Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अमरमाल

80

CSU Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ अथ भक्तमाला प्रारभ्यते ॥

इस पुस्त[illegible] सब अधिकार सन् १८६७ ई० [illegible] के [illegible] यंत्राधिकारीनें स्वाधीन रख[illegible]

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीकृष्णाय नमः ।

अथ भक्तमालान्तर्गतवैष्णवखण्डस्थसर्गाणां विषयानुक्रमः ।

सर्गांकाः	विषयाः	श्लो०
१	ग्रंथकर्तुर्मंगलाचरणम्, विष्ण्वादिखंडत्रयकथनानुक्रमः, भक्तिमहिमवर्णनं तद्भेदकथनंच, भक्तभेदाः, भक्तमहिमवर्णनम्, सर्वसाधनेभ्यो भक्तिरेव गरीयसी, भक्तानां लक्षणम्, पाखंडलक्षणम्, रागादिहेतुनापि स्मृतो हरिर्मोक्षदो भवति, तत्रोदाहरणार्थं केषांचिन्नामानि । श्लोकांकः	७३
२	भक्तिचरित्रकर्तुर्नाभदासस्यचरित्रम्.	३१
३	हनुमच्चरितम् तत्र हनूमता रामनामानंकितसुग्रीवदत्तमालायाः स्फोटनम्, द्वारकातः श्रीकृष्णेन हनुमदानयनार्थं गंधमादनं प्रति गरुडस्य प्रेषणम् , श्रीकृष्णेन गरुडेन हनुमंतमानाय्य श्रीरामरूपेण तस्मै दर्शनदानम्	६८
४	विभीषणचरितम्, तत्र कस्यचिद्वृद्धस्य कुष्ठिनो लंकांप्रति गमनम्, तस्य विभीषणदर्शनं तत्कृतसत्कारश्च, विभीषणहस्तस्पर्शात्कुष्ठिनो रोगनिवृत्तिः	३७
५	शबरीचरितम्, तत्र शबरीकृतमतंगसेवावर्णनम्, अन्यऋषिकृतमतंगाश्रमत्यागः, मतंगऋषेर्दिव्यलोकं प्रति गमनम्, शबर्या रामदर्शनोत्कंठावर्णनम्, श्रीरामस्य शबर्याश्रमं प्रत्यागमनम्, रामेण शबरीसमर्पितफलभक्षणम्, मतंगऋषेर्द्वेषकर्तॄणां शबरीप्रभावदर्शनम्, श्रीरामदर्शनोत्तरं रामसमक्षं शबर्याः स्वर्गगमनम्	८६
६	अजामिलचरितम्, तत्र अजामिलस्य वे-	

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
	श्यासक्तिवर्णनम्. तत्र कस्यचित्साधोरागमनं तस्मात्पुत्रप्रापकवरप्राप्तिश्च, अजामिलस्य,.मरणसमये पुत्रव्याजेन कृतनारायणनामोच्चारणरूपपुण्यातिशयेन यमदूतकृतपाशबंधननिवृत्तिपूर्वकं विष्णुदूतैर्वैकुंठलोकप्रापणम्, पराभूतयमदूतैर्यमंप्रति अजामिलवृत्तकथनम्, यमस्य वैकुंठं प्रति गमनं, तत्र भगवता नारायणेन यमंप्रति स्वनामोच्चारणमहिमवर्णनम्	६४
७	जटायुचरितम्, तत्र श्रीरामचंद्रस्यायोध्यातो वनंप्रति गमनहेतुकथनम्, पंचवट्यां रामे वसति सति शूर्पणखागमनं, लक्ष्मणेन तद्विरूपकरणंच, शूर्पणखावेदित वृत्तयोः खरदूषणयोस्तत्रागमो रामलक्ष्मणाभ्यां तयोर्वधश्च, तत्रैव शूर्पणखावेदितवृत्तस्य रावणस्य मारीचसमागमः,मृगरूपिमारीचवधार्थं रामे लक्ष्मणेच गते सति पश्चाद्रावणेन सीताहरणम्, मार्गे सीतावाक्यं श्रुत्वा जटायोरागमनम्, जटायुरावणयोर्युद्धं, तत्र जटायोर्धरण्यां पातश्च, रामलक्ष्मणयोस्तत्रागमो रामदर्शनेच्छया जिजीविषोर्जटायोर्मुखाज्जानक्या वृत्तश्रवणंच, जानकीवृत्तकथनानंतरं मृतस्य जटायो रामेणौर्ध्वदेहिककरणम्....	६१
८	अंबरीषचरितम्,१ अंबरीषगृहे एकादश्यामुपोष्य द्वादश्यां पारणासमये दुर्वाससआगमः, स्नानार्थं दुर्वाससि गते. सति द्वादश्युल्लंघनभयाद्ब्राह्मणाज्ञया राज्ञा जलपारणे कृते कृतपारणं राजानं ज्ञात्वा दुर्वाससो दंडमुद्यम्य राजानं हंतुमुद्यमः, तदानीं तद्रक्षार्थं स्थितं हरिचक्रं स्वं हंतुमायातं ज्ञात्वा दुर्वाससः प्रपलाय्य स्वरक्षार्थं ब्रह्मादिलोकं प्रति गमनम्, स्वप्राणपरित्राणमलभमानस्य दुर्वाससो विष्णवाज्ञया पुनश्चांबरीषं प्रत्यागमनम्, तत्रांबरीषप्रार्थनयैव चक्रनिवृत्तिपूर्वकं दुर्वाससः क्लेशापनोदः, ब्रह्मविष्णुसकाशादंबरीषं प्रतीप्सितवरप्राप्तिः	४१
९	अंबरीषचरितम् २ तत्र अंबरीषेण स्वभक्तायाः क्षुद्रनृपतिकन्यकायाः परिणयनम्, अंबरीषात् क्षुद्रनृपतेः सुतायां श्रीमतीनाम्न्याः कन्याया उत्पत्तिः, तस्याः सौंदर्यं दृष्ट्वांबरीषंप्रति पर्वतनारदाभ्यां याचनम्, तत्र स्वयंवरे श्रीकृष्णरूपेण स्थितयोरपि द्वयोः वानरमुखौ दृष्ट्वा तौ त्यक्त्वा श्रीमत्या	

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
	साक्षात् श्रीकृष्णं प्रति मालार्पणम्, असंजातमनोरथेन नारदेनेति क्रुधा देवं प्रत्यागत्य 'यथा त्वं मां छलयित्वा कन्यां स्वयं हृतवांस्तथा कोपि राक्षसस्तव भार्यां हरिष्यति' इति शापदानम्, तत्र भगवत्कृतनारदसांत्वनकथनम्.	७२
१०	विदुरस्त्रीचरितम्. तत्र कदाचिद्गृहे विदुरपत्नी नग्ना स्नानं कुर्वती सती कृष्णस्यागमनम्, भक्तिप्रेमवशाद्विस्मृतवस्त्रपरिधाना विदुरपत्नी कृष्णसत्कारं कुर्वती सती तत्र बहिर्गतस्य विदुरस्य समागमः, कृष्णेन भक्तिवशाद्विदुरस्त्रीदत्तरंभाफलत्वचो भक्षणम्, पुनश्च श्रीकृष्णेन दुर्योधनादिभिः कृतसत्कारं परित्यज्य भक्तिपारवश्याद्विदुरगृहमागत्यातिप्रेम्णा शाकपत्रमात्रभक्षणम्.	३६
११	सुदामचरितम्, तत्र दारिद्र्यपीडितपत्न्या वचनाद्द्वारकां प्रति सुदाम्नो गमनप्रवृत्तिः, पारितोषिकार्थं पत्न्या कुत्रचित् याच्ञया लब्धान्पृथुकान् गृहीत्वा सुदाम्नो द्वारकां प्रति गमनम्, तत्र तस्य कृष्णकृतसत्कारः, कृष्णेन सह संभाषणमित्यादिकथनम्, पुनश्च स्वपुरं प्रत्यागमनं, तत्र द्वारकासमपुरदर्शनम्, स्वपत्यागमनं श्रुत्वा पत्न्या महता सत्कारेण सुदाम्नो गृहे आनयनमैश्वर्यप्राप्तिकथनं च.	७४
१२	चंद्रहासचरितम्, तत्र चंद्रहासजन्मप्रभृति धृष्टद्युम्नपुरस्थसचिवगृहागमनपर्यंतं वृत्तकथनम्, चंद्रहासस्य शालग्रामशिलाप्राप्तिः, मंत्रिपुत्रेण सार्कं राजसंनिधिं गतं चंद्रहासं दृष्ट्वा सामुद्रिकमुखात् 'तवायं जामाता भविता, राजा भवितुमर्हति' इति श्रुत्वा चंद्रहासहनने निश्चयवतो धृष्टद्युम्नस्य चंडालायाज्ञादानम्, चंडालेन मारणाय प्रतार्य वनं नीतस्य चंद्रहासस्य शालग्रामप्रभावान्मुक्तता, तत्र मृगयार्थं कस्यचिद्राज्ञ आगमनम्, तेन चंद्रहासं भूमौ पतितं दृष्ट्वा चिह्नैः 'अयं राजपुत्रः' इति ज्ञात्वा तं गृहीत्वा स्वभवनमागत्य अपत्यरहितायै स्वपत्न्यै दानम्, तत्र क्रमेण युवावस्थापन्नं चंद्रहासं श्रुत्वा धृष्टद्युम्नस्य पुनश्च तन्मारणाय विचारः, केनचिन्मिषेण मारणाय स्वनगरमानीतस्य दैवयोगाद्विषयाया धृष्टद्युम्नकन्यायाः प्राप्तिः, पुनश्च चंद्रहासवधार्थं प्रवृत्तस्य धृष्टद्युम्नस्य देव्या मारणं चंद्रहासस्तुत्या पुनरुज्जीवनं च, मदनराजपुत्रादर्धराज्यप्राप्तिः	१२४

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
१३	शिविचरितम्. तत्र शिविना सत्त्वपरीक्षार्थे कपोतश्येनरूपाभ्यामागतयोरिंद्राग्न्योः स्वशरीरमांसदानम्, पश्चात्प्रसन्नाभ्यां प्रकटीभूय श्रीकृष्णभक्तिवरप्रदानम्	१२९
१४	द्रौपदीचरितम्, तत्र दुर्योधनेन पणे विजिताया द्रौपद्या दुःशासनेन सभायामानयनम्, सभायां दुःशासने तद्वस्त्रमाकर्षति सति दीनावस्थितया द्रौपद्या सकरुणं स्मारितस्य भगवतोंबररूपेण प्रकटीभवनमित्यादि.	३१
१५	द्रौपदीचरितम् २ तत्र दुर्योधनेन आतिसेवया वशीभूतस्य पांडवसत्त्वहरणाय प्रार्थितस्य दुर्वाससः सहस्रशिष्येण सह एकादश्यामुपोष्य द्वादश्यां पारणार्थं वने अर्धरात्रे पांडववसतिं प्रत्यागमनम्, द्रौपदीप्रार्थनया प्राप्तेन भगवता श्रीकृष्णेन सर्वेषां तृप्तिकरणमित्यादि.	४९
१६	वाल्मीकिचरितम्, तत्र जन्मप्रभृति अरण्ये लुंठनवृत्तिकरणपर्यंतवृत्तकथनम्, वसिष्ठवचनात्प्राप्तोपरमस्य लुंठाकवृत्तिं त्यक्त्वा वसिष्ठदत्तमंत्रं जपतो वाल्मीकेः रामनामजपमहिम्ना शतकोटिरामायणकरणशक्तिप्राप्तिः	५०
१७	रुक्मांगदचरितम्; तत्र रुक्मांगदस्य पुष्पवाटिकायां पुष्पस्तेयार्थमागतायाः कस्याश्चिदप्सरसो निर्माल्योल्लंघनाद्विहतस्वर्गत्या अगमः, तत्र विहतस्वर्गत्या अप्सरसो रुक्मांगदेनैकादशीव्रतपुण्यदानेन स्वर्गमनम्, रुक्मांगदस्यैकादशीव्रतप्रभावमालोक्य सर्वान् प्रति एकादशीव्रतकरणेनुशासनकरणम्, एकादश्युपवासेन मृतस्य रुक्मांगदजामातुः परमकारुणिकेन भगवता वैष्णववेषेणागत्योत्थापनं तत्रैव तस्यांतर्धानं च.	५९
१८	मयूरध्वजचरितम्; तत्र मयूरध्वजसत्वपरीक्षणार्थं चलितयोः कृतद्विजवेषयोः श्रीकृष्णार्जुनयोर्मार्गे अर्जुनं जिघांसोर्व्यात्ताननस्य व्याघ्रस्य दर्शनम्, तत्समीपे अर्जुनप्राणपरीप्सोः कृष्णस्य व्याघ्रवचनान्मयूरध्वजराज्ञोर्दक्षिणांगदानप्रतिज्ञाकथनम्, श्रीकृष्णार्जुनाभ्यां मयूरध्वजस्य स्त्रीपुत्राभ्यामारया कृंतितस्य दक्षिणांगस्य याचनम्, तत्र स्त्रीपुत्राभ्यां राजचरितगानपूर्वकमारया दक्षिणांगकृंतनम्, श्रीकृष्णस्य साक्षाद्दर्शनं वरदानं च.	५५

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
१९	प्रह्लादचरितम्, तत्र हिरण्यकशिपोर्महातपसा तुष्टाद्ब्रह्मणःसकाशादजयवरप्राप्तिः, गृहमागत्य प्रह्लदस्य पठनार्थं शुक्राचार्याय निवेदनम्, नारदानुग्रहाद्विष्णुनामोच्चारणं विनान्यव्यापारविरमः, शुक्रमुखात्प्रह्लदाचरणं श्रुत्वा हिरण्यकशिपोस्तन्मारणे प्रवृत्तिः, कृतेष्वपि मारणोपायेषु विष्णुस्मरणात्सर्वबाधाप्रशमकथनम्	७२
२०	भक्तरक्षार्थं संध्यायां स्तंभान्नृसिंहाविर्भावो हिरण्यकशिपुवधश्च, नृसिंहकोपप्रशमार्थं ब्रह्मादिकृतस्तवः प्रह्लादायवरदानकथनम्	४५
२१	आधुनिकभक्तचरितकथनोपक्रमः, तत्र निंबादित्यचरितम्, तत्र यतेर्भोजनार्थं हरिनिंबे आदित्यं दर्शितवानतो निंबादित्येतिनाम्ना प्रसिद्धिरित्यादिकथनम्	४५
२२	जामातचरितम्; तत्र पुष्पानयनार्थं गच्छता रामानुजशिष्येण जामातेन पथि कंचिद्वैष्णवप्रेतं दृष्ट्वातमुत्थाप्य श्मशाने तत्संस्कारकरणम्, अज्ञातजातिप्रेतसंस्कारकर्तुर्जामातस्यान्यैर्वैष्णवैर्बहिष्करणम्, अन्यवैष्णवैः प्रत्याख्यातस्य जामातस्य गृहे भोजनार्थं विष्णुप्रेषितवैष्णवानामागमनं दृष्ट्वा पुनः तस्य संग्रह इत्यादि कथनम्	३१
२३	श्रीमार्गचरितम्; तत्र श्रीमार्गे जगन्नाथदर्शनार्थं गते सति गुरुभक्तिपरायणस्य कस्यचिच्छिष्यस्य गुरोराज्ञया गुरुबुद्ध्या पादस्पर्शादिरहितं गंयायाः सेवनमित्यादि कथनम्, जगन्नाथपुर्यां आगतं श्रीमार्गं प्रति गंगातीरवासिभिः 'अनेन गंगास्नानादि न कृतम्' इत्यादि कथिते गुरुभक्त्या गंगामध्यस्थं गुरुंप्रति गुर्वनुज्ञातस्यांगप्रोक्षणकवस्त्रं दातुः शिष्यस्य पादस्पर्शनसमये गंगायां पद्मानां प्रादुर्भाव इत्यादि चमत्कारकथनम्	३७
२४	रामानुजचरितम्; तत्र जातसाक्षात्कारस्य रामानुजस्य जगन्नाथपुर्यां पूजकान् बहिर्निष्कास्य स्वयं जगन्नाथपूजांप्रति प्रवृत्तस्य स्वप्नदर्शनमित्यादि कथनम्	३२
२५	श्रीरंगचरितम्; तत्र श्रीरंगनाम्ना वैश्येन यमदूतमुखात् हरिभक्तिं विना सर्वे नरकभागिनः, इति श्रुत्वा जैनमतं त्यक्त्वा कस्यचिद्वैष्णवस्य शिष्यो भूत्वा वैष्णवमतस्वीकरणमित्यादिकथनम्	३२

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
२६	कृष्णदासचरितम्; तत्र विष्णुस्वामिशिष्यस्य कृष्णदासस्य प्रसादान्मानसिंहराज्ञः पुत्रप्राप्तिरित्यादि कथनम्....	३३
२७	कील्हाग्रयोश्चरितम्; तत्र कील्हेन मानसिंहनृपंप्रति मथुरायां स्थित्वा गुर्जरदेशाधिपतेः सुमेरुदेवस्य मरणवार्ताकथनम् राज्ञ्या मंजूषायां स्थापितमालायाः सर्पाकारेण पुनःपुनर्दर्शनमित्यादिकथनंच, अग्रदासस्य स्वंद्रष्टुमागतं नृपंप्रति पूर्वं दर्शनं दत्त्वा पश्चादंतर्धानभवनमित्यादिकथनम्.	३८
२८	शंकराचार्यचरितम्; तत्र शंकरांशशंकराचार्यैः जैननृपतौ मृते सति तत्काये प्रविश्य सचिवान् प्रति 'मृतोहं किंचिदायुःशेषत्वात्पुनर्धर्मराजाज्ञया यमलोकादिहागतः' इत्यादि उक्त्वा वैदिकधर्मपराङ्मुखानां रौरवयातनादिकथनपुरःसरं वैदिकधर्मप्रवर्तनम्....	५३
२९	शंकराचार्यैः सचिवैः स्वाशिष्यानानाय्य तद्द्वारा जैनमतखंडनपुरःसरं वैदिकमतसंस्थापनम्, जैनमताचार्यस्य मायायाः प्रत्याख्यानम्, शंकराचार्यमंडनमिश्रविवादस्तत्र मंडनमिश्रेण शांकरमतस्वीकरणम्, ...	५६
३०	मंडनमिश्रचरितं; शंकराचार्यस्य मिथिलां प्रति गमनं तत्र धनुःखंडदर्शनमित्यादि.	३७
३१	उदयनाचार्यचरितम्; तत्र राजसभायां केनचिज्जिनेन स्वमायया शालग्रामशिलां प्रति जलरूपेणांतर्धापिते सति उदयनाचार्यैः पुनः शिलारूपेण दर्शयित्वा जिनमतखंडनमित्यादिकथनम्.	८५
३२	पुंडरीकचरितम्; तत्र पूर्वं स्त्रीसक्तेन पुंडरीकेण मातापित्रोरवहेलनं पश्चात्पुराणश्रवणेन पित्रोः सेवाकरणम् सेवासक्तौ पुंडरीके सति तत्परीक्षार्थं भगवदागमनं तद्भक्त्या तत्रैवावस्थानंच.	९६
३३	नामदेवचरितम्;तत्र नामदेवोत्पत्तिः	८५
३४	नामदेवचरितम्; तत्र मातामहे ग्रामांतरं गते सति नामदेवो देवगृहं गत्वा तत्र स्वभक्त्या गोविंदं पयः पाययामासेत्यादि कथनम्.	३२
३५	नामदेवचरितम्; तत्र नामदेवभक्तितो मंदिरप्रचलनमित्यादिकथनम्.	२०
३६	नामदेवचरिते गोजीवनं शय्याप्रत्यक्षकरणमित्यादिकथनम्.	६५
३७	नामदेवचरिते एकादश्युपवासदिनेसत्वप-	

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
	रीक्षणार्थमागतस्य कस्यचिद्द्विक्षोर्व्याजमरणं पुनरुत्थानंच	६२
३८	नामदेवचरिते नाममाहात्म्यम्	५२
३९	जयदेवचरितम्; गीतगोविंदोत्पत्तिकथनम्.	५५
४०	जयदेवचरिते पद्मावतीपतिप्रेमवर्णनम्	९०
४१	जयदेवचरिते गंगाप्रादुर्भावः	९७
४२	श्रीधरस्वामिचरितम्; तत्र भागवतटीकानिमित्तकथनम्.	६८
४३	बिल्वमंगलचरितम्;	५३
४४	बिल्वमंगलचरिते मृतशिशोः पुनरुज्जीवनकथनम्.	४८
४५	बिल्वमंगलचरिते सर्वदैव श्रीकृष्णसान्निध्यकथनम्.	५४
४६	बिल्वमंगलचरिते चिंतामणिवेश्याचरितम्.	
४७	विष्णुशर्मचरितम्.	६४
४८	वल्लभाचार्यचरितम्; ज्ञानदेवचरितम्.	५८
४९	त्रिलोचनचरितम्.	३२
५०	कुलशेखरचरितम्; तत्र पौराणिकमुखाद्रावणहृतसीतावियोगनिमित्तं श्रीरामचंद्रं दुःखितं श्रुत्वा भक्त्यावेशाद्रावणं निहंतुं निश्चितवतोऽश्वमारूढस्य कुलशेखरस्य पयोब्धितीरे ससीतालक्ष्मणस्य श्रीरामचंद्रस्य साक्षाद्दर्शनमित्यादिकथनम्.	२५
५१	कुलशेखरचरिते नृसिंहावतारलीलायां केनचित्साधुना भक्त्यावेशात् मिथ्याभूतहिरण्यकशिपोर्वधस्तस्यैवच रामलीलायां गृहीतदशरथवेषस्य देहपात इत्यादिकथनम्	२७
५२	रतिमतीचरितम्; तत्र रतिमती बालगोविंदप्रतिमां कृत्वा पूजयंती पुराणश्रवणकाले 'यशोदा क्रुधा दाम्ना कृष्णं बबंध' इति श्रुत्वा भक्तिप्रेम्णा ममारेत्यादिकथनम्.	३९
५३	पुरुषोत्तमपुरराजचरितम्.	४०
५४	कर्माब्राह्मणीचरितम्; तत्र जगन्नाथपुरं गतया कर्माब्राह्मण्याऽतिभक्त्या निवेदित कृसरस्य नित्यं जगन्नाथदेवेन प्रेम्णा भोजनमित्यादिकथनम्.	७३
५५	कन्याद्वयचरितम्.	६४
५६	पांचालराजचरितम्.	६०
५७	राजपुत्रीचरितम्.	७३
५८	श्रीरंगपत्तनस्थस्वर्णकारचरितम्.	३७
५९	हंसव्याधचरितम्.	६४
६०	वैश्यचरितम्.	८३
६१	भुवनचौभानचरितम्.	५१
६२	देवाजीचरितम्.	५०

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०	सर्गांकाः	विषयाः	श्लो०	सर्गांकाः	विषयाः	श्लो०
६३	कामध्वजचरितम्.	४५	७८	गुरुभक्तिचरितम्.	२३	९३	सुरसुरिभक्तिचरितम्.	१५
६४	जयमल्लचरितम्.	४७	७९	रविदासभक्तचरितम्	७३	९४	नरहरिचरितम्	२४
६५	गोपालचरितम्.	३५	८०	रविदासभक्तचरितम्	३९	९५	नरहरिचरितम्	१७
६६	श्रीधरचरितम्.	३१	८१	रविदासभक्तचरितम्	४७	९६	तत्वाजीवाचरितम्.	५०
६७	कृष्णभक्तिचरितम्.	३२	८२	कबीरचरितम्	६४	९७	माधवचरितम्	५२
६८	निष्किंचनचरितम्.	६८	८३	कबीरचरितम्	४१	९८	माधवचरितम्	५७
६९	साक्षिगोपालचरितम्.	६३	८४	कबीरचरितम्	४४	९९	माधवचरितम्	५४
७०	साक्षिगोपालचरितम्.	४५	८५	पीपाचरितम्	४३	१००	माधवचरितम्	४६
७१	डाकोरस्थरामदासचरितम्.	६४	८६	पीपाचरितम्	६४	१०१	रघुनाथचरितम्	३०
७२	जसूश्यामचरितम्.	२०	८७	पीपाचरितम्	६०	१०२	नित्यानंदचरितम्	१५
७३	नंददासचरितम्.	३८	८८	पीपाचरितम्	४१	१०३	श्रीकृष्णचैतन्यप्रभुचरितम्	४९
७४	अह्लदासचरितम्.	२९	८९	धनाभक्तिचरितम्.	७२	१०४	सूरदासचरितम्	६८
७५	वेश्याभक्तिचरितम्.	४३	९०	सेनाभक्तिचरितम्.	४२	१०५	सूरदासचरितम्	५२
७६	राजभक्तिचरितम्.	२५	९१	सुखानंदचरितम्.	२२	१०६	हरिव्यासचरितम्.	३१
७७	अंतर्भक्तिराजचरितम्.	२२	९२	सुरसरानंदचरितम्.	२३	१०७	त्रिपुरदासचरितम्.	२१

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गांकाः	विषयाः	श्लो०
१०८	कृष्णदासचरितम्.	२७
१०९	माथुरविट्ठलचरितम्.	५४
११०	हरिरामचरितम्.	२८
१११	रूपसनातनचरितम्.	४५
११२	व्यासचरितम्.	७८
११३	भक्तरूपकचरितम्.	३१
११४	हरिदासचरितम्	५७
११५	सदनभक्तिचरितम्.	४५
११६	लड्डूभक्तिचरितम्.	५९
११७	त्रिलोकादिचरितम्.	५०
११८	गोविंदस्वामिचरितम्.	३९
११९	गुंजामालीगणेशदेवीचरितम्.	४७
१२०	लषाभक्तिचरितम्.	५३
१२१	नरसीचरितम्	७०
१२२	नरसीचरितम्	७४
१२३	नरसीचरितम्	३५
१२४	अंगदचरितम्.	३६
१२५	चतुर्भुजचरितम्.	८२
१२६	मीराचरितम्.	७५
१२७	पृथ्वीराजचरितम्.	२३
१२८	रामराजादिचरितम्.	४२
१२९	सूरदासचरितम्.	६६
१३०	मुरारिदासचरितम्.	३०
१३१	तुलसीदासचरितम्	४६
१३२	तुलसीदासचरितम्	४६
१३३	तुलसीदासचरितम्	३७
१३४	तुलसीदासचरितम्	७७
१३५	श्रीमद्गोकुलनाथादिचरितम्.	३७
१३६	गदाधरदासचरितम्.	५३
१३७	नारायणदासादिचरितम्.	५१
१३८	रत्नावतीचरितम्.	४६
१३९	रामदासचतुरस्वामिचरितम्.	४३
१४०	महाभक्तानां चरितम्.	५८
१४१	लालदासचरितम्.	५७
१४२	नाशकर्णचरितम्.	४८
१४३	नर्तकीभक्तिवर्णनम्.	५२
१४४	गोविंददासचरितम्.	३८
१४५	लालमतीचरितम्.	३९
१४६	जगन्नाथमनीरामगोविंदठक्करचरितम्.	७४
१४७	रामप्रसादचरितम्.	२९
१४८	ग्रंथकर्त्रास्वानुभवकथनम्.	८७
१४९	भक्तचरितवर्णनस्य सयुक्तिककारणकथनं, ग्रंथोपसंहारश्चेतिशम्.	३५

समाप्तेयं भक्तमालानुक्रमणिका ।

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जाहिरात ।

मिताक्षरा (धर्मशास्त्र) पद योजना

तात्पर्य्यार्थ भाषाटीका ।

इस असारसंसारमें मर्यादास्थितीके हेतु अनेक प्राचीन आचार्योंका मत लेकर "आचार" "व्यवहार" "प्रायश्चित्त" नामक तीनभागोंमें महर्षि याज्ञवल्क्यजीने भारतवर्षके चतुर्वर्णोंके नीतिपूर्वक स्वधर्ममें तत्पर रहनेके हेतु रचनाकी. आचाराध्यायमें गर्भाधानसे लेकर मरणपर्यन्तके समस्त संस्कार, सब जातियोंकी उत्पत्ति, ब्राह्मणादि चतुर्वर्णोंके धर्माचरण, आठ प्रकारके विवाहोंके लक्षण, भक्ष्याभक्ष्य पदार्थोंका विवेक, दान लेनेदेनेकी विधि, श्राद्ध तथा नवग्रहोंकी शान्ति, राजाओंके धर्माचरण वर्णित हैं ।

व्यवहाराध्यायमें न्याय सभा निरूपण, दीवानी फौजदारी मुकद्दमोंके निर्णयकी विधि, भूमिसम्बन्धी झगड़ोंका निपटारा, ऋण देनेलेने तथा गिरवी रखनेकी विधि, साक्षियोंका सत्यासत्य तथा दण्डका विचार, दस्तावेज लिखनेकी परिपाटी, विष देनेवालेका विचार, हिस्सा बांटनेकी विधि, १२ प्रकारके पुत्रोंका वर्णन, वारिस होने तथा दत्तक लेनेकी विधि, स्त्री कन्याके धनका

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

निर्णय, सीमाके झगड़ोंका निपटारा, देय अदेय दानोंका विचार, राजसम्बन्धी गूढ़ संचित समय संकेतोंके व्यतिक्रम का विचार, वेतन किराया मजूरी आदि झगडोंका निर्णय, चोर डाकू लुटेरे आदिकों का विचारादि विस्तारपूर्वक वर्णित हैं।

प्रायश्चित्ताध्यायमें जलदानप्रकार, आशौच सूतकादि निर्णय, जगदुत्पत्ति प्रपंच विस्तार, सर्वप्रायश्चित्तकरण दोष नरकादि लक्षण भेद व सुरापानादि महापातकोंके प्रायश्चित्त कथन, प्रत्येक बातों के स्वरूप व नियमादि वर्णन किये हैं. यह ग्रन्थ केवल संस्कृत में होने के कारण सर्व साधारण को लाभकारी न था; अतएव हमने पं० मिहिरचन्दजी के द्वारा प्रत्येक श्लोकमें पद योजना, तात्पर्यार्थ, भाषार्थ तथा गूढ़ाशयोंमें अन्यान्य स्मृतियों के मतानुसार टिप्पणी रचना कराय स्वच्छतापूर्वक छापकर प्रकाशित किया है—और सबके सुगमार्थ मूल्य केवल ५ रु० रक्खा है. सुन्दर जिल्द बँधी है॥

शार्ङ्गधर वैद्यक दत्तराम चौबेकृतभाषाटीकासहित।

यह टीका आढमल्ली और गूढ़ार्थप्रकाशिका जो इस्की संस्कृतटीका हैं उनके अनुसार भाषाटीका करीगई है. यद्यपि इस ग्रंथकी टीका कई भिषग्वरोंने कीहैं परन्तु इस रीतिसे गूढ़ाशयोंकी टिप्पणीसमन्वितकर विस्तारपूर्वक किसीने नहीं कीहै. तिसपरभी मूल्य केवल तीन ३ रु० रक्खाहै. विलायती कपड़ेकी जिल्द बँधीहै और नया छपाहै।

पद्मपुराण सम्पूर्ण ५५००० ग्रंथ बहुत पुस्तकोंके द्वारा शुद्ध होकर छपा तयार. की० १८ रु०.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीमहाभारत सटीक मोटे अक्षरका ।

महर्षि श्रीवेदव्यास प्रणीत और पंचमवेद संज्ञा होनेसे विशेष प्रशंसा करना.निरर्थक है ये वही पुस्तक गणपतकृष्णाजीके छापेकी है जो पूर्वकालमें ८० । ६० रुपयेको मिलताथा उसीको हमने सब लेकर ४० रुपयेमें देते हैं. टपाल महसूल ५ रु० अलग है; परंतु अब थोड़ी पुस्तकें रहगई हैं, महाभारतके प्रेमीलोगोंको शीघ्र लेना चाहिये कुछ कालके पीछे मूल्य अधिक होजायगा. ऐसा ग्रंथ उत्तम छपनेकी आशा कमती है–लीजिये. ट० खर्चा सहित मूल्य पैंतालीस ही ४५ रुपये हैं.

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास,

"श्रीवेंकटेश्वर" छापाखाना–मुम्बई.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रस्तावना.

कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति । —भगवान् ।

भवतु विदितं सकलसाधुजनेभ्यो भक्तजनेभ्यः पण्डितजनेभ्यश्च सरलहृदयेभ्यः। भक्तिमाहात्म्यं सर्वथाऽचिन्तनीयं खलु ।यतो भगवतो भक्तेषु निरतिशयवात्सल्यं विलसति । तदेतत् "भक्तिप्रियो माधवः" इत्यादिषु सुस्पष्टम् । "श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः" इत्यादिना भगवता व्यक्तीकरणात् । भक्तिर्नाम भगवति सर्वाधिकं निरतिशयं प्रेम। तदुक्तं नारदेन—"अथातो भक्तिं व्याख्यास्यामः॥ १ ॥सा त्वस्मिन्परमप्रेमरूपा॥ २॥" इत्यादिना । तादृशी भक्तिरेव भवतारिणीति सुप्रसिद्धम् । एवं भक्तिकृतां भगवद्भक्तानां जगत्पावनानि कलिमलहराणि चरित्राणि सर्वतः सुप्रसिद्धानि । न च तानि सर्वैरपि समानतया बोद्धुंशक्यानि । अतःपरमकारुणिकेन भगवद्भक्तवर्येण पश्चिमप्रांताधिपतिश्रीमानसिंहमहाराजगुरुश्रीकृष्णदासभक्तवर्यशिष्याग्रदासभक्तशिष्येण श्रीनाभदासभक्तेन निजगुर्वनुज्ञयाऽतीतादिसर्वभक्तजनजीवनचरित्राणि चमत्कृतिकृतीनि भगवत्प्रसादोपलब्धया विशदया बुद्ध्या सर्वार्थपरिज्ञानपूर्वकं भाषाग्रंथरूपेण यथावदुपनिबद्धानि । तानि च संस्कृतपद्यरूपेण श्रीमच्चंद्रदत्तेन स्वप्नागतभगवत्प्रेरितेनाविरचितानि। तच्चरित्राणां समग्रोऽयं ग्रन्थो भक्तमालेति नाम्ना सुप्रसिद्धः।अस्मिंश्च भक्तमालाग्रंथे—विष्णुखण्ड—शिवखण्ड—शक्तिखण्डाख्यं खण्डत्रयं कल्पितमस्ति। तत्रेदं प्रथमं विष्णुखण्डं ६७०० सप्तशताधिकषट्सहस्रश्लोकसंख्यापरिमितमेकोनपंचाशदधिकशतसर्गविभूषितमस्माकं समीपे मीरपुरनिवासिभिः श्रीमद्भिः श्रीलक्ष्मणमहाजनाभिधेयैः संप्रेषितम् । तदेतदस्माभिः स्वकीये "श्रीवेंकटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितम् । विज्ञापयामश्च सर्वान्साधुसज्जनभगवद्भक्तसद्गृहस्थादीञ्छ्रद्धालून् । यदेतत् सकलपुरातनादिसुप्रसिद्धभगवद्भक्तचरित्ररूपं भक्तमालाप्रथमखण्डं संगृह्य सर्वदेशीयभक्तचरित्राणि विज्ञाय तान्यनुसृत्यात्मनोऽपि भक्तिमुत्पाद्य भगवत्प्रियत्वमासाद्य भवबंधनं निर्भिद्य मुक्तिसरणिरनुसंधेयेति शम् ।

सर्वसज्जनकृपाकांक्षी—खेमराज श्रीकृष्णदास—" श्रीवेंकटेश्वर " छापाखाना—मुंबई.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ॐस्वस्ति ॥ श्रीगणेशायनमः ॥ अथभक्तमालाप्रारम्भः ॥ आकुंचितोरुबाहुभ्यांरिंगमाणंव्रजांगणे॥ श्रीनंदनंदनंवंदेप्राचांवाचामगोचरम् ॥ १ ॥विनायकंनमस्कृत्यशारदांसर्वकामदाम् ॥ भक्तमाहात्म्यचरितंकुर्वेहंमैथिलोद्विजः ॥ २ ॥ यथामेमतिरुत्पन्नाभक्तमाहात्म्यवर्णने ॥ यथामेनुभवोजातोवक्ष्याम्यग्रेसविस्तरम् ॥ ३ ॥ खण्डत्रयंविधास्येहंग्रंथेस्मिन्नातिविस्तरम् ॥ प्रथमंविष्णुखंडंचशिवखंडंततःपरम् ॥४॥ तृतीयंशक्तिखंडंचेत्येतत्खंडत्रयंशुभम् ॥ भक्तिर्हिसर्वलोकानांमातेवहितकारिणी ॥५॥ वर्णाश्रमस्थितानांतुतपोयागादिभिर्गतिः ॥ कलौवर्णाश्रमरताःप्रायेणमनुजानहि ॥ ६ ॥ तेषांभक्तिंविनानान्यांगतिंपश्यामिकामपि ॥ भक्तिस्तुद्विविधापूर्वावैधीरागादिजापरा ॥७॥ वर्णाश्रमरताःसंतोभगवंतंभजंतिये॥ तेषांतुवैधीविज्ञेयाभक्तिःसंसारतारिणी ॥८॥ रागादिजातुचान्येषांसातिशीघ्रफलप्रदा ॥ आर्तोजिज्ञासुरर्थार्थीज्ञानीभक्तिंकरोतुवै ॥९॥ सर्वेषांजायतेसिद्धिःस्वार्थानांनात्रसंशयः॥ नभक्तेःसदृशंकिंचित्प्रीणनंविद्यतेहरेः ॥ ॥ १० ॥ भक्तस्यवशगोब्रह्माभक्तस्यवशगोहरिः ॥ भक्तस्यवशगःशंभुःशक्तिर्भक्तवशानुगा ॥ ११ ॥ देवदैत्याश्चगंधर्वायक्षराक्षसकिन्नराः ॥ पिशाचाःपितरोनागाव्याघ्रऋक्षेभवानराः॥१२॥ मनुष्याःप्राणिनोयेवैसर्वेभक्तवशानुगाः ॥ संसारेजन्मसंप्राप्यभक्तिंकुर्वंतियेजनाः ॥ १३ ॥ तएवधन्यास्तैरेवाजितमेतच्चराचरम् ॥ श्रुतिस्मृतिपुराणानांमतमेतत्सनातनम् ॥ १४ ॥ सर्वेषांसाधनानांतुभक्तिरेवगरीयसी ॥ कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ॥ १५ ॥ इत्येतद्भगवद्वाक्याद्भक्तिरेवगरीयसी ॥ सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज ॥ १६ ॥ अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचः ॥ इत्येतद्भगवद्वाक्याद्भक्तिरेवगरीयसी ॥ १७ ॥ भक्त्यात्वनन्ययाशक्यअहमेवंविधोर्जुन ॥ इत्येतद्भगवद्वाक्याद्भक्तिरेवगरीयसी ॥ १८ ॥ श्रद्दधानामत्परमाभक्तास्तेऽतीवमेप्रियाः ॥ इत्येत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्भगवद्वाक्याद्भक्तिरेवगरीयसी ॥ १९ ॥ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मना ॥ २० ॥
अपिचेत्सुदुराचारोभजतेमामनन्यभाक् ॥ साधुरेवसमंतव्यः सम्यग्व्यवसितोहिसः ॥ २१ ॥ इत्येतद्भगवद्वाक्याद्भक्तिरेवगरीय
सी ॥ २२ ॥ सात्त्विकीर्विद्यतेयेषांतेषांलक्षणमुच्यते ॥ शांतोदांतोदयायुक्तोदेवब्राह्मणपूजकः ॥ २३ ॥ श्रद्धावाननसूयश्च
सवैभक्तोद्विजोत्तमः ॥ स्वधर्मनिरतोनित्यंब्रह्मविष्णुमहेश्वरान् ॥ २४ ॥ एकबुद्ध्याप्रपश्यंतितेवैभक्ताजनाःस्मृताः ॥ स्वधर्मपत्नीनि
रतागृहस्थाअतिथिप्रियाः ॥ २५ ॥ यथाशक्त्यार्चयंतोवैदेवंभक्तास्तुतेस्मृताः ॥ एकादशीव्रतरताआमिषाहारवर्जिताः ॥ २६ ॥ हरि
नामपरानित्यंज्ञेयास्तेवैष्णवाजनाः ॥ चतुर्दशीव्रतरतागणेशव्रतकारिणः ॥ २७ ॥ विष्णुनामपरानित्यंवैष्णवास्तेनसंशयः ॥ एक
पत्नीव्रतरतामिथ्याभाषणवर्जिताः ॥ २८ ॥ अर्चयंतोपिचहरिंज्ञेयास्तेवैष्णवाजनाः ॥ तापयंतिहिमेवह्निंदास्यंतितूलिकाअपि ॥
॥ २९ ॥ शितार्तेभ्यश्चदीनेभ्योज्ञेयास्तेवैष्णवाजनाः ॥ आरामवृक्षानारोप्यप्रयच्छंत्युदकंतुये ॥ ३० ॥ ग्रीष्मतौनिर्जलेदेशेज्ञेया
स्तेवैष्णवानराः ॥ युवतिंरूपसंपन्नांदृष्ट्वापत्नींपरस्यवै ॥ ३१ ॥ चलितंनमनोयेषांतेज्ञेयावैष्णवोत्तमाः ॥ दृष्ट्वासमृद्धिमन्येषांयेतु
ष्यंतिनरोत्तमाः ॥ ३२ ॥ स्वकीयामिवमन्वानाज्ञेयास्तेवैष्णवाजनाः ॥ अन्यस्तुतिंसमाकर्ण्यनासूयावशगाश्चये ॥ ३३ ॥ शिर
साचाभिनंदंतिज्ञेयास्तेवैष्णवाजनाः ॥मातरंपितरंचैवलक्ष्मीनारायणाविव ॥३४॥ पूजयंतितदाज्ञांवैकुर्वंतोवैष्णवाजनाः ॥ परोपकार
निरताःपररक्षणतत्पराः ॥ ३५ ॥ परनिंदामकुर्वंतोज्ञेयास्तेवैष्णवाजनाः ॥ पाखंडसंगरहितादंभाचारविवर्जिताः ॥ ३६ ॥ विश्व
स्तावेदशास्त्रेषुज्ञेयास्तेवैष्णवाजनाः ॥ शास्त्राचारव्रतैश्चैवनानाधर्मप्रजल्पनैः ॥ ३७ ॥ संमोह्यवित्तहर्तारःपाखंडास्तेप्रकीर्तिताः ॥
यथाकथंचिद्विष्णौबुद्धिर्यस्यदृढाभवेत् ॥ ३८ ॥ रागतोद्वेषतोवापिसोपिभक्तोनसंशयः ॥ कामाद्गोप्योभयात्कंसोद्वेषाच्चैद्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दयोनृपाः ॥ ३९ ॥ निरंतरंतंसंचिंत्यप्रापुःकृष्णंनसंशयः ॥ हरेरीश्वरताचैषासदाचिंतयतोजनान् ॥ ४० ॥ आत्मसात्कुरुते
तस्यरागद्वेषावुभौसमौ ॥ अज्ञानाद्वाप्रमादाद्वालोभान्मोहदृशापिवा ॥ ४१ ॥ चिंतयंतोहृषीकेशंगच्छंतिपरमांगतिम् ॥ दिव्यादि
तिर्य्यक्पर्यंतायेकेचिज्जीवजातयः ॥ ४२ ॥ बभूवुःकृतकृत्यास्तेसंयुज्यहरिमीश्वरम् ॥ दुर्वारवैरीदुर्नीतिर्निजाङ्गक्षयशंकया
॥ ४३ ॥ उपास्यकतिधावृत्त्याहरिंसुखमवाप्नुयात् ॥ भस्मासुरस्यवरदःकष्टंसंप्राप्यशंकरः ॥ ४४ ॥ स्मृत्वात्मानंहरिंसद्यो
मुक्तस्तत्क्षणमेवाहि ॥ एवमेवापरेसर्वेभजंतिहरिमीश्वरम् ॥ ४५ ॥ स्वस्वकामार्थसिद्ध्यर्थंपुराणेपरिकीर्तिताः ॥ नारदःपर्व
तश्चैवसनकाद्यास्तथैवच ॥ ४६ ॥ स्वायंभुवोयमश्चैवविष्वक्सेनोजयस्तथा ॥ विजयश्चसुनंदश्चनंदोभद्रःसुभद्रकः ॥ ४७ ॥
चंडःप्रचंडःकुमुदःकुमुदाक्षस्तथैवच ॥ पुण्यशीलःसुशीलश्चवैवस्वतमनुस्तथा ॥ ४८ ॥ महाभागवताश्चैतेकीर्तिताविष्णुभ
क्तिपाः ॥ अनंतोवासुकिश्चैवशेषनागस्तथैवच ॥ ४९ ॥ विष्णुभक्तिरताएतेसर्वदाविष्णुवल्लभाः ॥ प्रह्लादश्चबलिश्चैवविभी
षणसुखाश्चये ॥ ५० ॥ राक्षसास्तेतिभक्तावैकृष्णार्थेत्यक्तजीविताः ॥ दक्षश्चशरभंगश्चकविश्चहरिरेवच ॥ ५१ ॥ करभाजनोंतरि
क्षश्चचमसश्चप्रबुद्धकः ॥ आविर्होत्रःपिप्पलस्तुद्राविडश्चतथैवहि ॥ ५२ ॥ ऋषभस्यसुताएतेजगतोनंदनाःस्मृताः ॥ प्रजानां
पतयोभक्ताःख्यातानारायणांशतः ॥ ५३ ॥ पृथुःप्रियव्रतश्चैवमुचुकुंदोनिमिस्तथा ॥ सुधन्वाशिबिरिक्ष्वाकुरृभुर्गाधिःपुरूरवाः ॥
॥५४॥ प्राचीनबर्हिर्भगवाञ्छतधन्वारघुर्भृगुः ॥ मांधाताजनकश्चैवसत्यसंधरहूगणौ ॥ ५५ ॥ रुक्मांगदोम्बरीषश्चसगरश्चभगीरथः ॥
हरिश्चंद्रोदधीचिश्चसुरथोभरतस्तथा ॥ ५६ ॥ रयोमूर्तिरंतिदेवउत्तंकोभूरिदेवकः ॥ ययातिर्नहुषश्चैवदिलीपःपुरुरेवच ॥ ५७ ॥ य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दुरुत्तानपादश्चभीष्मोदशरथस्तथा ॥ एतेराजर्षयश्चान्येविष्णुभक्तिरताःसदा ॥ ५८ ॥ हनुमान्जांववांश्चैवसुग्रीवोगरुडस्तथा ॥ ग्रा
होगजोजटायुश्चनीलःकाकभुशुंडकः ॥ ५९ ॥ इत्येतेवैष्णवश्रेष्ठाविष्णुलीलाप्रवर्तकाः ॥ ध्रुवश्चचंद्रहासश्चचित्रकेतुश्चपांडवाः॥६०॥
मयूरध्वजोप्यालर्कोःरंतिदेवश्चकौरवः ॥ ताम्रध्वजःपरीक्षिद्वैराजानोविष्णुवल्लभाः ॥६१॥ वाल्मीकिश्चशुकश्चैवसुतःशौनकएवच ॥ भ
रद्वाजःप्रचेताश्चशमीकोयाज्ञवल्क्यकः॥६२॥ अगस्त्यश्चपुलस्त्यश्चपुलहश्च्यवनस्तथा ॥ वसिष्ठःसौभरिश्चैवकर्दमोत्रिस्तथैवच ॥६३॥
ऋचीकोगौतमश्चैवगर्गोव्यासस्तथैवच ॥ अंगिराभृगुदाल्भ्योवैशंपायनलोमशौ ॥६४॥ विश्वामित्रोथदुर्वासाःशृंगीमांडव्यएवच ॥ ज
मदग्निःकश्यपश्चमायादर्शःपराशरः॥६५॥ मार्कंडेयश्चऋषयोविष्णुभक्ताःप्रकीर्तिताः॥ उद्धवोविदुरश्चैवसुदामाक्रूरएवच॥६६॥संजयः
श्रुतिदेवश्चगुहोजामिलएवच ॥ एतेचान्येपुराणेषुमनुष्यावैष्णवोत्तमाः ॥ ६७ ॥ शबरीद्रौपदीकुंतीतथाविंध्यावलीसती ॥ सत्यरू
पात्रेयसुतासतीचैवमदालसा ॥ ६८ ॥ मथुरायांचब्राह्मण्योयाश्चान्नंहरयेददुः ॥ एताश्चान्याश्चगोप्योवैश्रीकृष्णार्पितमानसाः ॥ ६९ ॥
पतिंपुत्रंभ्रातृवर्गंपरित्यज्यहरिंमुदा ॥ चिंतयंत्योहरिंप्रेम्णातमेवापुर्नसंशयः ॥ ७० ॥ इतिसंक्षेपतोभक्तारूपंमाहात्म्यमेवच ॥ कथि
तंविस्तरादग्रेवक्ष्यामिसर्वकामदम् ॥ ७१ ॥ पुराणोक्तेषुभक्तेषुकथातत्रैवविस्तृता ॥ योलोकेविद्यतेतस्यनास्तिसाकल्पतेमया ॥७२॥
पुराणानुक्तभक्तानांकथाचैवात्रगीयते ॥ यथामतिचतांश्रुत्वासंतस्तुष्यंतुमत्कृते ॥ ७३ ॥ इति श्रीभगवद्भक्तिमाहात्म्येप्राचीनभक्त
स्मरणंनामप्रथमःसर्गः ॥ १ ॥ छ ॥ अथेतिहासंवक्ष्यामियथाभक्तावलीकथा ॥ लोकेप्रसिद्धायेनाथकृतायस्यप्रसादतः ॥१॥ पश्चिमे
मानसिंहोभूद्राजासर्वसमृद्धिमान् ॥ विजेतासर्वशत्रूणांदाताचैवद्विजन्मनाम् ॥२॥ गुरुस्तस्यमहानासीत्कृष्णदासइतिश्रुतः॥ महात्मावि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ष्णुभक्तश्चसर्वभूतसुहृत्तमः ॥ ३ ॥ तत्रैवनगरेतेनस्थानंराज्ञाविनिर्मितम् ॥ गुर्वर्थंतत्रसगुरुरुवासविजितेंद्रियः ॥ ४ ॥ तस्यशिष्यौच
विख्यातौकीलाग्रौतुततःपरम् ॥ एकदातौमहात्मानौकीलाग्रौनिर्गतौगृहात् ॥ ५ ॥ पूजोपकरणार्थायवनंयातौमुदान्वितौ ॥ गृही
त्वाकुशपुष्पादिपरावृत्तौगृहंप्रति ॥ ६ ॥ पथितिष्ठंतमंधंचशिशुमेकमपश्यताम् ॥ दुर्भिक्षसमयेत्यक्तंजनन्यानिर्जनेवने ॥ ७ ॥
कीलोऽग्रंप्राहपश्येमंबालमंधंवनेस्थितम् ॥ नयेमंस्वाश्रमेवत्सपालयैनंममाज्ञया ॥ ८ ॥ इत्युक्त्वाजलमादायममार्जतस्यच
क्षुषी ॥ ततोनेत्रेतिविमलेजातेतस्यततःशिशोः ॥ ९ ॥ नीत्वातंतावुपागत्यकृष्णदासाश्रमंप्रति ॥ तदाज्ञयाचप्रोवाचसोग्रदा
सःशिशुंप्रति ॥ १० ॥ अरेमद्द्वारिनिवसगृहाणेमंकटंशिशो ॥ साधूच्छिष्टजलेकुंडेस्नाहित्वमुदकेशिवे ॥ ११ ॥ सद्भिर्भुक्तावशिष्टान्नं
पत्रेत्यक्तंबहिस्तुयत् ॥ तद्भुक्त्वासाधुसेवायांनिरतोभवसर्वदा ॥ १२ ॥ इतिसंशिष्यतंबालमग्रदासोदयान्वितः ॥ अन्यानुवाचबालो
यंभवद्भीरक्ष्यतामिह ॥ १३ ॥ एवंकतिपयेकालेगतेबालस्त्वहर्निशम् ॥ रामनामजपन्द्वारिनिवसन्गुर्वनुज्ञया ॥ १४ ॥ साधुसेवाप्र
सादेनव्यवर्द्धतसदीप्तिमान् ॥ एकदातंगुरुःप्राहनाभाख्यंकृपयान्वितः ॥ १५ ॥ अथमत्संनिधानेत्वंवत्सकार्यकरोभव ॥ इत्युक्तःसोपि
संतुष्टोगुरुसंनिधिमावसत् ॥ १६ ॥ एकदासोग्रदासस्तुकृतासनपरिग्रहः ॥ नित्यंवैमानसींपूजांचकाररहसिस्थितः ॥ १७ ॥
तत्राप्ययंस्थितोनाभश्चामरेणचवीजयन् ॥ श्रीरामंस्वापयित्वाससंस्थाप्यकनकासने ॥ १८ ॥ परिधाप्यततोवस्त्रमलंकारान्ददौमु
दा ॥ चंदनेनापिसंपूज्यमाल्यंधृत्वासमुत्थितः ॥ १९ ॥ एतस्मिन्समयेकश्चिच्छिष्योग्रस्यवणिग्जनः ॥ सस्मारजलधौनाथंगुरुमग्रंत
दाहृदि ॥ २० ॥ तस्यनौर्वित्तसंपूर्णाक्वचिल्लग्नामहोदधौ ॥ नशशाकबहिर्गंतुंयदानौःसतदावणिक् ॥ २१ ॥ धनप्राणक्षयाद्भीतःस

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्मारात्मगुरुंहृदा ॥ तदाग्रस्यतुहस्तेवैमाल्यंताहृगवस्थितम् ॥ २२ ॥ मनस्तत्रगतंज्ञात्वारामोनावमतीतरत् ॥ ततोग्रदासस्यम
नोयावदासीत्प्रपूजने॥ २३ ॥ तावन्नाभःस्थितःपृष्ठेनाथदूरंगताहिनौः ॥ इत्यब्रवीत्ततोग्रस्तुपृष्ठस्थंवीक्ष्यसस्मितः ॥२४॥ मनसापूज
यित्वाथरामंसर्वोपचारकैः ॥ नमस्कृत्यसमुत्तस्थौतदानाभमुवाचसः ॥ २५ ॥ अरेनाभाख्यमेशिष्यवैष्णवानांयशांसिभोः ॥ वर्णयत्वं
मयाज्ञप्तस्तस्माच्छ्रेयोभविष्यति ॥ २६ ॥ ततःप्रणम्यनाभस्तंप्राहजानाम्यहंकथम् ॥ गुरुराहयथाज्ञासीर्दूरंनौकागतेतिभोः ॥२७ ॥
किंचमद्वचनात्साधुसेवामाहात्म्यतस्तव ॥ भूतायेवर्तमानाश्चभविष्यंतश्चसाधवः ॥ २८ ॥ तेषांयशांसिजानीहिनतेमिथ्याभवेद्वचः ॥
इत्याज्ञांशिरसाधृत्वागुरोरग्रस्ययत्नतः ॥२९॥ चकारभक्तिचरितंनाभदासस्तुभाषया ॥ तदुक्तमन्यकथितंश्रुत्वाहंतुयथामति ॥ ३० ॥
भगवद्भक्तिमाहात्म्यंचक्रेसंस्कृतभाषया॥३१॥इति श्रीभगवद्भक्तिमाहात्म्येनाभदासमाहात्म्यंनामद्वितीयःसर्गः॥२॥ छ ॥अथवक्ष्येह
नुमतोमाहात्म्यंपरमाद्भुतम् ॥ यस्यस्मरणमात्रेणरामेभक्तिर्दृढाभवेत् ॥ १ ॥ एकदाजलधेस्तीरेसेतुबंधसमुद्यमे ॥ राममिंदीवरश्यामं
परिवार्य्यस्थिताअमी ॥ २ ॥ लक्ष्मणश्चैवसुग्रीवोहनुमानंगदस्तथा ॥ नीलोनलश्चराजावैऋक्षाणांजांबवांस्तथा ॥ ३ ॥ अस्मिन्नेवमु
हूर्तेतुसमायातोविभीषणः ॥ मालामादायमहतींसर्वरत्नमयींशुभाम् ॥४॥ रत्नाकरस्यसर्वस्यमूलंभूमंडलस्यच ॥ तांमालांरामपुरतोद
दौभक्त्याविभीषणः ॥ ५ ॥ प्रशशंसगृहीत्वातांरामोमालामनिंदिताम् ॥ निरीक्ष्यसहनूमंतंप्रांजलिंपुरतःस्थितम् ॥ ६ ॥ तस्यकंठे
ददौमालांमारुतेर्भक्तवत्सलः ॥ मारुतिस्तुसमुत्थायप्रणम्यजगृहेस्रजम् ॥ ७ ॥ उपविश्यततोमालांकरेकृत्वानिरीक्ष्यच ॥ मणिमेकमु
पादायदंतैरस्फोटयत्स्फुटम् ॥ ८ ॥ ततोमनासिसर्वेतेजहसुःसस्मिताजनाः ॥ रामंविनाहनूमांस्तुपुनरेकमपिस्फुटम् ॥ ९ ॥ स्फोट

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यित्वामणिद्वंद्वंनिरीक्ष्यचपुनःपुनः ॥ चिक्षेपमालामेवाग्रेभूमौसर्वस्यपश्यतः ॥ १० ॥ ततःकिमितितेसर्वेविस्मयात्प्रष्टुमुद्यताः ॥ हनु
मान्स्वयमेवाहनिजभक्तिंप्रदर्शयन् ॥ ११ ॥ यस्यरामोनचस्वामीरामनामांकितंनयत् ॥ नतत्प्रियंममास्तीहसत्यमेतन्नसंशयः ॥१२॥
देहोयंसर्वभूतानांप्रियोभवतिसर्वदा ॥ रामनामविनाहंतुजह्यांतमपिसर्वदा ॥ १३ ॥ इत्युक्त्वासद्वचोदेहान्निष्कास्यादर्शयज्जनान् ॥
रामनामाभिलिखितमंगंसर्वंहनूमतः ॥ १४ ॥ तद्दृष्ट्वासाधुसाध्वेवमूचुःसर्वेतिविस्मिताः ॥ भक्तराजममन्यंतहनूमंतंतदाजनाः ॥ १५ ॥
एवंहनुमतोभक्तिर्नभूतानभविष्यति ॥ तादृशीदेवलोकेपिनृणामत्रतुकाकथा ॥ १६ ॥ सुग्रीवसख्यघटनंसीतान्वेषणमेवच ॥ समुद्रलं
घनंसीतासंभाषणमतःपरम् ॥ १७ ॥ आरामभंजनंचाक्षकुमारस्यवधस्तथा ॥ लंकायादीपनंरामसान्निध्यागमनंपुनः ॥ १८ ॥
सेतुबंधश्चजलधौद्रोणाद्र्यानयनंतथा ॥ लक्ष्मणप्राणरक्षाचरामशोकनिवारणम् ॥ १९ ॥ एवमादीनिकर्माणिप्रख्यातानिहनूमतः ॥
पुराणेभ्युदयायैतन्मयाकिंचिदिहोदितम् ॥२०॥ अपरंशृणुमाहात्म्यंहनुमत्संभवंपरम् ॥ परमाश्चर्य्यजनकंसर्वाहंकारनाशनम् ॥२१॥
एकदाद्वारकायांतुजित्वाकृष्णःशचीपतिम् ॥ पारिजातंसमानीयसत्यायैप्रददौहरिः ॥२२॥ सर्वाधिकाहमितिसातदात्मानममन्यत ॥
गरुडोपितदात्मानंवेगेनचबलेनच ॥२३॥ सर्वाधिकंमन्यमानोह्यादिगर्वसमावहत् ॥ बाणासुरभुजच्छेदाद्यैर्नैकाद्भुतकर्म्मभिः॥२४॥ च
क्रस्यापिमनस्यासीन्नमेतुल्यपराक्रमः ॥ इतित्रयाणांमानंतुखर्वीकुर्वञ्जनार्दनः ॥२५॥ दर्शयन्हनुमद्भक्तिंलीलामेकांचकारसः ॥ सत्यभा
मासमीपेतुतस्थावुत्साहवर्जितः ॥२६॥ श्रीकृष्णंतंप्रियाप्राहप्रांजलिर्दुःखितासती ॥ अद्यत्वामन्यमनसंपश्याम्युत्साहवर्जितम् ॥२७॥
कुतस्तद्ब्रूहिमेदास्यैनोचेत्प्राणांस्त्यजाम्यहम् ॥ नाप्यद्राक्षमनुत्साहंत्वांकदापिमहाभुजम् ॥ २८ ॥ अद्यत्वामीदृशंदृष्ट्वानोत्सहेजी

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वितुंप्रिय ॥ इतिसत्यावचःश्रुत्वाभगवान्वाक्यमब्रवीत् ॥ २९ ॥ अनुत्साहस्यमेसाध्विनास्तिकारणमण्वपि ॥ एकोभक्तस्यविरहोबा
धतेमांयदातदा ॥ ३० ॥ नताद्दशोमेप्रद्युम्नोनेदृग्देहोपिमेसति ॥ तद्विश्लेषाद्दहंखिन्नःकदाद्रक्ष्यामितंहितम् ॥ ३१ ॥ इतिश्रुत्वावच
स्तस्यसत्याप्राहातिविस्मिता ॥ किमेतद्भाषसेनाथयस्तवैताद्दशःप्रियः ॥ ३२ ॥ गच्छावस्तत्रतंवापिसमानयितुमर्हसि ॥ तवापिखि
द्यतेचित्तंयदर्थंतंनवेद्म्यहम् ॥ ३३ ॥ कस्तेसभक्तःकुत्रास्तेकिंनामब्रूहितन्मम ॥ इत्युक्तःप्रिययाकृष्णःप्राहतांचिंतितंवचः ॥ ३४ ॥
प्रियेयावोनसंदेहस्तंचात्रैवानयाम्यहम् ॥ परंतुशृणुतस्यैकानिष्ठाप्राणिसहायिनी ॥ ३५ ॥ हनुमान्नामभक्तोमेपर्वतेगंधमादने ॥ अस्ति
मद्रूपमेवैकंहृदिध्यायन्सदाकपिः ॥ ३६ ॥ सीतायाहरणेपूर्वंमयारामशरीरिणा ॥ तमेकंबलमादायजित्वारावणमाहवे ॥ ३७ ॥ सी
तालक्ष्मणसंयुक्तःकुशलीगृहमागमत् ॥ लक्ष्मणेशक्तिनिहतेमयिकर्तुंव्यवस्थिते ॥ ३८ ॥ संरक्षितमनेनैवरघूणांकुलमुत्तमम् ॥
तस्यैकापरमानिष्ठासीतारामौविनापुनः ॥ ३९ ॥ नान्यंपश्यतिनोयातिनमेमामपिनैवसः ॥ अतस्तत्रकथंयावःसआगच्छेत्कथंपुनः ॥
॥ ४० ॥ प्रसन्नोयास्यतीत्येतच्चिंतामेहृदिजायते ॥ अहंरामस्वरूपंहिधर्तुंशक्नोमिजानकी ॥ ४१ ॥ काभवेदितिमेचिंतात्वंवासारुक्मि
णीकिमु ॥ नान्यासामागतिंजानेयथाजनकजाभवेत् ॥ ४२ ॥ इत्युक्त्वासत्यभामातुकृष्णंप्राहातिहर्षिता ॥ अहोचिंतांत्यजाशुत्वमहं
स्यांजनकात्मजा ॥ ४३ ॥ आनयस्वप्रियंभक्तंनरुष्टःसभविष्यति ॥ इतिश्रुत्वावचस्तस्याःसस्मारगरुडंहरिः ॥ ४४ ॥ आगत्यविन
तापुत्रःकिंकरोमीतिचाब्रवीत् ॥ तमाहकृष्णःसंस्तुत्यगंधमादनपर्वते ॥ ४५ ॥ हनुमान्मंमभक्तोस्तितमानयमदुक्तितः ॥ तत्रगत्वा
ब्रूहितस्मैद्वारकायांसमागतः ॥ ४६ ॥ सीतयासहरामस्तुद्रष्टुंत्वामिच्छतिप्रभुः ॥ इत्युक्त्वातंतुशीघ्रंमांसमागत्येतिबोधय ॥ ४७ ॥ ॥ ४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इत्युक्त्वातंपुनश्चक्रंप्राहत्वंद्वारितिष्ठभोः ॥ आगतेकपिराजेतुद्वारिसंस्थाप्यतंपुनः ॥ ४८ ॥ निवेद्यमांततःपश्चादानयःसन्निधौमम ॥
तथेत्युक्त्वागरुत्मांस्तुययौतंगंधमादनम् ॥ ४९ ॥ हनुमंतंददर्शाथनमस्कृत्याब्रवीद्वचः.॥ यदुक्तंहरिणासर्वंश्रुत्वातन्मारुतिःपुनः ॥
॥ ५० ॥ अर्घपाद्यादिकंकृत्वाकृत्वातिथ्यंचपुप्लुवे ॥ गरुडोपिचतत्सर्वंपृष्टस्तेनसहैवतु ॥ ५१ ॥ यावदायातिगरुडस्तावदागतवा
न्कपिः ॥ द्वारिचक्रंसमालोक्यक्कमेस्वामीमहाप्रभुः ॥ ५२ ॥ तच्छ्रुत्वावचनंतस्यमारुतेर्भक्तवत्सलः ॥ बभूवरामरूपस्तुधनुर्बाण
धरोहरिः ॥ ५३ ॥ सत्यापिगृहमध्येतुचचारेतस्ततस्तुसा ॥ नसीतारूपमभजद्रुक्मिणींप्राहकेशवः ॥ ५४ ॥ सीतारूपंसमादायशी
घ्रमागच्छमेंतिकम् ॥ इत्युक्त्वासातुतत्रैवसीताजाताविदर्भजा ॥ ५५ ॥ हनुमंततदाचक्रंप्राहतिष्ठात्रयाम्यहम् ॥ त्वांनिवेद्यगृही
त्वाज्ञामागच्छामिततोव्रज ॥ ५६ ॥ इतिश्रुत्वातुहनुमांस्तच्चक्रंज्वलनप्रभम् ॥ भ्रममाणंभुजेदक्षेधृत्वाकंकणवत्कपिः ॥ ५७ ॥ जगा
मांतःपुरेसद्यःक्कमेस्वामीतिचासकृत् ॥ भाषमाणोददर्शाग्रेनीलजीमूतसन्निभम् ॥ ५८ ॥ द्विभुजंपुंडरीकाक्षंधनुर्बाणधरंप्रभुम् ॥
स्मितानन्नंपीतवस्त्रंदिव्यालंकारभूषितम् ॥ ५९ ॥ तद्वामपार्श्वगांदेवींजानकींजननीमिव ॥ दृष्ट्वामुहुर्निपत्योर्व्यांप्रणनाममहाकपिः ॥
॥ ६० ॥ हर्षाश्रुपरिपूर्णाक्षः समुत्थायकृतांजलिः ॥ हर्षगद्गदयावाचाकिंकरोमीतिचाब्रवीत् ॥ ६१ ॥ श्रुत्वातद्भगवान्प्रीत्याप्राहतेकु
शलंकपे ॥ इत्युक्त्वापाणिनापाणिंगृहीत्वास्वसमीपतः ॥ ६२ ॥ उपवेश्यकरेणास्यपृष्ठेपस्पर्शचासकृत् ॥ ततःसारुक्मिणीसीता
लड्डुकादिकमोदकान् ॥ ६३ ॥ हनूमतेददौप्रीत्यामारुतिर्बुभुजेमुदा ॥ भक्तिमंतंततस्तंतुमारुतिंभगवान्हरिः ॥ ६४ ॥ प्राहत्वत्स्म
रणाच्चेतोबभूवोत्कंठितंमम ॥ अतस्त्वांद्रष्टुकामेनगरुडःप्रेषितोमया ॥६५॥ दृष्टोसित्वंतुभद्रंतेगच्छतत्रसुखीभव ॥ एवंप्रभावोहनुमान

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वतारोमहेशितुः ॥ ६६ ॥ धर्मसंस्थापनार्थायप्रादुर्भूतोस्तिभूतले॥सएवरामःकृष्णोसौहनुमान्गरुडःसच ॥६७॥ आत्मनोऽनेकमूर्तीश्च
कृत्वारक्षतिमेदिनीम्॥सेव्यसेवकभावेनलोकंसंमोह्यमायया॥६८॥ इति श्रीभगवद्भक्तिमाहात्म्येहनुमच्चरितकथनंनामतृतीयःसर्गः॥३॥
विभीषणकथांवक्ष्येमहाश्चर्यमयींशुभाम् ॥ यांश्रुत्वामनुजःसद्योरामेभक्तिंलभेद्ध्रुवम् ॥१॥ विभीषणस्तुपौलस्त्योरावणस्यानुजोवली॥
जातिधर्मंपरित्यज्यबंधुवर्गंतथैवच ॥ २ ॥ श्रीरामंशरणंगत्वायुयुधेबंधुभिःसह ॥ लंकाविध्वंसनंज्येष्ठबंधुमारणमप्यहो ॥ ३ ॥
हितंमेनेनरामस्यभक्तितत्याजराक्षसः ॥ ततोलंकाधिपत्यंचचिरंजीवित्वमेवच ॥ ४ ॥ संप्राप्यांतेहरेर्धामगमिष्यतिनसंशयः ॥ एवं
रामायणेतस्यभक्तिरुक्तामहर्षिणा ॥ ५ ॥ लोकप्रसिद्धांतांभक्तिंवक्ष्येहंतुयथाश्रुतम् ॥ एकदापानपात्रेतुकाश्चित्सांयात्रिकोवणिक् ॥
॥ ६ ॥ विधायवित्तमंभोधौव्यवहर्तुंजगामह ॥ लग्नानौःक्वचिदंभोधौनचचालातियत्नतः ॥ ७ ॥ ततोवैश्योतिसंदिग्धःकिंकरोमीत्य
चिंतयत् ॥ तदाकेनचिदुक्तःसवलिरत्रप्रदीयताम् ॥ ८ ॥ एकोमनुष्योनोचेत्तुनौर्गमिष्यतिसंक्षयम् ॥ इत्युक्तःसवणिक्प्राहकथंदास्या
मिमानुषम् ॥ ९ ॥ अहमेवबलिर्भूत्वापतिष्यामिमहोदधौ ॥ तदैवतेषांकुशलंभविष्यतिनसंशयः ॥ १० ॥ मृतेमयिधनंचैतन्मत्पुत्रा
यप्रदीयताम् ॥ एवंनिश्चितबुद्धिंतंवणिजंप्राहकश्चन ॥ ११ ॥ कुष्ठरोगातुरोवृद्धोभृत्योवैश्यसुहृत्तमः ॥ नत्वंपतबलिर्भूत्वामृतेत्वयि
मृतावयम् ॥ १२ ॥ अहंतुकुष्ठरोगार्तोवृद्धोमर्तुमनाःस्वयम् ॥ बलिभूतःपतिष्यामिजीवत्वंरक्षबांधवान् ॥ १३ ॥ इत्युक्त्वानिपपाता
ब्धौदेवोगृह्णातुमांबलिम् ॥ अविघ्नमत्रनौरेषागच्छत्वभिमतांदिशम् ॥ १४ ॥ एवंसंकल्प्यपतितेवृद्धेरामेतिभाषिणि ॥ तत्क्षणाच्चलितानौ
कासर्वेकुशलिनोभवन् ॥ १५ ॥ सतुवृद्धोवीचिभिस्तुनीतोलंकासमीपतः ॥ तत्ररक्षोगणैर्दृष्टोगृहीत्वाभक्षणायसः ॥ १६ ॥ नीतो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विभीषणस्याग्रेभक्ष्यमेतत्प्रगृह्यताम् ॥ बिभीषणस्तुतंदृष्ट्वाभृत्येभ्यःपारितोषिकम् ॥ १७ ॥ दत्त्वाबहुधनंप्रीत्यातंवृद्धंतुस्वयंपुनः ॥
सिंहासनेसुसंस्थाप्यपूजयामासभक्तितः ॥ १८ ॥ अहोधन्योहमद्यैवतन्मनुष्यनिरीक्षणात् ॥ रामचंद्रस्यरूपंमेदृष्ट्याविर्भवतिस्फुटम्
॥ १९ ॥ अत्रैवतिष्ठतेराज्यमिदंकुरुयथासुखम् ॥ बिभीषणवचःश्रुत्वावृद्धःप्राहातिभीतवत् ॥ २० ॥ नाहंराज्यमिदंकांक्षेनचान्य
त्किञ्चिदप्यहो ॥ तस्यामेवतुनौकायांगंतुमिच्छाम्यहंविभो ॥ २१ ॥ इत्युक्तःसतुदैत्येंद्रोरत्नानिविविधानिसः ॥ तदंगेपटवस्त्रेणबद्ध्वा
भालेथतस्यवै ॥ २२ ॥ रामनामलिखित्वातुप्रोवाचजलधिंस्वयम् ॥ अहोस्यभालेमुद्रेयंप्रभुनामांकितामया ॥ २३ ॥ तत्प्रभावात्त्व
याचैषनेयोयत्रायमिच्छति ॥ गंतुंतत्रेतिसंप्रार्थ्यप्राक्षिपज्जलधौसतम् ॥ २४ ॥ सतुवृद्धोविष्णुभक्तकरस्पर्शप्रभावतः ॥ तदाभाषणसं
सर्गान्महारोगाद्विमुक्तवान् ॥ २५ ॥ लब्ध्वादिव्यवपुःकुष्ठीसमुद्रसलिलेपतत् ॥ वीचिभिःप्रेरितस्तस्यानौकायाःसन्निधिंगतः ॥ २६ ॥
तत्रनौकास्थितैर्दृष्टोमनुष्योयमुपागतः ॥ यःपोताज्जलधौमग्नोनौस्तंभेसमुपस्थितः ॥ २७ ॥ परंतुनास्यरोगोस्तिदिव्यरूपधरः
कथम् ॥ इतिसंदिह्यतेसर्वेसंपप्रच्छुस्तमादरात् ॥ २८ ॥ कोसिकस्मादिहायातःसत्यंकथयनःपुरः ॥ इतितेषांवचःश्रुत्वासउवाचप्रहृ
ष्टवत् ॥२९॥ अहोभ्रांताःकथंयूयंसएवाहंनसंशयः ॥ पुराजलेनिपतितोलंकायाःसंनिधौगतः॥३०॥ विभीषणाग्रेरक्षोभिर्नीतोहंभक्षणा
यच ॥ ततोविभीषणोदृष्ट्वामांसस्माररघूत्तमम् ॥३१॥ स्मारकोयदहंजातस्तस्मान्मांसोप्यपूजयत् ॥ दत्त्वारत्नान्यनेकानिभालेरामे
त्यलीलिखत् ॥ ३२ ॥ ततःसमुद्रेनिक्षिप्यप्रापयेमंयथेप्सितम् ॥ इत्युक्ताहंतुसंस्पर्शतदालापनयोगतः ॥ ३३ ॥ कुष्ठरोगाद्विमुक्तः
सन्निहायातोस्मिसांप्रतम् ॥ धन्योविभीषणोभक्तोधन्यंरामेतिनामतत् ॥ ३४ ॥ यत्प्रसादान्महापापादहमेवंविमोचितः ॥ इतिश्रुत्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तुतेसर्वेविस्मयंपरमंगताः ॥ ३५ ॥ रामभक्तिंप्रशंसंतोजग्मुस्तेस्वंस्वमालयम् ॥ एवंविभीषणेभक्तिःप्रसिद्धालोकपाविनी ॥ ३६ ॥
अद्यापिभक्तिमाहात्म्यमेवमेवास्त्यसंशयम् ॥३७॥ इतिश्रीभगवद्भक्तिमाहात्म्येविभीषणचरितंनामचतुर्थःसर्गः ॥४॥छ॥ शबरीभक्ति
माहात्म्यंकथयामियथाश्रुतम् ॥ परमाश्चर्यजनकंरामभक्तिप्रवर्द्धनम् ॥ १ ॥ दंडकारण्यमध्येतुमातंगाश्रमसन्निधौ ॥ शबरस्यसु
ताकाचित्पतिपुत्रविवर्जिता॥ २ ॥ अरण्येनिवसंतीसाफलमूलाशनाशुभा ॥ दैवान्मतंगंतमृषिमेकदासंददर्शह ॥ ३ ॥ प्रातःस्नात्वास
मायांतंस्वाश्रमेनियतेंद्रियम् ॥ दृष्ट्वापलायमानापिपश्यंतीभक्तितोमुनिम् ॥४॥ विचारयामासहृदिसेवेयाहंकथंमुनिम्॥ द्रष्टुंहिनहिश
क्नोमिनीचातंकथमर्च्चये ॥ ५ ॥ तथाप्येतस्यमार्गेहिशर्कराकंटकान्वितम् ॥ तंमार्जयाम्यहंनित्यंयावद्द्रक्ष्यतिनैवमाम् ॥ ६ ॥ इंध
नानिगृहीत्वाचतदाश्रमसमीपतः ॥ संस्थापयिष्येरात्रौतुततःसेवाभविष्यति ॥ ७ ॥ एवंकृतेकदाचित्स्यात्कृपामयिमुनेरहो ॥ इति
निश्चित्यमनसारात्रिशेषेचनित्यशः ॥ ८ ॥ मार्गंसंमार्जयित्वासाधारयामासचेंधनम् ॥ एवंगतेषुकालेषुमतंगःशिष्यमब्रवीत् ॥ ९ ॥
कोयंमार्गंमार्जयित्वाददात्यत्रेंधनानिभोः॥रात्रावागत्यनोजानेज्ञातव्यःकोऽस्तिकानने ॥१०॥ इत्युक्तोमुनिनाशिष्योरात्रौमार्गेनिलीय
सः॥ स्थितोददर्शशबरींदधानांशिरसेंधनम् ॥११॥ धृत्वेंधनंमार्जयित्वामार्गंचलितुमुत्सुका ॥ तदाशिष्यःसमुत्थायशबरींप्राहसत्वरः
॥१२॥ कासित्वमिहमार्गमेसंमार्जयसिनित्यशः ॥ जिज्ञासुस्तेगुरुस्त्वांमेचलतस्यसमीपतः ॥१३॥ इत्युक्तावेपमानासाशबरीभयविह्व
ला ॥ जगामचमुनेरग्रेभीताभक्तिमतीसती ॥१४॥ तांदृष्ट्वासमुनिःप्राहकिमर्थमिंधनानिमे॥ ददासिममार्गंचमार्जयंतीदिनेदिने॥१५॥
इत्युक्ताशबरीप्राहमतंगंप्रणिपत्यच ॥ नाथाहंशबरीनीचयोनिजाभाग्यवर्जिता ॥१६॥ तिष्ठंतीविपिनेचाहमपश्यंत्वांतपस्विनम् ॥तदा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दिनानतःसेवांकर्तुंव्यवसिताभवम् ॥ १७ ॥ कथंसेवांकरिष्यामिनीचेत्येवंविचार्यच ॥ त्वदीयस्नानमार्गेतुमार्जयानिदिनेदिने ॥१८॥ इंधनानिपरिक्षिप्य्त्वदाश्रमसमीपतः ॥ निशिस्वपर्णशालायामासीनैवंव्रतंमम ॥ १९ ॥ नचान्यसेवायोग्याहंनाथैतत्क्षम्यतांमम ॥ इतितस्यावचःश्रुत्वामतंगस्तद्दयान्वितः ॥ २० ॥ उवाचशिष्यमेषातुसंरक्ष्याश्रमतोबहिः ॥ नित्यमन्नंप्रदेह्यस्यैकृपणासेवतेहिनः ॥ ॥ २१ ॥ इतिश्रुत्वावचस्तस्यमतंगस्यमहात्मनः ॥ भूमौनिपत्यशबरीबद्धांजलिपुटाब्रवीत् ॥ २२॥ नाथैतत्क्षम्यतामत्रचान्नमिच्छाम्यहंतव ॥ कदाचित्तेदयामेस्यात्कृतार्थास्यांनसंशयः ॥ २३ ॥ नचमेविभवाकांक्षासंसारोनास्तिमेप्रियः ॥ यथामेसद्गतिर्भूयात्तथादेहिममाशिषम् ॥ २४ ॥ इतिश्रुत्वावचस्तस्यामतंगोमुनिपुंगवः ॥ क्षणंध्यात्वाब्रवीत्तांतुभद्रेतिष्ठात्रनिर्भया ॥ २५ ॥ इत्युक्त्वासमुनिर्गेहंजगामशबरीतुसा ॥ जगामस्वकुलंह्येवदिवाचक्रेगतागतम् ॥ २६ ॥ एवंगतेषुकालेषुदंडकारण्यवासिनः ॥ मतंगंप्रावदन्सर्वेशबरीसन्निधानतः ॥ २७ ॥ तत्यजुस्तस्यसंभाष्यंभोजनादिषुकाकथा ॥ ज्ञात्वापितन्मतंगस्तुनचुक्रोधमहामुनिः ॥२८॥ अवदातंस्वचरितंनिश्चित्यक्षमयान्वितः ॥ एवंगतेषुकालेषुमतंगोमुनिसत्तमः ॥ २९ ॥ ज्ञात्वाशरीरपातंचकुशासनमुपाविशत् ॥ ततःशिष्यगणाःसर्वेरुदंतस्तमपूजयन् ॥ ३० ॥ रुदंतीशबरीचापिकृतांजलिपुटागता ॥ मुनेःसम्मुखतस्तस्थौतांदृष्ट्वामुनिरब्रवीत् ॥ ३१ ॥ आगच्छवत्सेशबरिविषादंत्यजसुव्रते ॥ रामोदाशरथिःसाक्षाद्विष्णुरेवसनातनः ॥३२॥ अवतीर्णोस्त्ययोध्यायामागमिष्यतिचात्रसः॥ तस्यातिथ्यंविधायत्वंदिवियास्यसिनान्यथा ॥ ३३ ॥ तावत्त्वंतस्यरामेतिनामभाषणतत्परा ॥ वसात्रदंडकारण्येमत्सेवाफलमस्तुते ॥ ३४ ॥ इत्युक्त्वातांततःशिष्यानुक्त्वाचैवयथोचितम् ॥ जगामदिव्यलोकंतुमतंगोमुनिपुंगवः ॥३५॥ तदारभ्यप्रतिपलंशबरीरा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मभाषिणी ॥ फलमूलाशनानित्यंरामागमनकांक्षिणी ॥ ३६ ॥ कदागमिष्यतिश्रीमान्रामोदाशरथिःप्रभुः ॥ इत्येवंचिंतयंतीसामुहुः
पश्यतितत्पथम् ॥ ३७ ॥ फलमूलादिकंयत्रबदरींतिंदुकादिकम् ॥ भुंजानामधुरंज्ञात्वारामातिथ्यायसात्वधात् ॥ ३८ ॥ प्रातरेव
समागच्छेत्कदाचिदिहचेत्प्रभुः ॥ इतिसंचिंत्यमनसाविलिलेपकुटिंनिशि ॥ ३९ ॥ शयानापुनरुत्थायबहिरेत्यमहानिशि ॥ पश्यंती
सादिशःसर्वाआगमिष्यतिकिंप्रभुः ॥ ४० ॥ एवमुत्कंठितारण्येशबरीरामतत्परा ॥ पलंनैवविसस्माररामंराजीवलोचनम् ॥ ४१ ॥
एकदामुनिपुत्रास्तुशुश्रुवूरघुनंदनम् ॥ समागतमरण्येसाविदित्वैवंबभूवसा ॥ ४२ ॥ धावित्वेतस्ततोमूलफलान्यादायमंदिरे ॥ संर
क्ष्यजलमाहर्तुंजलाशयमुपागमत् ॥ ४३ ॥ अथदृष्टोमुनिःकोपिस्नात्वागच्छंस्तथापथि ॥ प्रदक्षिणीकृत्यमुनिंभयाद्दुद्रावसापुनः॥४४॥
अथतस्याःशरीरस्यच्छायामुनिपदांबुजे ॥ संलग्नातःसंचुकोपमुनिस्तांभर्त्सयन्रुषा ॥४५॥ परावृत्यपुनःस्नातुंजलाशयमुपागमत्॥त
त्रगत्वाददर्शांभोसृङ्निभंकृमिसंयुतम् ॥ ४६ ॥ चिंतयामाससमुनिःकिंजातमिदमंभसि ॥ तथापिमार्ज्जनंकृत्वासमायातोनिकेतनम् ॥
॥ ४७ ॥ शबरीतुततःपूर्वंजलंनीत्वास्ववेश्मगा ॥ अथैतस्मिन्क्षणेरामोलक्ष्मणेनसमन्वितः ॥ ४८ ॥ शबर्याश्रममायातःक्वसास्तिश
बरीमम ॥ इतिब्रुवाणस्तद्भक्त्याचांगणेसमुपागतः ॥ ४९ ॥ दृष्ट्वारामंघनश्यामंशबरीपुष्करेक्षणम् ॥ जटामुकुटशोभाढ्यंधनुर्बाणधरं
मुसा॥५०॥ ननर्तांगणमागत्यकरतालपरामुदा ॥ रामंददर्शहर्षेणनान्यत्किंचिद्बुबोधसा ॥५१॥ पतितंचोत्तरीयंतुपरिधानीयमप्यहो॥
तथापिननिवृत्तासानिमग्नानंदसागरे ॥ ५२ ॥ अथतांचोदयामासलक्ष्मणःसस्मिताननः ॥ अहोनृत्यान्निवर्तस्वरामोयंतवतिष्ठति ॥
॥ ५३ ॥ कुरुष्वातिथ्यमत्रत्वंभवपूर्णमनोरथा ॥ इत्युक्ताशबरीनित्यंत्यक्त्वाभूमौपपातह ॥ ५४ ॥ प्रणिपत्योत्थिताशीघ्रंकुशास

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नमुपाहरत् ॥ ततःपादौतयोर्भक्त्याप्रक्षाल्यबदरीफलम् ॥ ५५ ॥ तिंदुकानिचमूलानिफलान्यन्यानियानितु ॥ रामार्थंरक्षितान्या
सन्दंतैर्इिछत्त्वापरीक्ष्यच ॥ ५६ ॥ अग्रेधृत्वाददौप्रीत्यारामपाणौस्वपाणिना ॥ ततोरामःफलंतस्याबुभुजेप्रशशंसच ॥ ५७ ॥
ततोन्यत्फलमादायसमाघ्रायचसापुनः ॥ ददौरामायभुंक्ष्वेदंमधुरंपुष्करेक्षण ॥ ५८ ॥ ततोरामःफलंप्रीत्यालक्ष्मणश्चमहामनाः ॥
बुभुजेशबरीहस्तात्फलंभक्त्यावशीकृतः ॥ ५९ ॥ अथसर्वेसमायातादंडकारण्यवासिनः ॥ मुनयःशबरीवेश्मद्रष्टुंरामंसलक्ष्मणम् ॥ ६० ॥
नमस्कृत्यचतान्रामःपप्रच्छकुशलंमुनीन् ॥ अथोचुर्मुनयःसर्वेसदाकुशलिनोवयम् ॥ ६१ ॥ त्वद्दर्शनाद्रघुश्रेष्ठजाताःस्मोनिर्भयाव
यम् ॥ अथैकःप्राहरामंतुधन्येयंशबरीप्रभो ॥ ६२ ॥ यत्सान्निध्यात्परित्यक्तोमतंगोस्माभिरेवतु ॥ तस्याएवांगणेत्वांतुस्थितंवयमु
पास्महे ॥ ६३ ॥ पुनरेकउवाचाथजलमस्मिज्जलाशये ॥ अकस्मात्कृमिभिर्दुष्टंशोणिताभमभूत्कुतः ॥ ६४ ॥ कथंसम्यक्प्रजा
येततमुपायंवदप्रभो ॥ इत्युक्तवंतंतंप्राहलक्ष्मणःसस्मिताननः ॥ ६५ ॥ अहोधन्यतमायूयंतपोव्रतपरायणाः ॥ त्यक्त्वाविषयजंसौख्यं
वनेवसथनिःस्पृहाः ॥ ६६ ॥ भवद्भिरेवलोकोयंधार्यतेसचराचरः ॥ यआसीद्भवतामेकोमतंगोनामवैमुनिः ॥ ६७ ॥ तस्यानुग्रहत
श्चैपाभक्तिमार्गरताभवत् ॥ अतएषापिधन्याभून्मुनयोनात्रसंशयः ॥ ६८ ॥ जलंयत्कृमिभिर्दुष्टंतदस्याएवभर्त्सनात् ॥ अस्याइछाया
पदेलग्नासुनिनातेनभर्त्सिता ॥ ६९ ॥ पुनःस्नातुंगतेविप्रेजलमेवंबभूवतत् ॥ मतंगमुनिविद्वेषाद्रामभक्तावमानतः ॥ ७० ॥ जलमेतादृशंजा
तंभवतामभिमानतः ॥ अतःपरंमतंगस्यशिष्यान्सन्मानयंतुतान् ॥ ७१ ॥ भवंतःशबरीत्वेषागत्वास्पृशतुवारितत् ॥ ततोजलंपूर्ववत्तु
ल्यंस्यादेवात्रनसंशयः ॥ ७२ ॥ इत्युक्तामुनयःसर्वेलक्ष्मणेनमहात्मना ॥ मतंगमुनिशिष्यांस्तुतोषयामासुरानताः ॥ ७३ ॥ शबरींचापि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

राजार्थमुदकंनेतुमागता ॥ जलाशयेप्रविष्टासाजलंसम्यग्बभूवतत् ॥ ७४ ॥ अथनीत्वाजलंसातुशबरीरामसन्निधिम् ॥ समागत्यजलं
दत्त्वारामस्तामब्रवीत्पुनः ॥७५ ॥ त्वद्भक्तितःप्रसन्नोहंवरंब्रूहिददामितत् ॥ इत्युक्ताशबरीप्राहनाथातःपरमस्तिकिम् ॥ ७६ ॥ यत्त्वां
साक्षात्प्रपश्यामिनीचवंशभवाप्यहम् ॥ तथापियाचेभगवंस्त्वद्भक्तिःस्याद्दृढामम ॥ ७७ ॥ नातःपरंनिवत्स्यामिनाथसंसारसागरे ॥
इतिश्रुत्वावचस्तस्याएवमस्त्वितिसोब्रवीत् ॥ ७८ ॥ ततःसाशबरीरामंस्तुत्वागद्गदभाषिणी ॥ त्यक्तादेहंययौस्वर्गंपश्यंतीरघुनंद
नम् ॥ ७९ ॥ विमानवरमारुह्यजातावाणीवशापुनः ॥ पश्यतांसर्वलोकानांमुनीनामेतदद्भुतम् ॥ ८० ॥ ततोरामस्तुशबरीशरीरंकाष्ठ
संचयैः ॥ भस्मीकृत्योदकंतस्यैददौभक्तिवशीकृतः ॥ ८१ ॥ तांदृष्ट्वामुनयःसर्वेतुष्टुवुस्तांसुविस्मिताः ॥ क्वेयंमहादुराचाराशबरीनी
चसंभवा॥८२॥क्वचैतद्गमनंस्वर्गेजलदानमिदंपुनः ॥ तस्माद्भक्तैर्नवैकिंचिदसाध्यमिहाविद्यते ॥८३॥ इत्युक्त्वंतस्तेसर्वेस्तुत्वारामंसल
क्ष्मणम् ॥ जग्मुःस्वंस्वंचनिलयंययौरामोपिचान्यतः ॥ ८४ ॥ दृष्ट्वातुपरमाश्चर्यंविस्मितास्तेतपोधनाः ॥ इत्येतच्छबरीभक्तिमाहा
त्म्यंकथितंमया ॥ ८५ ॥ श्रुत्वैतत्परमांभक्तिंलभतेरघुनंदने ॥ ८६ ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येशबरीचरितंनामपंचमस्स
र्गः ॥ ५ ॥ छ ॥ अजामिलकथांवक्ष्येपरमाश्चर्यकारिणीम् ॥ यस्मिन्नाम्नश्चमाहात्म्यंव्यक्तीचक्रेजनार्दनः ॥ १ ॥ आसीत्कश्चिद्द्वि
जःपूर्वमंतर्वेदिदितिविश्रुतः ॥ कान्यकुब्जोतिधनवान्सर्वधर्मविवर्जितः ॥ २ ॥ दुःसंगविवशाद्विप्रोवेश्यायांनिरतोभवत् ॥ मद्यंवापि
पपौनित्यंमांसमश्नातिनित्यशः ॥ ३ ॥ विसस्मारनिजज्ञातिकर्मनामतथाहरेः ॥ एवंभूतोबंधुवर्गैस्त्यक्तोग्रामसमीपतः ॥ ४ ॥ निर्मा
यसुवनंवेश्यांसंरक्ष्यगृहिणीमिव ॥ उवासग्रामाद्बाह्येसचांडालइवचापरः ॥ ५ ॥ परंतुस्वगृहंद्वारमंगणंचापिसर्वदा ॥ ब्राह्मणाश्रमवच्च

२

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ग्रामजातिनं कश्चिद् हुनं नंभति २

केररक्षाजामिलस्तुताम्॥६॥एवंनिनायकतिचित्समास्तत्रद्विजाधमः ॥ गृहिण्यावेश्ययारेमेमद्यपानरतःसदा॥७॥एकदातत्समीपेचग्रामात्तत्रागतोऽतिथिः ॥ सायंकालेविष्णुभक्तःशालग्रामशिलांवहन् ॥८॥ किंचिदाहातिथिःप्रेम्णानिश्यत्रनिवसाम्यहम् ॥ स्थलंदर्शयवासार्थंसोब्रवीच्चातिदुर्जनः ॥ ९ ॥ ग्रामाद्वाह्येमहानेकोधर्मात्माजामिलोद्विजः ॥ शुश्रूषतिससर्वांस्तुभोजनास्तरणादिभिः ॥ १० ॥ इत्युक्त्वासगतोदुष्टःसोतिथिस्तत्रचागतः॥ द्वारदेशादाजुहावनाम्नाचाजामिलस्यवै ॥११॥ श्रुत्वातद्गृहिणीवेश्यासमागत्याब्रवीच्चतम् ॥ कोसिकस्मादिहायातःकिमर्थंतमिहेच्छसि ॥ १२ ॥ सउवाचततःसाधुःपथिकोनिवसाम्यहम्॥गतःपूर्वमहंग्रामेतत्रत्योमामुवाचह॥१३॥ ग्रामाद्वाह्येतिधर्मात्माविप्रोऽजामिलसंज्ञकः ॥ तत्रगच्छनिवासायसतेवासंप्रदास्याति ॥ १४ ॥ इत्युक्तोहमिहायातःक्वचास्तेजामिलस्सतु ॥ इतिश्रुत्वातुसावेश्याबहिर्वेश्मनितंतदा ॥ १५ ॥ निवासायददौस्थानंसनास्तिभवनेऽधुना ॥ आगमिष्यतिचेत्त्वांतुनमस्यतिनसंशयः ॥ १६ ॥ अथसांशीघ्रमागत्यग्रामेकंचिद्वणिग्जनम् ॥ समानीयतमालादिभोजनाद्यर्थमाहरत् ॥ १७ ॥ ततःप्रांजलिश्चाहेदंकूपेयमुदकंततः ॥ गृहाणनाहमुदकंदातुंयोग्यांत्यजाधमा ॥ १८ ॥ इतिश्रुत्वाद्विजस्साधुस्तद्गृहिर्मेदिरेस्वयम् ॥ उपलिप्यशुचौदेशेयनादेवंसमर्प्यच ॥ १९ ॥ बुभुजेनिशिसुष्वापसुप्रीतेनांतरात्मना ॥ अथार्धरात्रसमयेवारुणीमदविह्वलः ॥ २० ॥ अजामिलःसमायातोनिन्येतंसाद्भुतंगृहे ॥ अथरात्र्यांव्यतीतायांप्रभातेऽसोतिथिर्द्विजः ॥ २१ ॥ गंतुंप्रवृत्तोद्वारिस्थआजुहावपुनश्चतम् ॥ तदेवंरात्रिवृत्तांतमुवाचाजामिलायसा ॥ २२ ॥ पुनराहव्रजस्वत्वंगत्वातंचनमस्कुरु ॥ सदास्यतिवरंचैवंपुत्रंवरयमेप्रियम् ॥ २३ ॥ इतिश्रुत्वागतोद्वारितंसाधुंप्रणनामह ॥ तमाहसाधुःसंतुष्टस्त्वयिदास्यामितेवरम् ॥ २४ ॥ ब्रूहीतिश्रुत्वाप्रोवाचप्रांजलिःसोप्यजामिलः ॥

२

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवन्ननपत्योहंपुत्रोमेजायतामिति ॥ २५ ॥ प्रार्थयामिवरंत्वत्तोनान्यमिच्छाम्यहंवरम् ॥ इतिश्रुत्वावचस्तस्यसोऽतिथिःप्राहतंवचः॥
॥ २६ ॥ अहोतेभवितापुत्रःसत्यमेतन्नसंशयः ॥ परंतुतस्यनामाहोनारायणइतित्वया ॥ २७ ॥ रक्षितव्यमितिस्वांतेस्थापनीयंम
दीरितम् ॥ इत्युक्त्वासगतोविप्रोऽजामिलोप्यगमद्गृहम् ॥ २८ ॥ वेश्यायैसर्वमाचष्टश्रुत्वासापिजहर्षच ॥ ततःकतिपयेकालेजाते
सागर्भवत्यभूत् ॥ २९ ॥ सुषुवेदशमेमासिपुत्रंसर्वांगसुंदरम् ॥ ततोनामापिचक्रेसनारायणइतिस्फुटम् ॥ ३० ॥ सोप्यवर्धतकालेनयु
वावस्थामुपागतः ॥ अजामिलोऽतिवृद्धोभूज्जरयाजर्जरीकृतः ॥ ३१ ॥ तथापिमदिरापानंमांसाहारंनतत्यजे ॥ अथसोजामिलोरो
गान्म्रियमाणोगृहेस्थितः ॥ ३२ ॥ शय्यायांसेवितःप्रीत्यारुदंत्यावेश्ययासच ॥ अथतंम्रियमाणंतुज्ञात्वावैवस्वतःप्रभुः ॥ ३३ ॥
प्राहदूतान्दंडपाशहस्ताननतिभयंकरान् ॥ यातयूयंकान्यकुब्जोम्रियमाणोतिपातकी ॥ ३४ ॥ जात्याद्विजःकर्म्मणासौचांडा
लादाधिकोभवत् ॥ तमानयित्वापाशेनबद्ध्वात्रनरकेषुच ॥ ३५ ॥ पातयध्वंनतंचाहंद्रष्टुमिच्छामिपापिनम् ॥ इत्याज्ञांशिर
साधृत्वागतास्तेयमकिंकराः ॥ ३६ ॥ दंडपाशधराःसर्वेदीर्घदंष्ट्राभयंकराः ॥ आगत्याजामिलगृहेतंपाशैर्बद्धुमुद्यताः ॥ ३७ ॥
तान्दृष्ट्वाजामिलोभीत्याजुहावतनयंनिजम् ॥ अहोनारायणात्रेतिमांबध्नंतिभयंकराः ॥ ३८ ॥ नारायणततःपाहीत्येवंपु
त्रमभाषत ॥ वहुरेवंवदत्यस्मिन्विष्णुदूताःसमागताः ॥ ३९ ॥ शंखचक्रधराःसर्वेतुलसीदामभूषिताः ॥ यमदूतान्भ
र्त्सयंतोविजहीतेतिवादिनः ॥ ४० ॥ ततस्तुयमदूतास्तैरयुध्यंतमहात्मभिः ॥ ततोघोरतरंयुद्धंकृत्वातेविष्णुकिंकराः ॥ ४१ ॥ अजा
मिलंसमादायविमानेहरिमंदिरम् ॥ वैकुंठंप्रापयामासुरित्याश्चर्य्यमभूदहो ॥ ४२ ॥ अथतेयमदूतास्तुच्छिन्नहस्तोरुनासिकाः ॥ संप्रा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्यधर्मराजांतेरुदंतोवाक्यमब्रुवन् ॥ ४३ ॥अविचार्य्यैवभवताप्रेष्यंतेकिंकरानिजाः ॥ अथवाचित्रगुप्तोयंसहसासंवदत्यहो ॥ ४४ ॥
वयंतत्रगतानेतुंविप्रंचाजामिलंतदा ॥ विष्णुदूताःसमागत्ययुद्धंकृत्वातिदारुणम् ॥ ४५ ॥ विनिर्जित्यचनःसर्वान्निन्युस्तंभुवनंहरेः ॥
येनास्मदीयान्यंगानिचक्रच्छिन्नान्यनेकधा ॥ ४६ ॥ तमप्यानयितुंचास्माञ्छ्रीमंतःप्रेषयंतिहि ॥ तस्मादियमवस्थानोयोनामागंतु
मर्हति ॥ ४७ ॥ इतिश्रुत्वावचस्तेषांयमराजोतिविस्मितः ॥ आहूयचित्रगुप्तंतुपप्रच्छाजामिलस्यसः ॥४८॥ चित्रगुप्तोनिरीक्ष्याहआ
जन्ममरणावधि ॥ पुण्यलेशोनचास्त्यस्यनिश्चित्यैतद्ब्रवीम्यहम् ॥ ४९ ॥ किंतुप्राणांतसमयेदृष्ट्वादूतान्भयंकरान् ॥ नारायणेतिनाम्ना
नंतनयंस्वमुपाह्वयत् ॥ ५० ॥ तदाजुहावपुत्रंसनतुतंजगदीश्वरम् ॥ इतिश्रुत्वावचस्तस्यचित्रगुप्तस्यभास्करिः ॥ ५१ ॥ गृहीत्वानि
जदूतान्वैवैकुण्ठंप्रययौद्रुतम् ॥ तत्रगत्वाजगन्नाथंविष्णुंनारायणंहरिम् ॥५२॥ प्रणम्यप्रार्थयामासबद्धांजलिपुटोयमः ॥ भगवन्नधिकारो
मेवृथातवगणैःकृतः ॥ ५३ ॥ महापातकिनांश्रेष्ठोऽजामिलोभूद्द्विजाधमः ॥ तमानेतुंमयादूताःप्रेषिताजगदीश्वर ॥ ५४ ॥ अथां
तरेभवद्दासायमद्दूतान्निहत्यतम् ॥ समानिन्युरिहायंतेराजतेभवनेद्विजः ॥ ५५ ॥ श्रुत्वैतद्धर्मराजस्यवचनंभगवान्हरिः ॥ सस्मितं
सांत्वयित्वातंयमराजमभाषत ॥ ५६ ॥ अहोसत्यंनास्यपुण्यमाजन्ममरणावधि ॥ परंतुमृत्युसमयेमन्नामोच्चारणादयम् ॥ ५७ ॥
विमुक्तःसर्वपापेभ्योननीतोयमकिंकरैः ॥ शृणुष्वसमयंमत्तोनिजचित्तेवधारय ॥ ५८ ॥ पापिनोपियथादंडंभवतोनाप्नुवंतिहि ॥ तथा
वधार्यचित्तेवैविहरस्वमहीतले ॥ ५९ ॥ येनामसंततमहोममशंकरस्यदेव्याजपंतिमनुजाभुविपापिनोपि ॥ तांस्त्वंजहीतिनचतेतव
दंडयोग्याअस्मत्प्रियाइतिनतच्चरितंविचार्यम् ॥ ६० ॥ तत्रापियेविजहतिस्वकलेवराणिमन्नामभाषणपुरःसरमप्यचिन्ताः ॥ किंचाम

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

लेंत्रिपथगातटभाजितायेससेवितार्द्धतनवःखलुतेतिपूज्याः ॥६१॥ एवंशिक्षामुरीकृत्यनमस्कृत्ययमोहरिम् ॥ निजगामगणैःसार्द्धंहृष्टः संयमिनींपुरीम् ॥ ६२ ॥ तत्रापिनिजदूतेभ्यःशिक्षामाहहरेःकृताम् ॥ इत्यजामिलसंबंधाद्भक्तिमाहात्म्यमुत्तमम् ॥ ६३ ॥ परमाश्चर्यजनकंनामसामर्थ्यबृंहितम् ॥ श्रुत्वाभक्तिमवाप्नोतिमहापापात्प्रमुच्यते ॥ ६४ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्ये अजामिलचरितंनामषष्ठस्सर्गः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ जटायुचरितंवक्ष्येमहानंदप्रदायकम् ॥ अयोध्यायांरघुश्रेष्ठोराजादशरथःसुतम् ॥ १ ॥ ज्येष्ठंरामंयौवराज्येऽभिषेक्तुमुपचक्रमे ॥ तदावक्राचचोमत्वाहितंकेकयभूपजा ॥ २ ॥ निवारयामासनृपंरामराज्याभिषेचनात् ॥ किंचरामंसपत्नीकंचतुर्दशसमावने ॥ ३ ॥ निर्वासयामासनृपाद्वरंप्राप्याथकैकयी ॥ तदारामःपितुर्धर्मसंरक्षणपरायणः ॥ ४ ॥ सीतयालक्ष्मणेनाथययौदंडककाननम् ॥ वसन्रक्षोगणांस्तत्रनिजघानसहस्रशः ॥ ५ ॥ एकदादंडकारण्येगोदावर्य्याःसमीपतः ॥ पंचवट्यांस्थितंरामंसीतयालक्ष्मणेनच ॥ ६ ॥ घोराशूर्पणखानाम्नाखरदूषणयोःस्वसा ॥ ददर्शकोटिकंदर्पसुंदरंपुरुषोत्तमम् ॥ ७ ॥ समागत्याब्रवीद्वाक्यंसकामाहंत्वयासह ॥ रंतुमिच्छामितच्छ्रुत्वारामोवचनमब्रवीत् ॥ ८ ॥ द्वारितिष्ठतिमेभ्राताकनीयान्ममवल्लभः ॥ निस्त्रीकस्तंव्रजाहंतुसस्त्रीकःसीतयानया ॥ ९ ॥ अथसालक्ष्मणंगत्वाप्रोवाचात्ममनोरथम् ॥ ततःप्रहस्यसौमित्रिराहशूर्पणखांवचः ॥१०॥ अहंतुतस्यरामस्यदासोस्म्यदितिनंदिनि ॥अतस्तमेवगच्छस्वमाभूद्दासीमदाश्रयात् ॥ ॥ ११ ॥ इतिश्रुत्वागतारामंपुनर्लक्ष्मणमभ्यगात् ॥ एवंगतागतेकृत्वाभक्षितुंजनकात्मजाम् ॥ १२ ॥ प्रवृत्तालक्ष्मणःशीघ्रंतस्याश्छिच्छेदनासिकाम् ॥ ततःसंछिन्ननासासारुदंतीखरदूषणौ ॥ १३ ॥ गत्वोवाचवनेदृष्टावुभौतापसरूपिणौ ॥ तयोःसहायिनीरामासाक्षा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

च्छ्रीरिवसुंदरी ॥ १४ ॥ तांत्वदर्थमिहानेतुंप्रवृत्ताहंततस्तुमे ॥ नासांच्छित्वाश्रमाद्दूरेतेननिष्कासितात्वहम् ॥ १५ ॥ समागतेयं
तौहत्वाग्रहीतुंतांयुवांप्रियाम् ॥ इतितस्यवचःश्रुत्वाभ्रातरौखरदूषणौ ॥ १६॥ प्रकुप्यसेनयासार्धंयुयुधातेध्रुवंक्रुधा ॥ युध्यमानौतत
स्तौतुरामेणानिहतौरणे ॥ १७ ॥ ततःशूर्पणखासातुविनसाहतसोदरा ॥ रावणंसमुपागत्यरुदंतीप्राहराक्षसी ॥ १८ ॥ मयाद्यदंड
कारण्येराजपुत्रौयमावुभौ ॥ धनुर्बाणधरौरामलक्ष्मणाख्यौतपस्विनौ ॥ १९ ॥ समागमत्तयोस्साकंस्त्रीरत्नमतिसुंदरम् ॥ विराजतेत्व
दर्थंतुचानेतुमुद्यतावुभौ ॥ २० ॥ भ्रातरौमेत्वहंचापितदापलक्ष्मणोऽनुजः ॥ चिच्छेदममनासांसरामोमेभ्रातरावुभौ ॥ २१ ॥ खरदू
षणौजघानाथोसैन्यंचापिरुषावधीत् ॥ इतिश्रुत्वारावणस्तुगत्वामारीचिसन्निधिम् ॥ २२ ॥ गत्वासहायंतंनीत्वादंडकारण्यमागमत्॥
हिरण्मयमुखोभूत्वारामाश्रमतोबहिः ॥ २३ ॥ नीत्वालक्ष्मणनाम्नासौरामोक्तमिवचाह्वयत् ॥ श्रुत्वातद्वचनंसीतादुर्वाक्येनाथलक्ष्म
णम् ॥ २४ ॥ तत्रैवप्रेषयामासरामसाहाय्यकारणात् ॥ अत्रांतरेसमागत्यरावणोमुनिवेषधृक् ॥ २५ ॥ जहारसीतांहारामहाल
क्ष्मणनिनादिनी ॥ अथाकाशेजनकजावाक्यंश्रुत्वाव्यलोकयत् ॥ २६ ॥ जटायुर्दृष्टवान्सीतांरावणेनहृतामिति ॥ कृष्णदाशरथेर्भक्तः
सखादशरथस्यसः ॥ २७ ॥ उड्डीयाकाशगोभूत्वारावणस्याग्रतःस्थितः ॥ उवाचवचनंक्रोधाद्धर्षयन्रावणंमुहुः ॥ २८ ॥ अहो
ब्रह्मकुलेजातःपुलस्त्यतनयस्त्वसि ॥ अधीत्यवेदशास्त्राणिकरोष्येवंजुगुप्सितम् ॥ २९ ॥ ताभ्यांविनाश्रमेशून्येचोरयित्वाविदेह
जाम् ॥ श्ववापहरसेयज्ञागाराद्बलिरिवाधम ॥ ३० ॥ अद्यत्वांसरथंचाहंनिहन्म्यद्यनसंशयः ॥ अयोधयित्वानैवंतेगंतव्यंरावणत्वया ॥
॥ ३१ ॥ यद्यप्यहंजराग्रस्तोविरथोनायुधःखगः ॥ तथापिगंतुंशक्तोपिनैवत्वंमयिजीवति ॥ ३२ ॥ इत्युक्त्वोड्डीयगगनेपदाभ्यांत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्यमूर्धनि ॥ प्रहृत्यपातयामासमुकुटंरावणस्यसः ॥ ३३ ॥ पतितेमुकुटेदैत्योजहासप्रचुकोपच ॥ विव्याधपत्रिभिर्बाणैर्जटायुंप
क्षिसत्तमम् ॥ ३४ ॥ अमानयित्वातान्बाणानुड्डीयसपुनःखगः ॥ पक्षाभ्यांचरणाभ्यांचचक्षुर्भ्यांयुयुधेरुषा ॥ ३५ ॥ भूमौनिपा
तयामासरावणस्यरथंखगः ॥ ततश्चुकोपपौलस्त्योविव्याधबहुभिःशरैः ॥ ३६ ॥ जटायुंसतुवृद्धोपियुद्धान्नैवन्यवर्तत ॥ तुंडप्रहार
तोबाहुंश्चिच्छेदरावणस्यसः ॥ ३७ ॥ महदाश्चर्यमेतत्तुपश्यतांलोमहर्षणम् ॥ ततश्चुकोपपौलस्त्योबाहून्स्वान्परिकल्प्यसः ॥ ३८ ॥
आग्नेयास्त्रेणविव्याधगृध्रराजंसरावणः ॥ सदग्धपक्षोविद्धांगःपपातधरणीतले ॥ ३९ ॥ अर्धप्राणोनिर्निमेषोरामागमनकांक्षया ॥ त
द्भक्त्यातद्दिवक्षुस्तुनममारखगोत्तमः ॥ ४० ॥ सीतांगृहीत्वालंकायांजगामसतुराक्षसः ॥ अथरामःसहभ्रात्रालक्ष्मणेनमहात्म
ना ॥ ४१ ॥ तत्राजगामशनकैःविचिन्वञ्जनकात्मजाम् ॥ ददर्शपतितंभूमौविंध्यशृंगमिवाध्वनि ॥ ४२ ॥ लक्ष्मणःशंकमानस्तु
गच्छन्नाममुवाचह ॥ कोयंकबंधवद्दृष्टःपथमाक्रम्यातिष्ठति ॥ ४३ ॥ तावत्तन्मुखतोरामनामशुश्रावलक्ष्मणः ॥ रामेणसहितस्तत्र
गत्वातंपर्य्यपृच्छत ॥ ४४ ॥ कोसिकस्मादिहायातोपक्षदाहःकृतोऽधुना ॥ शस्त्रैरतिसुतीक्ष्णैश्चविद्धंकेनांगमस्तिते ॥४५॥ इत्युक्तः
पक्षिराजःसकस्त्वमित्यब्रवीन्नतम् ॥ तमाहलक्ष्मणःसर्ववनवासादिकंनिजम् ॥४६॥ सीतान्वेषणपर्य्यंतंततोरामंनिरीक्ष्यसः ॥ उवाच
रामवृद्धोहमाग्नेयास्त्रप्रहारतः ॥ ४७ ॥ मुमूर्षुर्नहिशक्तोमिबहुभाषितुमक्षमः ॥ तथापिवक्ष्येसंक्षेपाच्छुत्वाकुरुयथोचितम् ॥ ४८ ॥ ज
टायुर्नामगृध्रोहंवाचस्तस्याश्चचातुरः ॥ श्रुत्वाहंसमुपागत्यह्ययुद्धतयथाबलम् ॥ ४९ ॥ निपात्यसरथंभूमौछिन्नास्तस्यभुजामया ॥ त
तःसतुभुजानन्यान्परिकल्यानलास्त्रतः ॥५०॥ मांनिपात्यगतोलंकांरावणोनामराक्षसः ॥ सीतासापिचमांदृष्ट्वापतितंधरणीतले ॥५१॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

म्रियमाणंरुरोदाथप्रार्थयंतीतवास्पदम् ॥ इत्येतत्कथितंसर्वंरामत्वंसंमुखोभव ॥ ५२ ॥ पश्यन्भवंतंचक्षुर्भ्यांत्यजाम्येतत्क
लेवरम् ॥ इत्युक्त्वासरुदन्रामस्तंपस्पर्शस्वपाणिना ॥ ५३ ॥ गृध्रोगतव्यथोरामकरस्पर्शाज्जहावसून् ॥ अथरामोपिविलपञ्जटायुं
काष्ठसंचयैः ॥ ५४ ॥ दग्ध्वादत्त्वोदकंतस्मैहत्वाचैवमृगान्वने॥मांसमादायपक्षिभ्योददौतत्प्रीतयेप्रभुः ॥ ५५ ॥ जटायुरपिदिव्येनावि
मानेनययौदिवम्॥तंदृष्ट्वामुनयःसर्वेदंडकारण्यवासिनः॥५६॥साधुसाध्वितिजल्पंतःप्रशशंसूरवृत्तमम्॥ स्तुवंतोथजटायुंतेवदंत्येतत्प
रस्परम्॥५७॥अहोयद्योगिनांयोगैर्दुष्प्रापंरामदर्शनम् ॥प्राणव्ययेतंसाक्षाद्यत्पश्यन्प्राणाञ्जहौखगः॥५८॥नैवंदशरथस्यापिपितुर्भाग्यम
भूदहो ॥ यदभूद्गृध्रराजस्यमृत्युकालेमहासुखम् ॥५९॥ तस्माद्भक्तिर्हिजंतूनांसर्वसौख्यप्रदायिनी ॥ क्वरामःक्वचगृध्रोसौतथाप्यस्यौ
र्ध्वदैहिकम् ॥६०॥ चकारस्वयमेवात्रभक्तिरेवहिकारणम् ॥ इतिब्रुवंतोमुनयःस्वंस्वमाश्रममाययुः॥६१॥ ॥ इति श्रीभगवद्भक्तिमाहा
त्म्येजटायुचरितंनामसप्तमस्सर्गः ॥ ७ ॥ छ ॥ ॥ अंबरीषकथांवक्ष्येसद्योभक्तिविवर्द्धिनी ॥ राजर्षिरंबरीषोभूदयोध्यायांमहायशाः
॥ १ ॥ विष्णुभक्तोदयायुक्तोदातानीतिमदुत्तमः ॥ यस्यदेशेजनास्सर्वेबालवृद्धातुराअपि ॥ २ ॥ एकादश्यांनिराहाराविष्णुभक्ति
परायणाः ॥ आसन्नृपाज्ञयामिथ्याहिंसानिंदापराङ्मुखाः ॥ ३ ॥ एकदासतुराजर्षिरेकादश्यामुपोषितः ॥ रात्रौजागरणंकृत्वाप्रातः
स्नात्वाथपूजितुम् ॥ ४ ॥ विष्णुंयदोपविष्टःसतदातत्रमहातपाः ॥ दुर्वासाबहुभिःशिष्यैरागतोनृपवेश्मनि ॥ ५ ॥ दृष्ट्वाराजातमायां
तंपाद्याघ्यार्द्यैःसमर्चयत् ॥ उवाचकिंकरोहंतेसाधोकिंकरवाण्यहम् ॥ ६ ॥ इतिश्रुत्वाब्रवीद्वाक्यंदुर्वासामुनिसत्तमः ॥ एकादश्यांम
हाराजशिष्यैःसार्द्धमुपोषितः ॥ ७ ॥ बुभुक्षितोन्नंयाचेत्वामितिश्रुत्वाथभूपतिः ॥ अहोभाग्यमितिप्रीत्याबद्धांजलिपुटोमुनिम् ॥ ८ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

 उवाचभगवन्स्नात्वासमागच्छात्रतेवयम् ॥ इतिश्रुत्वागतःस्नातुंदुर्वासाऋषिसत्तमः ॥ ९ ॥ राजापिपाचयामासभोज्यंसर्वरसान्वितम् ॥
 अथांतेसमुपायातःपुरोधानृपसन्निधौ ॥ १० ॥ राजानमाहभूपाद्यद्वादश्यल्पाततोद्रुतम् ॥ पारणंकुरुनोचेद्धिव्रतमेवनिरर्थकम् ॥११॥
उपोष्यैकादशींयस्तुत्रयोदश्यांतुपारणम् ॥ कुरुतेनिष्फलंतस्यव्रतंत्यक्त्वाऽन्यहस्पृशम् ॥ १२ ॥ इत्युक्तोनृपतिःप्राहपुरोधसमुप
स्थितम् ॥ कथंकुर्यामहंब्रह्मन्पारणंमुनिसत्तम ॥ १३ ॥ दुर्वासाअतिथिःशिष्यैःसहितोऽस्तिनिमंत्रितः ॥ स्नातुंगतस्ततस्तस्मिन्नभु
क्तेममभोजनम् ॥ १४ ॥ कथंस्यादत्रयच्छ्रेयस्तद्ब्रवीतुभवान्मम ॥ इतिश्रुत्वावचस्तस्यराजर्षेःसपुरोहितः ॥ १५ ॥ उवाच
राजन्सत्यंतेनतावद्भोजनंहितम् ॥ परंतुव्रतरक्षार्थंविष्णोःपादोदकेनतु ॥ १६ ॥ पारणंकुरुराजेंद्रनैवंधर्मस्तुहीयते ॥ इतिश्रुत्वाततो
राजाकिंचित्पादोदकंहरेः ॥ १७ ॥ ददौमुखेऽन्नसमयेसमायातोमहामुनिः ॥ ततोराजांजलिंबद्ध्वाक्षमापयितुमुद्यतः ॥ १८ ॥ दुर्वासादं
डमुद्यम्यराजानंहंतुमुद्यतः ॥ ततःकोलाहलोजातोमहांस्तत्रनृपालये ॥ १९ ॥ राजाकृतांजलिपुटस्तूष्णींतस्थौनिजासने ॥ अ
थचक्रंहरेस्तत्ररक्षार्थंनृपतेःस्थितम् ॥ २० ॥ तंतुदुर्वाससंहंतुमिवायातंतदाग्रतः ॥ तंदृष्ट्वासमुनिर्भीत्यादुर्वासाःप्रपलायितः ॥
॥ २१ ॥ राजामंदिरतोबाह्येसमागत्यददर्शतम् ॥ चक्रंकालानलसमंग्रसदेतच्चराचरम् ॥ २२ ॥ ततोमुनिर्महाभीत्याब्रह्माणंशरणंय
यौ ॥ ब्रह्माज्ञात्वातुतच्चक्रमायातमतिसत्वरम् ॥ २३ ॥ स्वयमग्रेसमागत्यवैकुंठंप्रययौसह ॥ तत्रापिविष्णुर्विज्ञायब्रह्माणं
तंमुनिंतथा ॥ २४ ॥ प्रोवाचभगवान्पूर्वंब्रह्माणंशरणागतम् ॥ ममाप्येतदशक्यंत्वंजानीहिकमलासन ॥ २५ ॥ मयैवाज्ञा
पितंचक्रंप्रतिज्ञायपुराविधे ॥ योमेभक्तोऽस्तिभुवनेभजतेमामनन्यभाक् ॥ २६ ॥ त्वंरक्षस्वचतंचक्रजहित्वंतज्जिघांसकम् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तथाप्युपायंकुर्वेहंत्वमागच्छमयासह ॥ २७ ॥ एषोप्यागच्छतुमुनिर्गच्छामोवयमंतिकम् ॥ अंबरीषस्यराजर्षेःसचक्रंशमयिष्यति ॥ २८ ॥ ततःसमागताःसर्वेब्रह्मविष्णुमुनीश्वराः ॥ चक्रंचापिनृपद्वारिराजातावत्तथैवसः ॥ २९ ॥ आसनेनिवसन्नासीज्जलपानमपित्यजन् ॥ दृष्ट्वातानंबरीषस्तुहर्षेणमहतावृतः ॥ ३० ॥ पूजयामासविधिवद्ब्रह्माणंकेशवंमुनिम् ॥ पूजितोभगवानाहराजन्मुनिरयंक्षुधा ॥ ३१ ॥ त्वांहंतुमुद्यतस्तस्माच्चक्रमेतवरक्षकम् ॥ मुनिंहंतुमुपाधावत्सगतोब्रह्मसंनिधिम् ॥ ३२ ॥ ब्रह्मासमागतोभीतंनीत्वाहंत्वामिहागतः ॥ चक्रंनिवर्तयस्वत्वंशीघ्रंभोजयितुंमुनिम् ॥ ३३ ॥ स्वयंभुक्त्वायथाकामंकुरुराज्यमकंटकम् ॥ एषब्रह्मासुरश्रेष्ठोवरंदातुंतवागतः ॥ ३४ ॥ ब्रूहिकिंतेवरंदद्यादंबरीषप्रियोसिमे ॥ इतिश्रुत्वावचस्तस्याविष्णोराजर्षिसत्तमः ॥ ३५ ॥ उवाचवचनंभक्त्याप्रणिपत्यकृतांजलिः ॥ धन्योहमद्यदेवेशकृतार्थोहंनसंशयः ॥ ३६ ॥ अतःपरोवरःकोन्योवर्ततेजगतीतले ॥ यत्पश्याम्यागतंगेहंब्रह्माणंत्वांनृचक्षुषा ॥ ३७ ॥ तथाप्येकंवरंयाचेत्वयिभक्तिर्दृढास्तुमे ॥ इत्युक्तौतौब्रह्मविष्णूराज्ञेदत्त्वातुतंवरम् ॥ ३८ ॥ जग्मतुःस्वस्वभवनमंबरीषोपितंमुनिम् ॥ दुर्वाससंभोजयित्वाविसृज्यबुभुजेस्वयम् ॥ ३९ ॥ अहंकारंविनिर्धूयसर्वंविष्णुमयंजगत् ॥ पश्यञ्छशासपृथिवींविष्णुभक्तिपरायणः ॥ ४० ॥ इत्येतदेकमाख्यानमंबरीषविचेष्टितम् ॥ ४१ ॥ इति श्रीभगवद्भक्तिमाहात्म्येंऽबरीषचरितंनामाष्टमःसर्गः ॥ ८ ॥ छ ॥ ॥ अथापरंप्रवक्ष्यामितद्भक्तिचरितंपुनः ॥ यथाप्रसिद्धंलोकेस्तिमहदाश्चर्य्यमुत्तमम् ॥ १ ॥ कश्चित्कतिपयग्रामस्वामिकश्चास्थितोनृपः ॥ तस्यैकाकन्यकाजातापुत्रतोप्यतिहर्षणा ॥ २ ॥ सकालेतनयोद्वाहेकर्म्मकारयितुंनृपः ॥ महोत्साहात्प्रवृत्तोभूत्तदासातनयाब्रवीत् ॥ ३ ॥ पितरंत्यक्तलज्जासानाहमन्यंपतिंवृणे ॥ अंबरीषमृतेतातस

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्यमेतन्नसंशयः ॥ ४ ॥ अथान्यस्मैददासित्वंत्यक्षाम्येतत्कलेवरम् ॥ इतिश्रुत्वावचस्तस्याःसुतायाअतिविस्मितः ॥ ५ ॥
पत्नींप्राहसुतायास्तेकोयंवैमतिविभ्रमः ॥ अंबरीषोमहाराजःसप्तद्वीपाधिपोमहान् ॥ ६ ॥ सकथंतनयामेनांमत्तःप्रतिग्रहीष्य
ति ॥ इमांवार्तामपिशुभेतदग्रेकोवदिष्यति ॥ ७ ॥ तस्माद्बोधतदापुत्रीशपथंकृतवत्यपि ॥ पतिश्चेदंबरीषोमेयदान्योमेपतिर्भवेत्
॥ ८ ॥ तदोद्बंधनतोमातर्मरिष्यामिनसंशयः ॥ सत्यमेतन्नसंदेहःशपामिचरणौतव ॥ ९ ॥ इतिश्रुत्वावचस्तस्याःपुत्र्यामा
तातिविस्मिता ॥ निवारयामासपतिंतस्यावैवाहिकेविधौ ॥ १० ॥ राजापिविनिवृत्तोभूच्चिंतयातोदिवानिशम् ॥ लेभेनशर्म्मकुत्रा
पितांमेनेहृदिशल्यवत् ॥ ११ ॥ कर्णेकन्यकयाचैतद्वृत्तंपौरजनैःश्रुतम् ॥ ततोप्यन्यत्रानिर्गच्छद्ग्रामांतरमुपागतम् ॥ १२ ॥ संति
यद्यपिमेपत्न्यःसुरूपाश्चपतिव्रताः ॥ तथापितवपुत्रीसामत्तोऽन्यंनाभिकांक्षति ॥ १३ ॥ अतस्तांप्रतिगृह्णामिरक्षार्थंस्वव्रतस्यच ॥
व्रतमेतत्तुराजन्मेयोयोयद्यदभीप्सति ॥ १४ ॥ तस्मैतस्मैप्रदास्यामिशक्त्यातत्तन्नसंशयः ॥ तस्माद्गच्छस्वभवनंमुहूर्तंनिश्चिकायत
म् ॥ १५ ॥ लिखित्वाप्रेषयाशुत्वंदूतमेष्याम्यहंत्वरम् ॥ इतिश्रुत्वाल्पनृपतिःसमुत्थायकृतांजलिः ॥ १६ ॥ अहोनगंतुंभवतांयो
ग्योहंदासवत्तव ॥ आनयाम्यहमेवात्रसुतांतांनात्रसंशयः ॥ १७ ॥ महाराजनतत्रत्वंगंतुमर्हसिमेगृहे ॥ इतिश्रुत्वावचस्तस्यप्राहरा
जर्षिसत्तमः ॥ १८ ॥ अहोमानावमानौतुस्यातांलौकिककर्म्मणि ॥ भक्तिप्रसंगेह्येतौतुकुर्वाणोनहिसत्यभाक् ॥ १९ ॥ भगवान्जग
तांनाथोविधिविद्योमहत्तरः ॥ गणिकागोपशबरीकुब्जासंगरतोह्यभूत् ॥ २० ॥ तथेयंमयिभक्तातेपुत्रीराजन्नसंशयः ॥ तत्रैवागत्य
तत्पाणिंग्रहीष्यामिविधानतः ॥ २१ ॥ किंधनैर्नसमोसित्वंधनेनाहंसुपूजितः ॥ तवैवचेदृशीसंपत्स्याद्भवान्नचमेसमः ॥ २२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कस्येयंश्रीस्थिरालोकेकोवेत्तिहरिचेष्टितम् ॥ तस्मान्मच्छासनंचेदमंगीकृत्यव्रजाशुभोः ॥ २३ ॥ इत्युक्तःक्षुद्रनृपतिःजगामनिज
मंदिरम् ॥ हर्षेणमहतायुक्तःपत्नींसर्वमुवाचह ॥ २४ ॥ उक्त्वातस्यैनिजान्बंधूनाहूयाथपुरोहितम् ॥ निश्चीयसुमुहूर्तंसःप्रेषयामास
तंद्रुतम् ॥ २५ ॥ पुरोहितंचांबरीषसन्निधौनृपतिस्तदा ॥ दृष्ट्वापत्रंसराजर्षिरंबरीषोमहामनाः ॥ २६ ॥ वैवाहिकंवस्तुपतिंगृहीत्वाबंधु
भिर्युतः ॥ जगामवारयोषिद्भिर्वाद्यैःसंनर्तकैःसह ॥ २७ ॥ तत्रगत्वामहोत्साहात्प्रतिगृह्यचतांनृपः ॥ समानीयगृहेऽन्यत्ततस्यैनिर्मायद
त्तवान् ॥ २८ ॥ दासीर्दासांश्चबहुशोग्रामानन्यास्त्रियाइव ॥ ततःसानूतनस्त्रीवैराज्ञःपूजागृहागमे ॥ २९॥ आज्ञांगृहीत्वाथागत्यदृष्ट्वामू
र्तिंहरेरिह ॥ प्रणम्यतुमुदासाध्वीस्वकर्म्मप्रशशंससा ॥ ३० ॥ अथसारात्रिशेषेतुप्रत्यहंहरिमंदिरे ॥ समागत्यचसंमार्ज्यपूजोपकरणा
दिकम् ॥३१॥ संपाद्यस्वगृहंगत्वातस्थौसेवापरायणा ॥ गतोथनृपतिःपूजांकर्तुंश्रीपतिमंदिरे ॥३२॥ दृष्ट्वापूजोपकरणंसर्वंसंपादितंस्व
यम् ॥ दिनद्वयंततोराजाप्राहकोयंगृहेहरेः ॥३३॥ समागत्योपकरणंसंपाद्यव्रजतिस्वयम्॥ततःपूजागृहस्थस्तुविप्रःप्राहनृपंमुदा॥३४॥
राजंस्तवैवपत्नीयंकनिष्ठायासमागता ॥ सारात्रिशेषेऽनुदिनंसमागत्यात्रमंदिरे॥३५॥सर्वपूजोपकरणंसंपाद्यव्रजतिस्वयम् ॥ इतिश्रुत्वांं
बरीपस्तुतुतोपाकिलमानसे ॥ ३६ ॥ तांपत्नीमात्मसदृशींमेनेराजर्षिसत्तमः॥ गत्वातद्भवनंतस्यैददावाज्ञांप्रसन्नधीः ॥३७॥समर्च्चयहरिं
भक्त्यात्वमप्यत्रैववेश्मनि ॥ निर्मायागमयद्वेश्मदीयतेऽत्रैवतेप्रिये ॥ ३८ ॥ अहमत्त्यागमिष्यामिनित्यमत्रैवतेंतिके ॥ इत्युक्तासा
मुदायुक्ताप्रणनामपतिंसती ॥ ३९ ॥ राजापिसर्वमकरोत्तदासातत्रसर्वदा ॥ हरिभक्तिपराराज्ञीपतिसेवापरायणा ॥ ४० ॥ पूजयामा
सगोविंदंरसेतत्रैवभूपतिः ॥ ज्ञात्वैतत्प्रेमभूपस्यपत्न्योमान्यामहीपतेः ॥ ४१॥ ताभिःस्वस्वगृहेविष्णोःपूजारब्धाप्रयत्नतः ॥ एवंगते

= पूजकः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

षुकालेषुसाक्षुद्रनृपतेःसुता ॥ ४२ ॥ पत्नीराज्ञोतिसुभगाकन्यामेकामजीजनत् ॥ नृपतिःपरमप्रीत्यानामकर्मादिपुत्रवत् ॥ ४३ ॥
कारयामासधर्मात्मावहुदानपुरस्सरम् ॥ श्रीमतीतिचनाम्नासापित्राप्रख्यापिताभुवि ॥ ४४ ॥ साकन्याववृधेकालेरूपेणात्यंतसुंदरी ॥
शीलस्वभावगांभीर्य्यैर्भक्त्याश्रीरिवरूपिणी ॥ ४५ ॥ तांदृष्ट्वासुंदरींकन्यांनारदःपर्वतस्तथा ॥ अयाचेतांमहाराजन्नंवरीषसुतांत
दा ॥ ४६ ॥ अंवरीषोऽब्रवीद्वाक्यंविनयादतिनम्रधीः ॥ अहोभवंतौयाचेतेकन्यैकाममवेश्मनि ॥ ४७ ॥ कथंद्वाभ्यांप्रदातव्यातस्मा
त्किंचिद्ब्रवीम्यहम् ॥ स्वयंवरेणविधिनाविवाहोस्याभविष्यति ॥ ४८ ॥ यदायंवरयेदेषातस्मैदास्याम्यसंशयम् ॥ इतिश्रुत्वातुतौ
द्वौतुनारदःपर्वतःसतु ॥ ४९ ॥ गतौपृथक्पृथक्कृष्णमूचतुःस्वमनोरथम् ॥ कृष्णाहंपर्यटन्भूमावपश्यत्कन्यकांशुभाम् ॥ ५० ॥
अंवरीषस्यराजर्षेस्तांययाचेसुतांतदा ॥ समामुवाचराजर्षिःस्वयंवराविधानतः ॥ ५१ ॥ दास्यामितनयामेतांयस्मैमालांप्रदास्यति॥
इतिज्ञात्वाहमायातोविचार्य्यहृदयेपुनः ॥ ५२ ॥ इयंतुवैष्णवीकन्याध्यायतित्वामहर्निशम् ॥ तवरूपधरोयःस्यात्तमेववरयिष्यति ॥
॥ ५३ ॥ ततोममशरीरंतुकुरुष्वसदृशंविभो ॥ इतिप्रत्येकमेवोभौभगवंतंसमूचतुः ॥ ५४॥ भगवान्प्रददौताभ्यांशरीरंस्वसमंपुनः॥
मुखंवानरतुल्यंतुजातमद्भुतमेतयोः ॥ ५५ ॥ अथस्वयंवरेतस्याःसभायांतावुभावपि ॥ भगवानपितद्भक्त्याभूत्वाचमनुजाकृतिः ॥
॥ ५६ ॥ कोटिकामप्रतीकाशःश्यामःकमललोचनः ॥ शुवासर्वांगसुभगस्तत्रागत्यास्थितोभवत् ॥ ५७ ॥ अथसानृपतेःकन्या
धीमतीविष्णुतत्परा ॥ मालांगृहीत्वासदसिसमायातातिहर्षिता ॥ ५८ ॥ दृष्ट्वातंभगवंतंसासाक्षाद्विष्णुंनराकृतिम् ॥ प्रणम्यमनसामा
लांतस्यकंठेन्यवेशयत् ॥ ५९ ॥ ततोजयाशिषांनादस्तुमुलःसमपद्यत ॥ प्रतिगृह्यचतांकन्यामागतोभगवान्हरिः ॥ ६० ॥ तत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्तावपितंज्ञात्वाभगवंतंसमागतम् ॥ स्वमुखंवानरस्याभंज्ञात्वादेवंययौद्रुतम् ॥ ६१ ॥ तत्रगत्वाब्रवीत्क्रुद्धोनारदोविष्णुमप्रि
यम् ॥ छलयित्वातुमामेतांयथात्वंह्रतवानसि ॥ ६२ ॥ तथातवापिच्छलतःकांतामपिहारिष्यति ॥ कोपिदैत्योनसंदेहःपुनः
शृणुवदाम्यहम् ॥ ६३ ॥ यन्मेमुखंवानराभंकृतवानसिमेप्रभो ॥ भवानपिसखाभूत्वावानरस्यकियद्दिनम् ॥ ६४ ॥
तत्साहाय्यंकांक्षमाणोनिवसिष्यतिभूतले ॥ इत्येवंवचनंतस्यश्रुत्वासभगवान्हरिः ॥ ६५ ॥ शांतिपूर्वमुवाचेदंनारदायमहात्मने ॥
अहोनारदसत्यंतेभाषितंनात्रसंशयः ॥ ६६ ॥ भविष्यतिममाप्येतद्भाविकार्य्यस्यगौरवम् ॥ एषांवरीषतनयावव्रेमांपतिमुत्त
मा ॥ ६७ ॥ मातृवक्त्राच्छतवतीध्यायंतीमामहर्निशम् ॥ अतोनयोग्यायुवयोर्विचार्य्यैवंकृतंमया ॥ ६८ ॥ क्षंतव्यमेतद्यु
वाभ्यांपूर्वमुक्तंपुरस्तुवाम् ॥ इतिश्रुत्वाप्रसन्नौतौतुष्टुवातेतथेश्वरम् ॥ ६९ ॥ भगवानपिवैकुंठेरेमेपत्न्यातयासह ॥ इत्येतत्क
थितंसर्वमंवरीषस्यचेष्टितम् ॥ ७० ॥ महदाश्चर्य्यभूतंचहरिभक्तिप्रदायकम् ॥ श्रुत्वैतत्परमाख्यानंसकष्टान्मुच्यतेनरः ॥ ७१ ॥
सर्वान्कामानवाप्नोतिविष्णुभक्तिप्रदायकान् ॥ ७२ ॥ इति श्रीभगवद्भक्तिमाहात्म्येंऽबरीषचरितंनामनवमःसर्गः ॥ ९ ॥ ॥ छ ॥
विदुरस्त्रीकृतांभक्तिंवक्ष्येहंशृणुभक्तितः ॥ एकदाविदुरेयातेक्वचिन्निजगृहादथ ॥ १ ॥ विदुरस्त्रीगृहेनग्नाकुर्वतीस्नानमादरात् ॥ अ
थांतरेसमायातःकृष्णोद्वारिसमाह्वयत् ॥२॥ विदुरोस्तिगृहेनेतिश्रुत्वासाविदुरप्रिया ॥ तथैवोत्थायदुद्रावगताकृष्णस्यसन्निधिम् ॥३॥
आगच्छायातिसोप्यत्रेत्युक्त्वाधृत्वाकरंहरेः ॥ निनायभवनेसातुविस्मृतात्मकलेवरा ॥ ४ ॥ श्रीकृष्णदर्शनौत्सुक्यादुन्मत्तेवाभव
त्सती ॥ ततःपीतांबरंकृष्णोदधौतदुपरिस्वकम् ॥ ५ ॥ उवाचतांततःकृष्णोभोज्यंचेदस्तिदेहिमे ॥ ततोतिहर्षात्तद्वस्त्रंवेष्टिताकद

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

लीफलम् ॥ ६ ॥ समादायोपविष्टाग्रेभोजयामासकेशवम् ॥ रंभाफलत्वचंनीत्वाभोजनायददौकरे ॥ ७ ॥ फलंतत्याजभूमौसाबुभु
जेभगवान्स्वयम् ॥ अस्मिन्नेवमुहूर्तेतुविदुरःसमुपागतः ॥ ८ ॥ ददर्शतांप्रियांभार्यांकृष्णपीताम्बरावृताम् ॥ भोजयंतींत्वचंकृष्णं
त्यजंतींतत्फलंपुनः ॥ ९ ॥ उवाचतांमहोद्विग्नःपत्नींनिर्भर्त्सयन्मुहुः ॥ अरेफलत्वचंकस्माद्भोजयिष्यसित्वंहरिम् ॥ १० ॥ इदंपी
तांबरंचास्यकुतःपरिदधासिच ॥ इत्युक्त्वातुबुबोधाथजगर्हात्मानमात्मना ॥ ११ ॥ उत्थायांतर्गृहेगत्वापरिधायस्ववाससी ॥ पी
तांबरंननामाथशिरस्याधायसामुहुः॥१२॥ अथकृष्णायविदुरोददौतत्फलमुत्तमम् ॥ दूरीकृत्यत्वचंपश्चात्पप्रच्छमधुराक्षरम् ॥१३॥
ततःकृष्णोब्रवीत्प्रेम्णानत्वचासदृशंफलम् ॥ इत्युक्त्वातांजुहावाथविदुरस्त्रींहसन्प्रभुः ॥ १४ ॥ नायातिलज्जितागेहात्प्रार्थयंतींहरिंमु
हुः॥एकदापांडवार्थंतुश्रीकृष्णोहस्तिनापुरे॥१५॥दुर्योधनगृहेनीतिंवक्तुंतंसमुपागतः॥ततोनस्वीचकाराथकृष्णोक्तंधृतराष्ट्रजः ॥१६॥
एवंकथाप्रसंगेनमध्याह्नंसमुपागतम् ॥ दुर्योधनगृहेपाकशालायांभोजनायवै ॥ १७ ॥ श्रीकृष्णंप्रार्थयामासुःकुरवोविनयान्विताः ॥
धृत्तराष्ट्रोपिबहुधाकृष्णंप्राहातिलज्जितः ॥ १८ ॥ भुक्त्वागच्छमहाबाहोतवतुल्यावयंचते ॥ इत्युक्तोभगवानाहसत्यमुक्तंत्वया
नृप ॥ १९ ॥ परंतुयोनिसंबंधान्नचप्रीत्यानधर्म्मतः ॥ प्रीतिभोज्यानिचान्नानियावद्भोज्यानिचापरे ॥ २० ॥ नचत्वंप्रीयसेराजन्न
हिचोपहृतावयम् ॥ इत्युक्तोधृतराष्ट्रस्तुसर्वेन्येकुरवस्तथा ॥ २१ ॥ तूष्णींस्थिताःस्वकर्म्माणिस्मृत्वाकिंचिन्नचाब्रुवन् ॥ तत
उत्थायभगवान्विदुरस्यगृहंगतः ॥ २२ ॥ तमाहविदुरंभक्तंश्रीकृष्णोभक्तवत्सलः ॥ बुभुक्षितोहंभोक्तुंमेदेहियद्यस्तिकिंचन ॥२३॥
इत्युक्तोविदुरोभक्त्यासपत्नीकोतिहर्षितः ॥ स्वार्थंत्यक्ताशाकमात्रंदारिद्र्याद्भोक्तुमुद्यतः ॥ २४ ॥ एतस्मिन्नंतरेकृष्णःसमागत्येदम्

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ब्रवीत् ॥ ततोऽतिहर्षात्संस्कृत्यस्थलंतवपुरातनम् ॥ २५ ॥ काष्ठपीठंनिधायाथभगवंतमुवाचह ॥ अद्यमेशाकमात्रंतुजातमस्तिजनार्दन ॥ २६ ॥ कथंतत्तवदास्यामिभोक्तुंतिष्ठक्षणंततः ॥ द्रुतमन्नंसाधयामिततोभोक्ष्यसिमाधव ॥ २७ ॥ ततःसभगवान्शीघ्रमुत्थायेतिवदन्हसन् ॥ अहोशाकप्रियंमांत्वंनजानासिविशेषतः ॥ २८ ॥ तवशाकेभक्तिपूर्वंयत्तोषोममजायते ॥ नत्वभक्त्यान्नकूटस्थकृतःसर्वरसःप्रियः ॥ २९ ॥ इत्युक्त्वाजलमादायप्रक्षाल्यचरणौहरेः ॥ गत्वामंदिरमध्येतुपीठेसमुपविष्टवान् ॥ ३० ॥ विदुरस्त्रीतदाप्रेम्णापात्रेशाकंनिधायसा ॥ कृष्णाग्रेस्थापयामासभक्त्याहर्षाश्रुमालिनी ॥ ३१ ॥ तदासबुभुजेशाकंभगवान्भक्तवत्सलः ॥ भुक्त्वातृप्तिंगतोस्म्यद्यमहतीमितिचासकृत् ॥ ३२ ॥ वदन्नुत्थायहस्तौचप्रक्षाल्यविदुरःसच ॥ पूगीफलस्यखंडानिददौतन्मुखशुद्धये ॥ ३३ ॥ विसृज्यभगवंतंतंसस्त्रीकोविदुरोमहान् ॥ कृष्णभुक्तावशिष्टंयदुच्छिष्टंबुभुजेस्वयम् ॥ ३४ ॥ एवंप्रभावोभक्तेस्तुदृश्यतेस्मिन्युगेयुगे ॥ क्वचत्रैलोक्यनाथोसौकृष्णोलक्ष्मीपतिःस्वयम् ॥ ३५ ॥ क्वचशाकाशनंचात्रभक्तिरेवहिकारणम् ॥ ३६ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येविदुरस्त्रीचरितंनामदशमःसर्गः ॥ १० ॥ ॥ छ ॥ सुदाम्नोभक्तिमाहात्म्यंवक्ष्येसर्वमनोरमम् ॥ यच्छ्रुत्वाभक्तिमाप्नोतिनिर्द्धनोधनमाप्नुयात् ॥ १ ॥ द्वारकायाःसमीपेतुसुदामानामवैद्विजः ॥ सर्वशास्त्रार्थतत्त्वज्ञःसदासत्कर्मतत्परः ॥ २ ॥ परंतुकर्म्मदोषेणब्राह्मणोस्त्यतिनिर्धनः ॥ प्रत्यहंभोजनमपियस्यगेहेऽस्तिदुर्लभम् ॥ ३ ॥ अयाचितव्रतेनैवतथापिविजहौद्विजः ॥ एकदातस्यपत्नीतुकृशानाहारतःसती ॥ ४ ॥ वासःपरिदधानातुशतखंडंजरत्तरम् ॥ उवाचपतिमत्यर्थंपीडिताक्षुधयापुनः ॥ ५ ॥ अप्यकार्यशतंकृत्वाभर्तव्यानांतुपोषणम् ॥ कर्तव्यमिति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN.

शास्त्राज्ज्ञातंत्वत्तःश्रुतवतीह्यहम् ॥ ६ ॥ त्वमिदानींशरीरंस्वंमुंचस्यतीवदुर्बलः ॥ अनाहारात्कथंनैवजानासीत्यद्भुतंमहत् ॥ ७ ॥
इतिश्रुत्वा वचस्तस्याःप्रियायाःकरुणान्वितः ॥ उवाचसत्यमेतत्त्वंभाषसेनात्रसंशयः ॥ ८ ॥ जानाम्यवश्यंतेतन्विस्वशरीरस्य
चाप्यहम् ॥ परंतुनैवपश्यामियोपिदद्याद्धनंमम ॥ ९ ॥ अयाचितव्रतंचैवत्यक्तुंनोत्सहतेमनः ॥ इत्युक्त्वासापुनःप्राहपतिंप्रेमा
न्वितंहितम् ॥ १० ॥ एकस्मिन्दिवसेत्वंतुमामवोचःकथांतरे ॥ वसुदेवसुतःकृष्णोऽवंत्यांसांदीपनेर्गुरोः ॥ ११ ॥ यदापाठी
तदातत्रसहपाठीवसेस्मह ॥ ससर्वेभ्योऽधिकोजातोविद्ययाचबलेनच ॥१२॥ आनीयाब्धौमृतंपुत्रंगुरवेदक्षिणामदात् ॥ इदानींद्वारका
यांचराजाजातोमहाधनः ॥ १३ ॥ दीनानाथगणेभ्यस्तुददातिधनमीप्सितम् ॥ इतित्वन्मुखतोनाथश्रुतमस्तिमयापुरा ॥ १४ ॥
तस्मात्तत्रैवगच्छत्वंसतेदास्यतिपुष्कलम् ॥ इतितस्यावचःश्रुत्वासुदामाप्राहतांप्रियाम् ॥ १५ ॥ सत्यमुक्तंत्वयाभद्रेयामितत्रनसंशयः ॥
परंतुसतथैश्वर्यंप्राप्यद्रक्ष्यतिमांकिमु ॥ १६ ॥ तथापियामिकिंतस्मैदास्यामिपारितोषिकम् ॥ विचारयतुगेहेऽस्तिकिंचित्तद्वस्तुसं
प्रति ॥ १७ ॥ इत्युक्त्वासातदाछिन्नशालिक्षेत्रेगतासती ॥ उंछवृत्त्याथधान्यंसाविचिंत्यप्रस्थकार्द्धकम् ॥ १८ ॥ आनीयपृथुकंतस्यानि
र्ममेचकरेणसा ॥ ततःकस्मिन्पटेबद्ध्वादास्याम्येतद्विचिंत्यसा ॥ १९ ॥ परीक्ष्यहस्तमात्रस्तुयत्रासीत्स्वपटोदृढः ॥ तंगृहीत्वातुत
त्रैवबद्ध्वातान्पृथुकान्सती ॥ २० ॥ ददौपत्यैगृहीत्वेदंगच्छयत्रास्तितेसखा ॥ इत्युक्तःसगृहीत्वातंसुदामापृथुकंययौ ॥ २१ ॥ ततो
द्वारवतींतत्रकगच्छामीतिविचिंतयन् ॥ सर्वेसमानादृश्यंतेप्रासादाःपर्वतोपमाः ॥ २२ ॥ द्वारिसर्वत्रतिष्ठंतिद्वारपालागृहेगृहे ॥ कथंगं
तुंप्रदास्यंतिइत्येवंहृदिचिंतयन् ॥ २३ ॥ गच्छन्संप्राप्यश्रीकृष्णगृहद्वारिसदैवतम् ॥ दृष्ट्वातान्द्वारपालांस्तुतेजसाप्रष्टुमक्षमः ॥ २४ ॥

चाहतेनाष्टतम।

भक्तोरमैः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तूष्णींस्थित्वासुदामातुपप्रच्छुस्तेतमादरात् ॥ दृष्ट्वादरिद्रंविकलंवस्त्रखंडावृतंकटौ ॥ २५ ॥ विचारयंतोनेदृग्वैकोऽप्यस्तिचनरः
पुरे ॥ किंपुनर्ब्राह्मणस्तस्मात्कस्मादेषसमागतः ॥ २६ ॥ संचिंत्यमनसाचैवंतमाहुर्द्वारपालकाः ॥ कोभवान्कुतआयाति
किंवात्रास्तिप्रयोजनम् ॥ २७ ॥ इतिशुश्रूषवोविप्रवर्यंविज्ञापयामहे ॥ इतिश्रुत्वावचस्तेषांविनयेनसमन्वितः ॥ २८ ॥ हृष्ट
स्तुतोपश्रीकृष्णोनासौधनमदान्वितः ॥ यस्यभृत्याद्वारपालाएवंविनयवादिनः ॥ २९ ॥ इत्युक्त्वामनसातेभ्यउवाचमुदितो
द्विजः ॥ अहोसुदामानाम्नाहंसखाकृष्णस्यवैद्विजः ॥ ३० ॥ द्रष्टुमिच्छामितन्मित्रमेवंमेत्रमनोरथः ॥ इतिश्रुत्वाचतेसर्वेमनसै
तदसंभवम् ॥ ३१ ॥ यद्वासनांतुकोवेदचेष्टितंजगतीपतेः ॥ दीनानाथजनेप्रेमतस्याऽत्यर्थंहिदृश्यते ॥ ३२ ॥ वयंविज्ञापयामस्तंत
स्याज्ञैपाहिवर्तते ॥ दीनोवादुःखितोवापिपरसंतापितोथवा ॥ ३३ ॥ विज्ञाप्यस्तत्क्षणादेवनोपेक्ष्यःसमयोत्रभीः ॥ इतिनिश्चित्यमन
सातेपांमध्येजरत्तरः ॥ ३४ ॥ गत्वांतःपुरमध्येतुगृहाद्वाह्योस्थितोब्रवीत् ॥ जयशब्दंसमुच्चार्य्यनमस्कृत्यकृतांजलिः ॥ ३५ ॥ देव
देवागतोद्वारिद्विजोदीनोऽतिनिर्द्धनः ॥ उक्तवानस्तिमित्रंमेश्रीकृष्णंमेप्रदर्शय ॥ ३६ ॥ नाम्नासुदामेत्येवंतुश्रुत्वावैतत्क्षणात्प्रभुः ॥
पद्मयालालितपदःपर्यंकशयनेस्थितः ॥ ३७ ॥ अर्द्धनिमीलिताक्षस्तुतदासमुखनिद्रया ॥ श्रुत्वातस्यवचस्तूर्णंक्वसुदामासखामम ॥
॥ ३८ ॥ वदन्नेवंमुहुर्द्वारिसमायातोद्रुतंहरिः ॥ दृष्ट्वातंससमाश्लिष्यगृहीत्वापाणिनाकरम् ॥ ३९ ॥ निनायांतःपुरेतत्रनिवेश्यस्वा
सनोत्तमे ॥ पद्मामाहानयजलंपादौप्रक्षालयाम्यहम् ॥ ४० ॥ इतिश्रुत्वामहालक्ष्मीरुक्मिणीरूपधारिणी ॥ आनीयस्वर्णभृंगारंपादौ
धृत्वाप्रणम्यसा ॥ ४१ ॥ क्षालयामासकृष्णस्तुभृंगारेणददौजलम् ॥ विपादिकाभिःखिन्नाभ्यांकुंचिकाभ्यांचरुक्मिणी ॥ ४२ ॥

अंघ्रिपा
२शिशयग

एते विद्रालपद्या० भृंगारेणाकरवो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

आगे-चना
गुरुमात

कोमलाभ्यांकराभ्यांसापादौप्रक्षाल्ययत्नतः ॥ स्वांचलैःपादसंलग्नंजलंसंप्रोक्ष्यमूर्द्धनि ॥ ४३ ॥ सिषेवतत्पादजलंभक्त्याकृष्णस्तुतं
द्विजम् ॥ उपविश्यस्वपर्य्यंकेसुदामानमुवाचह ॥ ४४ ॥ अहोददौमदर्थंयत्स्नेहेनाथप्रजावती ॥ तद्देहिमेसखेपूर्वंपश्चाद्वार्ताभवि
ष्यति ॥ ४५ ॥ इत्युक्तःसोतिसंकोचात्पृथुकान्नंनिगृह्यच ॥ स्थितस्तदाहरिर्हस्ताद्बलेनस्वयमाददे ॥ ४६ ॥ चीरेबद्धंतुनिष्का
श्यप्रशशंसमुहुर्मुहुः ॥ मुष्टिमेकंमुखेदत्त्वाबुभुजेभगवान्स्वयम् ॥ ४७ ॥ पुनर्ग्रहीतुमुद्युक्तोरुक्मिणीतंन्यवारयत् ॥ सुदामानमथो
वाचवृत्तांतंगुरुवेश्मनः ॥ ४८ ॥ स्मरसित्वंसखेतत्रचेंधनार्थंगतावयम् ॥ इंधनानिगृहीत्वातावागतौचयदापथि ॥ ४९ ॥ समाग
तातिवृष्टिर्वैज्ञात्वानौवनगौगुरुः ॥ कृपयास्वयमायातःपथ्यावांद्रष्टुकामुकः ॥ ५० ॥ समागत्यस्थितश्चनौदृष्ट्वासमुमुदेगुरुः ॥ गृही
त्वानौततोगत्वागृहेसप्रत्यषेधत ॥ ५१ ॥ अद्यारभ्यनगंतव्यंभवद्भ्यामिंधनायभोः ॥ इत्यादीनिविचित्राणिसुखान्यासंगुरोःकुले ॥
॥ ५२ ॥ एवंसंस्मृत्यसंभाष्यभोजयित्वाविसर्जितः ॥ सुदामाहरिणाचाथद्वारवत्याःसनिर्गतः ॥ ५३ ॥ चिंतयामासमार्गेसश्रीकृ
ष्णचरितंसुधीः ॥ अहोएवंमहाह्लादंकृत्वायत्रददौधनम् ॥ ५४ ॥ तन्मेधनमदश्चेत्स्याज्ज्ञात्वोपकृतवान्हरिः ॥ एवंनिश्चित्यमनसा
समागत्यनिजंपुरम् ॥ ५५ ॥ नापश्यत्स्वकुटींतत्रप्रासादंगिरिसन्निभम् ॥ ददर्शराजवेश्माभंद्वारिद्वास्थैःसुरक्षितम् ॥ ५६ ॥ सुव
र्णयष्टिहस्तैश्चभृत्यैश्चेतस्ततःपुनः ॥ शिक्ष्यंतेऽन्येचभृत्यावैदानमानसमेधिताः॥५७॥ एवंदृष्ट्वासुदामाथप्रासादंस्वंचसर्वशः ॥ दिशोवि
भ्रामंचितातौनलेभेस्वकुटिंतदा ॥ ५८ ॥ अट्टालिकायांतत्पत्नीस्थितातंसाददर्शह ॥ स्वर्णयष्टिधरान्प्राहतंद्विजंशीघ्रमानय॥५९॥
इत्युक्तास्तेगतास्तूर्णंसुदामानंबभाषिरे ॥ समागच्छद्विजश्रेष्ठराज्ञीत्वांद्रष्टुमर्हति ॥ ६० ॥ एवमुक्तःसुदामातुचकंपेभयविह्वलः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

उवाचतानहोकिंमेदर्शनेनकरिष्यति ॥ ६१ ॥ राज्ञामंतःपुरेनैवगंतव्यंविदुषासदा ॥ एवंवदंतंसस्मीतंनिःश्वरंतंशनैःशनैः ॥ ६२ ॥ गृहीत्वाविभयाद्दूतास्तत्पत्नीनिकटेयथुः ॥ दृष्ट्वातंसासमुत्थायएहिकांतेतिभाषिणी ॥ ६३ ॥ जग्राहतंकरेणाथस्वासनेसंनिवेश्य तम् ॥ उवाचकृष्णचरितमेतत्सर्वंतवैवभोः ॥ ६४ ॥ अहंतवप्रियाभार्य्याश्रीकृष्णसविधेपतिम् ॥ भवंतंप्रेषितवतीगतेतत्रभवत्य थ ॥ ६५ ॥ आगत्यकृष्णभृत्याश्चनिर्मायैतद्गृहंतव ॥ दत्त्वावासोन्नभोज्यानितथालंकरणानिच ॥ ६६ ॥ दासीदासांश्चशतशःको शेवित्तंतथैवच ॥ दत्त्वाययुस्तेत्वांदृष्ट्वाप्रसन्नस्तेसखाद्विज ॥ ६७ ॥ श्रुत्वैतद्वचनंतस्याःस्वस्थचित्तोभवत्तदा ॥ उवाचद्वारकाधीय त्कृष्णेनाह्लादितःस्वयम् ॥ ६८ ॥ पादप्रक्षालनंदेव्यारुक्मिण्याभक्तिपूर्वकम् ॥ पृथुकान्नस्यकृष्णेनभोजनंचान्यदप्यहो ॥ ६९ ॥ उक्त्वास्तुत्वापरीधायपीतांवरमनुत्तमम् ॥ पत्न्यालंकरणैःसर्वैर्भूषितःश्रीहरिंस्मरन् ॥ ७० ॥ संपूज्यतंमहाभक्त्याभोजयित्वाद्विजा तिथीन् ॥ दीनानाथगणानार्यान्संतर्प्यैबुभुजेस्वयम् ॥ ७१ ॥ यावज्जीवंतयापत्न्याकृष्णनामजपन्द्विजः ॥ अवाप्यपुत्रपौत्रादीन्सर्वभो गसमन्वितः ॥ ७२ ॥ अंतेजगामसान्निध्यंकृष्णस्यपरमात्मनः ॥ इतिसंक्षेपतःप्रोक्तंसुदाम्नश्चरितंमया ॥ ७३ ॥ श्रुत्वैतद्भक्तिपूर्वंतु निर्धनोधनमाप्नुयात् ॥ भक्तिंचलभतेकृष्णेमृतोयातिपरंपदम् ॥ ७४ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसुदाम्नश्चरितंनामैका दशःसर्गः ॥ ११ ॥ ॥ छ ॥ ॥ चंद्रहासकथांवक्ष्येमहाश्चर्यप्रदायिनीम् ॥ यांश्रुत्वामनुजोभक्तिंश्रीकृष्णेलभतेदृढाम् ॥ १ ॥ आसी त्पुरामहीपालोधृष्टद्युम्नइतिश्रुतः ॥ तस्यराज्यसमीपेतुग्रामाधीशस्ततोनृपः ॥ २ ॥ तस्यैकतनयोजातश्चंद्रहासेतिनामतः ॥ तस्य वैपंचमेवर्षेशत्रुणानिहतःपिता ॥ ३ ॥ गृहीतंग्राममानीयपत्नीतस्यशुचिव्रता ॥ चंद्रहासंसुतंनीत्वाप्राणत्राणपरायणा ॥ ४ ॥ धृष्ट

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नामजपन

द्युम्नपुरंप्राप्यगतासचिववेश्मनि ॥ सचिवस्तंतुसंमान्यनिवासार्थंददौगृहम् ॥ ५ ॥ सातस्मिन्भवनेनित्यंचंद्रहासेनसंयुता ॥ वसंती
पतिशोकार्तासस्मारहरिमीश्वरम् ॥६॥ चंद्रहासःसुतस्तस्याःपुत्रेणसचिवस्यतु॥चिक्रीडेहर्निशंतस्मैचंद्रहासायवैष्णवः ॥ ७ ॥ कोप्या
गत्यददौस्वल्पांशालग्रामशिलांशुभाम् ॥ तांशिलांसशिशुर्भक्त्यागृहीत्वास्वमुखेन्यधात् ॥ ८ ॥ अन्यत्रचौरशंकातोनविश्वासो
बभूवह ॥भोजनेऽन्नंसमर्प्याथपरिधानीयवाससी ॥ ९ ॥ बद्धासंस्थाप्यबुभुजेसर्वदैवंव्रतंशिशोः ॥ एकदाक्रीडयायुक्तश्चंद्रहासःशिशु
र्मुदा ॥ १० ॥ मंत्रिपुत्रेणसाकंतुगतवान्राजसन्निधौ ॥ तत्रवेदविदोविप्राःसामुद्रिकविचक्षणाः ॥ ११ ॥ निमंत्रिताःसमायाताधृष्टद्युम्ने
नवैतदा ॥ अब्रुवन्भूपतिंसर्वेचन्द्रहासंनिरीक्ष्यते ॥ १२ ॥ अहोयंबालकोराजन्भविष्यतिपराक्रमी ॥ जामातातुतवैवायंभविष्यतिन
संशयः ॥ १३ ॥ भाग्यवान्धनसंपन्नोराजाभवितुमर्हति ॥ इतिश्रुत्वावचस्तेषांविप्राणांसचभूपतिः ॥ १४ ॥ तूष्णींस्थितोभोज
यित्वाब्राह्मणान्विससर्जच ॥ ततश्चिंतापरोराजाविप्रवाक्यमनुस्मरन् ॥ १५ ॥ मनसातस्यहननेनिश्चयंकृतवान्नृपः ॥ चंडालं
तुसमाहूयप्राहैकांतर्गतोनृपः ॥ १६ ॥ इत्युक्तोधृष्टद्युम्नेनचंडालस्तमथद्रुतम् ॥ प्रतार्य्यवनमध्येतुनिन्येमारयितुंशिशुम् ॥ १७ ॥ चं
द्रहासंतुतंबालंनीत्वावैकाननांतरे ॥ जहिशीघ्रंप्रत्ययार्थंतस्यांकिंचित्प्रदर्शय ॥ १८ ॥ शालग्रामशिलाभक्तेर्माहात्म्याद्भगवान्हरिः ॥
चांडालायददौबुद्धिंसात्विकींशिशुरक्षणे ॥ १९ ॥ अहोयंबालकोऽनाथोमातास्यशरणागता ॥ मृतेपत्यौधृष्टद्युम्नःसकथंहंतुमिच्छ
ति ॥ २० ॥ अहंतुनैवहन्म्येनंबालकंशुभदर्शनम् ॥ परंत्वस्यांगुलीमेकांप्रत्ययायनृपस्यच ॥ २१ ॥ छित्त्वानेष्यामिनगरेदर्शयि
ष्यामितंनृपम् ॥ इतिसंचिंत्यमनसापाणौषष्ठींस्थितांगुलिम् ॥ २२ ॥ छित्त्वातामागतोराज्ञेचांडालस्तामदर्शयत् ॥ दृष्ट्वाराजा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अरक्षितं तिष्ठ०

गुलिंचित्तेमृतोयमित्यमन्यत ॥ २३ ॥ अथतंबालकंदीनंरुदंतंगहनेवने ॥ हिरण्यपक्षिणश्चैवररक्षुःसमुपेत्यतम् ॥ २४ ॥ अथांतरे नृपःकश्चित्तत्रैवमृगयांचरन् ॥ आगत्यदृष्टवान्बालंरुदंतंगहनेवने ॥ २५ ॥ दृष्ट्वापप्रच्छकोसित्वंकथमत्रागतःशिशुः ॥ श्रुत्वातद्राज वचनंबालःप्रोवाचभूपतिम् ॥२६॥ नजानेकस्यपुत्रोहंधृष्टद्युम्नस्यमंत्रिणः॥गृहेवसन्निहानीतःकेनापिरिपुणावने ॥२७॥ षष्ठींकरांगुलिं छित्त्वासगतःकुत्रचिन्नृप॥ जानाम्येतदहंराजन्नान्यज्जानामिकिंचन॥२८॥इतिश्रुत्वावचस्तस्यबालस्यसमहीपतिः॥मनसाप्राहबालोयंस म्यग्वदातिनिर्भयः ॥२९॥ अतोयंकस्यचिद्राज्ञःपुत्रोनास्त्यत्रसंशयः ॥ अहमेनंनयाम्यद्यपुत्रवत्पालयामिच ॥३०॥नमेस्तिपुत्रोबालो यंपुत्रोभवितुमर्हति ॥ निश्चित्यैवंतुमनसातंबालंलालयन्मुदा ॥ ३१ ॥ आरोप्यशिबिकायांतुनिनायस्वगृहंनृपः॥तत्रपत्न्यैददौबालंपु त्रोयंप्रतिपाल्यताम् ॥ ३२ ॥ इतिश्रुत्वावचोराज्ञोदृष्ट्वाबालंमुमोदसा ॥ पालयामाससततंभोजनाच्छादनादिभिः ॥३३॥अथकालेनत त्रैवचंद्रहासोयुवाभवत्॥सर्वांगसुन्दरःशूरःसाक्षात्कामइवापरः ॥३४॥ धृष्टद्युम्नश्चश्रुत्वातंतस्यराज्ञोनिवेशने॥सचिवंप्रेष्यतेनाथकृत्वासं धिंचतत्सुतम् ॥ ३५ ॥ चंद्रहासंसमानाय्यदृष्ट्वाराजातिचिंतितः ॥ अथैनंछलतोहन्मीत्येवंकृत्वातुनिश्चितम् ॥ ३६ ॥ चंद्रहासायपत्रं तुलिखित्वाप्रददौस्वयम् ॥ धृष्टद्युम्नःस्थितोन्यत्रस्वगृहाद्राजकार्यतः ॥ ३७ ॥ मदनायस्वपुत्रायपत्रंस्वयमलीलिखत् ॥ स्वस्तिश्री त्यादितांलिख्यवृत्तांतंतदनंतरम् ॥ ३८ ॥ विषमस्मैप्रदातव्यंदर्शनादेवतत्क्षणात् ॥ इत्येवमलिखद्राजामुद्रयित्वाततःपुनः ॥ ३९ ॥ ददौसचंद्रहासायत्वंगच्छममवेश्मनि ॥ मदनायसुतायैतत्पत्रंदेहिपुरांतिके ॥ ४० ॥ पत्रंदृष्ट्वासतेभीष्टंकरिष्यत्यविचारयन् ॥ इति श्रुत्वावचस्तस्यधृष्टद्युम्नस्यसद्रुतम् ॥ ४१ ॥ जगामराजनगरेमध्याह्नात्परतोदिने ॥ तावत्तुमदनोभुक्त्वासुष्वापांतःपुरेगतः ॥ ४२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चंद्रहासोनृपद्वारिज्ञात्वासमुतवानिति ॥ तावत्सुषुप्सुरुर्व्यांतुविशश्रामश्रमातुरः ॥ ४३ ॥ तत्रविश्राम्यतस्तस्यानिद्रासदिथवाटि
काम् ॥ द्रष्टुंसमागताराज्ञःकन्यासाविषयाभिधा ॥ ४४ ॥ सखीभिःसंहिताचेषत्समाभासितयौवना ॥ साददर्शशयानंतंचंद्रहासंतरो
स्तले ॥ ४५ ॥ सशंकासासखीमध्येकोयंपुरुषभूषणः ॥ स्वपित्यत्रसमागत्यज्ञातव्यइतिमेमतिः ॥ ४६ ॥ परंत्वस्यतुपत्रैकंदृश्यते
शिरसिस्थितम् ॥ तदेवप्रथमंसख्यःसमानयतयत्नतः ॥ ४७ ॥ यथायंजागृयान्नैवतथागच्छतयत्नतः ॥ इतिश्रुत्वावचस्तस्यास्तासा
मेकाययौशनैः ॥ ४८ ॥ गत्वातन्मस्तकात्पत्रंकौशलाज्जगृहेद्रुतम् ॥ आनीयविषयायैसाददौपत्रंततस्तुसा ॥ ४९ ॥ उद्घाटयपत्रं
सापाठीत्पितुराज्ञांविषार्पणे ॥ बुद्ध्वासाचिंतिताबालागर्हयंतीपितुर्मनः ॥ ५० ॥ कथंकंदर्पसंकाशमिमंपुरुषभूषणम् ॥ हंतुमि
च्छतितातोमेतस्माद्दुष्टंहितन्मनः ॥ ५१ ॥ अहंतुपतिमेनंवैकरिष्यामिनसंशयः ॥ इतिसंचिंत्यमनसागत्वैकांतेमनस्विनी ॥ ५२ ॥
विषमस्मैप्रदातव्यमित्यत्रकुशलालिखत् ॥ विषयाऽस्मैप्रदातव्येत्येतत्पूर्वाक्षरोपरि ॥ ५३ ॥ ततःसंछिद्यतत्पत्रंसखीनांनिकटेगता ॥
किमत्रास्तीतिताभिःसाविषयासस्मितावदत् ॥ ५४ ॥ गृहवृत्तंकिमप्यास्तिपितामेमदनायभो ॥ अलिखद्देहितस्यैवमस्तकेपत्रमुत्त
मम् ॥ ५५ ॥ इत्युक्त्वातुददौपत्रंविषयातत्सखीकरे ॥ सापिगत्वाशनैस्तत्रपत्रंतन्मस्तकेन्यधात् ॥ ५६ ॥ अथसाविषयाशीघ्रंनि
जवेश्मसमागता ॥ चंद्रहासोपिचोत्थायययौनृपतिमंदिरम् ॥ ५७ ॥ मदनायददौपत्रंदृष्ट्वातन्मदनोमुदा ॥ चंद्रहासायवेश्मादा
न्निवासायातिशोभनम् ॥ ५८ ॥ भृत्यानाज्ञापयामासचंद्रहासस्यसेवने ॥ अंगरागंतथावस्त्रंपानपात्रादिकंददौ ॥ ५९ ॥
ततःपुरोहितंविप्रमानाय्यमदनस्त्वरम् ॥ उद्योगंकारयामासस्वसुर्वैवाहिकस्यसः ॥ ६० ॥ अलंचक्रुश्चनगरंराजवेश्मद्रुतं

कवित

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नराः ॥ आगत्यसपुरोधास्तुसर्वंसंपाद्यमब्रवीत् ॥ ६१ ॥ संपन्नासर्वसामग्रीविवाहेयाह्यपेक्षिता ॥ श्रुत्वातन्मदनस्तूर्णंमहोत्सव
विधानतः ॥ ६२ ॥ विषयांप्रददौतस्मैचंद्रहासायहर्षितः ॥ अथरात्रौगतोत्साहोमदनःप्रातरेवहि ॥ ६३ ॥ सद्यु
स्थायलिलेखाथपत्रंपित्रेऽतिभक्तिमान् ॥ भवदाज्ञांपुरस्कृत्यस्वसारंविषयामहम् ॥ ६४ ॥ तस्मिन्नेवदिनेप्रादाच्चन्द्रहासाय
भक्तितः ॥ महोत्साहविधानेनविवाहःसमभूत्तयोः ॥ ६५ ॥ इतिश्रुत्वाततोराजामहाचिंताकुलोभवत् ॥ किंचित्तंसमभूत्किंचि
त्कथंतुलिखितंमया ॥ ६६ ॥ इतिसंदिग्धहृदयःप्रतस्थेतत्क्षणान्नृपः ॥ अथागत्यनिजंवेश्ममदनंप्राहभूपतिः ॥ ६७ ॥ विषयाया
विवाहार्थंयत्पत्रंप्रेषितंमया ॥ तदानयाहंपश्यामिइत्युक्तोमदनोमुदा ॥ ६८ ॥ तत्पत्रंदर्शयामासराजादृष्ट्वातिविस्मितः ॥ अहो
ममाक्षराण्येवपत्रेस्मिन्नात्रसंशयः ॥ ६९ ॥ कथमेतन्मयालेखिविषयास्मैप्रदीयताम् ॥ इतिसंचिंत्यमनसापुनश्चोपायचिंतनम् ॥७०॥
निश्चित्यतूष्णींतस्थौसपापबुद्धिर्नृपाधमः ॥ जातोविवाहःकिंतेनच्छलात्तंविनिहन्म्यहम् ॥ ७१ ॥ अन्यथाराज्यमेवैषहरिष्यतिनसंश
यः ॥ विषयाविधवाभूत्वानिवत्स्यतिममालये ॥ ७२ ॥ तत्सोढव्यंनचायंतुयद्ग्रहीष्यतिमेप्रियम् ॥ इतिसंचित्यमनसापुत्रादीन्स
नृपोऽब्रवीत् ॥ ७३ ॥ अहोऽत्रग्रामेयादेवीसातुनःकुलदेवता ॥ तांसंपूजितुंसमायातुचंद्रहासोबुधोनिशि ॥७४॥ इत्युक्त्वातुतथैकांते
चंडालायाब्रवीन्नृपः ॥ देवींपूजयितुंगच्छेच्चंद्रहासोयदानिशि ॥ ७५ ॥ तदात्वंमठमध्यस्थःखड्गेनजहितंद्रुतम् ॥ तावन्मठेनकोप्यन्यो
गमिष्यतिममाज्ञया ॥ ७६ ॥ इत्युक्तातंतदान्येभ्यउवाचनृपतिःस्वयम् ॥ सायमारभ्ययावत्तांचंद्रहासःप्रपूजयेत् ॥ ७७ ॥ तावन्मठे
नगंतव्यंकेनापीतिममाज्ञया ॥ इत्युक्त्वाविररामाथराजान्येनागराजनाः ॥ ७८ ॥ चंद्रहासंपुरस्कृत्यनिशिपूजार्थमागताः ॥ अथांतरेतुम

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दनश्चंद्रहासेनसंयुतः ॥ ७९ ॥ ततोविस्मृत्यराजाज्ञांप्रथमंगिरिजामठे ॥ जगामदेवीपूजार्थंस्नेहेनतद्वशंगतः ॥ ८० ॥ जगाममदनःस्नेहा
न्मठेस्मिन्निर्जनेनिशि ॥ अथोशीघ्रंतुचांडालोमदनस्याशिरोऽसिना ॥ ८१ ॥ चिच्छेदचंद्रहासोयमितिमत्वानिरीक्ष्यतम् ॥ चंद्रहासोनि
ववृतेगंतुंतत्रस्वयंसुधीः ॥ ८२ ॥ बबंधतंतुचांडालंबद्धाकस्मैचिदार्पयत् ॥ अथकोलाहलोजातस्तुमुलोलोमहर्षणः ॥ ८३ ॥ श्रुत्वारा
जापिचहतंमदनंदैवयोगतः ॥ रुरोदार्त्तस्वरेणाथाशिरःसंताडयन्मुहुः ॥ ८४ ॥ स्वयंतत्रगतोराजायत्रश्रीमदनोहतः ॥ विललापातिशो
केनदृष्ट्वातंविनिपातितम् ॥८५॥ अतिशोकेनराजासपाषाणेनाशिरःस्वयम् ॥ प्रस्फोटचविजहौप्राणांश्चंद्रहासस्ततःपरम् ॥८६॥ चित्ते
विचारयामासमद्विवाहादभूदिदम् ॥ राजातुपुत्रशोकेनममारजरयान्वितः ॥८७॥ तत्पुत्रोमदनश्चासौमदर्थेत्यक्तजीवितः ॥ ततोमांधि
ग्यदिह्येनंत्यक्त्वायामिगृहंप्रति ॥८८॥ तस्मादेनंहरिंप्रार्थ्यदेवींमेतत्कुलार्चिताम् ॥ आराध्यजीवयित्वातुसहयास्यामिमंदिरम् ॥८९॥
नोचेच्छित्वाशिरःस्वंतुमरिष्येनात्रसंशयः ॥ इत्युक्त्वामदनस्यात्रमठेसंयोज्यमस्तकम् ॥ ९० ॥ वपुषातत्कपाटंतुदत्त्वाबहिरुपस्थि
तः ॥ स्थापयित्वामठद्वारिशालग्रामशिलांनिजाम् ॥ ९१ ॥ निमीलिताक्षोमनसातुष्टावजगदीश्वरम् ॥ देवींचैवतुचित्तेनमरणेकृत
निश्चयः ॥ ९२ ॥ ततोरात्रिर्गतासर्वाप्रभातेसमुपस्थिते ॥ जिजीवमदनोदेवीमंदिरादाजुहावच ॥ ९३ ॥ कोप्यस्तिद्वारिबाह्येतुकपा
टोदत्तशृंखलः ॥ उद्घाटयतामयंशीघ्रमागमिष्याम्यहंबहिः ॥ ९४ ॥ इतिश्रुत्वाचंद्रहासःसमुद्घाटचकपाटकम् ॥ दृष्ट्वातुमदनंहृष्टःप्रण
नामहरिंशिवाम् ॥ ९५ ॥ अथागतंबहिस्तंतुमदनंनागराजनाः ॥ दृष्ट्वातिपरमाश्चर्यमापुस्तेजीवनादहो ॥ ९६ ॥ अथतंमदनोदृष्ट्वापि
तरंगतजीवितम् ॥ किंजातमिदमित्युक्त्वाचंद्रहासोऽब्रवीच्चतम् ॥९७॥ अयंत्वांनिहतंश्रुत्वासमागत्यात्रवैशिरः ॥ ममारस्वयमास्फो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

टचपाषाणेनमहाशुचा ॥ ९८ ॥ श्रुत्वैतन्मदनःप्राहकेनाहंनिहतःकथम् ॥ श्रुत्वैतच्चंद्रहासस्तुवद्धंचांडालमाह्वयत् ॥ ९९ ॥ आग
त्यसतुचांडालःसचिवस्याग्रतोब्रवीत् ॥ अहोयंचंद्रहासस्तुशिशुर्मात्रासहस्थितः ॥ १०० ॥ तदामांनृपतिःप्राहचंद्रहासंमहावने ॥
जहिनीत्वाप्रत्ययार्थंतदंगंमेप्रदर्शय ॥ १ ॥ इत्युक्तोहमिमंबालंप्रतार्यनीतवान्वने ॥ हंतुंसमुद्यतश्चाहंदयातीवाभवत्तदा ॥ २ ॥
अस्यैकामंगुलिंषष्ठींछित्त्वाराज्ञेह्यदर्शयम् ॥ उक्तवानथभोराजन्निहतःसतुकानने ॥ ३ ॥ इतिपूर्वंप्रजानामिपूर्वंद्युर्यदभूच्छृणु ॥
राजामांप्राहरहसिचंद्रहासोमठेयदा ॥ ४ ॥ देवींपूजयितुंगच्छेत्खड्गेनजहितंद्रुतम् ॥ तावदन्योमठेनैवकोपिगच्छेन्ममाज्ञया ॥
॥ ५ ॥ त्वमेवमठमध्येतुतावद्गत्वास्थिरोभव ॥ इत्युक्तोहंसमायातोगृहीत्वाखड्गमुत्तमम् ॥ ६ ॥ देवीपूजार्थमेतस्मिन्नागते
प्रथमंतदा ॥ मदनःप्रविशन्नेवचंद्रहासधियाहतः ॥ ७ ॥ अहमेतत्प्रजानामियथेच्छसितथाकुरु ॥ श्रुत्वैतद्वचनंतस्यमदनंसचिवो
ऽब्रवीत् ॥ ८॥ सत्यमेतन्नसंदेहोराज्ञोबुद्धिस्तुताहशी ॥ विषयाविधवागेहेनिवत्स्यातिनांनिहन्म्यमुम् ॥९॥इतिप्रतिज्ञातस्यासीदभाग्या
न्नृपतेरहो॥मृतेत्वयिसमागत्यराज्ञिचापिमृतेसाति ॥ १० ॥ प्रतिजज्ञेचंद्रहासोनजीवामिविनाऽमुना ॥ ततोदेवींहरिंभक्त्यास्तुत्वात्वां
सत्वजीवयत् ॥११॥ एतावत्तेऽत्रकथितमज्ञातंतेनृपात्मज॥अद्यापिजननीत्वस्यचंद्रहासस्यदुर्बला ॥१२॥ रुदंतीपुत्रशोकार्तावसंती
चममालये॥अतःपरंराजपुत्रयथेच्छसितथाकुरु ॥ १३ ॥ इतिश्रुत्वातुमदनःप्रीतोहंसचिवंवचः ॥ यदभूत्तदभून्मंत्रिन्नतच्छक्यंनिव
र्तितुम् ॥ १४ ॥ अतःपरंतुकोप्यन्यश्चंद्रहाससमोनहि ॥ राज्यार्द्धमस्यमेत्वर्द्धंसत्यमेतद्ब्रवीम्यहम् ॥ १५ ॥ अतः
परंतुकर्तव्यंनृपतेरौर्ध्वदैहिकम् ॥ इत्युक्त्वासचिवैःसार्द्धंसचकारपितुःक्रियाः ॥ १६ ॥ ततोवेश्मसमागत्यदत्त्वादानान्यनेकशः ॥

कालीदेवी
नभवति
यन्नभावी

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ अर्द्धंविभज्यबुभुजेराज्यंसमदनोनृपः ॥ १७ ॥ अर्द्धंतुचन्द्रहासायददौसोपिमुदान्वितः ॥ आनयित्वास्वजननीमुवासभवनेस्वके
॥ १८ ॥ राजपुत्रोपिविषयासहरेमेमहामतिः ॥ अथांतरेतुयेनासौवनान्नीतोथरक्षितः ॥ १९ ॥ तंसस्त्रीकंपितृमातृतुल्यंमत्वाह्यपू
जयत् ॥ ददौतदीयंसकलंकृत्वाराज्यमकंटकम् ॥ २० ॥ येनासौलुंठितोबालोपितायेनचमारितः ॥ तंगत्वासैन्यसंयुक्तोलुंठयित्वा
वधीद्द्रुतम् ॥ २१ ॥ एवंसचन्द्रहासस्तुशौरिनामस्यभक्तितः ॥ घोरामहापदस्तीर्त्वाप्राप्यराज्यमकंटकम् ॥ २२ ॥ तस्माद्भ
क्तिसमंकिंचिन्नैवापद्विनिवारकम् ॥ इतिज्ञात्वासुखाकांक्षीभक्तिंकुर्य्यान्निरंतरम् ॥२३॥ यत्प्रसादादिहामुत्रमनःसुखमवाप्नुयात् ॥
॥२४॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येचंद्रहासचरितंनामद्वादशःसर्गः ॥ १२ ॥ ॥ शिवेर्नृपस्यभक्तेस्तुमाहात्म्यंकीर्त्यतेऽधुना ॥
सर्वपापहरंपुण्यंदृढभक्तिप्रदायकम् ॥ १ ॥ शिबिर्नाम्नामहानासीद्राजाभून्मंडलेश्वरः ॥ दातावदान्योधर्मात्माकृष्णभक्तिपरा
यणः ॥ २ ॥ श्रीकृष्णप्रीतयेनित्यंददातिकनकादिकम् ॥ योमेवित्तादिकंलोकेयत्किंचिदभिकांक्षते ॥ ३ ॥ श्रीकृष्णप्रीतयेतस्मै
तत्तद्दास्याम्यसंशयम् ॥ इतिप्रतिज्ञांचक्रेसराजादानपरायणः ॥ ४ ॥ शशासराज्यंनिर्वैरंश्रीकृष्णस्यप्रसादतः ॥ एकदासमहारा
जःस्नात्वासंपूज्यकेशवम् ॥ ५ ॥ भोजयित्वातिथीन्सर्वान्स्वयंभोक्तुमथोत्थितः ॥ एतस्मिन्नंतरेराज्ञोहस्तेचातिभयातुरः ॥ ६ ॥
कपोतःसमुपागत्यतस्थौराजभयंत्यजन् ॥ त्राहिराजन्महाबाहोश्येनोमांखादितुंबलात् ॥ ७ ॥ पृष्ठतोयंसमायातस्तस्मात्त्वांशर
णागतः ॥ इतिश्रुत्वावचस्तस्यकपोतस्यसभूपतिः ॥ ८ ॥ तस्मिन्नेवासनेभूपउपविष्टोबभूवह ॥ तंकपोतंकरस्थंतुवहश्छयेनंददर्श
ह ॥ ९ ॥ समायांतंसवेगेनकपोतंभोक्तुमुद्यतम् ॥ दृष्ट्वातंवारयामासशिबिर्नाम्नामहीपतिः ॥ १० ॥ अथश्येनोनिवृत्तस्तुराजा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ग्रेसमुपाविशत् ॥ क्षुधितःप्राहराजानंश्येनोधृष्टइवाब्रवीत् ॥ ११ ॥ शिविभूपमहाराजधर्म्मात्मात्वंश्रुतोमया ॥ कथमेतमधर्म्मंभोः
कर्तुमिच्छसिभूपते ॥ १२ ॥ अयंमेकल्पितोभक्ष्योधात्रैवात्रनसंशयः ॥ भोक्तुंतमहमायातोमांनिवारयसिस्वयम् ॥ १३ ॥ क्षुधि
तोहंबहुदिनाद्दैवाद्यःप्रनिरीक्षितः ॥ सत्वयारक्ष्यतेहंतुमरिष्यामिक्षुधातुरः ॥ १४ ॥ इतिश्रुत्वावचस्तस्यराजाश्येनंवचोब्रवीत् ॥
सत्यंधात्राकृतोभक्ष्यस्तथापिशरणागतः ॥ १५ ॥ कथमेनंप्रदास्यामिजानन्धर्म्मंविशेषतः ॥ राज्यंजह्याच्छिरोजह्यात्पुत्रदाराधनानि
च ॥ १६ ॥ आत्मानमपिधर्मात्मानत्यजेच्छरणागतम् ॥ इमंधर्म्ममनुस्मृत्यरक्ष्योमेनात्रसंशयः ॥ १७ ॥ त्वंतुसत्यंक्षुधार्तोसि
तुभ्यंदास्यामिभोजनम् ॥ मृगयायांहतानांतुमृगाणांमांसमस्तिमे॥१८॥तत्खादक्षुन्निवृत्त्यर्थंजहिमांशरणागतम् ॥ इतिश्रुत्वावचस्त
स्यश्येनःप्राहातिनिष्ठुरम् ॥ १९ ॥ नाहंभोज्येऽन्यमांसंतुत्वंचेदेतत्समंस्वयम् ॥ स्वशरीरस्यमांसंतुदेहितद्भक्षयाम्यहम् ॥ २० ॥
इतिश्रुत्वावचस्तस्यराजाचातीवहर्षितः ॥ अहोसम्यगिदंचोक्त्वास्वशरीरंचकर्तह ॥ २१ ॥ कपोतान्नाधिकंजातंतुलायांतन्न्यवर्त
यत् ॥ श्येनःपूर्णमिदंराजन्निवर्तस्वमहामते ॥ २२ ॥ आवांजानीहिचेंद्राग्नीत्वत्परीक्षार्थमागतौ ॥ सत्यंत्वंदृढभक्तोसिददावोभिमतं
तव ॥ २३ ॥ इत्युक्त्वासुरराट्श्येनःकपोतोऽग्निरभूत्क्षणात् ॥ राजानंप्राहसंतुष्टोवरंब्रूहिमहामते ॥ २४ ॥ इत्युक्तःशिविभूपस्तु
तौप्राहविहितांजलिः ॥ अहोश्रीकृष्णभक्तिर्मेदृढाजन्मनिजन्मनि ॥ २५ ॥ भूयादेतद्वरंयाचेनान्यदिच्छामिकिंचन ॥ इतिश्रुत्वातदें
द्राग्नीतस्मैदत्त्वावरंगतौ ॥ २६ ॥ प्रशंसंतौमहाराजंजग्मतुःस्वंस्वमालयम् ॥ इत्येतत्कथितंकिंचिदौशीनरविचेष्टितम् ॥ २७ ॥
विस्तरस्तुपुराणेषुप्रसिद्धोव्यासभाषितः ॥ श्रुत्वैतत्परमाश्चर्यंशिविभूपस्यचेष्टितम् ॥ २८ ॥ श्रीकृष्णेलभतेभक्तिंर्मृतोयात्युत्तमांग

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तिम् ॥ इहलोकेसुखंप्राप्यधनपुत्रादिजंनरः ॥ २९ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येशिबिदेवचरितंनामत्रयोदशः
सर्गः ॥ १३ ॥ ॥ छ ॥ ॥ पांचाल्याभक्तिमाहात्म्यंकथयामियथाश्रुतम् ॥ महाभक्तिप्रदंनृणांभारतेयत्प्रकीर्तितम् ॥
॥ १ ॥ एकदाधर्म्मराजस्तुभाविनोर्थस्यगौरवात् ॥ द्यूतक्रीडासमासक्तश्चक्रेद्रुपदजांपणम् ॥ २ ॥ अधर्मेणजितास्सर्वैकुरुभिः
सयुधिष्ठिराः ॥ तदादुःशासनोगत्वापांचालींसकचग्रहम् ॥ ३ ॥ गृहीत्वाचानयामाससभायांपश्यतांनृणाम् ॥ एकवस्त्रां
मुक्तकेशींस्त्रीधर्म्माधिगतांसतीम् ॥ ४ ॥ इमामवस्थामापन्नांदृष्ट्वाद्रुपदजांजनाः ॥ नेत्रेपिधायतस्थुर्वैहाहाकृत्वाशनैःशनैः ॥
॥ ५ ॥ सभासदःस्थितास्तत्रभीष्मोद्रोणःकृपस्तथा ॥ अश्वत्थामाविकर्णश्चतथान्येवैमहारथाः ॥ ६ ॥ धृतराष्ट्रश्चशकु
निःकर्णोदुर्योधनस्तथा ॥ युधिष्ठिरोभीमसेनोऽर्जुनोमाद्रिसुतौतथा ॥ ७ ॥ सर्वैर्दृष्ट्वाद्रुपदजामवस्थांतादृशींगताम् ॥ स्नेहात्क्रो
धाद्धर्म्मतोपिनोचुःकिंचिदधोमुखाः ॥ ८ ॥ तस्थुरेतन्महाश्चर्य्यंभाविनोर्थस्यवैबलात् ॥ अथदुःशासनस्तस्याःसक्रोधत्वा
च्चलांबरम् ॥ ९ ॥ चकर्षाथतदादेवीसस्मारगरुडध्वजम् ॥ शंखचक्रगदापद्मपाणिपीतांबरंहरिम् ॥ १० ॥ अहोनारायणतातगोविं
दगरुडध्वज ॥ इमामवस्थामापन्नांत्राहिकृष्णजनार्दन॥११॥ दामोदरजगन्नाथहृषीकेशगदाधर ॥ पाहिपाहिकृपासिंधोमामत्रगरुडध्व
ज ॥ १२ ॥ इमेभीष्मादयःसर्वेतूष्णींतिष्ठंत्यधोमुखाः ॥ अतःकंयामिशरणंत्रायस्वकमलेक्षण ॥ १३ ॥ इतिशुश्रावभगवान्द्वारका
यांजनार्दनः ॥ पटोयंवर्द्धतामस्याअस्तुनोद्घाटितंवपुः ॥ १४ ॥ एवमाहततोवस्त्रंशरीरस्थंनचाचलत् ॥ दुःशासनकरस्थंतद्दरीव
र्द्धतिकेवलम् ॥ १५ ॥ अथदुःशासनोदुष्टःकर्षणान्नन्यवर्तत ॥ तदग्रेसमभूत्तत्रमहान्वैवस्त्रपर्वतः ॥ १६ ॥ अथापिचासौदुष्टात्मान

अत्र आत्मनेपदोभवतिपरंतुआर्षम्

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

न्यवर्ततकर्षणात् ॥ अमन्यतमहालाभंवाससांसोतिदुर्जनः ॥ १७ ॥ उत्थाप्योत्थाप्यवासांसिकोशागारेषुसर्वशः ॥ स्थापयामासभृ
त्यैःस्वैरसौदुष्टचतुष्टयी ॥ १८ ॥ दुर्योधनश्चकर्णश्चशकुनिर्दुष्टशासनः ॥ ततस्त्वन्यैर्द्धनैस्सार्द्धंतद्वस्त्रनिचयंपुनः ॥ १९ ॥ बलोब
भूवसहसाकोशोभूदतिनिर्द्धनः ॥ अथतत्रागतःकृष्णोभगवान्देवकीसुतः ॥२०॥ तंदृष्ट्वाप्राहपांचालीगोविंदागतवानसि ॥ इत्युक्त्वाश्रु
मुखीदीनारुरोदार्तस्वरेणसा ॥ २१ ॥ ततश्चुकोपभगवान्रुदंतींतांनिरीक्ष्यसः ॥ कुरून्संहर्तुमुद्युक्तआरक्तकमलेक्षणः ॥ २२ ॥
ददौपीतांबरंस्वंतुपांचाल्याउपरिप्रभुः ॥ यदिपीतांबरंचैतदाकर्षन्ममपश्यतः ॥ २३ ॥ तदासर्वान्हनिष्यामिकुरूनद्यैवनान्यथा ॥ इति
ज्ञात्वातुकृष्णस्यमतंभीष्मादयस्तदा ॥ २४ ॥ न्यवारयंततद्वस्त्रकर्षणाद्दुष्टशासनम् ॥ अहोकिमुत्थितंवस्त्रंशरीरेस्यास्तुतादृशम् ॥
॥ २५ ॥ तदासीत्पुनरेतावान्जातोसौवस्त्रपर्वतः ॥ तथापिनत्वयाज्ञातंपीतांबरमतःपरम् ॥ २६ ॥ यदिकर्षसिचेन्मोहादद्यैवैतत्कु
लंमहत्॥विनंक्ष्यतिकुरूणांवैतस्मात्साधुह्युपारम ॥२७॥ इत्युक्त्वाविररामाथकर्षणात्सोपिदुर्जनः ॥ एवंदृष्ट्वासुभक्तायाःपांचाल्यादुर्ग
तिंहरिः ॥२८॥ भस्मसादकरोद्वंशंकुरूणांभगवान्हरिः ॥ एवंसंकष्टसमयेस्मृतोरक्षातिमाधवः ॥२९॥ पुराणेबहुधाज्ञातमिदमद्यापिवर्त
ते ॥ तस्माद्भक्त्यास्मृतोदेवःकरुणामृतवारिधिः ॥३०॥ तत्क्षणात्समुपागत्यभक्त्यनुग्रहविग्रहः ॥ पालयत्येवसर्वांस्तुनात्रकार्याविचा
रणा॥३१॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येद्रौपदीचरितंनामचतुर्दशःसर्गः॥१४॥ छ ॥ अथापरंप्रवक्ष्यामिद्रौपद्याश्चरितंशुभम्॥यस्य
श्रवणमात्रेणमुच्यतेसकलापदः ॥१॥ दुर्योधनस्यगेहेतुकदाचिदृषिसत्तमः ॥ युतःशिष्यसहस्रेणदुर्वासाःसमुपागतः ॥२ ॥ दृष्ट्वातंमुनि
शार्दूलंज्वलंतमिवपावकम् ॥ दुर्योधनःसमुत्थायपूजयामासभक्तितः ॥३॥स्वगेहेवासयामासदिनानिसुबहूनिसः॥समानभक्त्यानृपतेःसं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तुतोषमुनीश्वरः ॥ ४ ॥ वरंदत्त्वाजिगमिषुराहदुर्योधनंमुनिः ॥ संतुष्टःसेवयातेहंवरंब्रूहिनृपात्मज ॥ ५ ॥ श्रुत्वातद्वचनंतस्यविचा
र्यैवमनसासतु ॥ दुर्योधनोमुनिंप्राहप्रतिजानीहिचेद्वरम् ॥ ६ ॥ याचेहंतद्वचःश्रुत्वाप्रतिज्ञामकरोन्मुनिः ॥ विहितंवाक्यविहितंयत्त्वं
मत्तोभिवांच्छसि ॥ ७ ॥ तद्ददामिनसंदेहःप्रतिज्ञैषाकृतामया ॥ ततोदुर्योधनःप्राहमुनयेपांडुनंदनाः ॥ ८ ॥ वनेवसंतितत्रत्वमेका
दश्यामुपोषितः ॥ वृतःशिष्यसहस्रेणद्वादश्यामपराह्णके ॥ ९ ॥ पांचाल्यांभुक्तवत्यांतुभोक्तुंतत्रव्रजातिथिः ॥ इतिश्रुत्वामुनिस्त
त्रचुक्रोधनिजमानसे ॥ १० ॥ उवाचनीतिंपौराणींनिंदन्नात्मानमात्मना ॥ ननीचवशगोभूयात्प्राणैःकंठगतैरपि ॥ ११ ॥ वशीकृत्या
त्ममार्गेयदधर्मेरमयत्यसौ ॥ तथाप्युक्तंहिकर्तव्यंप्रतिज्ञांस्मरतामया ॥ १२ ॥ विचार्य्यैवंमुनिःप्राहदुर्योधनमिदंवचः ॥ यास्येपतव
नोवाक्यंकरिष्यामिनसंशयः ॥ १३ ॥ इत्युक्त्वाप्रययौतत्रयत्रधर्मादयःस्थिताः ॥ वनेपराह्णेद्रौपद्यांभुक्तवत्यांमहामुनिः ॥ १४ ॥
वृतःशिष्यसहस्रेणक्षुधार्तःसमुपोषितः ॥ दृष्ट्वातमागतंविप्रमतिथिंसमयांतरे ॥ १५ ॥ दुर्वाससंक्रोधमूर्तिंब्रह्माग्निमिवरूपिणम् ॥
युधिष्ठिरःसमुत्थायपाद्यार्घ्याद्यैरपूजयत् ॥ १६ ॥ सर्वांस्तदनुशिष्यांश्चमुनिभक्तिपरायणः ॥ पूजितःप्राहदुर्वासाधर्मराजातिथि
स्तव ॥ १७ ॥ वृतःशिष्यसहस्रेणसमायातोबुभुक्षितः ॥ भोजनंदेहिनस्तावत्स्नात्वायामस्तवांतिके ॥ १८ ॥ इतिश्रुत्वाधर्मराजो
भद्रमित्यब्रवीद्वचः ॥ द्रौपदींपरिपप्रच्छकिंभविष्यत्यतःपरम् ॥ १९ ॥ साक्षादग्निर्हिदुर्वासावृतःशिष्यगणैर्यदि ॥ भोजनंनलभेतासौ
भस्मीकुर्यान्नसंशयः ॥ २० ॥ श्रुत्वैतद्द्रौपदीसाध्वीधर्मराजमुवाचह ॥ सत्यमेतन्नसंदेहःप्रकारोऽन्योनवर्तते ॥ २१ ॥ श्रीकृष्णस्म
रणात्स्वामिन्सत्रह्माग्नेर्विमोक्ष्यति ॥ इत्युक्त्वासाद्रुपदजासस्मारपुरुषोत्तमम् ॥ २२ ॥ चक्रायुधघनश्यामपुण्डरीकाक्षमाधव ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विप्रक्रोधानलात्त्वंनस्त्रातुमर्हसिकेशव ॥ २३ ॥ लाक्षागृहागतानस्मान्यथागोप्त्रीः पुराभवान् ॥ तथेदानींद्विजक्रोधात्पाहिनःशरणागतान् ॥ २४ ॥ एवंवदंतीसादीनाशुष्ककंठोष्ठतालुका ॥ ददर्शायांतमग्रेतं श्रीकृष्णंपादचारिणम् ॥ २५ ॥ द्वारकायांतदाकृष्णःशयानःपद्मयासह ॥ शुश्रावकरुणंतस्यावचःपद्म्यामपाद्रवत् ॥ २६ ॥ नास्मार्षीद्गरुडंचक्रंस्खलत्पीतांबरःस्वयम् ॥ दृष्ट्वातंनिजनाथंसाहर्षेणाश्रुमुखीसती॥२७॥आगतोस्त्येहिपीठेस्मिन्निवसक्षालयाम्यहम्॥पादावितिवचःश्रुत्वाश्रीकृष्णस्तामभाषत॥२८॥बुभुक्षितोहमस्त्यर्थेनान्यन्नोपविशाम्यहम् ॥ अभुक्त्वातःसमुत्थायदेहिमेभोजनंद्रुतम् ॥ २९ ॥ इतिश्रुत्वाद्रुपदजाकृष्णंप्राहातिविस्मिता ॥ अहोपराह्णेसंजातेभुक्त्वामामपिभोजनम् ॥ ३० ॥ नास्तीतिजानन्किंचैतत्कदर्थयसिनःप्रभो ॥ इत्युक्तःप्राहकृष्णस्तामस्तित्वंतुमहानसे ॥ ३१ ॥ गत्वाप्रदेहिमेभक्ष्यमतिक्षुत्पीडितोह्यहम् ॥ इत्युक्ताद्रौपदीगत्वामहानसमनिंदिता ॥ ३२ ॥ अधोमुखेपानपात्रेपश्यतीशाकमप्यथ ॥ अत्यल्पंशाकमात्रंतुलब्ध्वासाप्राहकेशवम् ॥ ३३ ॥ इदमेतावदत्रास्तिशाकमात्रंजनार्दन ॥ कथंदास्यामिभवतेकिमनेनभविष्यति ॥ ३४ ॥ इत्युक्तःप्राहभगवान्पर्याप्तमिदमेवंप्रे ॥ देहिशीघ्रंक्षुधार्तोहंमाविचारयकिंचन ॥ ३५ ॥ इत्युक्ताद्रौपदीशाकंश्रीकृष्णस्यकरेददौ ॥ अनेनशाकमात्रेणश्रीविष्णुस्तृप्यतामयम् ॥ ३६ ॥ इतिसंकल्प्यमनसाकृष्णस्तंबुभुजेमुदा ॥ संकल्पसिद्धिस्तेभूयादित्युक्त्वोत्थायवारिणा ॥ ३७ ॥ प्रक्षाल्यपाणीपादौसउपविष्टःसुखासने ॥ उवाचधर्मराजानंसंप्रेषेकंमुनिंप्रति ॥ ३८ ॥ आयातुकिंविलंबेनभोक्तुंचमुनिसत्तमः ॥ ततःसंप्रेषयामासद्विजंदुर्वाससंप्रति ॥ ३९ ॥ दुर्वाससःसशिष्यस्यतदाजीर्णोमहानभूत् ॥ त्यक्ताह्निकोक्षमोगंतुंतथापिचलितोऽन्यतः ॥ ४० ॥ तत्रगत्वाद्विजःप्राहभुक्त्वागच्छमहामते ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भवदागमनव्यग्रोधर्मराजःप्रतीक्षते ॥ ४१ ॥ श्रुत्वैतद्वचनंतस्यदुर्वासाःप्राहतंद्विजम् ॥ गच्छविप्रनमेभोक्तुंक्षुधाजीर्णोह्यभून्मम ॥४२॥
स्वस्त्यस्तुधर्मराजायेत्येवंवदमदीरितम् ॥ वृथाहमागतोदुष्टदुर्योधनवशीकृतः ॥ ४३ ॥ अथसर्वाण्यलंगच्छत्वंयामोवयमप्यथं ॥
इत्युक्त्वासगतस्तूर्णंदुर्वासालज्जितोमुनिः ॥ ४४ ॥ विप्रस्ततःसमागत्यधर्मराजमुवाचतत् ॥ श्रुत्वातद्धर्म्मराजोपिश्रीकृष्णानुग्रहो
ह्ययम् ॥ ४५ ॥ इतिमत्वाभगवताचक्रेपौराणिकींकथाम् ॥ एवंपांचालजाभक्त्याश्रीकृष्णोभगवान्स्वयम् ॥ ४६ ॥ द्वारकातः
समागत्यपालयामासपांडवान् ॥ तस्मादेकेनमनसास्मृत्वाकृष्णंमहापदि ॥ ४७ ॥ मुच्यतेसर्वसंकष्टात्सत्यंसत्यंनसंशयः ॥ इत्येत
द्द्रौपदीभक्तिमाहात्म्यंकथितंमया ॥ ४८ ॥ यःशृणोतिनरोभक्त्यासंकटैर्नसपीड्यते ॥ इतिश्रीभगवद्भक्तिमाहात्म्येद्रौपदीचरितंना
मपंचदशःसर्गः ॥ १५ ॥ ॥ छ ॥ वाल्मीकिमुनिमाहात्म्यंकथयामियथाश्रुतम् ॥ पुराकश्चिद्द्विजोजातःकुटुंबीनिर्द्धनोमहान्॥१॥
कुटुंबभरणार्थंतुभिक्षांपूर्वंचकारसः ॥ नतथालभतान्नानिततोऽधर्म्मरतोऽभवत् ॥ २ ॥ वनेवसन्प्रातरादिसायांतंपथिकान्जनान् ॥
लुंठयित्वाधनैस्तांस्तुस्वजनान्पुपुषद्विजः ॥ ३ ॥ एवंलुंठाकवृत्तौसनिरतोनिर्जनेवने ॥ जघानापिबहूंस्तत्रपथिकान्धनलिप्सया॥४॥
एवंगतेषुकालेषुवसिष्ठश्चैकदाततः॥तस्मिन्नरण्येतंदृष्ट्वावसिष्ठंसद्विजोब्रवीत् ॥ ५ ॥ अहोवस्त्रादिकंसर्वंशीघ्रंदेहिनचेदहम्॥घातयामिप्रय
च्छाशुयदिजीवितुमिच्छसि॥६॥इत्युक्तःसवसिष्ठस्तुतंद्विजंप्राहसस्मितम्॥अहोस्वार्थमिदंकर्म्मकरोष्यन्योस्तितेगृहे॥७॥इत्युक्तःसद्वि
जःप्राहसंतियेबांधवागृहे ॥ पुत्रादाराःस्वजननीतेषांगतिरहंमुने ॥८॥ इत्युक्तवंतंतंविप्रंवसिष्ठःप्राहसस्मितम् ॥ अहोयदर्थमेतत्त्वंघोरंकर्म ॥ २४॥
करोषिभोः ॥ ९ ॥ तान्गच्छपृच्छयत्पापंकृत्वाधनमुपार्ज्यते ॥ तत्किममैवतत्पापंस्यादथोभवतामपि ॥ १० ॥ तेयद्वक्ष्यंतित

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

च्छुत्वात्वमाख्याहिममाग्रतः ॥ तावदत्रैवतिष्ठामिसत्यमेतन्नसंशयः ॥ ११ ॥ इतिश्रुत्वाद्विजःसोथमुनेर्दर्शनतोह्लदि ॥ जग्राह
वचनंतस्यसमायातोनिजंगृहम् ॥ १२ ॥ आगत्यपृष्टवान्सर्वान्सर्वैरुत्तरितंसमम् ॥ ममपापंनपुण्यंवातत्सर्वंतुतवैवहि ॥ १३ ॥
भोक्तुंददासिभोक्ष्यामिनजानेकस्यतद्धनम् ॥ सर्वान्सपृष्ट्वाभार्यायैपप्रच्छातिप्रयत्नतः ॥ १४ ॥ सापितद्वदुवाचाथश्रुत्वासपुन
रागतः ॥ वसिष्ठनिकटेगत्वामनसाचातिदुःखितः ॥ १५ ॥ वसिष्ठंसउवाचाहोसर्वैरुत्तरितंसमम् ॥ पुण्यंपापंनजानीमस्तत्सर्वंतवके
वलम् ॥ १६ ॥ त्वद्दत्तान्नानिभुंजानाविप्रनैवकृताकृतम् ॥ इतिश्रुत्वावसिष्ठस्तंप्रोवाचकृपयाप्रभुः ॥ १७ ॥ अहोभवान्महा
मूर्खोजातोब्रह्मकुलेस्वयम् ॥ त्यक्त्वाधर्म्ममधर्म्मंतुयदर्थंकुरुषेद्विज ॥ १८ ॥ तेषामुक्तिरियंत्वंतुवृथापापंकरोषिभो ॥ एकाकी
जन्मसंप्राप्यभुंजानःकर्मणांफलम् ॥ १९ ॥ आयुषोंतेव्रजत्येकोधर्माधर्मसहायवान् ॥ नकोप्युपकरोत्यस्यजंतोरंतेसुखेरतः ॥२०॥
स्वकृतान्येवकर्माणिसुखयंत्यर्दयंतिच ॥ यस्मिन्जीवतियास्नेहात्स्वमित्यालिंगयद्वपुः ॥ २१ ॥ दृष्टातदेवसात्यर्थंबिभ्यतीद्रष्टुमक्ष
मा ॥ यःसुतोजनितःस्नेहात्पालितोवर्धितःसतु ॥ २२ ॥ मृतेपितरितंप्रेतंमन्यमानोबिभेतिवै ॥ तस्मान्नपत्नीकार्यार्थंकिंचित्कर्तु
मिहार्हसि ॥ २३ ॥ एवंसंचिंत्यमनसायथारुचिकुरुद्विज ॥ इतिश्रुत्वावचस्तस्यवसिष्ठस्यमहात्मनः ॥ २४ ॥ भाग्यात्तत्संगतो
विप्रःप्रबोधमगमत्तदा ॥ उवाचप्रांजलिर्भूत्वासत्यमेतन्महामुने ॥ २५ ॥ त्यक्त्वासर्वंप्रपन्नोस्मित्वामहंशरणंमुने ॥ मह्यंप्रदेहिमंत्रंभो
शिष्यस्तेहंगुरुर्भवान् ॥ २६ ॥ इत्युक्तःसवसिष्ठस्तुज्ञात्वातंपापकारिणम् ॥ उवाचाहंतुगंच्छामित्वरितस्त्वंगृहंव्रज ॥ २७ ॥ तत्रै
वान्यस्यशिष्यस्त्वंग्रामेभवितुमर्हसि ॥ इत्युक्तःसद्विजःप्राहनिष्फलंकुरुषेयदि ॥ २८ ॥ तदात्वांघातयित्वाद्यकरिष्येहंनसंशयः ॥

४

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इत्युक्त्वाजगृहेपादौबलात्तस्यमहामुनेः॥२९ ॥ ततःसकृपयाविष्टोभीतोब्रह्मवधादपि ॥ विचार्य्यमनसामंत्रंददौतस्मैद्विजातये ॥३०॥
मंत्राणामधिकारस्तुनास्यातःसर्वतारकम् ॥ रामेत्येतन्मरेत्येवंविपरीतंददौमुनिः॥३१॥ ततस्तच्चरणौत्यक्त्वाप्रणनाममहामुनिम् ॥
वसिष्ठोपिद्विजंप्राहमंत्रमत्रजपन्वस ॥ ३२ ॥ भविष्यासिमहानेवसर्वेभ्योनात्रसंशयः ॥ इत्युक्त्वासजगामाथद्विजस्तत्रैवतास्थिवान्
॥ ३३ ॥ जपन्मरेतिमंत्रंसःत्यक्त्वान्नमुदकंद्विजः ॥ एकासनोपविष्टस्यतस्यकालोमहानगात् ॥ ३४ ॥ शरीरेतस्यवल्मीकोमहा
नासीद्विजन्मनः ॥ सएवायमितिज्ञात्वासस्मारसपुनर्विधिम् ॥ ३५ ॥ वसिष्ठस्मरणात्तूर्णंसमायातोविधिस्तदा ॥ तंवसिष्ठःप्रणम्या
हवरोह्यस्मैप्रदीयताम् ॥ ३६ ॥ अनेनतुमहत्ततंतपःपरमदुश्चरम् ॥ इत्युक्तःसविधिःप्राहसत्यमेतन्नसंशयः ॥ ३७ ॥ दातु
मिच्छन्नहमपिवरमत्रस्मृतस्त्वया ॥समागतोस्मिह्यस्यायददामिवरमुत्तमम्॥३८॥इत्युक्त्वामृत्तिकांभित्त्वाऽकरोत्स्पर्शंकरेणतम्ः ॥
विधेःकरस्पर्शवशात्समुतस्थौद्विजोत्तमः ॥ ३९ ॥ दृष्ट्वावसिष्ठंब्रह्माणंदंडवत्पतितोभुवि ॥ ततोब्रह्मासमुत्थाप्यब्रह्मर्षित्वंददौमुदा ॥
॥ ४० ॥ नामचास्याकरोत्तत्रवाल्मीकिरितिविश्रुतम् ॥ ईजेवाल्मीकियज्ञेषुपुनःसद्विजसत्तमः ॥ ४१ ॥ सांगोपांगास्ततोवेदाःशा
स्त्राणिसकलान्यथ ॥ आचारःक्रतवोधर्म्मःश्रीर्ह्रीःकीर्तिस्तथाधृतिः ॥ ४२ ॥ लज्जाक्षमादयाशांतिःश्रद्धापुष्टिःस्मृतिर्मतिः ॥ एतान्य
न्यानिवाल्मीकेर्मूर्तिमंत्यागतानिवै ॥ ४३ ॥ विधेराज्ञावशात्तस्यतपोमाहात्म्यतोपिच ॥ ऊचुर्वाल्मीकिमासाद्यजातोब्रह्मर्षिस
त्तमः ॥ ४४ ॥ अथांतरेगतोधातावसिष्ठःस्वगृहंवशी ॥ वाल्मीकिरपिसंप्राप्यवरंपूर्णमनोरथः ॥ ४५ ॥ ऋषिभिर्वंद्यमानःसन्च
चारतपउत्तमम् ॥ एवंप्रभावोनाम्नोवैभक्तेश्चापिश्रुतोमया ॥ ४६ ॥ यथातथात्रलिखितोमाहात्म्यंतस्यकःपुनः ॥ वक्तुंशक्नोतिलोकेऽ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्मिन्विशेषेणतमाहृतः ॥ ४७ ॥ रामावतारतःपूर्वंरामायणमनुत्तमम् ॥ चक्रेविख्यापितोलोकेछंदोबद्धासरस्वती ॥ ४८ ॥ अद्यापि यस्तुवाल्मीकेर्नामसंकीर्तयेत्तुयः ॥ महाजाड्यंविनिर्धूयशास्त्रज्ञोभवतिद्विजः ॥ ४९ ॥ इतिवाल्मीकिभक्तेस्तुमाहात्म्यंक[illegible]या ॥ श्रुत्वैतत्सर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ ५० ॥ इति श्रीभगवद्भक्तिमाहात्म्येवाल्मीकिचरितंनामषोडशःसर्गः ॥ १६ ॥ ॥ छ ॥

रुक्मांगदकथांवक्ष्येसद्योभक्तिप्रदायिनीम् ॥ यांश्रुत्वामनुजोकृष्णेदृढांभक्तिंलभेतवै ॥ १ ॥ आसीद्रुक्मांगदोराजाचतुरंगबलान्वितः ॥ धर्माधर्मविजानन्सःप्रजापालनतत्परः ॥ २ ॥ निष्कंटकंराज्यभोगंबुभुजेबहुवासरान् ॥ तस्यैकानगरोपांतेपुष्पवाट्यातिशोभना ॥ ३ ॥ नित्यंसर्वर्तुकुसुमामणिसोपानवाटिका ॥ नानापुष्पसमोपेतानानावालिभिरावृता ॥ ४ ॥ तस्याःपुष्पाणि रात्रौतुसमागत्याप्सरोगणाः ॥ जहुस्तदानृपःक्रुद्धोमालाकारमुवाचह ॥ ५ ॥ कोगृहीत्वानिशायांवैपुष्पाणिप्रतिवासरम् ॥ यातितंवदनोचेत्त्वांसकटुंबंनिहन्म्यहम् ॥ ६ ॥ इतिसंचिंत्यतत्रैकःस्थितःकश्चिद्द्विजोत्तमः ॥ वृद्धःशास्त्रपुराणज्ञोधर्मशास्त्ररतःसदा ॥ ७ ॥ तमुक्त्वासर्ववृत्तांतंमालाकारोपतत्पदोः ॥ त्रायस्वसकुटुंबंमामुपदेशप्रदानतः ॥ ८ ॥ जानीयांकथमेतद्वैकःसमायातिवाटिकाम् ॥ इतिश्रुत्वाद्विजश्चित्यंचिंतयामासबुद्धिमान् ॥ ९ ॥ अहोमनुष्योनायातिराजदंडभयाध्रुवम् ॥ देवोवाराक्षसोवापियक्षोगंधर्वकिन्नराः ॥ १० ॥ समागत्यविचिन्वंतिपुष्पाण्यस्यांनसंशयः ॥ तत्रोपायंवदिष्यामियथाज्ञास्यसितस्करम् ॥ ११ ॥ निर्माल्यंदेवतानांतुवाटिकायांविकीर्य्यच ॥ रात्रौतिष्ठततःप्रातश्चौरःस्थास्यतिबद्धवत् ॥ १२ ॥ इतिश्रुत्वा तथाचक्रेमालाकारोऽतिहर्षतः॥ प्रातर्जगामवाट्यांतुददर्शैकांस्त्रियंशुभाम् ॥ १३ ॥ तत्राप्सरोगणारात्रौसमायांतिमहानिशि ॥ सर्वे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जग्मुर्दिवंप्रातरेकानिर्माल्यलंघनात् ॥ १४ ॥ तस्थौतत्रैवतस्यास्तुगतिर्दिव्याहताभवत् ॥ मालाकारस्ततःशीघ्रंगत्वाराजानमब्र
वीत् ॥ १५ ॥ राजंश्चौरोधृतोवाटयांकाचित्कमललोचना ॥ सर्वांगसुंदरीरामाद्योतयंतीदिशोदश ॥ १६ ॥ नमानुषीयंसत्यंतेक
थयामीतिमेमतिः ॥ इतिश्रुत्वाततोराजास्वयमुत्थायचाययौ ॥ १७ ॥ पुष्पवाट्यांददर्शाथसत्यंनेयंतुमानुषी ॥ इत्यमन्यततांप्राह
कासिकस्मादिहागता ॥ १८ ॥ स्थित्वाकिमर्थमत्रैवतापसत्वंसमागता ॥ तत्सर्वंब्रूहिसर्वंमेमाभयंकुरुसुव्रते ॥ १९ ॥ इत्युक्तासा
प्युवाचाथराजानंचाप्सरोवरा ॥ राजन्नप्सरसांमध्येकाप्यहंस्वर्गवासिनी ॥२०॥ पुष्पवाटयांतवात्राहंसखीभिःसहितानिशि ॥ विहारा
र्थंसमायातागतासख्योदिवंमम ॥२१॥ अहंतुदेवनिर्माल्यलंघनाद्गंतुमक्षमा ॥ स्वर्गेतिर्विहतामेद्यनिर्माल्यलंघनात्ततः ॥२२॥ इतिश्रुत्वात
तोराजाप्राहतामप्सरोवराम् ॥ उपायःकोपिचेदस्तिपुनर्येनगतिर्भवेत् ॥२३॥ तंब्रूहिप्रकरोम्येतत्ततस्त्वंतुदिवंव्रज ॥ इत्युक्तासाथराजान
मुवाचमुदितासती ॥२४॥ राजन्नेकादशीपुण्यंयादिकस्यापिवर्तते ॥ तद्दद्याद्यदिमेतस्माद्गतिःस्वर्गेपुनर्भवेत् ॥२५॥ इतिश्रुत्वानृपोग्रामे
गत्वासर्वानुवाचह ॥ एकादशीव्रतंकेनकृतमायातुसद्रुतम् ॥२६॥ तदादूतगणाग्रामेराज्येगत्वाययुर्द्रुतम् ॥ राजन्ग्रामेनराज्येवाकश्चिदे
कादशीव्रती ॥२७॥ एकात्रवणिजोदासीव्यभिचारंचकारसा ॥ वणिक्तांताडयामाससातत्रैकादशीदिने ॥२८॥ अहोरात्रंनिराहारानिर्जला
शोकतःपुनः ॥ लेभेनानिद्रांरात्रौसातस्याएवमभूद्व्रतम् ॥२९॥ इतिश्रुत्वाशुसाप्राहसैवागत्यददातुमे ॥ एकादशीव्रतफलंतेनयास्याम्यहं
दिवि ॥३०॥ इत्युक्तोनृपतिस्तांतुवैश्यदासीमुदाह्वयत् ॥ दापयामासतत्पुण्यंतत्कालेसाययौदिवम् ॥३१॥ दृष्ट्वातत्परमाश्चर्यंराज्ञोभ ॥ २६ ॥
क्तिरभूद्दृढा ॥ चक्रेसपरिवारःसस्वयमेकादशीव्रतम् ॥३२॥ संपूर्णेनिजराज्येससर्वाण्येवमशिक्षयत् ॥ नभोक्तव्यंनभोक्तव्यंपशुपक्षिगणै

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रपि ॥३३॥ एकादश्यांनभोक्तव्यंजंतुमात्रेणकेनचित् ॥ भुंजीतयदिवामोहात्समेदंड्योनसंशयः ॥३४॥ इत्याज्ञांनृपतेःसर्वेगृहीत्वाशिर
साजनाः॥विज्ञायापि नदाश्चर्य्यंचकुरेकादशीव्रतम्॥३५॥एवंरुक्मांगदोराजाकुर्वन्नेकादशीव्रतम् ॥ शशासराज्यंधर्म्मेणजातःसर्वसमृद्धि
मान्॥३६॥एकदातस्यजामाताएकादश्यांसमागतः॥अन्यराजैकतनयोवयसाप्यतिकोमलः ॥३७॥ राजाज्ञयातुराहितुनददौभोजनंस
ती॥ राजपुत्रीतुकिंकुर्य्यात्पितृमातृवशंगता ॥३८॥ जामाताप्राहप्रत्येकंश्वशुरादीन्विनीतवान् ॥ अद्यावधिसमासीनोनिशायामप्युपो
पणम् ॥ ३९ ॥ अतोनैवोपवासंवाकर्तुंशक्नोम्यहंनृप ॥ श्रुत्वैतद्वचनंतस्यजामातुःपरिभूपतिः ॥ ४० ॥ नददौभोजनंतस्मैजा
मात्रेपिदृढव्रतः ॥ ततोरात्रेःपरार्धेतुजामातासक्षुधार्दितः ॥ ४१ ॥ ममारसनृपोज्ञात्वाराज्ञीवातत्सुताथवा ॥ एतावदेवचायुष्यमि
त्युक्त्वादग्धुमुद्यताः ॥ ४२ ॥ अथांतरेसुताराज्ञःसहगंतुंसमुद्यता ॥ द्वादश्यांप्रातरेवाथसंभारान्प्रददौनृपः ॥ ४३ ॥ सापिराजसु
तागत्वाश्मशानेबंधुभिःसह ॥ चितायांपतिमारोप्यवह्निंदातुंसमुद्यता ॥ ४४ ॥ अथांतरेसभगवान्द्विजवेषधरोहरिः ॥ मालामुद्रां
वहंस्तत्रसमायातोन्यवारयत् ॥ ४५ ॥ मादहेथामृतोनायंक्षुधयाचातिमूर्च्छितः ॥ अहमेनंजीवयामिदत्त्वान्नंवदनेस्यभो ॥ ४६ ॥
शीघ्रमन्नंकिमप्यत्रसमानयममाग्रतः ॥ ततोदूतोद्रुतंगत्वापृथुकान्नंसमानयत् ॥ ४७ ॥ गृहीत्वातंजलेसम्यक्संमर्द्यतज्जलंद्विजः ॥
ददौजामातृवदनेनिर्गय्यर्यसतदादृशौ ॥ ४८ ॥ उद्घाट्यतान्समालोक्यपप्रच्छकिमिदंत्विह ॥ ततःप्रोचुस्तदासर्वेतंतस्यमरणादिक
म् ॥ ४९ ॥ श्रुत्वासोप्याहसत्यंभोक्षुधयैवमृतोह्यहम् ॥ अतःपरमनेनाद्यजीवितोहंनसंशयः ॥ ५० ॥ इत्युक्तवंतंतंसर्वेराजाचपुर
वासिनः ॥ शिबिकायामथारोप्यनिन्युर्नृपतिमंदिरम् ॥ ५१ ॥ सवैष्णवोद्विजःसर्वैःसम्यग्गच्छन्महोत्सवैः ॥ अंतर्दधेजगामाथनज्ञा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तंकेनचित्तुतत् ॥ ५२ ॥ राजागृहंसमागत्यक्वास्तेसद्विजसत्तमः ॥ येनायंजीवितोबालस्तमानयसमर्चये ॥ ५३ ॥ तदासर्वेगृहेभ्या
मेमार्गेसम्यग्विचिंत्यतम् ॥ नैवापश्यंस्तदाराज्ञेप्रोचूराजन्गतःसतु ॥ ५४ ॥ सहैवतुसमागच्छन्कदाचांतर्दधेद्विजः ॥ नजानातिज
नःकोपिमहोत्साहेनभूपतेः ॥ ५५ ॥ इतिश्रुत्वावचस्तेषांराजात्यर्थंशुशोचह ॥ अहोनसद्विजंःकिंतुभगवान्भक्तवत्सलः ॥ ५६ ॥
आगत्यजीवयामासतंबालंनात्रसंशयः ॥ इत्युक्त्वास्नानपूजादिकृत्वादत्त्वाधनानिच ॥ ५७ ॥ भोजयित्वाद्विजान्सर्वान्बुभुजेऽन्नंस्व
यंतदा ॥ इत्येतत्कथितंसर्वंरुक्मांगदविचेष्टितम्॥५८॥श्रुत्वैतत्सर्वपापेभ्योमुच्यतेमनुजोध्रुवम्॥५९॥ ॥इतिश्रीभगवद्भक्तिमाहात्म्ये
रुक्मांगदचरितंनामसप्तदशःसर्गः ॥१७॥ ॥ छ ॥ मयूरध्वजभक्तिंतुवक्ष्याम्याश्चर्यदायिनीम् ॥ श्रुत्वायांमनुजःसद्योमुच्यतेऽज्ञानबं
धनात्॥ १ ॥एकदार्जुनचित्तेतुमहान्गर्वोबभूवह ॥ नमेसमोस्तिभक्तोवैश्रीकृष्णस्यचराचरे ॥ २ ॥ इतिज्ञात्वातुभगवानर्जुनंप्राहविस्मि
तम् ॥ एह्यागच्छमयासार्द्धंगच्छामिक्वचिदर्जुन ॥ ३ ॥ इत्युक्त्वाद्वारकायास्तुनिर्जगामबहिर्यदा ॥ तदार्जुनंपुनःप्राहत्वंभूत्वाद्वादशा
ब्दिकः ॥ ४ ॥ आगच्छवृद्धोभूत्वाहंगच्छामिराजमंदिरम् ॥ मयूरध्वजनामास्तिराजासोऽतीवमेप्रियः ॥ ५ ॥ तंद्रष्टुंयाम्यहंतत्तुस
मागच्छमयासह ॥ इत्युक्त्वाह्यव्रजन्मार्गेव्याघ्रमेकंददर्शह ॥ ६ ॥ व्यादितास्यंमहाघोरंहंतुमुद्यंतमर्जुनम् ॥ तंदृष्ट्वाप्राहभगवानहो
बालंविहायमाम् ॥ ७ ॥ भोक्तुमर्हसिशार्दूलबालोतीवममप्रियः ॥ एवमुक्तोब्रवीद्व्याघ्रोनत्वांभोक्ष्येजरंनरम् ॥ ८ ॥ उपायमेकंवक्ष्या
मिबालस्यास्यतुरक्षणे ॥ मयूरध्वजनामासौराजाचातिप्रियस्तव ॥९॥ तस्यार्द्धंदक्षिणांगंचेदारयामस्तकादितः ॥ द्विधाकृत्वाथतत्प
त्नीपुत्राभ्यांदीयतेयदि ॥ १० ॥ तत्रापिशोकोनस्याच्चेद्राज्ञःपत्न्याःसुतस्यवा ॥ तदाहंतद्ग्रसिष्यामित्यक्ष्याम्येनंतवार्भकम् ॥११॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नोचेद्दद्यात्सनृपतिस्तदेमंमेप्रदास्यसि ॥ इतिप्रतिज्ञांकृत्वातंगच्छतत्रद्विजोत्तम ॥ १२ ॥ श्रुत्वैतद्वचनंतस्यव्याघ्रस्यभगवान्द्विजः ॥
कृत्वाप्रतिज्ञांभगवान्मयूरध्वजसन्निधिम् ॥१३॥ मध्याह्नेऽतिथिवेलायांभोक्तुंराजासमुद्यतः ॥ अथद्वारेसमागत्यश्रावयामासतंनृपम् ॥
॥ १४ ॥ नृपःश्रुत्वासमागत्यद्वारितंप्रणिपत्यच ॥ प्राहतंनरशार्दूलकिंकरोमिवदात्रमाम् ॥ १५ ॥ इत्युक्तःप्राहवृद्धस्तंश्रीकृष्णप्री
तयेह्यहम् ॥ याचेयंतत्प्रदद्याश्चेत्तदासत्यंकुरुष्वभो ॥ १६ ॥ तदाहंकथयिष्यामिवांछितार्थंनसंशयः ॥ इतिश्रुत्वावचस्तस्यराजोवाच
प्रसन्नधीः ॥ १७ ॥ अहोऽन्यदर्थयःकश्चिन्मत्तोभीप्सतितद्ददे ॥ श्रीकृष्णप्रीतिकामस्तुदद्यामात्मानमप्यहम् ॥ १८ ॥ पुत्रान्दारा
न्धनंसर्वमात्मानमपिचद्विज ॥ श्रीकृष्णप्रीतयेदद्यांसत्यमेतत्करोमिभो ॥ १९ ॥ इतिश्रुत्वावचस्तस्यराज्ञोवृद्धोद्विजोऽब्रवीत् ॥ राजं
स्त्वद्दर्शनार्थायसमागच्छन्पथिह्यहम् ॥२०॥ अपश्यंव्याघ्रमेकंतुव्यादितास्यंभयंकरम् ॥सहसाखादितुंबालमितंसचमयार्थितः ॥२१॥
अहोमांभक्षयत्वंभोत्यजबालंममाप्रियम् ॥ इत्युक्तःसोऽब्रवीद्व्याघ्रोनत्वांभोक्ष्येजरंनरम् ॥ २२ ॥ उपायमेकंवक्ष्यामिबालकस्यास्यजी
वनम् ॥ मयूरध्वजनामास्तिराजाचेन्निजमस्तकात् ॥ २३ ॥ आरयासुतपत्नीभ्यांद्विधात्कृत्वाददातिचेत् ॥ नशोचतेतदाको
पिराजपत्नीसुतोथवा ॥ २४ ॥ तद्देहिभोजनंमह्यंतदाबालंत्यजाम्यहम् ॥ नोचेदिमंसमादायसमागत्यप्रदेहिमे ॥ २५ ॥ इतिसत्यं
प्रतिज्ञायगच्छतत्रद्विजोत्तम ॥ तदाप्रतिज्ञांकृत्वाहंसमायातस्तवांतिकम् ॥ २६ ॥ अतःपरंकुरुष्वत्वंयथारुचिमहीपते ॥
श्रुत्वातद्वचनंराजामुदाब्राह्मणमब्रवीत् ॥ २७ ॥ अहोभाग्यंमहन्मेद्यश्रीकृष्णप्रीतयेतुयत् ॥ शरीरंप्रतिगृह्णातिब्राह्मणो
वैभवादृशः ॥ २८ ॥ इत्युक्त्वातनयंपत्नीमाजुहावनृपोत्तमः ॥ आरामादायताभ्यांतुदत्त्वाप्रोवाचसुंदरीम् ॥ २९ ॥ अनया

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चारयामेऽत्रशिरआरभ्यवैमुदा ॥ द्विधाकृत्वादक्षिणार्द्धंश्रीकृष्णप्रीतयेद्रुतम् ॥३०॥ द्विजायास्मैप्रमुदितौयुवामर्प्पयतांतदा ॥ पत्नी
पुत्रश्चमुदितावूचतुस्तौमुहुर्नृपम् ॥ ३१ ॥ ममैवार्द्धंदेहिराजन्विप्रायास्मैप्रतिग्रहम् ॥ त्वयिजीवतिपुत्राश्चभाविष्यंतितथास्त्रियः॥३२॥
इतिश्रुत्वातयोर्वाक्यंविप्रस्तौप्रत्यषेधत ॥ नाहंगृह्णामियुवयोःशरीरार्द्धंनसंशयः ॥ ३३ ॥ राजाचैतद्ददात्यर्द्धंतदागृह्णामिनान्यथा ॥
इतिश्रुत्वानिवृत्तौनिमातृपुत्रौनिजार्प्पणे ॥ ३४ ॥ राजाज्ञयागृहीत्वारांनिधायनृपमूर्द्धनि ॥ आचकर्षतुरन्योन्यंतौमातृतनयावुभौ ॥
॥ ३५ ॥ अशोकौनृपतेर्नाशान्मुखावाधेयदागता ॥ आरातदातुनृपतेर्वामाक्षादश्रुचापतत् ॥ ३६ ॥ तद्दृष्ट्वाब्राह्मणःप्राहनाहंगृह्णामिते
वपुः ॥ त्वंरोदिषिमहाराजवामाक्षादश्रुचापतत् ॥ ३७ ॥ श्रुत्वैतद्विप्रवाक्यंतुनाहंरोदिमिभोद्विज ॥ इदंवामंशरीरार्द्धंरोदित्येतद्वि
चार्य्यभो ॥ ३८ ॥ सहैवावांसमुद्भूतौसहसंवर्द्धितौपुनः ॥ दक्षिणार्द्धस्यतद्भाग्यंयत्कृष्णार्थंव्रजत्यहो ॥ ३९ ॥ ममैवजन्मसंजातंनि
रर्थकमितिद्विज ॥ एवंशोकभरेणेदंवामंरौतिनसंशयः ॥ ४० ॥ एवंताभ्यांखिद्यमानःसस्मितंप्राहभूपतिः ॥ दृष्ट्वातन्महदाश्चर्य्य
माकाशात्पुष्पवृष्टयः ॥ ४१ ॥ आपतन्साध्वितितदावागभूत्त्रिदिवौकसाम् ॥ भगवानपितंकालंसमुत्थायात्मरूपधृक् ॥ ४२ ॥
पीतांबरोघनश्यामःशंखचक्रगदादिभृत् ॥ हस्ताभ्यांमातृसुतयोर्धृत्वाहस्तौन्यवारयत् ॥ ४३ ॥ मयूरध्वजमूर्द्धानंपस्पर्शकृपया
हरिः ॥ तत्करस्पर्शमात्रेणराजाभूदक्षतस्तथा ॥ ४४ ॥ उवाचभगवान्भूपंप्रसन्नोस्मिमहीपते ॥ वरंब्रूहिप्रयच्छामिनादेयंकिमपि
त्वयि ॥ ४५ ॥ इतिश्रुत्वावचस्तस्यराजावचनमब्रवीत् ॥ अहोकृतार्थोधन्योहंकंवरंप्रार्थयाम्यहम् ॥ ४६ ॥ यस्तुसाक्षाद्देवता
नांनबभूवकदाचन ॥ तंभवंतंचतुर्वाहुंप्रपश्यामिनृचक्षुषा ॥ ४७ ॥ तदपिचेद्वरंदातुंचिकीर्षसिकृपांमयि ॥ नैवंपरीक्ष्याकस्यापिक

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तेव्यासैवदेहिमे ॥ ४८ ॥ श्रुत्वातद्राजवचनंसंतुष्टोहरिरब्रवीत् ॥ एवमस्त्वितिभूपायपुनर्वरमदात्प्रभुः ॥ ४९ ॥ स्वेच्छयागतशो कस्त्वंकुरुराज्यमकंटकम् ॥ इच्छयाचसपत्नीकःस्त्वमेष्यसिममांतिकम् ॥ ५० ॥ यावन्मन्नामलोकेस्मिंस्तावत्त्वत्संततिर्नृप ॥ स्था स्यत्यवनिमध्येतुदुःखशोकविवर्जिता ॥५१॥ इत्येवंतुवरंदत्त्वाकृष्णोब्राह्मणरूपधृक् ॥ निर्ययौद्वारकांरम्यामर्जुनेनसमन्वितः ॥५२॥ ततोऽर्जुनोपिमनसाहृष्टातत्परमाद्भुतम् ॥ अतिभक्तोहमित्येतांमुमोचाहंकृतिंनिजाम् ॥ ५३ ॥ एवंभक्तिवशाल्लोकेतृणीकृत्यात्मजीव नम् ॥ प्रीणयंतिजनाःकृष्णंधन्याःसंतिमहीतले ॥ ५४ ॥ तस्मादनित्यंधनपुत्रमित्रकलत्रराज्यादिसुखंविहाय ॥ तथात्मनास्व स्यहितायविद्वान्कृष्णंशरण्यंशरणंप्रयातु ॥ ५५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येमयूरध्वजचरितंनामाष्टादशःसर्गः ॥१८॥ ॥

प्रह्लादचरितंशास्त्रेलोकेयद्यपिविश्रुतम् ॥ तथापिवक्ष्येसंक्षेपाच्छृण्वतांपापनाशनम् ॥ १ ॥ आसीद्धिरण्यकशिपुःपुरादैत्याधिपो बली ॥ सचोग्रंतपआस्थायतोषयित्वासुरंविधिम् ॥ २ ॥ अजयःस्यामितिवरंलब्ध्वाऽजेयोबभूवसः ॥ जित्वालोकत्रयंदैत्यःपीडया मासदेवताः ॥ ३ ॥ एवंगतेषुकालेषुबभूवुस्तस्यैवसुताः ॥ प्रह्लादाद्यामहावीर्य्याःपितृतुल्यपराक्रमाः ॥ ४ ॥ तेषांप्रह्लादोज्येष्ठ स्तुजातःसवैष्णवोत्तमः ॥ हिरण्यकशिपुस्तंतुशुक्राचार्यायचार्प्पयत् ॥ ५ ॥ इदंपाठयबालंमेयथास्यात्पण्डितोयुधि ॥ इत्युक्त स्तंगृहीत्वाथशुक्राचार्यःस्ववेश्मनि ॥ ६ ॥ पाठयामाससगुरुरथविद्यांप्रयत्नतः ॥ सतुकृष्णेतिरामेतिवैकुंठादीनिचप्रभोः ॥ ७ ॥ नामानिप्रजपन्नित्यमन्यान्दैत्यसुतानपि ॥ पाठयामासधर्म्मात्मातदाशंकागतोगुरुः ॥ ८ ॥ अहंतुपाठयाम्यन्यदयमन्यद्वदत्यहो ॥ इतिसंचिंत्यतंप्राहप्रह्लादंभार्गवोरुषा ॥ ९ ॥ अरेत्वहंपाठयेकिंपठसित्वंकिमन्यथा ॥ ततस्त्वांदैत्यराजःसताडयिष्यत्यसंशयः ॥१०॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इत्युक्तःसोऽब्रवीद्वाक्यंगुरुंतंभृगुनंदनम् ॥ त्वंगुरुर्नात्रसंदेहःपाठयस्वाथमांहितम् ॥ ११ ॥ परंतुसर्वशास्त्राणिकृष्णनाम्निस्थिता
न्यहो ॥ इतिनैवविजानातिराजावाथभवानपि ॥ १२ ॥ तस्माल्लाघवतोहंतुपठामिनामकेवलम् ॥ अत्रश्रमोमहान्नैवसारभूतंपरं
त्विदम् ॥ १३ ॥ येनेदंसकलंविश्वंकृत्वासंपालयलीलया ॥ संह्रियतेक्षणार्द्धेनतन्नाम्नोऽन्यत्किमास्तिभो ॥ १४ ॥ तस्मात्पिताभवा
न्वापियद्वातद्वाकरोतुवै ॥ नामसंकीर्तनंविष्णोर्नत्यक्ष्यामिकदाचन ॥ १५ ॥ इतिश्रुत्वावचस्तस्यप्रह्लादस्यतदागुरुः ॥ शंकितोदै
त्यराजेनशत्रुपक्षाश्रितःशिशुः ॥ १६ ॥ कृतोऽनेनैवगुरुणेत्येवंतस्यभवेद्यदि ॥ तदानर्थोमहान्मेस्यात्ततोनाध्यापयाम्यहम् ॥ १७ ॥
गृहीत्वाबालमेनंतुयास्यामिराजसंनिधिम् ॥ कथयिष्यामिसर्वंतंसकरिष्यतियद्धितम् ॥ १८ ॥ एवंविचारयत्यस्मिन्राजाप्रह्लादमा
ह्वयत् ॥ श्रुत्वाह्वानंगतस्तत्रलालयित्वापिताब्रवीत् ॥ १९ ॥ आरोप्यांकेथपप्रच्छसमपाठीस्तुयद्गुरोः ॥ श्रुत्वापितुर्वचस्तूर्णं
प्रह्लादश्चातिहर्षितः ॥ २० ॥ पपाठपितुरंकस्थःसुस्वरंमधुराक्षरम् ॥ श्रीरामनारायणवासुदेवगोपालगोविन्दमुकुंदकृष्ण ॥ २१ ॥
पठामिचाहंकिलसर्वसारंगुरुस्तमामन्यदुवाचकिंचित् ॥ इतिश्रुत्वाततोदैत्यःकर्णशूलमिवक्रुधा ॥ २२ ॥ स्वांकादपातयामासप्रह्लादं
बालकंज्वलन्॥ उवाचरेममकुलेभूत्वात्रैलोक्यपूजिते॥२३॥शत्रुनामजपन्मूर्खोयशोगायसितस्यवै ॥ योमेसदाकुलद्वेषीहंतुमिच्छतिनः
सदा ॥ २४ ॥ तत्किंतस्माद्बिभेषित्वंकिंतेसतुकरिष्यति ॥ मयिजीवतिकाभीतिस्तस्यवान्यस्यपुत्रक ॥ २५ ॥ तस्मात्त्यजारि
पक्षंत्वंशास्त्रेषुनिरतोभव ॥ इतिश्रुत्वापितुर्वाक्यंप्रह्लादस्तमुवाचह ॥ २६ ॥ पितःस्वशास्त्रमेतन्मेयत्पठामितवाग्रतः ॥ समेसदाकु
लद्वेषीत्येवंयद्भाषतेभवान् ॥ २७ ॥ एतदप्यविचार्यैवंनमेशत्रुर्नमेसुहृत् ॥ अस्माञ्जीघांसतीत्येतद्यदुक्तंतुतदप्यसत् ॥ २८ ॥ सएव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्वभूतेषुस्थितःसर्वमयोयतः ॥ ततःकःकंजिघांसेद्वैभ्रमएवनसंशयः ॥ २९ ॥ भीतोहंतंप्रपन्नोस्मीत्येतत्सत्यंवचस्तव ॥ परंत्वयातुसं
सारेपारावारपरंगतः ॥ ३० ॥ नहितस्मात्समुद्धर्तुमन्योवैभुवनत्रये ॥ तस्मात्त्वंममदैत्येंद्रविरोधंत्यक्तुमर्हसि ॥ ३१ ॥ इतिब्रुवंतंप्र
ह्लादंहिरण्यकशिपुःक्रुधा ॥ निरैक्षतातिक्रोधेननेत्राभ्यांनिर्दहन्निव ॥ ३२ ॥ अथांतरेसमायांतोभार्गवोभयविह्वलः ॥ जयेतिशब्दमुच्चा
र्यंदत्त्वाशीर्वादमाहतम् ॥ ३३ ॥ दैत्यराजमहानेषस्वतंत्रोनैवमामपि ॥ गणयत्यात्मनाध्यात्मांसिद्धांतमधिगच्छति ॥ ३४ ॥ अ
न्यानपीहबालान्वैशिक्षयत्येवदुर्मतिः ॥ इतिश्रुत्वाथदैत्येंद्रोऽसंतोष्यपुनरब्रवीत् ॥ ३५ ॥ पुनस्तदेवसंप्राहप्रह्लादोनिर्भयःशिशुः ॥
एवंप्रार्थ्यशिक्ष्यमाणोनस्वीचक्रेतदीरितम् ॥ ३६ ॥ दैत्यराजःसुतंतंतुहंतुंचक्रेमनस्तदा ॥ बद्धातंदृढपाशेनचंडालायसमर्पयत् ॥
॥ ३७ ॥ इमंवैभूधराच्छृंगान्निपातयमहीतले ॥ पतितोम्रियतामेषइत्याज्ञांकुरुमेद्रुतम् ॥ ३८ ॥ ततस्तंससमानीयपर्वताग्रादपा
तयत् ॥ प्रह्लादस्तुहृदाकृष्णंचिंतयञ्जगतीपतिम् ॥ ३९ ॥ पतितोप्यथपर्यंङ्केशयानइवचाभवत् ॥ दृष्ट्वापिपरमाश्चर्यंतमोगुणव
शोऽसुरः ॥ ४० ॥ नामन्यतहरेरेतत्तत्क्षणाद्भक्तिजंफलम् ॥ ततआहूयसर्पांस्तुतक्षकादीन्विषोल्बणान् ॥ ४१ ॥ येषांफूत्कारमात्रेण
भस्मसाद्वैभवेद्गिरिः ॥ उवाचयूयंप्रह्लादंसंदश्ययमसादनम् ॥ ४२ ॥ प्रापयध्वंममाज्ञेयंनविचारयतात्रभो ॥ इतिश्रुत्वावचस्तस्य
दैत्येंद्रस्यवशानुगाः ॥ ४३ ॥ गत्वाप्रह्लादमदशन्फूत्कृत्यतंमहाविषाः ॥ प्रह्लादस्तुहसन्कृष्णंसस्मारगरुडध्वजम् ॥ ४४ ॥ अथ
कृष्णप्रसादेनप्रह्लादःपूर्ववत्स्थितः ॥ सर्पाणामधरोष्ठानिचूर्णान्यासंस्त्वचोपिच ॥ ४५ ॥ विदीर्णादशनाभग्नावैमूलात्पाटिताकृतिः ॥
ततःपरावृत्तिगताःसर्पादैत्येशसन्निधिम् ॥ ४६ ॥ दर्शयंतोह्यवस्थांस्वामूचुःप्राञ्जलयोभवन् ॥ अहोदंताविशीर्णानःस्फुटितामणयोऽ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पिच ॥४७॥ त्वचोजीर्णानयास्यामश्रुर्णितानिमुखानिच ॥ प्रह्लादंदशतांपश्यतस्माद्विज्ञापयामहे ॥४८॥ शाधिकार्यान्तरंनोद्यनास्मि
न्कार्य्येनियोजय ॥ इतिश्रुत्वाततस्तूष्णींस्थित्वादैत्यपतिःक्रुधा ॥ ४९ ॥ आनाय्यहस्तिनंमत्तंतत्पादेतंन्यवेशयत् ॥ अथांतरे
ससस्मारकृष्णस्यचरितंतुतत् ॥५०॥ हस्तीकुवलयापीडोयथातेननिपातितः ॥ ततस्तस्योपरिष्टंतुहस्तीपादंदधारसः ॥ ५१॥ अ
थकृष्णप्रसादेनप्रह्लादांगसमुत्थितः ॥ तेजोग्निर्भस्मसात्कृत्वाहास्तिपादमधस्तलात् ॥ ५२ ॥ ततश्चीत्कृत्यसगजःपपातधरणीतले ॥
पतितोमूर्च्छितोहस्तीममाराश्चर्य्यमित्यहो॥५३॥दृष्ट्वातंपतितंभूमौहस्तिनंक्रोधमूर्च्छितः॥पुनराज्ञापयामासबद्धागाधेमहाह्रदे॥५४॥
निपातयैनंतत्रैवमग्नःप्राणान्प्रहास्यति ॥ दैत्येश्वरवचःश्रुत्वाप्रह्लादंराक्षसाद्भुतम् ॥५५॥ निन्युर्जलेमहागाधेबध्वातत्राप्यसौहरिम् ॥
सस्मारकमलाकांतंजलशायिनमच्युतम् ॥ ५६ ॥ अथागत्यजलेविष्णुःसंस्तभ्यसलिलंततः ॥ बंधनान्मोचयामाससोप्यस्तौषीद्ध
रिंमुदा ॥ ५७ ॥ ततःकालेनकियताप्रह्लादोऽशुष्कविग्रहः ॥ निर्बंधनःसमायातोदृष्ट्वातंदितिजेश्वरः ॥ ५८ ॥ अहोसमागतोयंभो
नमृतोह्यमरोयथा ॥ तस्मादेनंमहारिष्टंवह्नौसंस्थापयाम्यतः ॥ ५९ ॥ वह्निनाभस्मसाद्भूतोभविष्यतिनसंशयः ॥ इतिसंचिं
त्यमनसाकुंभकारमथाह्वयत् ॥ ६० ॥ अपाकेसंनिवेश्यैनंपश्चाद्दीपयपावकम् ॥ यथात्वयंहिप्रह्लादोभवेद्भस्मतथाकुरु ॥ ६१ ॥
इत्युक्तस्तंगृहीत्वाथबद्धावापाकमध्यतः ॥ निवेश्याच्छादयित्वातंदीपयामासपावकम् ॥ ६२ ॥ अथसस्मारकृष्णंसस्रुजंतंमुख
तोऽनलम् ॥ पंचभूतस्यकर्तारंसर्वसंकटनाशनम् ॥ ६३ ॥ ततःसमागत्यहरिरतिशीतोऽनलोस्तुते ॥ इत्युक्त्वाबंधनान्मुक्ताज
गामनिजधर्म्मतः ॥ ६४ ॥ ततःपावकमध्येतुस्थितःसोतीवहर्षितः ॥ तत्संसर्गात्समीपस्थोनपक्वोभांडसंचयः ॥ ६५ ॥ अथप्र

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भातेदैत्यास्तेसमाजग्मुर्नृपाज्ञया ॥ निर्वापितेऽग्नौभांडानिकुंभकारोग्रहीत्ततः ॥ ६६ ॥ मध्येददर्शप्रह्लादंमुदितंपूर्ववत्स्थितम् ॥
तत्संसर्गवशाद्भांडान्यपक्कान्येवकानिचित् ॥ ६७ ॥ इत्येतत्परमाश्चर्यंदर्शयामासकुंभकृत् ॥ दृष्ट्वातत्परमाश्चर्यंराक्षसाराजस
न्निधिम् ॥ ६८ ॥ गत्वाब्रुवन्महाराजप्रह्लादोनिर्भयःसुखी ॥ निर्बंधनःस्थितस्तत्रसमायात्येषपश्यतम् ॥ ६९ ॥ इतिश्रुत्वाथतंदृ
ष्ट्वाप्रह्लादंदितिजेश्वरः ॥ अहोनायंमृतःपापोबहुभिश्चाप्युपद्रवैः ॥ ७० ॥ अरिष्टोयंमहानेषममजातोनसंशयः ॥ इत्येवंक्रोधतः
सत्यंवभाषेदनुजेश्वरः ॥ ७१ ॥ कालपाशवशोमर्त्योनजानातिहिताहितम् ॥ इति श्रीभगवद्भक्तिमाहात्म्येप्रह्लादचरितंनामैकोन
विंशःसर्गः ॥ १९ ॥ ॥ छ ॥ अथकालवशोराजातंहन्मिस्वयमेवहि ॥ इतिनिश्चित्यमनसासभायामाययौज्वलन् ॥१॥ आना
य्यतंनिजंबालंप्रह्लादंवैष्णवोत्तमम् ॥ पप्रच्छचित्तेकिंतेऽस्तिनकरोषिमदीरितम् ॥ २ ॥ इतिश्रुत्वाततःप्राहप्रह्लादःपितरंमुदा ॥
करोमिभवतामेवकथितंनात्रसंशयः ॥ ३ ॥ अविचिंत्यात्ममरणंभवदुक्तंकरोम्यहम् ॥ सर्पाणांदंशनंमत्तगजपादतलेस्थितम् ॥ ४ ॥
धराधराग्रात्पतनमापाकाग्नौनिवेशनम् ॥ जलनिर्मथनादीनिप्राणहारीणियद्यपि ॥५॥ कर्माणितातभवतोवाक्यादेवकृतानिभो ॥ कि
मात्थैवंमहाराजकिंवृथामयिकुप्यसि ॥ ६ ॥ इतिश्रुत्वामहाकोपाद्धिरण्यकशिपुःसुतम् ॥ प्राहसाक्षेपवचनंयद्बलात्प्राहकोपवान् ॥७॥
तंपश्यामिकथंत्वांतुसरक्षतिममाग्रतः ॥ इत्युक्त्वाखड्गमादायदुर्निरीक्ष्यंसुरासुरैः ॥ ८ ॥ वामहस्तेनतंबालंगृहीत्वाप्राहको
पवान् ॥ हिरण्यकशिपुःप्राहकुत्रास्तेसहरिस्तव ॥ ९ ॥ दर्शयाद्यनचेत्त्वांतुघातयामिनसंशयः ॥ इतिश्रुत्वावचस्तस्य
दैत्येंद्रस्यसभासदः ॥ १० ॥ भयात्तूष्णींस्थितास्तत्रददृशुर्महदद्भुतम् ॥ प्रादुर्भवतियस्मिन्वैमृत्युमाप्नोतिभूपतिः ॥ ११ ॥ चचा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

लवसुधाभीतासशैलवनकानना ॥ नवभावपिमध्याह्नेगगनेरविमंडलम् ॥ १२ ॥ हिरण्यकशिपोर्वेश्मशिवागृध्रैरथावृतम् ॥ एवंज्ञा
त्वामहोत्पातंततोवृद्धायगुर्गृहम् ॥ १३ ॥ हिरण्यकशिपुस्तंतुप्रह्लादंप्राहकोपतः ॥ अरेदर्शयमेयस्यनाम्नांचास्तिबलंतव ॥ १४ ॥
नचेदनेनखड्गेननिहन्मित्वांनसंशयः ॥ इतिश्रुत्वापितुर्वाक्यंप्रह्लादोवाक्यमब्रवीत् ॥ १५ ॥ अहोमांतुभवानाहतंदर्शयममाद्यभो ॥
इतिसंगच्छतेनैवसर्वात्मनिस्थितेहरौ ॥ १६ ॥ यतश्चैकस्थितोन्यत्रनस्यात्तंतत्रदर्शयेत् ॥ सदासर्वत्रतिष्ठंतंसदासर्वस्वरूपिणम् ॥ १७ ॥
दर्शयिष्येकुतोहंतंसर्वपश्यहरिंप्रभो ॥ ग्रामेगृहेसभायांचसभास्थेषुभवत्ययम् ॥ १८ ॥ मयिस्तंभेथखड्गेचहरिःसर्वत्रतिष्ठति ॥
इतिश्रुत्वावचस्तस्यप्रह्लादस्यमहात्मनः ॥ १९ ॥ उवाचप्रहसन्नेवविक्षिप्तोभून्नसंशयः ॥ स्तंभेऽस्मिन्नस्तिसहरिरित्येतत्सत्प्रज
ल्पति ॥ २० ॥ इत्युक्त्वातंपुनःप्राहहिरण्यकशिपुर्हसन् ॥ अरेस्तंभेचसहरिस्तवतिष्ठतिसर्वदा ॥ २१ ॥ इत्युक्तःप्राहपितरंप्रह्ला
दश्चातिहर्षितः ॥ अहोसत्यंमहाराजस्तंभेस्मिन्नास्तिमेप्रभुः ॥ २२ ॥ इतिश्रुत्वावचस्तस्यत्यक्त्वातंबालकंरुषा ॥ वामेनपाणिना
स्तंभंजघानातीवरोषतः ॥ २३ ॥ समायातुतमप्येषहन्मिनास्त्यत्रसंशयः ॥ इत्युक्तवतिदैत्येंद्रेबालंहंतुमथोद्यते ॥ २४ ॥ स्तंभंभि
त्त्वाप्रादुरासीन्नरसिंहोमहाबलः ॥ अर्द्धंकृत्वातुवपुषासिंहस्यार्द्धंनरस्यतु ॥ २५ ॥ लेलिहानोमहाजिह्वोवज्राधिकमहानखः ॥ दं
ष्ट्रादुष्प्रेक्ष्यपंचास्यःसटानिर्भिन्नवारिदः ॥ २६ ॥ उत्प्लुत्यनरसिंहस्तंहिरण्यकशिपुंरुषा ॥ निपात्यभूमौहृत्कोष्ठंनखैस्तत्रव्यदारयत् ॥
॥ २७ ॥ विदीर्णवक्षोदैत्येंद्रोनेत्रेजिह्वांप्रसार्य्यच ॥ ममारात्यद्भुतंदृष्ट्वासर्वेहाहेतिवादिनः ॥ २८ ॥ नरसिंहभयाद्दैत्यादिशोदशप
लायिताः ॥ अथजाज्वल्यमानस्सनृसिंहस्तत्सभास्थितः ॥ २९ ॥ दुर्निरीक्ष्यस्तुजंतूनांनिर्दहन्निवतेजसा ॥ ज्ञात्वांवतारंनृहरेर्निहतं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सुरकंटकम् ॥ ३० ॥ ब्रह्माणंपुरतःकृत्वाजग्मुरिंद्रादयःसुराः ॥ तत्रागत्यनतेद्रष्टुंशेकुस्तंनृहरिंप्रभुम् ॥ ३१ ॥ अतिदुर्दर्शतेजो
भिर्नम्रग्रीवाअथामराः ॥ प्रह्लादंतुपुरस्कृत्यतुष्टुवुर्हृष्टमानसाः ॥ ३२ ॥ नमोविष्णवेदुष्टदैत्यांतकायप्रपन्नार्तिहंत्रेधराभारहर्त्रे ॥
जगद्भूतिरक्षाविरामैर्विहर्त्रेसदाभक्तकार्य्यायरूपाणिधर्त्रे ॥ ३३ ॥ वरेण्यायविद्याविधात्रेविवस्वद्विधूद्भासिनेत्रायपीतांबराय ॥
चतुर्वेदवेद्यायवेदांतकर्त्रेविधात्रेविरूपाक्षरूपायतुभ्यम् ॥ ३४ ॥ नमोमत्स्यवाराहकूर्मस्वरूपैर्धरित्रींसदाविभ्रतेवामनाय ॥ नमःक
ल्किनेरामकृष्णात्मनेतेनमोरामचंद्रायरामायतुभ्यम् ॥ ३५ ॥ एवंस्तुत्वासुरगणास्तस्थुस्तूष्णींदिवौकसः ॥ नृसिंहोपिचप्रह्लादं
जिघ्रन्सौम्योब्रवीत्सुरान् ॥ ३६ ॥ अहोदेवाभवंतोवैव्रजंतुस्वस्वमंदिरम् ॥ विधेराज्ञांपुरस्कृत्यस्वेस्वेवर्त्मनिसंस्थिताः ॥३७॥ विहर
ध्वंयथाकाममोदध्वंविगतज्वराः ॥ अयंत्वतीवमेभक्तःप्रह्लादोदैत्यसत्तमः ॥ ३८ ॥ एतदर्थमभूवंवैकृत्वाभीष्टंप्रयत्नतः ॥ एवमुक्त्वासदे
वांस्तुप्रह्लादायवरंददौ ॥ ३९ ॥ पुनर्देवानुवाचाथभगवान्भक्तवत्सलः ॥ शृणुताहोमरगणाःसमेभक्तःसमेप्रियः ॥ ४० ॥ आत्मापि
चततोयोमेभक्तंद्रुह्यात्समेरिपुः ॥ इत्युक्त्वानरसिंहस्तुजगामचोत्तरांदिशम् ॥ ४१ ॥ देवाअपिहरिंनत्वाजग्मुस्तेस्वस्वमालयम् ॥
प्रह्लादोपिततश्चक्रेभक्त्यातस्योर्द्ध्वदैहिकम् ॥ ४२ ॥ एवंभक्तिवशःकृष्णोभक्तंरक्षतिसर्वदा ॥ नवासुदेवभक्तानामशुभंविद्यतेक्वचित
॥ ४३ ॥ इत्यादिव्यासवचनात्प्रह्लादश्चिरजीवनात् ॥ सत्यमेवनसंदेहःस्वानुभूतमिदंमम ॥ ४४ ॥ यदिदंशृणुयाद्भक्त्याप्रह्लादच
रितंशुभम् ॥ संकष्टंनैवजायेतश्रीकृष्णस्यप्रसादतः ॥ ४५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येप्रह्लादचरितंनामविंशतितमःसर्गः
॥ २० ॥ ॥ छ ॥ ॥ अथवक्ष्येपुराणेषुयेनोक्ताभगवत्प्रियाः ॥ तेषांभक्तेस्तुमाहात्म्यंपारंपर्याद्यथाश्रुतम् ॥ १ ॥ कलेर्गतेषुकतिषु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वत्सरेष्वभवंस्तुये ॥ भविष्येऽथासदेवेननोक्ताविस्तारकारणात् ॥ २ ॥ किंचानन्याअपितथाइदानीमपिभूरिशः ॥ भवंतिभगवद्भक्ता
भविष्यंतितथापरे ॥ ३ ॥ परंतुभक्तिःसर्वेषांभवसागरतारिणी ॥ इत्याहभागवान्व्यासःशबरीगजकीर्तनात् ॥ ४ ॥ वर्णाश्रमाश्रितानां
तुनराणांभक्तिमात्रतः ॥ उद्धारंजायतेभक्तिमाहात्म्यंनात्रसंशयः ॥ ५ ॥ स्वधर्मनिरतानांतुस्वधर्म्मःकल्पपादपः ॥ नकदाचित्तुतंज
ह्यात्प्राणैःकंठगतैरपि ॥ ६ ॥ स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ॥ श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् ॥ ७॥ इत्यादिभगव
द्वाक्यात्स्वधर्मंपालयेत्सदा ॥ स्वधर्म्मस्यचभक्तेश्चनविरोधःकदाचन ॥८॥ नारदाद्याःस्वधर्म्मेषुस्थिताभक्तिंप्रकुर्वते ॥ तथाराजर्षयोऽ
न्येतुजनकाद्याःस्थिताभुवि॥९॥राजानोन्येपिबहवःचंद्रहासादयस्तथा ॥ येस्वधर्माश्रितास्तेषांभक्तितोऽन्यन्नतारकम् ॥१०॥ स्वधर्म्म
निरतानांतुभक्तिःस्यादेवतद्बलात् ॥ यथाकाशीपुरीनृणांसर्वेषांतारिणीभुवि ॥ ११ ॥ पुण्यात्मनांपापनाशात्तथाभक्तिर्हितारिणी ॥
बंधनंपापपुण्याख्यंभित्त्वाजीवन्विमुच्यति ॥१२॥ तेषांभक्तिःस्वतोनैवनलब्धोयैस्तथागुरुः ॥ तेषांभक्तिकथैवेयंभक्तिदात्रीनसंशयः॥
॥ १३ ॥ तस्माच्छास्त्रीयभक्तानांप्रथमंकथिताःकथाः ॥ अतःपरंत्वनुक्तानांपुराणचरितंब्रुवे ॥ १४ ॥ आसन्सिद्धांतकर्तारश्चत्वारो
वैष्णवाद्विजाः ॥ यैरयंपृथिवीमध्येभक्तिमार्गोदृढीकृतः ॥ १५ ॥ विष्णुस्वामीप्रथमतोनिंबादित्योद्वितीयकः ॥ मध्वाचार्यस्तृ
तीयस्तुतुर्योरामानुजःस्मृतः ॥ १६ ॥ कृष्णदासेतिनाम्नाभूच्छिष्योवैविष्णुशर्मणः ॥ कृष्णदासस्यशिष्याणांनामानिकथयाम्य
हम् ॥ १७ ॥ कीलाग्रदेवहेमाख्यगंगाकल्याणकंधराः ॥ विष्णुदासस्तथारंगावामनेत्यादयोमताः ॥ १८ ॥ अत्रैववल्लभाचार्योवि
ष्णुस्वामिकुलेभवत् ॥ रामानुजस्यशिष्यस्तुदेवाचार्योमहामतिः ॥ १९ ॥ हर्यानंदेतिविख्यातोमहामहिषएवच ॥ राघवानंदइ ॥ ३२॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्येषोशिष्योवैष्णवसत्तमः ॥ २० ॥ राघवानंदशिष्याणांनामानिकथयाम्यहम् ॥ अनंतानंदइत्येषोभावानंदस्ततःपरम् ॥ २१ ॥
सुखासुरःसुरापद्मावतीनरहरिस्तथा ॥ पीपाश्चरविदासश्चकंबीरसदनस्तथा ॥ २२ ॥ धन्वासुरसुरश्चैवतथाधरहारिःस्मृतः ॥ एतेचा
न्येचबहवोरामानुजकुलोद्भवाः ॥ २३ ॥ वैष्णवास्तस्यशिष्यायेशिष्यैर्व्याप्तमिदंजगत् ॥ एतेषांतुकथामग्रेकथयिष्यामिविस्त
रात् ॥ २४ ॥ निंबादित्यकथांवक्ष्येमहाश्चर्य्यप्रदायिनीम् ॥ निंबादित्येतिनाम्नाभूद्यथातस्यवदामितत् ॥ २५ ॥ एकदासमहाभ
क्तःशुश्रावग्रामआगतम् ॥ दंडिनंतंस्वयंनत्वाभोजनायन्यमंत्रयत् ॥ २६ ॥ अथागत्याब्रवीत्कंचिच्छिष्यंपाकंकुरुद्रुतम् ॥ श्रुत्वागु
रोर्वचःशिष्यःसामग्रींकर्तुमुद्यतः ॥ २७ ॥ कृत्वाकथंचित्सामग्रींपपाचातिप्रयत्नतः ॥ तदासायमभूद्दृष्ट्वाभिक्षुराचार्य्यमब्रवीत् ॥ २८ ॥
अतःपरंनभोक्तव्यंमयारात्रिरुपस्थिता ॥ निशायांभोजनंनैवविहितंममवर्तते ॥ २९ ॥ इतिश्रुत्वावचस्तस्यनिंबादित्योतिचिंतितः ॥
कृष्णंसंस्मारमनसाचक्रायुधमनन्यधीः ॥ ३० ॥ ततःसभगवांश्चक्रंप्राहतत्रव्रजद्रुतम् ॥ मद्भक्तवचनात्पश्चादादित्यमिवतिष्ठभोः ॥
॥ ३१ ॥ भुंजीतयावद्भिक्षुर्वैपुनरायाहिसत्वरम् ॥ इतिश्रुत्वाप्रभोर्वाक्यंचक्रंतदातिसत्वरम् ॥ ३२ ॥ आगत्याचार्य्यभवना
त्पश्चिमायांस्थितंह्यभूत् ॥ आचार्य्यस्तुततोनिंबवृक्षसंमुखतोरविम् ॥ ३३ ॥ दृष्ट्वातंदर्शयामासभिक्षुकंपरयामुदा ॥ पश्यादित्य
स्यबिंबंभोत्यजशंकांनिजांप्रभो ॥ ३४ ॥ इत्युक्तस्तेनभिक्षुस्सस्वयंदृष्ट्वार्कमंडलम् ॥ बुभुजेथसमुत्थायहस्तप्रक्षालनोत्तरम् ॥ ३५ ॥
आचम्यमुखसंशुद्धिंगृहीत्वापुनरैक्षत ॥ महांधकारंमार्गेसगंतुमप्यक्षमोभवत् ॥ ३६ ॥ भिक्षुःप्राहतदाचार्य्यंकिमेतद्वदभोद्विज ॥
आचार्य्यःप्राहतंभिक्षुंभक्तिगद्गदयागिरा ॥ ३७ ॥ भवानेवहिजानातिभवानेवब्रवीतुनः ॥ इतिश्रुत्वावचस्तस्यभिक्षुःप्राहातिहर्षितः ॥ ३८ ॥ अ

५

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

होरात्रिरभूत्सत्यंपरंतुभगवान्हरिः ॥ त्वद्धर्मरक्षणार्थायचक्रंतत्रानियुक्तवान्॥ ३९ ॥ तेनतावद्दिनमभूच्चक्रेतत्रस्थितेसति ॥ ममापिपा
पंनाभूद्वैरात्रिभोजनजंत्विह ॥ ४० ॥ मद्भोजनार्थमेतावान्प्रयासोहरिणाकृतः ॥ तस्मिन्कृतेकपापानियच्चिकीर्षतिमाधवः ॥ ४१ ॥
इत्युक्तःसपुनःप्राहतमाचार्य्यंवचोयतिः ॥ यन्निंबेदर्शयित्वाहमादित्यंभोजितोनिशि ॥ ४२ ॥ निंबादित्यइतिख्यातंतवनामभविष्य
ति ॥ इत्युक्त्वासगतोभिक्षुःक्वचित्सुष्वापतांनिशाम् ॥ ४३ ॥ निंबादित्योपिबुभुजेसहशिष्यैर्हरिंस्मरन् ॥ एवंभक्तप्ररक्षार्थंभगवा
न्भक्तवत्सलः ॥ ४४ ॥ उपायंकुरुतेऽत्यर्थंस्मृतमात्रस्तुतत्क्षणात् ॥ परंतुकृत्वाविश्वासंयदितंशरणंव्रजेत् ॥ ४५ ॥ ॥ इति
श्रीभगवद्भक्तिमाहात्म्येनिंबादित्यचरितंनामैकविंशःसर्गः ॥ २१ ॥ ॥ जामातइतिविख्यातःशिष्योरामानुजस्यहि ॥ सोपि
भक्तोबभूवास्यकथांवच्मिमनोहराम् ॥ १ ॥ सतुरामंभजन्प्रेम्णावैष्णवानांतुदासवत् ॥ चकारपरिचर्य्यांवैकर्मणामनसागिरा ॥ २ ॥
एकदासतुजामातःपुष्पंनेतुंव्रजन्पथि ॥ ददर्शपतितंग्रामाद्बाह्येकश्चिन्मृतंनरम् ॥ ३ ॥ गोपीचंदनलिप्तांगंसर्वांगेतुलसीस्रजम् ॥ ह
ष्ट्वातंवैष्णवंमोहाद्बालंमत्वान्यवर्तत ॥ ४ ॥ तमुत्थायशवंमूर्ध्निधृत्वाभारातुरोपिसन् ॥ गत्वाश्मशानभूमौसतंददाहसुतोयथा ॥५॥
दृष्ट्वैतदन्येयेतत्रस्थितावैवैष्णवाजनाः ॥ तेसर्वेगर्हयांचक्रुर्विक्षिप्तोयमभूत्किल ॥ ६ ॥ कस्येदंमृतकंमूर्ध्नानीयाऽयंसंस्करोतिभोः ॥
अतस्त्वंनहिस्प्रष्टव्योभवपंक्तेस्तुबाह्यतोः॥७॥ इतिसंमंत्र्यमिलितास्तत्यजुस्तस्यवेश्मते ॥ जामातस्तुततःशोकादागत्यनिजमंदिरम्
॥ ८ ॥ त्यक्त्वाशनोदकेरात्रौसुष्वापश्रीहरिंस्मरन् ॥ अथप्रातःसमुत्थायस्नात्वाभुक्त्वासमुत्थितः ॥ ९ ॥ चतुर्थेदिवसेसाधुभो
जनायसमुत्सुकः ॥ गृहेयत्किंचिदासीद्वैधनंतेनाकरोत्स्वयम् ॥ १० ॥ साधूनांभोज्यवस्तूनितृतीयेदिवसेनिशि ॥ गत्वासर्वस्य ॥ ३३ ॥

CSU-Jaipur Campus Collection

गेहेसवैष्णवानांनिमंत्रणम् ॥ ११ ॥ ददौततःपरंतेतुवैष्णवास्तंकदक्षरम् ॥ ऊचुःकस्त्वंस्थितोजात्याचांडालोन्योपिवापुनः ॥
॥ १२ ॥ दग्ध्वातंपितृवद्यन्नोनिमंत्रयितुमागतः ॥ अतःपरंतुतेशाकंनभोक्ष्यंतीहवैष्णवाः ॥ १३ ॥ किंपुनस्त्वद्गृहेऽन्नानितस्मा
द्गच्छयथारुचि ॥ एवंसर्वैस्तुतत्रत्यैःप्रत्याख्यातःसवैष्णवः ॥ १४ ॥ जामातःससमागत्यनिजगेहेस्थितोभवत् ॥ चिंतयापरया
विष्टःसस्मारजगदीश्वरम् ॥ १५ ॥ भगवानथतंस्वप्नेरात्रौसर्वमुवाचह ॥ अहोशोकंत्यजाशुत्वंप्रातःकालेतुवैष्णवाः ॥ १६ ॥
आगमिष्यंतित्वद्गेहमभोक्तुंमत्प्रेरिताःशुभाः ॥ भुक्त्वायदातेयास्यंतितदैवग्रामवासिनः ॥ १७ ॥ स्वयंत्वांप्रार्थयिष्यंतिभोक्तुं
देहीतिवैमुहुः ॥ एवंदृष्ट्वातिसुस्वप्नंजामातश्चारुणोदये ॥ १८ ॥ जाग्रदुत्थायहर्षेणगृहसंमार्जनादिकम् ॥ कृत्वास्नानं
हरिंभक्त्यापूजयित्वासमुत्थितः ॥ १९ ॥ पत्रावलीनांशतशोगृहेचैवांगणेतथा ॥ स्थापयित्वाततोवारिपूर्णपात्राण्यनेकशः ॥ २० ॥
तत्रसंस्थापयामासपादप्रक्षालनस्थले ॥ एवंदृष्ट्वातुतेसर्वेअहोऽयंकिंकरोतिवै ॥ २१ ॥ भोक्तुंनचागतःकोपिकथमेवंकरोत्ययम् ॥
कथयत्स्वथतेष्वेवंशंखध्वनिरभून्महान् ॥ २२ ॥ श्रुत्वाजहर्षजामातस्तेसर्वेविस्मयंगताः ॥ ततआगत्यभक्तास्तेविष्णुनाप्रेषिताः
स्वयम् ॥ २३ ॥ जामातस्यगृहेगत्वाबुभुजुस्तेपिभक्तितः ॥ ततस्तान्वैष्णवांस्तेतुग्रामीणावैष्णवाःपराः ॥ २४ ॥ पप्रच्छुस्तेभुक्तवं
तःकेयूयंवदतेतिनः ॥ तेषांमध्येततश्चैकःप्रहसन्नब्रवीत्तदा ॥२५॥ अहंहिवैविष्णुभक्तद्विषःकिंसंवदामिवः ॥ इत्युक्तातेनभोमार्गंगताःप
रमवैष्णवाः ॥ २६ ॥ तेपिग्रामस्थिताःसर्वेजामातंप्रणिपत्यतम् ॥ भोजनंयाचयामासुर्जामातस्तानथाब्रवीत् ॥ २७ ॥ अहोतद्भुक्त
शेषंतुगृहेयन्ममवर्तते ॥ तत्सर्वंभवतामेवभक्षयध्वंनसंशयः ॥ २८ ॥ इत्युक्तास्तेसमायाताःसर्वेतेग्रामवासिनः ॥ पुनस्तान्भोजयामा

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सतावतैक्चवस्तुना ॥ २९ ॥ जामातःसंस्मरन्कृष्णंतत्प्रसादाद्व्यवर्द्धत ॥ सर्वापिभोज्यसामग्रीतैर्भुक्त्वातुयथापुरा ॥ ३० ॥ एवं
भक्तेस्तुमाहात्म्यंज्ञात्वातेग्रामवैष्णवाः ॥ जामातभक्तिंकुर्वंतोजातास्तेपिचवैष्णवाः ॥ ३१ ॥ इति श्रीभगवद्भक्तिमाहात्म्येजामातभ
क्तिचरितंनामद्वाविंशःसर्गः ॥ २२ ॥छ॥ अथापरंप्रवक्ष्यामिमाहात्म्यंपरमाद्भुतम् ॥ श्रीमार्गस्यसशिष्यस्यगुरुभक्तिप्रसंगतः ॥ १ ॥
आसीद्भागीरथीतीरेश्रीमार्गोवैष्णवोत्तमः ॥ धनपुत्रादिमोहंसंत्यक्त्वाभक्तिपरायणः ॥ २ ॥ श्रीकृष्णसेवानिरतोजपंस्तन्नामकेवलम् ॥
तस्यासीदतिभक्तोवैशिष्यःपुत्रादपिप्रियः ॥ ३ ॥ एकदातंसमाहूयश्रीमार्गःसमवोचत ॥ अहोवत्समयानैवजगन्नाथोनिरीक्षितः ॥४॥
तदर्थंयामित्वंचात्रतावत्तिष्ठात्रवेश्मनि ॥ अहंदृष्ट्वाजगन्नाथंशीघ्रमेष्याम्यसंशयम् ॥ ५ ॥ इयंगंगाजगद्धात्रीदेवीभागीरथीपरा ॥
तारिणीसर्वभूतानांपूज्यतेत्रिदशैरपि ॥ ६ ॥ इयंत्वयाभक्तिपूर्वंपूजनीयाविशेषतः ॥ यथाहंपूजितोनित्यंतथेमामपिपूजय ॥
॥ ७ ॥ सुखंवसात्रमामेनांविद्धिगंगांनसंशयः ॥ इत्युक्त्वाप्रययौशिष्यंश्रीमार्गःसाधुसत्तमः ॥ ८ ॥ जगन्नाथपुरींशिष्योभ
क्त्यावैतद्दिनादितः ॥ गंगायांनददौपादंगुरुरेवेतिनिश्चितः ॥ ९ ॥ अन्यत्रकृत्वास्नानादिभिक्षित्वान्नादिकंपुनः ॥ कृत्वानै
वेद्यमन्नंचनीत्वागंगातटेस्थितः ॥ १० ॥ संपूज्यजाह्नवींदेवींगुरुवत्प्रणिपत्यच ॥ अन्नंनिवेद्यगंगायैस्वयंसबुभुजेसदा ॥ ११ ॥
एवंतस्याह्निकंकर्मनित्यंगुर्वागमावधि ॥ रात्रिभोजनमप्यस्यैगंगायैतन्न्यवेदयत् ॥ १२ ॥ गुरुवत्तामहोरात्रंपश्यन्निन्येतुवत्स
रम् ॥ अथागतोगुरुःसायंकालेश्रीमार्गवैष्णवः ॥ १३ ॥ दृष्ट्वातमागतंशिष्यःप्रणिपत्यसमर्चयत् ॥ सेवांचकारभक्त्यासपादसं
वाहनादिभिः ॥ १४ ॥ अथतत्रस्थितायेचगंगातीरनिवासिनः ॥ श्रीमार्गंतेऽब्रुवन्क्रोधादेषशिष्योतिदुष्टधीः ॥ १५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

गतेत्वयितदारभ्यअद्यावधिनिरंतरम् ॥ गंगायांचैवनस्नानंकृतमेतेनपापिना ॥ १६ ॥ अस्माभिर्भर्त्सितोप्येषनोवाचोत्तरमप्यसौ ॥
इतिश्रुत्वागुरुःप्राहअहोस्नास्यत्यतःपरम् ॥ १७ ॥ इतिश्रुत्वातुसुष्वापप्रात रुत्थायसत्ततः ॥ गत्वातीरेसमुत्तस्थौगुरुस्तुगतवान्ज
ले ॥ १८ ॥ आकंठवारिणिस्थित्वाप्राहाशिष्यंगुरुस्तदा ॥ अंगप्रोक्षणकंवस्त्रमत्रागत्यप्रदेहिमे ॥ १९ ॥ इत्युक्तःसमहाकष्टंप्रापाशि
ष्योऽतिभक्तितः ॥ गतोदातुंचतद्वस्त्रमेतस्मिन्नंतरेजले ॥ २० ॥ प्रादुर्बभूवुःपद्मानिमहांतिसुदृढानिच ॥ जलाद्वितस्तिमात्रंतुप्रोत्थि
तानितुतीरतः ॥ २१ ॥ गुरोःसमीपपर्यंतंदृष्ट्वाशिष्यस्तुतानिवै ॥ हर्षात्तत्रैवपादौतुतद्गृहीत्वांतिकेगुरोः ॥ २२ ॥ समागत्यददौवस्त्रं
दृष्ट्वासर्वेचदुर्जनाः ॥ प्राहुराश्चर्यमेतद्धीह्युत्युक्तातत्रचागताः ॥ २३ ॥ स्नात्वाबहिरथागत्यगुरुःशिष्यमुवाचतम् ॥ किमेतन्महदा
श्चर्यंत्वत्पादस्थलहेतवे ॥ २४ ॥ पद्मपत्राणिचैतानिप्रादुर्भूतानिकिंनुतत् ॥ इत्युक्तस्तंगुरुंनत्वाशिष्यःप्रांजलिरब्रवीत् ॥ २५ ॥
नजानाम्यहमन्यद्वैतवभक्तिंविनाप्रभो ॥ त्वंगंगाहमितिप्रोच्यजगन्नाथंनिरीक्षितुम् ॥ २६ ॥ गतस्तदादिगंगायांस्नानंनकृतवानहम् ॥
गंगांत्वामेवजानन्वैकथंपादतलेनताम् ॥ २७ ॥ स्पृशामीतिविचार्याहंनपीतमपितत्पयः ॥ परंतुकेवलंभक्त्यापूजांकृत्वानिरंतरम् ॥
॥ २८ ॥ स्थितोद्यावधिवस्त्राणिदेहीत्येवंभवान्यदा ॥ समवोचत्तदाकष्टंममासीदतुलंविभो ॥ २९ ॥ कथंदास्यामिगुरवेवस्त्रंतत्रग
तोऽधुना ॥ गंगांस्पृशामिपादाभ्यांकथमेतद्विचारणात् ॥ ३० ॥ तावदेतानिपद्मानिप्रादुर्भूतानिदृष्टवान् ॥ निधायतत्रचरणौवस्त्रं
तुभ्यंददाम्यहम् ॥ ३१ ॥ भवत्प्रसादान्मेधर्मरक्षणायेहजाह्नवी ॥ पत्राण्युद्भावयामासभवतामपरातनुः ॥ ३२ ॥ एतज्जानाम्यहंना
थत्वत्प्रसादादतःपरम् ॥ नजानेतद्भवानेवसर्वंजानातिकेवलम् ॥ ३३ ॥ इत्युक्त्वासंस्थितस्तूष्णींगुरुस्तस्मैशुभाशिषम् ॥ दत्त्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सुमोदमनसासत्पुत्रेणयथागृही ॥ ३४ ॥ तेपितत्रस्थितायैवैनिंदंतस्तंतुदुर्जनाः ॥ चक्रुस्तस्यमहाभक्तिंशिष्यस्यचगुरोरपि ॥ ३५ ॥
इत्येतदुक्तंचरितंश्रीमार्गगुरुशिष्ययोः ॥ शृण्वन्भक्त्यामनुष्यस्तुगुरुमाहात्म्यमुत्तमम् ॥ ३६ ॥ लभतेमहतींभक्तिंमूर्खोविद्यामवा
प्नुयात् ॥ ३७ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येश्रीमार्गगुरुशिष्ययोश्चरितंनामत्रयोविंशःसर्गः ॥ २३ ॥ छ ॥ ॥
रामानुजकथांवक्ष्येमहाश्चर्यप्रदायिनीम् ॥ यांश्रुत्वानिजधर्म्मेणभक्तिंप्राप्यहरिंव्रजेत् ॥ १ ॥ रामानुजोद्विजःश्रेष्ठःशास्त्रज्ञोवेद
वित्तमः ॥ आसीत्सदाक्षिणात्येषुमहाचाररतःसदा ॥ २ ॥ सएकदातुजग्राहमंत्रंगुरुमुखाद्द्विजः ॥ गुरुणाचैवमुक्तस्तुमंत्रो
यंसिद्धितोद्भुतम् ॥ ३ ॥ ततःसभगवद्रूपमपश्यत्तत्क्षणाद्धृदि ॥ अथागत्यस्वगेहेषुसुप्तेलोकेमहानिशि ॥ ४ ॥ उच्चैःस्व
रेणतन्मंत्रमुच्चस्थानात्पपाठह ॥ अन्येपिश्रुत्वागृह्णंतुमंत्रमेनंततोहरिम् ॥५॥ प्राप्नुवंत्वितिबुद्ध्यावैततस्तद्ग्रामवासिनः ॥ येप्रबुद्धाः
स्थितारात्रौतेसर्वेजगृहुर्मनुम् ॥ ६ ॥ सर्वेतेज्ञानसंपन्नाःसिद्धानारायणंययुः ॥ ततोरामानुजःस्वामीभक्ताचार्य्योबभूवह ॥ ७ ॥
एकदातुसहस्रेणशिष्येणसहितोययौ ॥ नीलाचलेजगन्नाथंद्रष्टुंश्रीपुरुषोत्तमम् ॥ ८ ॥ गत्वातत्रनमस्कृत्यसददर्शार्थपूजकान् ॥ अ
नाचाररतानन्यान्सर्वानेकत्रभोजिनः ॥ ९ ॥ अहोकिमेतद्यत्सर्वेवर्णाएकत्रभुंजते ॥ तस्माद्व्यवस्थांकुर्वेहंयथाचारःप्रवर्त्तताम् ॥ १० ॥
इतिसंचिंत्यमनसापूजकांस्तान्बलेनसः ॥ वृतःशिष्यसहस्रेणबहिश्चक्रेसपूजनात् ॥ ११ ॥ स्वयमेवजगन्नाथंपूजयामासभक्तितः ॥
महाचारेणनैवेद्यंसंपाद्यहरयेपुनः ॥ १२ ॥ उवाचाहोह्यनाचारोस्त्याग्रहोवर्त्ततेमम ॥ आचारेणयथाभक्त्यायोमेयद्यत्प्रयच्छति ॥ १३ ॥
ततस्तुल्यमहंमन्योकिंचिद्भक्त्याविशिष्यते ॥ तस्मान्मत्पूजकान्भक्तान्स्नात्वानयममार्चने ॥ १४ ॥ निजांजहित्वमप्यत्रत्यजाचा

स्वप्ने जगन्नाथ उवाच

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रकथामिह ॥ इतिरामानुजःस्वामीस्वप्नंदृष्ट्वातदानिशि ॥ १५ ॥ नतत्याजस्वमाचारंस्मृतिवाक्यमनुस्मरन् ॥ अहोअत्रहरेःकोप
मनाचाराग्रहोमहान् ॥ १६ ॥ आश्रमांश्चतुरोवर्णान्यत्सहैवाशयत्ययम् ॥ अहंतुनसदाचारंत्यक्ष्यामिजीवितावधि ॥ १७ ॥ इत्यु
क्त्वानसतत्याजस्वामीस्वाचारमुत्तमम् ॥ ततस्तुभगवान्प्राहगरुडंभक्तवत्सलः ॥ १८ ॥ गच्छरामानुजंब्रूहिनात्राचारःप्रशस्यते ॥
अतस्तेपूजकाएवकुर्वंतुममपूजनम् ॥ १९ ॥ भवानाचारभक्तिभ्यांप्रियस्तत्रनसंशयः ॥ परंत्वन्मंत्रवशतःसुलभोहंसतांतव ॥ २०॥
पूजकानांतुचात्रैवममभक्तिर्दृढास्तिभो ॥ ममापिचैतत्कर्तव्यमनाचारोऽत्रसाधनः ॥ २१ ॥ तस्मात्स्वदेशेगत्वात्वंसदाचारेणमांभ
ज ॥ अहंतेऽभिमतंसर्वंस्मृतोदास्याम्यसंशयम् ॥ २२ ॥ इत्युक्तोयादिमन्येततदातन्मोहयस्वयम् ॥ प्रापयस्वनिजंस्थानंसशि
ष्यंनिद्रयान्वितम् ॥ २३ ॥ इत्युक्तोगरुडस्तेनजगन्नाथेनवैतदा ॥ रामानुजसमीपेसगत्वास्वप्नेब्रवीद्वचः ॥ २४॥ सर्वंश्रीकृष्णक
थितंश्रुत्वास्वामीजहर्षच ॥ अहोयदर्थमायातस्तत्संपन्नंमयाधुना ॥ २५ ॥ यदिप्रसन्नोभगवान्स्मृतोमेदास्यतीप्सितम् ॥ तादिदं
वागृहंवापितुल्यमेवनसंशयः ॥ २६ ॥ गच्छाम्यहमवश्यंभोइतिब्रह्मस्वरूपिणम् ॥ गरुडंप्राहचस्वामीसुष्वापशिष्यसंवृतः॥२७॥
अथांतरेतंगरुडःसशिष्यंयत्नमात्रतः ॥ निजदेशेस्थापयित्वानीलाचलमथागमत् ॥ २८ ॥ ततःप्रातस्तुतत्रत्यैर्ज्ञातःस्वामीग
तोनिशि ॥ ततःपूजाकरान्सर्वानानाययित्वानृपःस्वयम् ॥ २९ ॥ पूजयामासदेवेशंजगन्नाथंमुदान्वितः ॥ स्वामीतुप्रातरुत्थायदृष्ट्वानि
जगृहंस्मरन्॥३०॥रात्रौस्वप्नंयथादृष्टंतत्सत्यमकरोद्धरिः॥अहोभक्तेस्तुमाहात्म्यंसर्वाधिकतमंपरम्॥३१॥इत्युक्त्वामनसाशिष्यैर्युतो
भक्तिंसमाचरन् ॥ स्थापयामासपंथानंहरिभक्तेरनुत्तमम् ॥ ३२ ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येरामानुजचरितंनामचतुर्विंशः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्गः॥२४॥ ॥छ॥ ॥ अथश्रीरङ्गभक्तस्यमाहात्म्यंकथयाम्यहम् ॥ पुष्करात्पश्चिमेग्रामेधौसानाम्नेतिविश्रुते ॥१॥ तत्रश्रीरंगनामा
सीद्विइयोजैनपथेस्थितः॥तस्यदासोमृतोजातोयमदूतःसएकदा ॥२॥ वणिग्द्वारिसमागत्यदर्शयित्वात्मनोवपुः॥उवाचवणिजंपापाद्यम
दूतोभूर्वंवणिक् ॥ ३ ॥ हरिभक्तिंविनासर्वेसदानरकभागिनः ॥ इदानींपश्यप्रत्यक्षंयोसौवैश्यवृषोमहान् ॥ ४ ॥ तस्यशृंगेगतश्चाहं
स्वर्णकारमिमंपुनः ॥ परदाररतंदुष्टंहत्वानेष्येयमालयम् ॥ ५ ॥ इत्युक्त्वांतर्दधेदूतस्तत्कालेतत्रसंस्थितम् ॥ स्वर्णकारंसतुवृ
षःशृंगाभ्यांनिजघानह ॥ ६ ॥ इतिदृष्ट्वामहाश्चर्यंश्रीरंगःस्वमतंतदा ॥ त्यक्त्वाकस्यापिशिष्योभूद्वैष्णवस्यातिभक्तितः ॥ ७ ॥
हरिपूजारतोनित्यंहरिनामपरायणः ॥ ददावन्नंचपानीयंक्षुत्पिपासातुरायसः ॥ ८ ॥ स्वर्णकारस्तुदूतेननीतोगत्वायमालयम् ॥ पुन
रागत्यस्वग्रामेजातःप्रेतोऽतिहिंसकः ॥ ९ ॥ बहून्संतापयामासहरिभक्तिविवर्जितान् ॥ एकदास्वर्णकारःसप्रेतःस्वतनयंरुषा
॥ १० ॥ दर्शयामासचात्मानंततोभीतस्तुतत्सुतः ॥ नकिंचिन्मन्यतेसाधुस्मरन्प्रेतंसमुत्कटम् ॥ ११ ॥ प्रत्यहंचिंतयामास
राजन्शुष्कोबभूवसः ॥ एकदानिशितंपुत्रंहंतुंसपुनरागतः ॥ १२ ॥ ततउत्थायतत्पत्नीप्रार्थयंतीसमागता ॥ किमर्थंहंसिभोपु
त्रंवदाभीष्टंकरोमितत् ॥ १३ ॥ इतिश्रुत्वावचस्तस्याःपत्न्याःसंपश्यतोरहः ॥ प्रेतःप्रोवाचयेनस्यात्सद्गतिस्तत्कुरुष्वभो ॥ १४॥
इतिश्रुत्वातुसाप्राहकथंतेसद्गतिर्भवेत् ॥ तदाहप्रेतोहंत्वस्यशरीरेप्रविशाम्यथ ॥ १५ ॥ त्वंतुश्रीरंगपूजायाभगवच्चरणामृतम् ॥
आनीयदेहिमेशीघ्रंतदास्वर्गंव्रजाम्यहम् ॥ १६ ॥ इत्युक्तासाकरोत्सर्वंतदासप्रेतबंधनात् ॥ मुक्तोबभूवतत्पुत्रःस्वस्थोजातस्तदैव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हि ॥ १७ ॥ एवंश्रीरंगभक्तेस्तुमाहात्म्यंकथितंमया ॥ यःशृणोतिनरोभक्त्यालभतेभक्तिमुत्तमाम् ॥ १८ ॥ ॥ इति
श्रीभगवद्भक्तिमाहात्म्येश्रीरंगचरितंनामपंचविंशःसर्गः ॥ २५ ॥ ॥ छ ॥ ॥ विष्णुस्वामिप्रयःशिष्यःकृष्णदासोबभूवह ॥
कथांतस्यप्रवक्ष्यामिभक्तिमाहात्म्यसूचिताम् ॥ १ ॥ कृष्णदासस्यशिष्योभूदूर्द्ध्वरेतामहामनाः ॥ यंयंतुकृपयाशिष्यंचकारसोतिभक्ति
मान् ॥ २ ॥ भुंक्तेहविविधान्भोगान्ययावंतेहरेःपदम् ॥ मानसिंहोमहाराजस्तन्मंत्रग्रहणादभूत् ॥ ३ ॥ यस्याश्ववाहाअश्वैस्तु
तीर्त्वाब्रह्मनदंपुनः ॥ परात्परात्करंजह्रुःकृष्णदासप्रसादतः ॥ ४ ॥ मानसिंहोनिवासार्थंददौस्थानमनुत्तमम् ॥ गालवस्यऋषेःपूर्वं
स्थानमासीदनुत्तमम् ॥ ५ ॥ तदेवगलतेत्येतद्विश्रुतोह्यधुनाभुवि ॥ बहुधाकृष्णदासस्तुराजभक्तिवशीकृतः ॥ ६ ॥ तत्रैवमवसद्भूपः
स्वेच्छयापर्य्यटन्नपि ॥ एकदाकुहदेशस्यराजापुत्रविवर्जितः ॥ ७ ॥ राजकार्य्येष्वुदासीनोदत्त्वाभारंतुमंत्रिणे ॥ सपत्नीकोगतोरा
जाकस्मिंश्चित्पर्वतोत्तमे ॥ ८ ॥ प्रसन्नःकृष्णदासंतुकचित्तरुतलेस्थितम् ॥ हृष्टःप्रसादयामासकृष्णदासंनृपोत्तमः ॥ ९ ॥ प्रसन्नः
कृष्णदासस्तुतस्मैमंत्रंददौस्वयम् ॥ राजातुकृतकृत्योभून्मंत्रंप्राप्यगुरोस्ततः ॥ १० ॥ एकदातस्यभुक्त्यर्थंराज्ञीमेवाहभूपतिः ॥
मिष्टान्नंवर्ततेगेहेस्वामिनोभोजनायहि ॥ ११ ॥ समानयेतिविश्रुत्वाययौगेहेस्वयंसती ॥ नीत्वामिष्टान्नमायातिनिम्नोन्नतपथिश्र
मात् ॥ १२ ॥ पपातहस्तान्मिष्टान्नंस्थालीतःकिंचिदल्पशः ॥ उत्थायभुक्त्वातद्राज्ञीनीत्वान्यत्सापययौपुनः ॥ १३ ॥ दृष्ट्वातस्मा
त्तुभुंजानांराज्ञींचुक्रोधभूपतिः ॥ खड्गमादायतांहंतुमुद्युक्तोगुरुणाततः ॥ १४ ॥ निवारितोनचेयंभोसापराधातिसुव्रता ॥ इत्युक्त्वा
तत्करान्नीत्वामिष्टान्नंकृपयागुरुः ॥ १५ ॥ विभज्यभागमेकंतुददौराज्ञेस्वयंपुनः ॥ गृहीत्वाचैकमेवंतुराज्ञ्यैभागद्वयंददौ ॥ १६ ॥

गलताजी
जैपुरमेंप
हाडपरहै

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तद्दृष्ट्वानृपतिःप्राहकिमिदंकुरुषेप्रभो ॥ श्रुत्वैतद्वचनंराज्ञःकृष्णदासोऽब्रवीद्गुरुः ॥ १७ ॥ एषागर्भवतीराजन्पुत्रस्तेभविताध्रुवम् ॥ त
स्मैद्वितीयभागंतुददाम्येतन्नसंशयः ॥ १८ ॥ भविष्यतिसुतोयस्तेमहाभागवतोत्तमः ॥ इतिलब्ध्वावरंतस्मात्कृष्णदासाद्गुरोर्नृपः ॥
॥ १९ ॥ मेनेकृतार्थमात्मानंसपत्नीकोननामतम् ॥ अथराजासगुरुणाकृष्णदासेननोदितः ॥ २० ॥ जगामस्वगृहंराजाकृष्णदासोनि
जालयम् ॥ अथसासुषुवेराज्ञीसुमुहूर्तेसुतंसती ॥ २१ ॥ महाभागवतःसोभूच्चक्रेराज्यमकंटकम् ॥ एवंहिभगवद्भक्तिप्रसादात्किंतुदु
र्लभम् ॥ २२ ॥ पुत्रदारधनंलोकेयदिच्छेल्लभतेसतत् ॥ श्रीकृष्णप्रसादेनसत्यंसत्यंनसंशयः ॥ २३ ॥ ॥ इतिश्रीभगवद्भक्तिमा
हात्म्येकृष्णदासचरितंनामषड्विंशःसर्गः ॥ २६ ॥ ॥ छ ॥ अस्यैवशिष्यौकील्हाग्रौकथयामितयोःकथाम् ॥ तयोर्ज्येष्ठस्तुकी
ल्होभून्महायोगीजितेंद्रियः ॥ १ ॥ बहुधामथुरायांसतस्थौकृष्णमनुस्मरन् ॥ एकदामानसिंहस्तुगतस्तंद्रष्टुमुत्सुकः ॥ २ ॥
गत्वाददर्शकील्हंतंप्रणम्योवाससन्निधौ ॥ तृतीयेप्रहरेयातेदिवसस्यतदातुसः ॥ ३ ॥ आकाशमवलोक्याहअहोसम्यगहोइति ॥
श्रुत्वैतन्मानसिंहस्तुपप्रच्छविनयान्वितः ॥ ४ ॥ किमेतदब्रवीर्नाथअहोसम्यगहोइति ॥ कील्होऽब्रवीत्तुतंश्रुत्वागुर्जरस्याधि
पोनृपः ॥ ५ ॥ मृतस्त्विदानींसस्वर्गेविमानेनप्रयातितम् ॥ दृष्ट्वाब्रुवंतमत्रत्यःसोतिभक्तोममप्रियः ॥ ६ ॥ नाम्नासुमेरुदेवे
तिविख्यातोयशस्वानृपः ॥ इतिश्रुत्वातुतद्वाक्यंमानसिंहोनृपोत्तमः ॥ ७ ॥ दूतंशीघ्रगतिंतस्मात्स्थानादुत्थायप्रैरयत् ॥
सत्यंवाऽसत्यमेतत्तुज्ञातुंतस्यमहात्मनः ॥ ८ ॥ गत्वागुर्जरदेशंतुनीत्वापत्रंत्वरान्वितः ॥ प्रददेमानसिंहायतस्मिन्पत्रेतदैवसः ॥ ॥ ३७॥
॥ ९ ॥ तस्मिन्दिनेऽपराह्णेतुमृतोराजानसंशयः ॥ इतिदृष्ट्वातुतत्पत्रंनिश्चिकायतदानृपः ॥ १० ॥ अथकील्हेनतज्ज्ञातंराज्ञः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

संदेहकर्मतत् ॥ नचुकोपदयार्द्रत्वात्पुनःकालांतरेगुरुः ॥ ११ ॥ मंजूषायांधृतांमालाराज्ञीपश्यतिचात्मनः ॥ तदैवघटिका द्वित्रीमध्येकीलहोऽब्रवीन्नृपम् ॥ १२ ॥ मंजूषायास्तुनिष्कास्यमालांमेदेहिभूपते ॥ इतिश्रुत्वाततोराजामंजूषोद्घाटितास्वयम् ॥ ॥ १३ ॥ ददर्शतत्रसर्पंतुस्फुरंतमतिकोपनम् ॥ ततोराजाभयात्तस्यमुखमाच्छाद्यतंगुरुम् ॥ १४ ॥ प्राहात्रसर्पोतिमहान्नमालादृश्यते गुरो ॥ ततस्तुकीलहदासोपिराज्ञीपश्यतितत्क्षणात् ॥ १५ ॥ मालांततोविनिष्कास्यपुनस्तत्रैवतांन्यधात् ॥ पुनराहनृपंदेहीत्युक्तः सपुनरेवहि ॥ १६ ॥ उद्घाटितेमुखेतस्याःसर्पमेवददर्शसः ॥ एवंवारत्रयंतस्मैदर्शयित्वाद्भुतंमहत् ॥ १७ ॥ तूष्णींतस्थौगुरुःसो पिराजात्मानंविगर्हयन् ॥ तत्कथायांचसंदेहंत्यक्त्वातद्भक्तिमानभूत् ॥ १८ ॥ अस्यभ्राताकनिष्ठोभूदग्रदासइतिश्रुतः ॥ वक्ष्येत द्भक्तिमाहात्म्यंपरमाश्चर्यकारकम् ॥ १९ ॥ एकदाचाग्रदासंतंद्रष्टुंराजासमागतः ॥ स्वसैन्यंद्वारतोबाह्येधृत्वाराजाततोगृहम् ॥ २० ॥ अग्रदासस्तदागेहात्पुष्पवाट्यांजगामह ॥ तत्रशुष्काणिपर्णानिसंमार्ज्यबहिरत्यजत् ॥ २१ ॥ राजागत्वासतस्याग्रेस्वासनस्थंददर्श तम् ॥ दर्शनीयंविधायाग्रेप्रणनामातिदासवत् ॥ २२ ॥ अथपप्रच्छकुशलमग्रदासोनृपंमुदा ॥ सोपितंप्रणिपत्याहकथामन्यांनीजेप्सि ताम् ॥ २३ ॥ अथाग्रदासःसंमार्ज्यपुष्पवाटीमुपागतः ॥ गृहद्वारिनवैगंतुंतस्मैतेराजकिंकराः ॥ २४ ॥ ददुस्तत्रैवतिष्ठत्वंराजातत्रग तोधुना ॥ इतिब्रुवंतस्तद्वाक्यंश्रुत्वातत्रैवसंस्थितः ॥ २५ ॥ द्वारिसंचिंत्यतन्नामस्वादिदंभविवर्जितः ॥ अथांतरसमायातोनाभादासः कश्चिद्गतः ॥ २६ ॥ ददर्शगुरुमासनिमग्रदासंधरातले ॥ अहोकिमेतदित्युक्त्वाअग्रनामाततस्तुतम् ॥ २७ ॥ प्राहाग्र दासोराज्ञोवैभृत्यैरेतैर्निवारितः ॥ तिष्ठाम्यत्रैवकिंतेनयथातत्त्वादृशंत्विदम् ॥ २८ ॥ इतिश्रुत्वासतान्भृत्यान्संनिवर्त्यगुरुं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततः ॥ पुरस्कृत्यगतस्तत्रयत्रासीन्नृपतिःस्थितः ॥ २९ ॥ तंदृष्ट्वातेसमुत्तस्थूराजापिपरमादरात् ॥ दंडवन्निपपाताथरा
जातस्मिन्क्षणेपुनः ॥ ३० ॥ आसनस्थोऽग्रदासस्तुतत्रैवांतर्दधेस्वयम् ॥ दृष्ट्वैतत्परमाश्चर्यंततउत्थायभूपतिः ॥ ३१ ॥
नाभाख्यंपृष्टवान्सर्वंनाभादासस्तमब्रवीत् ॥ तवभक्त्यानृपगुरुःकार्य्यांतरमकल्पयत् ॥ ३२ ॥ ततःस्वयंसमायातस्तत्तिरोभावय
न्वपुः ॥ नचैवाश्चर्यमेतद्धिराजन्नेषांमहात्मनाम् ॥ ३३ ॥ नचात्रविस्मयःकार्योमहदाचरिताऽद्भुतम् ॥ ततआगत्यराजातुमानसिं
होतिभक्तिमान् ॥ ३४ ॥ अग्रदासंतुतुष्टावस्वापराधंक्षमापयन् ॥ अग्रदासोपितंप्राहसंतुष्टोऽहंनराधिप ॥ ३५ ॥ अजानद्भिस्तुतेभृ
त्यैर्द्वारेऽहंरोधितोनृप ॥ नतत्रतवदोषोऽस्तिनचतेषामपिध्रुवम् ॥ ३६ ॥ इतिश्रुत्वावचोराजातुतोषप्रणिपत्यतम् ॥ आजगामस्वं
नगरंतद्भक्तिंहृदिचिन्तयन् ॥ ३७ ॥ इत्युक्तमग्रदासस्यभक्तिमाहात्म्यमुत्तमम् ॥ श्रुत्वैतत्परमाख्यानंविष्णुभक्तिंलभेन्नरः ॥ ३८ ॥
॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येकीलहाग्रदासचरितंनामसप्तविंशःसर्गः ॥ २७ ॥ छ ॥ ॥ शंकराचार्यमाहात्म्यंकथया
मिमहाद्भुतम् ॥ यस्यश्रवणमात्रेणसद्भक्तिंलभतेनरः ॥१॥ देशेतुद्राविडेपुण्येतुंगभद्रेतिनामतः ॥ नद्यौपापविनाशिन्यौपुण्यदःसंगम
स्तयोः ॥ २ ॥ शृंगेरीइतिविख्यातस्तत्रग्रामोतिपुण्यवान् ॥ तत्रासन्ब्राह्मणाःपुण्यावेदवेदांगपारगाः ॥ ३ ॥ अध्यापयंतोवेदांश्चस
र्वेयज्ञविशारदाः ॥ दयाधर्म्मरताःसर्वेनिजदाररताःसदा ॥ ४ ॥ ब्रह्मलोकइवाभातिपृथिव्यांनगरंतुतत् ॥ तत्रब्रह्मकुलेसाधाववतीर्णो
महेश्वरः ॥ ५॥ शंकरःशंकरेत्येतन्नाम्नासंप्रार्थितःसुरैः ॥ घोरेकलियुगेप्राप्तेलुप्तेयज्ञादिकर्म्मणि ॥ ६ ॥ सर्वेजैनमतैर्मुग्धानास्तिकाध
र्म्मनिंदकाः ॥ दानश्रद्धाव्रतादीनांद्वेषिणोजातिवर्जिताः ॥७॥ वर्णाश्रमच्युताःसर्वेहव्यकव्यबहिष्कृताः ॥ असच्छास्त्रप्रवक्तारःसच्छा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्त्रत्यागिनोनराः ॥ ८ ॥ ततःस्वभागमप्राप्यदेवाइंद्रपुरागमाः ॥ ब्रह्माणंशरणंसर्वेहव्यकव्यबहिष्कृताः ॥ ९ ॥ जानाम्यहंभवंतस्तुय
दर्थमिहचागताः ॥ तस्योपायंकरिष्यामियूयमायातपृष्ठतः ॥ १० ॥ इत्युक्त्वाप्रययौधातायत्रासौगिरिजापतिः ॥ तत्रासीनंददर्शाथ
विष्णुनासहशंकरम् ॥ ११ ॥ ततोपविश्यधातातावुवाचहरिशंकरौ ॥ युवयोर्बलमाश्रित्यमयासृष्टमिदंजगत् ॥ १२ ॥ तादिदानीं
कर्म्मभूमौजैनाचाररतानराः ॥तत्यजुर्वेदशास्त्राणियज्ञदानतपःक्रियाः ॥१३॥ ततोमीदेवगंधर्वयक्षकिन्नरपन्नगाः॥अप्राप्यबलिभागंतेदी
नाःप्राणावशेषिताः ॥१४॥ युवांशरणमायाताःकुरुतंतत्प्रतिक्रियाम् ॥ इत्युक्ताप्राहभगवानेतदर्थमहंपुरा॥१५॥युष्मदागमनंज्ञात्वास
मायातोत्रशंकरः ॥ यद्वदिष्यतिलोकानांहितंकुर्मोवयंहितत् ॥१६॥ इतिश्रुत्वावचस्तस्यतदाप्रोवाचशंकरः ॥ अहोयथाभवेत्स्वस्ति
प्रजानांगरुडध्वज ॥१७॥ तद्विचार्यवदस्वत्वंवचनंकरवाण्यहम्॥इतिश्रुत्वावचस्तस्यशंकरस्यतथाविधिः॥१८॥ प्रोवाचाहंप्रवक्ष्यामि
यथास्यात्स्वस्तिमज्जगत् ॥ अहोभवश्चविष्णुश्चसर्वेवयमतःपरम्॥१९॥गत्वापृथिव्यामंशेनप्रादुर्भूयद्विजालये॥वेदान्शास्त्राणियज्ञादी
न्संस्थाप्यजैनशासनम्॥२०॥तिरस्कृत्यगमिष्यामस्ततःक्षेमंभविष्यति॥इत्युक्तोवेधसातौतुस्वींचक्रातेहराच्युतौ ॥ २१ ॥ ययौस्वधा
मसविधिर्विसृज्येंद्रादिकान्सुरान् ॥ विचिंत्यमिथिलायांसप्रजापतिरवातरत् ॥ २२ ॥ श्रीमंडनाविमिश्रोहिनामाद्विजकुलेविधिः ॥ भ
गवानपितत्रैवमिथिलायांजनार्दनः ॥ २३ ॥ श्रीमदुदयनाचार्य्यरूपेणावततारह ॥ महादेवोपिद्रविडेदेशेब्रह्मकुलेप्रभुः ॥ २४ ॥
शंकराचार्यनाम्नावैसंजातोद्विजमंदिरे ॥ कथामस्यप्रवक्ष्यामिपूर्वंपश्चात्तयोरपि ॥ २५ ॥ सतुविप्रकुलेजातःसाक्षादेवसदाशिवः ॥
अनायासेनवेदांश्चशास्त्राण्यध्यैष्टसर्वशः ॥२६॥ कृत्वासद्ब्रह्मचर्यंतुगार्हस्थ्यारण्यवर्जितम् ॥ दंडंजग्राहविधिनासंन्यस्तोभून्महामतिः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ २७ ॥ धर्मंसर्वत्रसंस्थाप्यपाश्चिमायांतुकश्चन ॥ राजासीज्जैनाशिष्यस्तुमहामूर्खोतिनास्तिकः ॥ २८ ॥ तस्यराज्येजनाःसर्वे
नास्तिकाएवकेवलम् ॥ नतेश्रद्धधिरेमूर्खाःशंकराचार्य्यभाषितम् ॥ २९ ॥ तथापिनास्तिकग्रंथखंडकंपुस्तकंनिजम् ॥
श्रावयामासराजानंसराजादैवयोगतः ॥ ३० ॥ ममारश्रुत्वातंस्वामीशिष्यान्प्राहात्रमेवपुः ॥ रहःसंस्थाप्यरक्षंतुतैलद्रोण्यांनिरं
तरम् ॥ ३१ ॥ षण्मासांतेपुनरहमायास्यामिवपुष्यथ ॥ यथारुचिकरिष्यामिततोहंदुष्टशासनम् ॥ ३२ ॥ अहंराज्ञःशरी
रेतुगत्वातत्रनिजंमतम् ॥ निर्मायराज्येसंस्थाप्यवेदान्नेष्याम्यसंशयम् ॥ ३३ ॥ इत्युक्त्वासगतःस्वामीराज्ञोवपुषितत्क्षणात् ॥ पर
कायप्रवेशादिसिद्धिभिःसेवितोयतिः ॥ ३४ ॥ ततोराजगृहेराजाजिजीवेत्यब्रुवञ्जनाः ॥ सर्वेमुमुदिरेतत्रमहोत्साहंप्रचक्रिरे ॥ ३५ ॥
अथराजासमुत्थायसचिवानिदमब्रवीत् ॥ अहोमृतोगतोहंतुधर्मराजसमीपतः ॥ ३६ ॥ तत्रदृष्ट्वासमाहूययमोदूतानवोचत ॥ अरेऽ
स्यवर्त्ततेचायुर्नेदानींमत्प्रशासनम् ॥ ३७ ॥ अर्हत्ययंततोयूयमेनंनयतस्वंवपुः ॥ इतिश्रुत्वाअहंतैस्तुनीतोस्मिस्वशरीरके ॥३८॥
तत्रयावत्स्थितोहंतुदृष्टवान्परमाद्भुतम् ॥ सत्यंवेदाश्चयज्ञाश्चधर्मशास्त्रव्रतंतपः ॥ ३९ ॥ एतन्मार्गरतायेवैवेदशास्त्रपरायणाः ॥
तान्दृष्ट्वासौम्यरूपःसचतुर्बाहुर्हसन्मुखः ॥ ४० ॥ प्रणम्यपूजयित्वातान्प्रस्थापयतिवैदिवम् ॥ येत्वभक्तावेदशास्त्रेयज्ञकर्म्मविनिंद
काः ॥ ४१ ॥ अनीश्वरपथारूढानास्तिकाभ्रांतचेतसः ॥ तान्दृष्ट्वासहसोत्थायवापीसदृशलोचनः ॥ ४२ ॥ महोग्रदीर्घदंष्ट्राभि
र्भयंकरमुखःस्वयम् ॥ दंडमादायकोपेनमहादीर्घवपुर्द्धरः ॥ ४३ ॥ हत्वादंडेनतान्सर्वान्स्थापयत्यातिदुःखदे ॥ कुंडेकुंडेपूयकृमि
विडंगारास्त्रसंकुले ॥ ४४ ॥ एवंसाक्षादहंदृष्ट्वासमायातोस्मितत्क्षणात् ॥ तस्मान्मतमिदंसर्वंनिर्मूलंनात्रसंशयः ॥४५॥ अस्तिस्वर्गे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्वनरकोवेदाःशास्त्राणिसंतिभो॥देवायज्ञाश्चधर्म्मश्चसत्यंतेनात्रसंशयः॥४६॥अतोयातस्तदेवाहंमतमंगीकरोमिच॥यूयमन्येचयेकेचिन्म मराज्यनिवासिनः ॥ ४७ ॥ वेदमार्गेणगच्छंतुत्यक्त्वातन्नास्तिकंमतम् ॥ इमामाज्ञांसमुल्लंघ्यप्रस्थास्यतिनराधमः ॥ ४८ ॥ तंतु हन्मिनसंदेहःसत्यमेतद्ब्रवीम्यहम् ॥ आनयध्वमतोगाश्चरत्नानिकनकानिच ॥ ४९ ॥ ब्राह्मणावेदशास्त्रज्ञास्तेभ्योदास्याम्यहंधनम् ॥ पूजोपकरणंसर्वंदेवताप्रतिमास्तथा ॥ ५० ॥ शालग्रामशिलांराज्येस्थाप्यतांप्रतिमन्दिरम् ॥ इत्याज्ञांनृपतेःसर्वेपुरस्कृत्ययथो क्तवत् ॥ ५१ ॥ चक्रुस्तेसचिवाअन्यैःकारयामासुरादरात् ॥ अथराजापिसुस्नातःसंपूज्यमनसाहरिम् ॥ ५२ ॥ दत्त्वाधनानिविप्रे भ्योराजकार्य्यपरोऽभवत् ॥ ५३ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येशंकराचार्य्यचरितंनामाष्टाविंशःसर्गः ॥ २८ ॥ ॥ अथते सचिवास्तंतुराजानंप्राहुरानताः ॥ राजन्वेदानसंत्यत्रशास्त्राण्यपिनकानिचित् ॥ १ ॥ यज्ञंतपोवादानंवानजानातीहकश्चन ॥ ततः किंतुकरिष्यामस्तद्वदात्रमहीपते ॥ २ ॥ इतितेषांवचःश्रुत्वाराजाप्राहाथमंत्रिणम् ॥ अत्रागतोभून्मेस्वामीशंकराचार्य्यनामतः ॥ ॥ ३ ॥ सशिष्योयदिवात्रस्थोशिष्यावायदिसंतिचेत् ॥ तद्द्वारावेदशास्त्राणिप्रकटानिकरोम्यहम् ॥ ४ ॥ तमानयध्वंवैचात्रशिष्यान्वा ममसन्निधिम् ॥ इत्युक्ताःसचिवास्तेतुशिष्यान्नीत्वानृपांतिकम् ॥ ५ ॥ आनयित्वाददौराज्ञेराजातानब्रवीत्स्वयम् ॥ भवंतोवेद शास्त्राणियज्ञव्रततपांसिच ॥ ६ ॥ शिक्षयंतुजनान्सर्वान्ममाग्रेपिचकेचन ॥ समेत्यशास्त्रंगृह्णंतुमयायद्यत्प्रदीयते ॥ ७ ॥ इत्युक्त्वा तान्सशिष्यान्सराजासर्वस्वयंपुनः ॥ शास्त्रमध्यापयामासवेदान्यज्ञादिकाःक्रियाः ॥ ८ ॥ ततस्तेराज्यवासिनोविद्यांशिष्याद दुर्मुदा ॥ एवंसंपूर्णराज्येतुवेदशास्त्रव्यवस्थितिः ॥ ९ ॥ संपन्नानृपतिस्सोपिददौदानमनेकशः ॥ तदाराज्येस्थितायेवैनास्तिकास्ते

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दिशोदश ॥ १० ॥ प्रपलाय्यगतास्तूर्णमात्मरक्षणतत्पराः ॥ अथजातेतुषण्मासेस्वामीराजशरीरगः ॥ ११ ॥ नाजगामनिजेदेहे
शिष्योगत्वारहोब्रवीत् ॥ स्वामिन्व्यतीतान्षण्मासांस्तैलेदेहोस्तियःपुनः ॥ १२ ॥ तस्यकिंतुकरिष्यामितदाज्ञापयमांविभो ॥
इतिश्रुत्वासशिष्यस्यवचनंप्राहतंपुनः ॥ १३ ॥ स्वामीराजाथसंरक्ष्यप्रातरेष्याम्यसंशयम् ॥ ततउत्थायराजातुसचिवानाजुहावच॥
॥ १४ ॥ आगतांस्तानुवाचेदंसचिवान्समहीपातिः ॥ अहोरात्रौमयास्वप्नोदृष्टःप्राणहरोनृणाम् ॥ १५ ॥ इदानीमपिनासाग्रंनपश्यामि
तथापुनः ॥ नशृणोमिप्रयत्नेनप्राणघोषानपिस्वयम् ॥ १६ ॥ अतोहंतनयंज्येष्ठमभिषिंचामिसत्कृतम् ॥ राज्येयूयंमंत्रिणस्तु
यथातस्यहितंभवेत् ॥ १७ ॥ तथातथातुकर्त्तव्यंयुष्माभिर्धर्म्मतत्परैः ॥ इदानीमेवसामग्रींसंपादयतमाचिरम् ॥ १८ ॥
इतिश्रुत्वावचस्तस्यराज्ञस्तेसचिवाद्रुतम् ॥ संपाद्यसर्वसामग्रींशोकार्ताअब्रुवन्नृपम् ॥ १९ ॥ ततोराजासुतंज्येष्ठमभ्य
षिंचत्स्वमंत्रिभिः ॥ धर्म्मकार्य्यंतथाराजाकरोत्सर्वानुवाचह ॥ २० ॥ यथायोग्यमथैवंतुनिनायतदहर्नृपः ॥ प्रातःकालेसमु
त्थायस्नात्वासंपूज्यकेशवम् ॥ २१ ॥ दत्त्वादानंद्विजातिभ्योसंस्थाप्यनृषुवैष्णवीम् ॥ भक्तिमभारनृपतिर्नारायणपदंवदन् ॥
॥ २२ ॥ अथागत्यनिजेदेहेतैलादुत्थायचस्वयम् ॥ पूर्ववत्सहशिष्यैस्तुशंकराचार्य्यआस्थितः ॥ २३ ॥ ततःश्रुत्वातुता
न्स्वामीनास्तिकान्मरुदेशगान् ॥ तत्रापिराजाबौद्धस्याशिष्याःसर्वेऽतिनास्तिकाः ॥ २४ ॥ तैःसाकंबहुधातस्यविवादःसमजायत ॥
पराजिताअपितथानामन्यंतपराजयम् ॥ २५ ॥ अथैकदातुनृपतीररामग्रामबाह्यतः ॥ पंचभूमौप्रसादेचस्थितस्तत्रगतावुभौ ॥२६॥
शंकराचार्य्यस्वामीतुजैनाचार्य्यस्तथापरः ॥ तत्रैववादंकुर्वतौनएकोपिपराजयत् ॥ २७ ॥ ततोजैनमताचार्य्योराजानमिदमब्रवीत् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

राजन्निदानीमत्रैवमहाश्चर्य्यंभविष्यति ॥ २८ ॥ तत्पश्यपूर्वमेवाहंजानामिनिजशक्तितः ॥ अत्राकस्माद्धरांभित्त्वाजलंप्रादुर्भविष्यति ॥ २९ ॥ तज्जलंवर्द्धमानंतुसर्वमेतद्गृहंतव ॥ मज्जयिष्यतिनौरेकातस्मिन्नायातिसास्वयम् ॥ ३० ॥ तत्रारूढस्तरेद्वारिनोचेन्मग्नोभविष्यसि ॥ इत्युक्त्वामाययासर्वंचकारनास्तिकोत्तमः ॥ ३१ ॥ स्वामीज्ञात्वातुतत्सर्वंतन्मायांविललापसः ॥ स्वप्नंतयाकरोत्सर्वंतत्रवैनास्तिकःसतु ॥ ३२ ॥ विश्वस्तोनिजमायायामागतेवारिसंचये ॥ राजानमाहपश्येदंवारिराजन्समागतम् ॥ ३३ ॥ अतःपरंकथंह्यत्रतिष्ठामोवारिराशिषु ॥ नौरेषायासमायातातस्यांस्थित्वातयावयम् ॥ ३४ ॥ तरिष्यामोनसंदेहःश्रुत्वैतद्वचनंद्रुतम् ॥ अब्रवीच्छंकराचार्य्योराजन्गच्छत्वयंपुरा ॥ ३५ ॥ ततोभवांस्ततोऽहंतुनावियास्याम्यहंस्वयम् ॥ इतिश्रुत्वाततोराजातंनास्तिकमुवाचह ॥ ३६ ॥ गच्छत्वंप्रथमंशीघ्रंनौकायांतदनंतरम् ॥ अहंयास्येषस्वामीतुपश्चात्तत्रागमिष्यति ॥ ३७ ॥ इत्युक्त्वाजैनसिद्धांतीस्वामीमायेतिनिश्वसन् ॥ आरुरोहचत्वंनौकांनृपोपिचलितोभवत् ॥ ३८ ॥ हस्तंगृहीत्वातंस्वामीन्यवारयतवैबलात् ॥ अथासौनौकयारूढोराज्ञएवमभून्मतिः ॥ ३९ ॥ सतुतत्रगतोत्युच्चैराकाशात्पतितोभुवि ॥ हस्तौपादौतदैकत्रशिरश्चैकत्रतस्यह ॥ ४० ॥ पपाततत्क्षणान्नौकाजलंचादृश्यतांययौ ॥ इतिदृष्ट्वाद्भुतंराजाशंकराचार्य्यमब्रवीत् ॥ ४१ ॥ किमिदंकथयस्वामिन्महाश्चर्य्यमभूदिदम् ॥ श्रुत्वैतद्वचनंराज्ञःस्वामीवचनमब्रवीत् ॥ ४२ ॥ राजन्नेषमहादुष्टोनास्तिकोनिजमायया ॥ मिथ्याजलंतथानौकांदर्शयित्वाथदुर्जनः ॥ ४३ ॥ मांनिहंतुंसमुद्युक्तस्तत्रसंस्थाप्यचेत्यहम् ॥ ज्ञात्वामायांनिजांकृत्वातन्मायानाशितामया ॥ ४४ ॥ तत्तुनावैत्सदुष्टात्मास्वमायेतिचनिःश्वसन् ॥ भवद्वाक्याच्चनौकायांगतोनिपततोभुवि ॥ ४५ ॥ सर्वंमिथ्येतिज्ञात्वाहंभयात्त्वांप्रत्यषेधयम् ॥ एनंपश्यमृतंभूमौस्वकर्म

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वशतःखलम् ॥ ४६ ॥ धर्म्मंचैवतुत्वंत्यक्त्वाकौलीनंराजसत्तम ॥ ननास्तिकपथेवोरेगंतुमर्हसिभूपते ॥ ४७ ॥ इत्युक्तोभूपतिः
प्राहशंकराचार्य्यमानतः ॥ अहोस्वामिन्मयाप्येतज्ज्ञातंसर्वंनसंशयः ॥ ४८ ॥ मिथ्यैवनास्तिकमतंत्यक्तमेतन्मयापिभो ॥ अतःप
रंभवानेवमंत्रंमेदातुमर्हति ॥ ४९ ॥ ततःस्वामीहरेर्मंत्रंददौराज्ञेऽतिभक्तिदम् ॥ राजागृहीत्वामंत्रंतुस्वराज्येसचिवादिकान् ॥ ५०॥
आज्ञापयामासतदात्यक्त्वातुजैनशासनम् ॥ वेदशास्त्ररताःसर्वेंभवंतःप्रभवंतुभो ॥ ५१ ॥ एवमाज्ञांपुरस्कृत्यसचिवाद्यास्ततःपरम् ॥
वेदशास्त्रोक्तमार्गेणबभूवुरतिवैष्णवाः ॥ ५२ ॥ एवंतत्रापिसंस्थाप्यवेदशास्त्राणिचप्रभुः ॥ पर्यटन्पृथिवीमेतांमिथिलायामुपागतः ॥
॥ ५३ ॥ ददर्शमिथिलांरम्यांब्राह्मणैरतिसंकुलाम् ॥ मीमांसान्यायवेदांतसांख्यसिद्धांतमंडिताम् ॥ ५४ ॥ सांगोपांगंयजुर्वेदंपठ
द्भिर्ब्राह्मणैर्युताम् ॥ प्रतिग्रामंद्विजगणैर्नमस्कृत्यसुपूजितः ॥ ५५ ॥ एवंदृष्ट्वासमिथिलांस्वामीसम्यक्तुतोषह ॥ ५६ ॥ ॥ इति
श्रीभगवद्भक्तिमाहात्म्येशंकराचार्य्यचरितंनामएकोनत्रिंशःसर्गः ॥ २९ ॥ मिथिलायांततःस्वामीजनकस्यगृहस्थलम् ॥ गत्वाप्रथ
मतस्तत्रधनुःखंडंददर्शह ॥ १ ॥ यद्बभंजरघुश्रेष्ठःसीतापाणिग्रहोद्यमे ॥ ततोविदूरेगिरिजांविदेहकुलदेवताम् ॥ २ ॥ ददर्शाथ
ततोगत्वाव्याघ्रतीर्थमनुत्तमम् ॥ शरबिंदुह्रदेतत्रस्नात्वादृष्ट्वामहेश्वरम् ॥ ३ ॥ शिलानाथंततोगत्वाश्रीमन्मंडनशर्म्मणः ॥
गृहंजगाममध्याह्नेशिष्यैःसर्वैःसमन्वितः ॥ ४ ॥ तंदृष्ट्वादंडिनंमिश्रःसमुत्थायाग्रतोययौ ॥ नमस्कृत्यस्वयंतंतुपाद्याद्यर्घ्याद्यैरपूजय
त् ॥ ५ ॥ ततोऽन्नंभोजयामासस्वामिनंबहुभक्तितः ॥ ततःस्वयंसशिष्यस्तुभुक्त्वामंडनमिश्रकः ॥ ६ ॥ स्वामिन्विज्ञातुमि
च्छामियदिकोपोनमेभवेत् ॥ त्वंहिनारायणःसाक्षादतःपूर्वंक्षमापये ॥ ७ ॥ आगत्याचार्य्यनिकटेददौतस्मैसुखास्तरम् ॥ तस्मि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

न्स्वामीविशश्रामतंमिश्रःपुनरब्रवीत् ॥ ८ ॥ इत्युक्तःशंकराचार्य्यस्तमुवाचाथसास्मितम् ॥ माभयंकुरुमत्तस्त्वंनाहंक्रोधवशंगतः ॥
॥ ९ ॥ अधःपततिसत्यंहिक्रोधलोभवशोयतिः ॥ तस्मात्त्वंनिर्भयंपृच्छयद्योग्यंतद्ददाम्यहम् ॥ १० ॥ एवंमंडनमिश्रस्तुश्रुत्वा
स्वामिनमब्रवीत् ॥ अहोकलौनिषिद्धोपिसंन्यासोयद्यपिप्रभो ॥ ११ ॥ बलात्त्वयागृहीतश्चेह्लाभोस्माकंमहानयम् ॥ यत्पुस्तके
भिक्षुधर्म्माःस्वरूपंचश्रुतंमुहुः॥१२॥ दृष्टेदानींभवंतंतत्साक्षात्पश्यामिचक्षुषा ॥ अद्यावधिनकेनापिकृतःकुत्रापिवैप्रभो ॥१३॥इतिमि
श्रवचःश्रुत्वास्वामीप्राहातिहृष्टवत् ॥ अहोभवान्कथमिदंब्रूतेचित्रंममाग्रतः॥१४॥ विज्ञायसर्वशास्त्राणिसंन्यासोवर्जितःकलौ ॥ कलाव
पिविधिमत्तःसंन्यासस्यनिशामय ॥ १५ ॥ इत्युक्त्वाधर्म्मशास्त्राणांवचनान्यब्रवीत्ततः ॥ ततोमिश्रोपितत्पक्षखंडनायाब्रवीद्वचः ॥
॥ १६ ॥ एवंतयोरभूत्तत्रविचारःकतिवासरान् ॥ नकोप्याप्नोतिविजयंनकोपिचपराजयम् ॥ १७ ॥ ततएकदिनेस्वामीप्राहमंडनमि
श्रकम् ॥ अहोभवानपिब्रूतेतथाहमपितद्द्वयम् ॥ १८ ॥ मध्यस्थेनविनाचेत्थंनसिद्धांतोभविष्यति ॥ तस्मात्तवेयंयापत्नीसैवदेवीस
रस्वती ॥ १९ ॥ तामाभाष्यावयोर्जानेविचारेसाधुनस्तुयत् ॥ कथयिष्यतिमांत्वांतुससिद्धांतोनसंशयः ॥ २० ॥ इतिश्रुत्वावच
स्तस्यमिश्रोप्यंगीचकारतत् ॥ ततोमिश्रस्त्रियंस्वामीप्राहत्वमसिभारती ॥२१॥ आवयोःशास्त्रकलहेसिद्धांतंवदनौहितम् ॥ इत्युक्ता
सामिश्रपत्नीप्राहाहंयुवयोर्वचः ॥ २२ ॥ श्रुतवत्यस्मिचाद्यापिशृण्वंतीगृहकर्म्मच ॥ कुर्वाणानौवदिष्यामिसिद्धांतंनात्रसंशयः ॥२३॥
इत्युक्त्वासातुसंपाद्यस्वयंपाकंशुचिव्रता ॥ तयोरंतिकमागत्यवाग्भिर्विवदमानयोः॥२४॥पतिंप्राहातिविनयात्पश्यतांविदुषांनृणाम् ॥
विवादादातुरोजातःस्वाम्यभिज्ञांचराधुना ॥ २५ ॥ इतितस्यावचःश्रुत्वामिश्रस्तूष्णींबभूवह ॥ स्वामीतुतांमिश्रपत्नीमाशीर्भिरभ्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वर्द्धयत् ॥२६॥ तदान्येपंडिताःसर्वेस्थितायेतुसभासदः ॥ अनुध्यंताशेषवाक्यमाचार्यमतमुत्तमम् ॥२७॥ परंत्वातुरसंन्यासोनसर्वेषा
मितिस्फुटम् ॥ इतिज्ञात्वापुनर्मिश्रःस्वामिनंप्राहसस्मितम् ॥२८॥ अहोऽनयायदुक्तंतेआतुरोजातइत्यपि ॥ तस्मादातुरसंन्यासंस्वी
करोमिकलावपि॥२९॥नत्वाश्रमश्चतुर्थोयंसिद्धचत्यस्मिन्पुरोनृणाम् ॥ त्वादृशःपुरुषश्चस्याद्धियानियमेनच॥३०॥ जितारिवर्गोनिर्द्वं
द्वोतदान्यस्तोभवेद्द्विजः॥ इतिमंडनमिश्रस्यश्रुत्वास्वामीवचोऽब्रवीत्॥३१॥अहोसत्यमिदंब्रूषेसर्वसिद्धांतसम्मितम् ॥ मतमेतन्नसंदेहः
सिद्धांतोयंनसंशयः ॥ ३२ ॥ अतःपरंसमुत्तिष्ठजातःपाकोस्तिमंदिरे ॥ दत्त्वास्मभ्यंस्वयंभुंक्ष्वकथापश्चाद्भविष्यति ॥ ३३ ॥ इत्युक्तः
संस्थितोमिश्रोदत्त्वातेभ्यस्तुभोजनम्॥स्वयंतुबुभुजेशिष्यैरागतैःपंडितैःसह॥३४॥ उत्थायचततःस्वामीप्रहृष्टेनांतरात्मना॥ न्यायमी
मांसयोर्व्याख्यांमिश्रेणचकृतांपुनः॥३५॥ गृहीत्वाशिष्यसहितःप्रतस्थेमिथिलांपुरीम् ॥ एवंश्रीशंकराचार्यश्रीमन्मंडनमिश्रयोः॥३६॥
संवादोवर्णितोभक्तेःप्रसिद्धोधरणीतले॥३७॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येश्रीशंकराचार्यमंडनमिश्रचरितंनामत्रिंशःसर्गः॥३०॥छ॥
अथवक्ष्येतृतीयस्यहरेरंशस्यधीमतः ॥ उदयनाचार्यनाम्नस्तुमाहात्म्यंलोमहर्षणम् ॥ १ ॥ भूत्वासमिथिलायांतुशास्त्राण्यध्यै
ष्टसर्वशः ॥ विशेषतोन्यायशास्त्रेसाक्षाद्वैगौतमोमुनिः ॥ २ ॥ बौद्धसिद्धांतमुग्धांतःसुखायहितकारिणीम् ॥ वितेनेविदुषांप्रीत्यै
विमलांकिरणावलीम् ॥ ३ ॥ एकदाबौद्धसिद्धांतान्प्रकटीकर्तुमागतः ॥ बौद्धाचार्योतीवभक्तोनृपग्रामंसमागतः ॥ ४ ॥ स्वशि
ष्यैःस्वीयशास्त्रस्यपुस्तकैर्बहुभिर्वृतः ॥ राजानंप्रेषयामासदूतंदर्पवशादसौ ॥ ५ ॥ किंचिच्छिवंगच्छशिष्यमिथिलेशंवदाधुना ॥
मद्वाक्याद्वेदशास्त्राभ्यांमुधाभ्रांतोसिभूपते ॥ ६ ॥ निरीक्ष्यममशास्त्राणिप्रत्यक्षानुगतोभव ॥ अस्तिचेत्तवदेशेस्मिन्वेदस्थापनकृत्पु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मान् ॥ ७ ॥ तमानयमयासार्द्धंविचारंप्रकरोतुसः ॥ तदाराजातुश्रुत्वैतद्वचनंवेदभाषितम् ॥ ८ ॥ उवाचदूतंगच्छत्वंस्वगुरुं
ब्रूहिमेवचः ॥ अहंभ्रांतःसचेद्भ्रांतइत्येवंनिश्चयोमहान् ॥ ९ ॥ आगच्छसदसिप्रातःसतेव्यक्तीभविष्यति ॥ इत्युक्तःसगतोदूतःप्राह
सर्वंनृपोदितम् ॥ १० ॥ गुरवेसतुशृण्वन्वैजहासातिमुदान्वितः ॥ अथराजातत्क्षणात्तुदेशस्थान्पंडितान्बहून् ॥ ११ ॥ श्रीमदु
दयनाचार्य्यमुख्यांस्तानपिचोक्तवान् ॥ अहोयंनास्तिकोग्रामेसमायातोतिपंडितः ॥ १२ ॥ अनेनविवदध्वंवैयूयंयादिसचेज्जयेत् ॥
तदाहंचभवंतश्चसर्वेतन्मतगामिनः ॥ १३ ॥ भविष्यामोनसंदेहोभवतांचेज्जयोभवेत्॥ तदाहंभवतांदास्यंकरिष्यामिनसंशयः ॥१४॥
इत्युक्तास्तेतुविद्वांसःसर्वेतूष्णींस्थिताअथ ॥ श्रीमदुदयनाचार्य्यस्तेषांमध्येब्रवीन्नृपम् ॥ १५ ॥ सत्यमात्थमहाराजशृणुकिंचिन्म
योदितम् ॥ जयःपराजयोवापिश्रीहरेरिच्छयानृणाम् ॥ १६ ॥ यथाशक्तिविवादंतुकरिष्यामिनसंशयः ॥ त्वंतुचिंतांपरित्यज्यपश्या
स्माकंपराक्रमम् ॥१७॥ इत्युक्त्वानृपतिंग्रामेतस्थुःसर्वेथपंडिताः॥ द्वितीयेदिवसेप्राप्तेराजासंसदिचागतः ॥१८॥ आहूयपंडितान्सर्वा
स्तंचापिजिनशास्त्रिणम् ॥ उवाचह्युभयोरस्तुविचारःपश्यतोमम ॥ १९ ॥ इतिराजवचःश्रुत्वानास्तिकःपूर्वमब्रवीत् ॥ अहोविचारउभ
योःसतोर्भवितुमर्हति ॥२०॥ तेसर्वेसत्पथारूढाःकिंवदिष्यंतिमामिह ॥ इतिश्रुत्वावचस्तस्यनास्तिकस्यदुरात्मनः ॥२१॥ उवाचोदय
नाचार्य्योमतंतन्मतखंडनम् ॥ एवंबहुदिनान्यासीद्विवादःसुमहांस्तयोः ॥ २२ ॥ तदाबौद्धोह्यदामत्वाचार्य्यान्निजपराजयम् ॥ मायां
विस्तारयामासमहाश्चर्य्यप्रदायिनीम् ॥२३॥ उवाचनृपतिंराजन्सर्वेऽमीमद्विरोधिनः ॥ नकोपिमद्धितंब्रूतेतदाहोकंवदाम्यहम् ॥२४॥
शालग्रामशिलायांतुसह्यमीषांस्थितोहरिः ॥ तामानयाशुस्वमतैःखंडयामिशिलामहम् ॥ २५ ॥ यदिसाजलवद्भूत्वातस्मादस्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शिलापुनः ॥ तदायदुक्तंसत्यंस्यादद्यचेत्तांपुनःसतु ॥ २६ ॥ आचार्य्योंजलवत्कृत्वाशिलांव्यक्तीकरिष्यति ॥ तदास्यापिमतंसत्यं मन्येहंनात्रसंशयः ॥ २७ ॥ इत्युक्तःसनृपस्तेनबौद्धेनाथमहीपतिः ॥ ददर्शोदयनाचार्य्यंकिंवदत्येषनास्तिकः ॥ २८ ॥ इत्युक्तोभूमिपतिनाप्राहाचार्योतिहृष्टवान् ॥ इदंतुमायाचरितंतथापिस्वीकरोम्यहम् ॥२९॥ मायामपिचजानामिपरंत्वेकंब्रवीम्यहम् ॥ जातायांचपुनस्तस्यांशिलायांतन्मतद्वयम् ॥ ३० ॥ सत्यंवेतिवदिष्यंतिभ्रांत्यासर्वेसभासदः ॥ तस्मादेकमहंवक्ष्येसत्यमिथ्याविचारणे ॥ ३१ ॥ तत्करिष्यत्ययंचेद्वैकरिष्याम्युक्तमप्यहम् ॥ इतिश्रुत्वाततोराजाजैनाचार्यंददर्शह ॥ ३२ ॥ ततोजैनोनृपंप्राहकरिष्या म्यस्यभाषितम् ॥ इतिश्रुत्वाततोराजाशालग्रामशिलांदृढाम् ॥ ३४ ॥ आनाय्यस्थापयामासस्वर्णस्थाल्यांशुचौभुवि ॥ ततो बौद्धोब्रवीत्स्वीयंमतंदृष्ट्वातुतांशिलाम् ॥ ३३ ॥ अथक्षणेनसासर्वाशिलाजलमभूत्तदा ॥ ततोर्द्धक्षणतस्तद्वैजलमंतर्बभूवह ॥ ३५ ॥ पं श्यतांसर्वलोकानांमहाश्चर्यमभूदिदम् ॥ ततस्तूदयनाचार्य्योबौद्धसिद्धांतखंडनम् ॥ ३६ ॥ स्वमतंप्राहतूर्णंतज्जलंप्रादुर्बभूवह ॥ ततःक्षणेनतद्वारिसाशिलासमपद्यत ॥ ३७ ॥ ततोराजादयःसर्वेसाधुसाध्वितिवादिनः ॥ प्रशशंसुश्चतंभक्त्योदयनाचार्य्यमादरा त् ॥ ३८ ॥ आचार्य्यस्तुततःप्राहकथमेषास्तुतिर्मम ॥ स्थितएवमतेह्यस्यतस्मात्कुरुमदीरितम् ॥ ३९ ॥ इत्युक्त्वानास्ति कंप्राहमायाकारतवेरितम् ॥ अतःपरंमतंकस्यसत्यंमिथ्येतिनिश्चितम् ॥ ४० ॥ मयायदुच्यतेतेनप्रकारेणनृपाग्रतः ॥ एषता लद्रुमोद्धारितिष्ठत्यतिमहानहो ॥ ४१ ॥ तमारुह्यपतिष्यामोयःस्थास्यतिससत्यभाक् ॥ वेदाःप्रमाणमित्युक्त्वानिपतिष्याम्यहं भुवि ॥ ४२ ॥ त्वंतुवेदाअप्रमाणमित्युक्त्वानिपताधुना ॥ युगपत्पतितोवृक्षाज्जीविष्यतियआवयोः ॥ ४३ ॥ ससत्यवाङ्मतं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तस्यसत्यंलोकस्तुतंभजेत् ॥ एवमाचार्य्यवचनंश्रुत्वासोपिजहर्षच ॥ ४४ ॥ स्वीचकारततोराजातावुभावब्रवीद्वचः ॥ अहोप्रा
णांतकीचेयंपरीक्षानैवशोभना ॥ ४५ ॥ तस्माद्विरमतामत्रयुवामेतद्विचारतः ॥ इतिराजवचःश्रुत्वोदयनाचार्य्यआहतम् ॥ ४६ ॥
तवनास्त्यत्रकिंचिद्वोदूषणंनैवपातकम् ॥ स्वशास्त्रभक्तितश्चावांकरिष्यामोयथारुचि ॥ ४७ ॥ त्वमेकस्मिन्मृतेचास्मिन्मयिवानृपस
त्तम ॥ तन्मतंचपरित्यज्यजीवन्मतपरोभव ॥ ४८ ॥ किंचयावंतितेराज्येपुस्तकानिचतानिवै ॥ जलेप्रक्षेपयेच्चैतच्छास्त्रो
पासनकारकः ॥ ४९ ॥ तांदंडयित्वायोजीवेदावयोस्तन्मतानुगान् ॥ कुरुष्वेत्यस्ययुक्त्यावैप्रतिज्ञांकुरुभूपते ॥ ५० ॥
इत्युक्तोनृपतिर्जैनाचार्य्यस्यमुखमैक्षत ॥ एवमेषोब्रवीत्सोपिप्रतिपक्षनृपस्तदा ॥ ५१ ॥ ततउत्थायतेसर्वेआगतास्ता
लसन्निधौ ॥ वंशादिनाथतौद्वौतुचारुह्योच्चैर्महातरुम् ॥ ५२ ॥ वेदाःप्रमाणमित्युक्त्वाआचार्य्योन्यपतद्भुवि ॥ बौद्धोवेदाअप्रमाण
मित्युक्त्वानिपपातह ॥ ५३ ॥ आचार्य्योन्यपतद्भूमौवेदैःसंरक्षितःसुखम् ॥ मंदंमंदंसमागत्यतस्थौचेमंहरिंस्मरन् ॥ ५४ ॥ जैनाचा
र्य्यःपतन्मार्गेभ्राम्यमाणउपर्य्यधः ॥ परिवर्तितशीर्षांघ्रिःपपातधरणीतले ॥ ५५ ॥ व्यस्तमस्तकबाह्वंघ्रिर्निष्प्राणोन्यपतत्खलः ॥
इतिदृष्ट्वामहाश्चर्य्यंसर्वेराजादयोजनाः ॥ ५६ ॥ आचार्य्यंप्रशशंसुस्तेनमस्कृत्यमुहुर्मुहुः ॥ ततोराजावेदशास्त्रंसत्यंमत्वातिभक्तितः ॥
॥ ५७ ॥ स्वराज्येस्थापयामासतदाचारपरःस्वयम् ॥ भूत्वाचकारराज्यंससर्वधर्म्मसमन्वितः ॥ ५८ ॥ नास्तिकस्यतुयान्यासन्
शास्त्राणिपृथिवीतले ॥ तानिसर्वाणिचिक्षेपजलेयेतदुपासकाः ॥ ५९ ॥ तान्सर्वान्दंडयामासचक्रान्नास्तिकसंमतान् ॥ श्रीमदुदयना
चार्य्यंचक्रेराज्यगुरुंनृपः ॥ ६० ॥ जीविकायैददौग्रामान्स्वयमाज्ञापरोऽभवत् ॥ एकदोदयनाचार्य्योजगन्नाथदिदृक्षया ॥ ६१ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुरुषोत्तमपुरेगत्वास्नात्वात तीर्थवारिणा ॥ मार्कंडेयोदपानेनमंदिरद्वारमागतः ॥ ६२ ॥ देवंदृष्ट्वामंदिरांतःप्रवेष्टुंचलितोयदा ॥ तदा
कपाटःसंलग्नःस्वयमेवनिरीक्ष्यसः ॥ ६३ ॥ द्वारांतरमुपायातस्तत्राप्येवंबभूवह ॥ अथतृतीयद्वारेतुसंप्राप्तःसयदाद्विजः ॥ ६४ ॥
तत्राप्यसौकपाटस्तुस्वयंलग्नःपुनश्चसः ॥ चतुर्थद्वारमागत्यमंदिरंगंतुमुद्यतः ॥ ६५ ॥ तमप्यपश्यत्संलग्नंकपाटंस्वयमेवाहि ॥ इति
कौतुकमेतत्तुपश्यंतस्तेजनाःस्थिताः ॥ ६६ ॥ तदातूदयनाचार्यःसस्मितंवाक्यमब्रवीत् ॥ जगन्नाथंसुरश्रेष्ठंभक्त्यहंकारपूर्व
कम् ॥ ६७ ॥ ऐश्वर्य्यमदमत्तोसिमामवज्ञायवर्तसे ॥ उपस्थितेषुबौद्धेषुमदधीनातवस्थितिः ॥ ६८ ॥ इत्येवमुक्तेश्लोकेतुसहसोद्धा
टिताःस्वयम् ॥ कपाटास्तत्क्षणादेवनृणांचित्रंतुपश्यताम् ॥ ६९ ॥ तत्रतत्रस्थितायेतुजगन्नाथस्यपूजकाः ॥ तेसर्वेविनयात्तंतुगृही
त्वाचार्य्यमाहृताः ॥ ७० ॥ नीत्वाथमंदिरेदेवंदर्शयंतिस्महर्षिताः ॥ सोपिदृष्ट्वाजगन्नाथंसंपूज्यस्तुतिभिर्मुहुः ॥ ७१ ॥ स्तुत्वानत्वा
समभ्येत्यबहिर्दत्त्वाधनानिच ॥ उषित्वाकतिचिद्रात्रीःसमायातुमथोद्यतः ॥ ७२ ॥ अथस्वप्नेजगन्नाथःसंपूज्यब्राह्मणान्स्वयम् ॥
उवाचममयच्चास्तिपीतांबरमनुत्तमम् ॥ ७३ ॥ तद्देयमुदयनाचार्य्यैविद्वान्सोतीवमेप्रियः ॥ ममैवांशोनसंदेहस्तेनैवस्थापितोस्म्य
हम् ॥ ७४ ॥ तिरस्कृतोमहामूढबौद्धसिद्धांतवादिभिः ॥ इतिदृष्ट्वातुतेस्वप्नंपूजकाःप्रातरुत्थिताः ॥७५॥ परस्परंस्वप्नमध्येमंत्रयित्वा
तुभक्तितः॥पीतांबरंसमानीयजगन्नाथाज्ञयाददौ॥७६॥ आचार्य्यायततःसोपिधृत्वातन्निजमस्तके ॥ प्रणनाममुहुर्देवंजगन्नाथंमुदाद्विजः
॥७७॥एवंततोजगन्नाथप्रसादंप्राप्यसद्विजः॥मिथिलामाजगामाशुनिजमंदिरमुत्तमम्॥७८॥ तत्रशिष्योपशिष्यैश्चसेवितःपरमादरात् ॥
अध्यापयामासमुहुःसर्वशास्त्राणियत्नतः ॥ ७९ ॥ अधीत्यतस्मादाचार्य्याद्वेदशास्त्राणिसर्वशः ॥ धर्मसंस्थापयामासुर्देशेदेशेऽतिप

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

णिडताः ॥८०॥ अद्यापिमिथिलायांतुतदन्वयभवाद्विजाः ॥ विद्वांसःशास्त्रसंपन्नाःपाठयंतिगृहेगृहे ॥८१॥ सतुकालेनमहतावृद्धोभूत्वा जरातुरः ॥ काशीमागत्यकतिचित्स्थित्वातत्रादिनानिच ॥ ८२ ॥ मणिकर्ण्यांब्रह्मतालेप्राणांस्तत्याजलीलया ॥ प्रातःपुरातनं देहंवैष्णवंसुरदुर्लभम् ॥ ८३ ॥ एवंतूदयनाचार्य्योबभूवपृथिवीतले ॥ धर्म्मसंस्थापनार्थायनास्तिकानांनिवृत्तये ॥ ८४ ॥ शृण्व न्वदन्मतमेतन्नरोबुद्ध्यानहीयते ॥ ८५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येउदयनाचार्य्यचरितंनामैकत्रिंशःसर्गः ॥ ३१ ॥ दक्षिण स्यांतुविख्याताभीमानामनदीशुभा ॥ तत्तीरेग्रामआसीद्वैवेदविद्विप्रसंकुलः ॥ १ ॥ तत्रैकःपुंडरीकेतिनाम्नासीद्ब्राह्मणःशुचिः ॥ दाक्षिणात्यकुलेजातोमहाराष्ट्रीतिविश्रुतः ॥ २ ॥ नातिविद्योनधर्म्मज्ञोविप्रोभातिबहुश्रुतः ॥ मातापितृभ्यांसहितःपत्नीप्रेमवशःसदा ॥ ३ ॥ भिक्षान्नजीविकाःस्सर्वेनिर्धनालोभवर्जिताः ॥ एकदापुंडरीकस्यपत्नीभिक्षाटनेगता ॥ ४ ॥ शुश्रावकाशीमाहात्म्यंपुराणेद्वि जवक्रतः ॥ जहर्षश्रुत्वासातत्रनिश्चयंमनसाकरोत् ॥ ५ ॥ काशीमवश्यंयास्यामियदिदेवकृपाभवेत् ॥ इतिसंकल्प्यमनसासमाग त्यनिजंगृहम् ॥ ६ ॥ भर्तारंप्राहसादीनानाथैकंयाचयाम्यहम् ॥ यदिदास्यसिचेत्सत्यंकुरुवक्ष्याम्यहंततः ॥ ७ ॥ पुंडरीकउवा चाथकिंजातमद्यमेप्रिये ॥ त्वद्याचितंनदास्यामीत्येवंमनसितेकथम् ॥ ८ ॥ शपेहंदेविसत्येनदास्यामितवयाचितम् ॥ इत्युक्त्वा सापतिंप्राहकाशिकायाअहंद्विज ॥ ९ ॥ श्रुत्वामाहात्म्यमतुलंमनस्तत्रैवतिष्ठति ॥ त्वयासहगमिष्यामिकाशींह्येतद्द्रुतंकुरु ॥१०॥ वृद्धावेतौचपितरौतयोर्यात्राभविष्यति ॥ इतिश्रुत्वावचस्तस्याःप्रियायाःसद्विजोत्तमः ॥ ११ ॥ अहोऽवश्यंगमिष्यामिममाप्येष मनोरथः ॥ परंतुकतिचिद्वृद्धैर्गंतारःसंतिवैद्विजाः ॥ १२ ॥ तैरेवसाकंयास्यामितावद्याचेधनंजनान् ॥ पथिनिर्वाहसिद्ध्यर्थमेतावान्नि

दृष्टान्त

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रयोमम ॥ १३ ॥ इत्युक्त्वासगतोविप्रोयाचितुंधनिनोधनम् ॥ याचित्वाथततोह्यश्वंविक्रीयचसवैद्विजः ॥ १४ ॥ पत्नींप्रेम्णा
श्वमारोप्यपितृभ्यांसहितःस्वयम् ॥ चलितःपादचारेणग्रामीणैःसहकाशिकाम् ॥ १५ ॥ भृत्यवत्तांपरिचरन्पत्नींस्नेहेनचद्विजः ॥
वृद्धावपिचपितरौपादचारश्रमाकुलौ ॥ १६ ॥ शुश्रूषतिस्मनोकिंचिदन्नमात्रंददौतयोः ॥ एवमेवगतःकाशींभीमचंडीसमीपतः ॥
॥ १७ ॥ तत्रस्नात्वाददर्शाथदेवींसंपूज्यभक्तितः ॥ पुराणंतत्रशुश्राववाच्यमानंद्विजेनवै ॥ १८ ॥ पितृसेवनमाहात्म्यंमातृसेवनजं
तथा ॥ पिताब्रह्मापिताविष्णुःपितासाक्षात्सदाशिवः ॥ १९ ॥ पितासंतोषितोयेनतेनदेवाःसुतोषिताः ॥ रुष्टेपितरिदेवाश्चनतुष्यं
तिकदाचन ॥ २० ॥ स्नानंसंध्याजपोहोमोदानंयागोव्रतानिच ॥ पितुःक्रोधान्नृणांसर्वंनिष्फलंजायतेध्रुवम् ॥ २१ ॥ पित
रंपूजयित्वातुतत्पादस्नानवारिणा ॥ अभिषिंचंतिमूर्द्धानंतेषांतीर्थफलंध्रुवम् ॥ २२ ॥ जीवतोवाक्यकरणात्क्षयाहेभूरिभोजनात् ॥
गयायांपिंडदानेनत्रिभिःपुत्रस्यपुत्रता ॥ २३ ॥ पितुराज्ञाकराःपुत्राःप्रवर्द्धंतेदिनेदिने ॥ उल्लंघयंतियेतेषांनसुखंनचसंततिः ॥ २४ ॥
यस्यांतसमयेमातापितावाभाषतेवचः ॥ तत्सर्वंसत्यमेवस्यादाशीर्वादायएववा ॥ २५ ॥ पितुर्दशगुणामातासाक्षान्नारायणःपरः ॥
याधृत्वादशमासांस्तुगर्भेबालंप्रसूयच ॥ २६ ॥ पुष्णातिस्तनपानाद्यैःप्राणोपेतेनिरंतरम् ॥ मरणेकृतसंकल्पापुत्रेरोगार्दितेसाति ॥
॥ २७ ॥ एवंमातृसमालोकेनान्यावैविद्यतेगतिः ॥ सर्वेषामुपकाराणामस्तिलोकेप्रतिक्रिया ॥ २८ ॥ मात्राकृतोपकारस्यसानैवा
स्तिकथंचन ॥ एवंविप्रमुखात्तत्रभीमचंडीसमीपतः ॥ २९ ॥ श्रुत्वापुराणंविप्रस्तुपुंडरीकोतिदुःखितः ॥ मनसाचतदात्मानंजगर्हे ॥ ४६ ॥
निजकर्मणा ॥ ३० ॥ निवृत्तायांकथायांतुसमुत्थायसवैद्विजः ॥ पित्रोःसमीपमागत्यतावुभावतिविस्मितौ ॥ ३१ ॥ पितरावितएवा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हंयुवांनीत्वातुभक्तितः ॥ स्वग्रामंप्रतियास्यामिनकाश्यांमेप्रयोजनम् ॥ ३२ ॥ युवयोःसेवनादेवकाशीवासफलंभवेत् ॥ अद्यावधि
कृतंनैवयुवयोःसेवनंमया ॥ ३३ ॥ अजानतातिमूढेनतत्क्षंतव्यंसुतस्यमे ॥ नमेकाशीनमेगंगानमेविष्णुर्नमेशिवः ॥ ३४ ॥ युवामे
वहिजानामियुवांसर्वंनसंशयः ॥ इतिपुत्रवचःश्रुत्वापितरावाहतुःसुतम् ॥ ३५ ॥ वत्सक्षमांवहेसर्वमावांनैवात्रसंशयः ॥ वृद्धयोरोगि
णोःपित्रोःपुत्रएवसदागतिः॥ ॥ ३६ ॥ नपुत्रसदृशंमित्रंत्रिषुलोकेषुविद्यते ॥ नयावांयत्रवांछातेकिंतुमद्वचनंशृणु ॥ ३७ ॥ काशीमा
गत्यविश्वेशमदृष्ट्वामणिकर्णिकाम् ॥ अस्नात्वातत्रगंतुंस्वंगृहंनोजायतेमनः ॥ ३८ ॥ अतएतैःसमंतत्रगत्वास्नात्वायथाविधि ॥ विश्वे
श्वरंनमस्कृत्यगच्छावइतिमेमतिः ॥ ३९ ॥ ततःपितृभ्यांयुक्तःसपुंडरीकोद्विजोत्तमः ॥ तदाज्ञांशिरसाधृत्वागत्वांतर्गृहमध्यतः ॥
॥ ४० ॥ स्नानदानादिकंपित्रोःकारयित्वायथाविधि ॥ उषित्वाहानिकतिचित्पित्रोःसेवापरायणः ॥ ४१ ॥ स्वयंययौनाविश्वेशंद्रष्टुंता
भ्यांविनाद्विजः ॥ एवंपित्रोःससेवायांनिरतोभूद्द्विजोत्तमः॥४२॥अथसंपाद्ययात्रांतुकाश्यांतैर्ब्राह्मणैस्सह॥ आजगामद्विजःसोपिपितृभ्यां
सहितोगृहम् ॥४३॥ समागत्यगृहेप्रातरुत्थायापितरंस्वयम्॥दंतधावनमारभ्यभोजनांतंचयत्नतः॥४४॥कारयित्वाततोऽन्यद्वैचकारत
दनुज्ञया ॥ एवंगतेषुकालेषुभगवानेकदाहरिः ॥४५॥ तद्भक्त्यापरितुष्टोऽभूदायातोद्विजरूपधृक् ॥ द्विभुजःश्यामलोनातिह्रस्वःकमल
लोचनः॥४६॥पादचारीसमायातःपुंडरीकद्विजोत्तम ॥ समागतोहमतिथिर्नमांसंभाषसेकुतः॥४७॥इतिश्रुतंवचोमात्रंनददर्शचतंपुनः॥
इष्टकैकास्थितातस्यपुंडरीकस्यसान्निधौ॥४८॥तांगृहीत्वातिथेरग्रेचिक्षेपत्वरयान्वितः॥ उवाचचात्रतिष्ठत्वंयावत्सेवांकरोम्यहम्॥४९॥
इत्युक्त्वासपितुःसेवामाचरद्द्विजपुंगवः ॥ भगवानपितद्भक्तिंदृष्ट्वातस्यवशंगतः ॥ ५० ॥ तस्थौतदिष्टकायांतुद्वौपादौविनिवेश्यच

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुंडरीकस्तुपितरौभोजयित्वायथाविधि ॥ ५१ ॥ स्वापयित्वातुशय्यायांदत्त्वातांबूलकंद्विजः ॥ बहिरागत्यपाद्यंतुगृहीत्वा
तिथिसन्निधिम् ॥ ५२ ॥ अहोगृहाणपाद्यंभोःस्नानमाचरसुव्रत ॥ इत्युक्तवान्मुहुर्विप्रोनोवाचसोऽतिथिर्यदा ॥ ५३ ॥ तदासपुंड
रीकस्तुप्रार्थयामासभूरिशः ॥ अहोक्षमस्वमेसर्वमपराधंद्विजोत्तम ॥ ५४ ॥ पितृसेवावशान्नाहंयत्पूर्वनासिसत्कृतः ॥ एषमेनि
श्चयोब्रह्मञ्जह्यांप्राणानपिध्रुवम् ॥५५॥ पितृसेवांजातुनैवतस्मादेतत्क्षमस्वभोः ॥ इत्युक्त्वापादयोस्तस्यपतित्वापुनरुत्थितः॥५६॥
हस्तेनहस्तंजगृहेसमागच्छेत्यकर्षयत् ॥ ततःशिलामयीमूर्तिरभूत्तत्रातिथिर्हरिः ॥ ५७ ॥ नचचालततस्तत्रमहाश्चर्यमभूदहो ॥
श्रुत्वासर्वेसमायाताःशिष्टाविद्वांसएवच ॥ ५८ ॥ अन्येपिबालवृद्धाश्चमहाश्चर्यदिदृक्षवः ॥ कोयंकस्मादिहायातःकथमेवंबभू
वह ॥ ५९ ॥ विद्वद्भिरेवपृष्टस्तुपुंडरीकउवाचतान् ॥ पितृशुश्रूषणंस्वीयंतदागमनमेवच ॥ ६० ॥ अतिथेर्वचनंपश्चादिष्टकादा
नमेवच ॥ पितरौस्वापयित्वातुस्वस्यागमनमेवच ॥ ६१ ॥ पाद्यादिदानमतिथेःप्रार्थनादिकमेवच ॥ उवाचपुंडरीकस्ताञ्छ्रुत्वा
तेप्यतिविस्मिताः ॥ ६२ ॥ किमिदंवेत्तिविज्ञातुंनशशाकमहानपि ॥ किंचित्कालंचिंतयंतःस्थिताजग्मुःस्वमालयम् ॥ ६३ ॥ त
स्थुस्तत्रैवकेचित्तुपुंडरीकालयेद्विजाः ॥ पुंडरीकस्तुकृत्वावैनित्यकार्य्याखिलंपुनः ॥ ६४ ॥ पपौवार्य्यपिनोविप्रोभोजनस्यतुकाक
था ॥ अतिथावागतेतस्मिन्नाभुंक्तभोजनंकथम् ॥ ६५ ॥ कुर्य्यामितिविनिश्चित्यसोपवासपरोभवत् ॥ तत्पत्नीचापिपितरौसर्वेचिं
तासमन्विताः ॥ ६६ ॥ अन्येपितद्गृहेकेचिदात्मीयास्तस्यचागताः ॥ तेपिनैवाददुःकिंचिदुदकंचान्नमेवच ॥ ६७ ॥ इत्थंदिनंगतं
सर्वेसंध्याकालउपागते ॥ आगतावृद्धविद्वांसःपुंडरीकनिकेतनम् ॥ ६८ ॥ ऊचुःसर्वेमंत्रयित्वापुंडरीकशृणुष्वनः ॥ यंकंचिद

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दतिथिंचेन्मांस्नापयित्वांभसापुनः ॥ ६९ ॥ अभ्यर्च्यगंधमालाद्यैरन्नमग्रेनिवेद्यच ॥ भक्षयंतुभवंतोपिनैवंधर्म्मस्तुहीयते ॥ ७० ॥
इत्युक्तःपुंडरीकस्तुस्वीकृत्यसचकारतत् ॥ सर्वेपरंतुबुभुजेस्वयंनैवतुकिंचन ॥ ७१ ॥ यावदेषोतिथिर्नैवभक्षेदन्नमिहाश्रमे ॥ ताव
न्नाहंतुभोक्ष्यामिसत्यमेतन्नसंशयः ॥७२॥ तावत्प्राणास्तुतिष्ठंतुयांतुकिंवाकरोम्यहम् ॥ इतिकृत्वापुंडरीकोनिश्चयंनिजमानसे ॥७३॥
नकिंचिद्बुभुजेरात्रौपितृसेवापरायणः ॥ सुष्वापपितरौसम्यक्स्वापयित्वासुखास्तरे ॥७४॥ अथरात्रौहरिःसाक्षात्सर्वेषांपुरवासिनाम् ॥
पुंडरीकस्यचस्वप्नंददौतद्भक्तियंत्रितः ॥७५॥ पुंडरीकद्विजश्रेष्ठतुष्टोहंतवभक्तितः ॥ अनेनैवतुरूपेणवसाम्यत्रैवसर्वदा ॥ ७६ ॥ त्वां
पश्यन्नहितृप्यामिपितृसेवापरायणम्॥ द्वारकायाःसमानीयरुक्मिणीमपियत्नतः ॥ ७७॥ अत्रांशेनस्थितोभूत्वाभक्ताभीष्टंददाम्यहम् ॥
येमांप्रेम्णात्रपश्यंतिसमाश्लिष्यंतिमानवाः ॥७८॥ तुलसीपत्रमात्रेणपूजयंतिप्रयत्नतः॥ तेऽतीववल्लभालोकेभविष्यंतिनसंशयः ॥७९॥
अत्रमांपूजयंतस्तुकलावपिनराध्रुवम् ॥ ममभक्ताभविष्यंतिमत्प्रसादान्नसंशयः ॥ ८० ॥ तस्मात्त्वंद्विजशार्दूलनचिंतांकर्तुमर्हसि॥
प्रातरुत्थायपितरौपरिचर्य्ययथाविधि ॥ ८१ ॥ भुंक्ष्वान्नमहमत्रैवनिवसामिभवद्गृहे ॥ इतिस्वप्नंददौतस्मैपुंडरीकायवैहरिः ॥८२॥
अन्येभ्योग्रामवासिभ्योपश्चात्तद्देशभूपतिम् ॥ तस्मैस्वप्नेहरिःसाक्षात्कथामेतामुवाचह ॥ ८३ ॥ अथप्रभातेयेसर्वेग्रामीणाःसचभू
पतिः ॥ उत्थायपुंडरीकस्यवेश्मजग्मुर्मुदान्विताः ॥ ८४ ॥ ऊचुःपरस्परंसर्वेपुंडरीकस्तुमूकवत् ॥ अर्च्चयित्वातुपितरौतस्थौते
पांपुरस्सरम् ॥ ८५ ॥ तमाहुःपुंडरीकंतुराजाद्याःपुरवासिनः ॥ धन्योसित्वंद्विजश्रेष्ठधन्यंतेपितृसेवनम् ॥ ८६ ॥ यत्प्रसादाद्धरिः
साक्षात्समागत्यात्रतिष्ठति ॥ इत्युक्त्वातंपुरस्कृत्यपुंडरीकंद्विजोत्तमम् ॥ ८७ ॥ पूजांचक्रुर्महाभक्त्यातस्यश्रीरुक्मिणीपतेः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इदानीं पंढरपुर इति नाम वर्तते

विशस्थलेस्मिन्नित्युक्तःपुंडरीकेनयत्प्रभुः ॥ ८८ ॥ ततोविठ्ठलनामासौविख्यातोस्तिहरिःस्वयम् ॥ पुंडरीकपुरंसाक्षात्सिद्धिक्षे
त्रंकलौयुगे ॥ ८९ ॥ विशेषेणनृणांमुक्तिर्भुक्तिस्तद्दर्शनादपि ॥ महाविष्णोर्निवासेनसर्वेसेंद्रादयःसुराः ॥ ९० ॥ समागत्यचतत्रै
वक्षेत्रेतिष्ठंतिसर्वदा ॥ शिवोऽपिस्वगणैःसार्द्धंगणेशेनचसंयुतः ॥ ९१ ॥ तिष्ठत्यहर्निशंभक्तरक्षणायनिजांशतः ॥ देव्योपिविष्णु
भक्तानांपालनायनिरंतरम् ॥ ९२ ॥ तिष्ठंतिपुंडरीकस्यपुरेपुण्यतमेशुभे ॥ पुंडरीकपुरस्यास्यमाहात्म्यंचातिविस्तरम् ॥ ९३ ॥
नाहंजानामिसंक्षेपाद्यथाश्रुतमुदाहृतम् ॥ अथापिदृश्यतेतत्रनामसंकीर्तनादपि ॥ ९४ ॥ महापातकसंघातैर्मुच्यतेनात्रसंशयः ॥
तत्रैवागत्यनिवसन्विठ्ठलेहमहर्निशम् ॥ ९५ ॥ स्मरन्नवाप्यसकलान्भोगानंतेगतोदिवम् ॥ = ॥ इति श्रीभगवद्भक्तिमाहात्म्येविठ्ठ
लपुंडरीकचरितंनामद्वात्रिंशःसर्गः ॥ ३२ ॥ पुंडरीकपुरेत्येतन्नाम्नाग्रामोबभूवसः ॥ सएवपण्ढरपुरमितिख्यातोस्तिसांप्रतम् ॥ १ ॥ कस्त्वंनंदपु
अत्रैवनामदेवोभून्महाभागवतःसतु ॥ तस्योत्पत्तिंचकीर्तिंचवक्ष्याम्याश्चर्यमुत्तमम् ॥ २ ॥ बभूवपण्ढरपुरेवामदेवेतिनामतः ॥
छीपी जात्याशिंपीतिविख्यातःशूद्रःसत्कर्मवर्जितः ॥ ३ ॥ धनवान्जातिसंपन्नोभ्रातृभिःपरिवारितः ॥ सोऽनपत्योबभूवाथवयसावृद्ध
अंगंगविते तांगतः ॥ ४ ॥ तथापिनिजकर्मासौनतत्याजधनाशया ॥ एकदातत्प्रियाप्राहकिमर्थंखिद्यतेवृथा ॥ ५ ॥ अनपत्योसिनाथत्वं
कोभोक्ताऽस्यधनस्यते ॥ इमेतेभ्रातरःसर्वेमनसाचिंतयंतिह ॥ ६ ॥ इमावपत्यरहितौमृतयोरेतयोर्धनम् ॥ भोक्ष्यामोवयमेवेतिक
थयंतिमुहुर्मुहुः ॥७॥ इतिश्रुत्वावचस्तस्यावामदेवोमहामतिः॥उवाचवचनंतस्याःपरितोषकरंहितम् ॥८॥ शृणुप्रियेप्रवक्ष्यामिनिश्चयेन ॥ ४७ ॥
मतंमम ॥ नत्यक्ष्यामिनिजंकर्म्मयथाशक्तिनसंशयः ॥ ९ ॥ कस्यवित्तस्यकोभोक्तानैवंजानामिकश्चन ॥ इमेसंवर्द्धितावित्तैर्मयैवं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कथयंतिमाम् ॥ १० ॥ अतःकृतघ्नाएवैतेभ्रातरोममवल्लभे ॥ तमुपायंप्रवक्ष्यामियेनैषांनिष्फलंवचः ॥ ११ ॥ भविष्यतिनसं
देहोविधेहिममशासनम् ॥ कुरुष्वसुकृतंनित्यंयेनसंततिमाप्नुयाम् ॥ १२ ॥ जातायांसंततावेतेचिंतयिष्यंतिनेदृशम् ॥ इतिश्रुत्वा
प्रियाप्राहसुकृतंकेनकर्मणा ॥ १३ ॥ कर्तव्यमितिमेब्रूहियत्करोम्यहमादरात् ॥ प्रियायावचनंश्रुत्वावामदेवोऽब्रवीत्पुनः ॥ १४ ॥
नजानासिकिमप्यन्यत्सुकृतंसाधुवादिनि ॥ गुरुणैवोपदिष्टोहंसाधुसेवापरोभव ॥ १५ ॥ मंत्रंदत्त्वोक्तवानेवंतन्मंत्रंविस्मृतंमया ॥
उपदेशःस्मृतोमेद्यतस्मात्सेवैवकेवलम् ॥ १६ ॥ जानीहिसुकृतंतन्वितेनसाधयवांछितम् ॥ अतोऽद्यारभ्ययःकश्चित्सायंकालेगृहेम
म ॥ १७ ॥ आगमिष्यतिवामाग्रेभीमातीरेथवापुनः ॥ तत्रगत्वाधनैःकामैस्तेषांसेवाविधीयताम् ॥ १८ ॥ अहमाज्ञापयामित्वां
व्ययेशंकांत्यजस्वमे ॥ अहंतुप्रत्यहंभीमातीरेसायंसमागतान् ॥ १९ ॥ प्रणामधनवस्त्राद्यैस्तोषयिष्याम्यसंशयम् ॥ एवंसत्सेवनेस
क्तावशक्तौवृद्धदंपती ॥ २० ॥ लेभातेसंततिंकन्यांसाधुसेवाप्रभावतः ॥ जातायांकन्यकायांतौमुमुदातेतुदंपती ॥ २१ ॥ ऊचतुर्हृ
ष्टमनसौफलितंसाधुसेवनम् ॥ सुमतिश्चेतिनाम्नासापित्राप्रख्यापिताशुभा ॥ २३ ॥ तदारभ्यातिभक्त्यातौपूजनंचक्रतुःसताम् ॥
सापिकन्याचिरेणैववव‍ृधेपितृलालिता ॥ २३ ॥ कदाचित्सुदिनंज्ञात्वाकंचिदानाय्यबालकम् ॥ विवाहंकारयामासमहोत्सवविधा
नतः ॥ २४ ॥ पुत्रवद्वामदेवस्यजामातान्यवसद्गृहे ॥ मुमुदातेसुतंवीक्ष्यजामातरमथापिवा ॥ २५ ॥ हर्षेणमहताविष्टौतदातौवृद्धदं
पती ॥ एवंगतेषुकालेषुजामाताज्वरपीडितः ॥ २६ ॥ षोडशाब्देममारासौवामदेवस्यपश्यतः ॥ तदातिकष्टितौद्वौतुहाहाकारंप्रच
क्रतुः ॥ २७ ॥ हृष्टौपुरजनैःसर्वैःशांतितौवृद्धदंपती ॥ कष्टमेवंगतावापिसाधुसेवांप्रचक्रतुः ॥ २८ ॥ वामदेवःसुताचैषातत्पत्नीचोति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वैत्रयः ॥ एकदातनयायास्तुपुनर्वैवाहिकंविधिम् ॥ २९ ॥ वामदेवोऽब्रवीत्पत्नींसचैवाप्यन्वमोदयत् ॥ तच्छ्रुत्वासुमतिःकन्यारुरो
दभृशदुःखिता ॥ ३० ॥ नाहमिच्छामिभर्तारंमृतेपत्यौतपस्विनी ॥ कुलदोषानचैवाहंभविष्यामिकदाचन ॥ ३१ ॥ युवयोःसेवने
सक्तासाधुसेवापरायणा ॥ दासीवनित्यंतेमातर्गृहेवत्स्यामिसुव्रता ॥ ३२ ॥ इतितस्यावचःश्रुत्वाजननीप्राहतांसुताम् ॥ यदिनस्वी
करोषित्वमेवंमेवचनंसुते ॥ ३३ ॥ बलेनतेपितापुत्रिविवाहंकारयिष्यति ॥ श्रुत्वैवंसुमतिःप्राहमातरंनिष्ठुरंवचः ॥ ३४ ॥ यद्येवंतर्हिभी
मायांनिमज्याद्यैवजीवितम् ॥ त्यक्ष्याम्यहंनसंदेहःशपामितवपादयोः ॥ ३५ ॥ इतिश्रुत्वासुतावाक्यंभीतास्नेहेनविह्वला ॥ प्रत्य
पेधत्पतिंसापिसुतापाणिग्रहंप्रति ॥ ३६ ॥ निवृत्तोवामदेवोपिप्रियावचनयंत्रितः ॥ ततःसातनयादीनापितृमातृपरायणा ॥ ३७ ॥
साधुसेवारतानित्यंब्राह्मणीवव्रतेस्थिता ॥ एकदामाघमासेतुपर्जन्येपिचवर्षति ॥ ३८ ॥ रात्रौजलार्थिनीकुंभंगृहीत्वासुमतिर्गता ॥
भीमायांजलमाहर्तुंतत्रसाददृशेपथि ॥ ३९॥ इतस्ततोभ्राम्यमाणंदीनंवर्षांबुताडितम् ॥ अंधंदंडधरंविप्रंविष्णुभक्तिपरायणम्॥४०॥
त्राहिकृष्णेतिभाषंतमर्द्धप्राणंतपस्विनम् ॥ तत्रगत्वाथसुमतिःप्राहप्रांजलिरानता ॥ ४१ ॥ एहिविप्रसमागच्छममगेहेमयासह ॥
शूद्रीचाहंममपितातवभक्तोधृतव्रतः ॥ ४२ ॥ पूजयिष्यतिसोपित्वामाज्ञापयनमोस्तुते ॥ इतिश्रुत्वातिशीतार्तोद्विजःप्रोवाचवे
पितः ॥ ४३ ॥ नयमांजीवदानंमेकुरुभद्रेप्रियंमम ॥ इत्युक्तवंतंतंविप्रंस्थापयित्वाशिरस्यथ ॥ ४४ ॥ निनायस्वगृहंतन्वीतत्र
वह्निंप्रदीप्यच ॥ तापयित्वाथतंविप्रंफलमूलादिनापुनः ॥ ४५ ॥ भोजयित्वासुखास्तीर्णेस्थापयित्वाशुचिव्रता ॥ सुमतिर्मातृभ
वनंगत्वासुष्वापतांनिशाम् ॥ ४६ ॥ अथप्रभातेनिर्मलेनिवृत्तेकालवर्षणे ॥ उत्थायविप्रःसुमतिंपुत्रीमितिसमाह्वयत् ॥ ४७ ॥ अये

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वत्सेसमागच्छवामदेवःपिताकृते ॥ आयातुतंसमाभाष्यगमिष्यामियदृच्छया ॥ ४८ ॥ इतिश्रुत्वाथसुमतिःपित्रासहसमागता ॥
नमस्कृत्वाब्रवीद्वाक्यंकिंकरोमिप्रसीदमे ॥ ४९ ॥ तच्छ्रुत्वावचनंतस्याविप्रस्तद्भक्तिविह्वलः ॥ उवाचवचनंवत्सेत्वयाहंरक्षितो
निशि ॥ ५० ॥ अतःप्रसन्नस्तेदद्मिवरंत्वंपुत्रिणीभव ॥ इतिविप्रवचःश्रुत्वावामदेवोतिदुःखितः ॥ ५१ ॥ प्रणम्याहवचोविप्रंनाथयु
क्तंनतेवचः ॥ इयंहिविधवानैवकरिष्यतिपतिंपुनः ॥ ५२ ॥ अतोस्याःपुत्रिणीत्येतद्वाक्यंतवकथंभवेत् ॥ इतिश्रुत्वांधदृष्टिःस
विप्रोभूद्बहुदुःखितः ॥ ५३ ॥ वामदेवमुवाचाथनाशीर्वादोवृथाममम ॥ अद्यावधिश्रीगोविन्दप्रसादादभवत्क्वचित् ॥ ५४ ॥ अतोऽहंभी
मातीरेत्रगत्वास्याःपुत्रकारणात् ॥ पूजयिष्यामिगोविंदंमदुक्तंसकरिष्यति ॥ ५५ ॥ इत्युक्त्वासौगतोविप्रोभीमातीरेदृढासनः॥अहोरात्रै
श्चबहुभिस्तुष्टावजगदीश्वरम् ॥ ५६ ॥ निराहारोदकोविप्रःक्षुत्पिपासार्दितोभवत् ॥ मरणेकृतसंकल्पःकामसिद्धिमृतेद्वि
जः ॥ ५७ ॥ एकदातिकृशोदीनोनिद्रांचैवसमागतः ॥ तत्रपश्यतिवैविप्रःस्वप्नेशुक्लांबरस्रजम् ॥ ५८॥ तुलसीजामदामोदैस्तर्पयंतंदि
शोदश ॥ स्वप्नेतंप्राहविप्रंसकिमर्थंखिद्यसेद्विज ॥ ५९ ॥ इतिश्रुत्वाद्विजःप्राहनिजकाममशेषतः ॥ श्रुत्वातद्वचनंविप्रःशुक्लांबर
धरोब्रवीत् ॥ ६० ॥ उत्तिष्ठविप्रभद्रंतेभविष्यतितवेप्सितम् ॥ अचिरेणैवकालेनप्रत्ययोदृश्यतेमया ॥ ६१ ॥ यदिप्रभातएवैते
चक्षुषीतवसुव्रत ॥ भविष्यतस्तदातस्याःपुत्रंमाकुरुसंशयम् ॥ ६२ ॥ स्वप्नेस्वपतिरूपेणकृष्णेनसंगतासती ॥ जनयिष्यतिपुत्रं
साविष्णुभक्तंनसंशयः ॥ ६३ ॥ पापिष्ठांतांसुतेजातेकथयिष्यंतियेनराः ॥ अंधास्तेकुष्ठरोगार्ताभविष्यंतिनसंशयः ॥ ६४ ॥ इत्यु
क्त्वासगतोविप्रःसोपिस्वप्नात्प्रबोधितः ॥ चिंतयन्हृदिहर्षेणविस्मयेनसमाकुलः ॥ ६५ ॥ निन्येतांशेषरजनींप्रातःकालंसमर्चयत् ॥

ऋतुस्नातातु या नारी स्वप्ने मैथुनमाचरेत्
गर्भं धत्ते ध्रुवं सातु इति वै श्रौश्रुतं मतम् ॥ १॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अथप्रभातेपश्यन्सगृहवस्तूनिसर्वशः ॥ ६६ ॥ मुमुदेक्षुत्पिपासार्तिंजहौविप्रोतिहर्षितः ॥ जगामत्वरितंवामदेवस्यभवनंप्रति ॥
६७ ॥ आहूयतंसमाचष्टस्वप्नेदृष्टमशेषतः ॥ प्रादुर्भावश्चक्षुषोश्वप्रत्ययोदर्शितस्तथा ॥ ६८ ॥ समाभाष्यगतोविप्रःस्वैरचारीयदृ
च्छया ॥ वामदेवोपितच्छ्रुत्वाहृष्टोभीतश्चलोकतः ॥ ६९ ॥ गोविंदप्रतिमांगेहेसंस्थाप्यार्चनतत्परः ॥ पयोमात्रंनियमितोनिवेद्य
बुभुजेस्वयम् ॥ ७० ॥ एवंगतेषुकालेषुस्वप्नेसासुमतिःपतिम् ॥ ददर्शतेनगर्भंसाधारयामाससुव्रता ॥ ७१ ॥ उत्थितासानिशा
यांतेशोकेनमहताकुला ॥ किंजातमितिचित्तेनभाषमाणानतानना ॥ ७२ ॥ तांदृष्ट्वासुमतिंमाताप्राहोत्तिष्ठकिमित्यहो ॥ निष्कार
णोमनस्तापोदृश्यतेकथमद्यते ॥ ७३ ॥ इतिमातृवचःश्रुत्वास्वप्नंप्राहमनस्विनी ॥ तच्छ्रुत्वावचनंपुत्र्याहृष्टामाताह्युवाचताम् ॥
॥७४॥ विप्रस्यवरदानादिश्रुतंयत्पतिवक्त्रतः ॥ श्रुत्वैतत्सापिविश्वस्तागृहकर्मपराभवत् ॥ ७५ ॥ गोविंदार्चापराःसर्वेसाधुसेवापराय
णाः ॥ निन्युस्तेदशमासान्वैवामदेवादयस्त्रयः ॥ ७६ ॥ अथैकदानिशाभागेसुमुहूर्तेमनस्विनी ॥ असूततनयंगेहेसुखेनैवशुचिव्र
ता ॥ ७७ ॥ श्रुत्वैतद्वामदेवोपिवरदानमनुस्मरन् ॥ हृष्टःप्राहप्रियांनाम्नानामदेवोभवत्स्वयम् ॥ ७८ ॥ पुत्रिकातनयोलोकेपुत्र
एवनसंशयः ॥ इतिश्रुतंविप्रमुखादावयोरप्ययंसुतः ॥ ७९ ॥ इत्युक्त्वाप्रातरासाद्यययौब्राह्मणमंदिरम् ॥ पुरोहितंसमाहूयदानं
दातुमवोचत ॥८०॥ पुरोहितोजगर्हाथनामदेवंसभासदः ॥ येस्थितास्तेपिजहसुर्ह्रीहियाहीतिचापरे ॥८१ ॥ ऊचुर्मित्रगणास्तत्रमत्वातां
व्यभिचारिणीम् ॥ समेत्यभवनंसर्वेवामदेवस्यतस्यवै ॥८२॥ उत्सवंपरमंचक्रुःदानगानादिभिर्जनैः ॥ वामदेवोपिविप्रेभ्योज्ञातिभ्योपिय ॥ ४९ ॥
थार्हतः ॥ ८३ ॥ दत्त्वाधनंचगोविंदंसंपूज्याभ्यर्च्यसज्जनान् ॥ मेनेकृतार्थमात्मानंपत्न्यासहमहामतिः ॥ ८४ ॥ तदारभ्यदृढांभ

समिन वोल्ली०

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्तिंगोविंदेसचकारह ॥ ८९ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनामदेवोत्पत्तिचरितंनामत्रयस्त्रिंशः सर्गः ॥ ३३ ॥ सजातोवर्द्धमानस्तुधूलिकेलिपरोभवत् ॥ तत्रापिबालकैःसार्द्धंनिर्मायरजसाहरिम् ॥ १ ॥ पूजयत्प्रत्यहंपूजामनुकुर्वन्निवार्भकः ॥ एवंगतेषुकालेषुसजातस्सप्तहायनः ॥ २ ॥ मातामहेनसार्द्धंसचिक्रीडाहर्निशंसुखी ॥ एकदाकार्य्ययोगेनवामदेवःक्वचिद्गतः ॥ ३ ॥ उक्त्वेदंनामदेवायवत्सत्वयामिदिनत्रयम् ॥ कार्य्यमस्तिततस्त्वंतुप्रातरुत्थायनित्यशः ॥ ४ ॥ गांदुग्ध्वाथशुचिर्भूत्वागोविंदंपाययिष्यसि ॥ पयस्तदात्वंभुंजीथाइत्येवंतुव्रतंमम॥५॥ तथेत्युक्त्वागतोवामदेवोग्रामांतरंतदा ॥ नामदेवोपिगोदुग्धंवटपत्रेविधायच ॥ ६ ॥ नीत्वागोविंदभवनेप्रातःप्रांजलिरब्रवीत् ॥ पिबदुग्धंमहाराजमातामहनिदेशतः ॥ ७ ॥ मयैवोपाहृतंचाथसतुग्रामांतरंगतः ॥ जल्पन्नेवंनामदेवोगोविंदप्रतिमाग्रतः ॥ ८ ॥ पिबतिस्मयदानैवतदासपुनरेवहि ॥ उत्थायोत्थायदुग्धंतुगृहीत्वाप्रणिपत्यच ॥ ९ ॥ चिंतयामासमनसासितानास्मिन्समाहृता ॥ अतोयंनैवपिबतितांदत्त्वादाञ्चितेपयः ॥ १० ॥ इत्युक्त्वासितयायुक्तंकृत्वादुग्धंकरेसच ॥ गृहीत्वापुनरुत्थायप्रार्थयामासभूरिशः ॥ ११ ॥ नपपौप्रतिदुग्धंतुमनस्येवमचिंतयत् ॥ मांनजानास्यतोनैवपिबस्येतत्पयोमम ॥ १२ ॥ अहंतुवामदेवस्यसुतापुत्रोनसंशयः ॥ तिष्ठाम्यत्रैवभवनेजानेत्वांत्वंनवेत्सिमाम् ॥ १४ ॥ इत्युक्त्वादुग्धमादायपुनरुत्थाययत्नतः ॥ प्रसीदमेपिबपयोमुहुरेवमुवाचतम् ॥ १४ ॥ एवंप्रार्थयमानस्यसंपूर्णंदिनमत्यगात् ॥ नपपौप्रतिमादुग्धंततश्चितापरोभवत् ॥ १५ ॥ किंचाहमशुचिःकिंवापात्रमेतत्पयोशुचि ॥ अतःप्रातःसमुत्थायस्नात्वाप्रक्षाल्यभाजनम् ॥१६॥ दास्यामिससितंदेवंतत्रःपास्यातिनिश्चितम् ॥ कथमन्नमहंभोक्ष्येगोविंदेस्मिन्बुभुक्षिते ॥ १७ ॥ इतिनिश्चित्यशिष्योऽसौरात्रौत्यक्ताशनोदकः॥ मात्रानिशंप्रार्थ्यमानोबुभु

हेगोविंदरा०

CSU-Jaipur Campus Collection

जेनैवकिंचन ॥ १८ ॥ अथप्रभातेचोत्थायस्नात्वासंमार्ज्यमंदिरम् ॥ पयोदुग्ध्वाप्रतिष्ठाप्यपुनःस्नात्वासमाहितः ॥ [illegible] ॥ ससि
तंदुग्धमादायपिबेतिमुहुरब्रवीत् ॥ नपपौप्रतिमातत्रमनस्येवमचिंतयत् ॥ २० ॥ नस्नानंकृतमेतेननकृतंदंतधावनम् ॥ स्नापयि
त्वांभसावस्त्रंपरिधाप्याग्रतःस्थितः ॥ २१ ॥ पयोगृहीत्वापाणिभ्यामुवाचप्रणयान्वितः ॥ मयापिनैवभुक्तंभोदिनमेकंसमभ्यगात् ॥
॥ २२ ॥ अतःपिबमहाराजपयइत्यब्रवीन्मुहुः ॥ नपपौप्रतिमादुग्धंज्ञात्वैतत्सरुरोदह ॥ २३ ॥ अथतत्रतुगोविंदप्रतिमानेत्र
युग्मतः ॥ अपश्यद्वाश्रुधारांवैदृष्ट्वाबालोप्यभाषत ॥ २४ ॥ किंरोदिषिपिबस्यैतन्नोचेदत्रैवजीवितम् ॥ त्यक्ष्यामिपश्यतस्ते[illegible]त्य
मेतन्नसंशयः ॥ २५ ॥ इत्युक्त्वातन्मुखेदुग्धंयोजयामासदृढवत् ॥ प्रतिमाप्यपिबद्दुग्धमित्याश्चर्यतरंमहत् ॥ २६ ॥ [illegible]नेतां
तांपुनःप्राहनामदेवोतिहर्षितः ॥ सर्वंपिबसिगोविंदमदर्थंनैवरक्षसि ॥ २७ ॥ तवपीत्वावशिष्टंतुमाताम्महसमर्पितम् ॥ बहुचा[illegible]
स्माभिरतोविज्ञापयाम्यहम् ॥ २८ ॥ इतिश्रुत्वाऽथसामूर्तिःसस्मितादुग्धमत्यजत् ॥ गृहीत्वातत्करेहृष्टानामदेवोबुभुक्षितः २९ ॥
बुभुजेमातृदत्तंयद्गृहेभोज्यादिकंस्थितम् ॥ केचिदाश्चर्यमेवंहिश्रुत्वाश्रद्दधिरेनहि ॥ ३० ॥ केचिद्वदंतिसत्यंस्याद्भगवान्भक्तवत्स
लः ॥ केचिदागत्यसुमतिंपप्रच्छुरिदमादरात् ॥ ३१ ॥ इत्येतद्भक्तिमाहात्म्यंनामदेवस्यकीर्तितम् ॥ भूयएवप्रवक्ष्यामितस्यमा
हात्म्यमद्भुतम् ॥ ३२ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येप्रतिमादुग्धपानं नामदेवचरितंनामचतुस्त्रिंशःसर्गः ॥ ३४ ॥ ॥ छ ॥
॥ ॥ अथकालेनकियतावामदेवोममारह ॥ भीमातीरेऽथतत्पत्नीबभूवसहगामिनी ॥ १ ॥ वह्निंचितायांप्रज्वाल्यप्राविशातिह ॥ ६० ॥
पिता ॥ नामदेवोपिदुःखार्तःकृत्वातस्यौर्द्ध्वदैहिकम् ॥ २ ॥ ब्राह्मणेभ्योधनंदत्त्वाभोजयित्वात्मबांधवान् ॥ साधून्संतर्प्यविविधैरन्नै

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्वबुभुजेस्वयम् ॥ ३ ॥ ततःसाधून्समभ्यर्च्यततोगोविंदपूजन ॥ समासक्तोनामदेवोनिजवृत्तिंनचस्मरन् ॥ ४ ॥ मातामहार्जितंवित्तं साधुभ्यःप्रत्यहंददत् ॥ स्वयंतुबुभुजेकिंचिज्जनन्यासहवेश्मनि ॥ ५ ॥ निवसन्विष्णुरेवैतेइतिसाधूनमन्यत ॥ एकदामहदाश्चर्य मेकादश्यामभूदहो ॥ ६ ॥ तत्रभीमानदीतीरेविष्णुमंदिरमुत्तमम् ॥ वैष्णवास्तत्रतिष्ठंतिविष्णुसेवापरायणाः ॥ ७ ॥ उपोषण परास्तत्रकदाचिद्धरिवासरम् ॥ कुर्वंतोजागरंरात्रौनृत्यगीतादिनाजनाः ॥ ८ ॥ तोषयंतिजगन्नाथंमंदिरेविष्णुतत्पराः ॥ श्रुत्वातेषांगीत नादंनामदेवोतिहर्षितः ॥ ९ ॥ अर्द्धरात्रेगतेकालेजगामहरिमंदिरम् ॥ उपवासरतःशांतोविष्णुभक्तिपरायणः ॥ १० ॥ द्वारएवस्थि तोदेवंप्रणम्योपानहौपुनः ॥ निबध्यवस्त्रेचौरस्यशंकयानात्यजद्बहिः ॥ ११ ॥ ततोंतःप्रविवेशासौगीतनृत्यपरायणः ॥ वस्त्रेणाच्छादि तेतत्रदृष्टेकेनाप्युपानहौ ॥ १२ ॥ अरेमूर्खकिमेतत्तेयद्धृतोपानहौपुनः ॥ मठप्रविष्टोदेवस्यधिग्धिग्गच्छेतिताडितः ॥ १३ ॥ केन चित्तुगलेहस्तेदत्त्वानिष्कासितोबहिः ॥ बहिरागत्यसतदानामदेवोतिहर्षितः ॥ १४ ॥ अहोसम्यक्कृतंचैतैःसाधुभिर्ममशासनम् ॥ यद हंसुदुराचारोलोभादेवमठेगतः ॥ १५ ॥ इत्येवमुक्त्वामनसामठस्यपश्चात्प्रदेशेकिलनामदेवः ॥ गत्वार्चयामासहरिंस्वभक्त्याहर्षा श्रुणागद्गदनादगीतैः ॥ १६ ॥ ततश्चकंपेमठभूमिरुच्चैर्जुघूर्णितन्मंदिरमेवसर्वम् ॥ भूकंपइत्यूचुरथाशुमंदिरात्पलायितामंदिरपातभी त्या ॥१७॥ ततःक्षणेनंस्थिरतामुपागतोमठस्तुसर्वैर्विपरीतवक्त्रः ॥ दृष्टोथतत्संमुखएवनामदेवःस्थितःप्रांजलिरत्युदारः ॥१८॥ दृष्ट्वैत त्परमाश्चर्यंसर्वेविस्मयमागताः ॥ नामदेवंसमासाद्यप्रशशंसुश्चतेजनाः॥१९॥महाश्चर्यमितिप्रोचुर्भक्तिमाचरतोपिते॥ गरीयसींमन्यमा नास्तथागानंप्रचक्रिरे ॥ २० ॥ इति श्रीभगवद्भक्तिमाहात्म्येनामदेवभक्तितोमंदिरप्रचलनंनामपंचत्रिंशःसर्गः ॥ ३५ ॥ ॥ छ ॥

उत्साहात् निश्चयात् धैर्यात् तत्तत्कर्म प्रवर्तनात् । संगत्यागात् सतो वृत्तेः षड्भिर्भक्तिः प्रसीदति ।
अत्याहारः प्रयासश्च प्रजल्पोऽनियमाग्रहः । जनसंगश्च लौल्यं च षड्भिर्भक्तिः विनश्यति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुनरेवंप्रवक्ष्यामिनामदेवस्यचेष्टितम् ॥ महदाश्चर्य्यभूतंहिविष्णुभक्तिप्रवर्द्धनम् ॥ १ ॥ तत्रासीन्म्लेच्छनृपतिस्तत्रगत्वातिदुर्जनाः ॥
ऊचुराय्यापरास्सर्वेराजानंदुष्टमानसाः ॥ २ ॥ दंभाचाररतोनित्यंनामदेवोतिदुर्जनः॥ अमानंपूजयत्येषग्रामेऽस्माकंतुपश्यताम् ॥३॥
अतस्त्वंशासनैरुग्रैस्तत्परीक्षांकुरुप्रभो ॥ तथावयंयतिष्यामस्त्वत्सहायेनभूपते ॥ ४ ॥ यथापराभवंप्राप्तोसौभविष्यतिदुःखितः ॥
किंकरिष्यत्ययंपश्चादितिज्ञात्वास्यपूजनम् ॥ ५ ॥ शासनंवाकरिष्यामस्त्वयासहनसंशयः ॥ इत्युक्तोनृपतिर्दुष्टैर्यथारुचिकुरुष्विन्
ति ॥ ६ ॥ साहाय्यंवःकरिष्यामियथावदथमांपुनः ॥ इत्युक्तास्तेनृपतिनातैस्त्वेकत्रसभाकृता ॥ ७ ॥ तत्रतेचिंतयामासुःकथंकुर्म्मो
स्यशासनम् ॥ एवंचिंतयमानास्तेगामेकांददृशुर्मृताम् ॥ ८ ॥ तेषामेकोब्रवीदेतांमृतांगांद्वारितस्यवै ॥ कपाटेस्थापयामोवैलोके
सुप्तेमहानिशि ॥ ९ ॥ उषस्येववयंतत्रस्थास्यामःसपुनर्गृहात् ॥ कपाटंबहिरागंतुमुत्थायोद्घाटयिष्यति ॥ १० ॥ पतिष्यतिमृतेवेयं
तदाकोलाहलंवयम् ॥ करिष्यामोमहांतंवैअहोगौर्निहतामुना ॥ ११ ॥ धिगित्येवंगर्हयित्वागत्वाराजसमीपतः ॥ उक्तागौर्निहतासा
कमनेनातिदुरात्मना ॥ १२ ॥ जीवयत्यद्यगामेतांभोभोम्लेच्छोभवत्वयम् ॥ इत्येवंशासनंराज्ञोगृहीत्वातस्यदुर्दशाम् ॥ १३ ॥
पदातीनपिसंगृह्यगमिष्यामोवयंपुनः ॥ किंवदिष्यतिनस्तत्रतदायंनष्टचेतनः ॥ १४ ॥ इत्येवंकल्पनांकृत्वाप्रशशंसुःपरस्परम् ॥
सर्वेतेमुदितारात्रौतदाचक्रुर्महानिशि ॥ १५ ॥ प्रातरुत्थायसर्वेतेनिरीक्षणपरायणाः ॥ तस्थुरस्मिन्मुहूर्तेतुगोविंदंमनसास्मरन् ॥१६॥
गोविंदप्रतिमांनत्वाद्वारदेशेसमागतः ॥ नामदेवःकपाटंतुसमुद्घाटितवान्स्वयम् ॥ १७ ॥ उद्घाटितेकपाटेतुगोशवःपतितोभुवि ॥
तंदृष्ट्वामहदाश्चर्य्यंनामदेवोतिविस्मितः ॥ १८ ॥ किंजातमितिशोकेनतस्थौस्थाणुरिवाचलः ॥ ततस्तेदुर्जनास्सर्वेदृष्ट्वातंनिश्चलं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्थितम् ॥ १९ ॥ ऊचुराक्रोशवचनैर्निंदंतस्तंपरस्परम् ॥ धिक्त्वामहोवृथाधूर्तोमालामुद्रादिकंत्विह ॥ २० ॥ प्रतारयसिनःसर्वान्दे
वंतेक्रोधचेष्टितम् ॥ किंभुक्तमनयातेद्ययादित्थंघातितात्वया ॥ २१ ॥ तिष्ठतिद्वारिशीतार्तारात्रौत्वांशरणैषिणी ॥ अथैकस्तत्रतन्म
ध्येगौर्मदीयेतिचासकृत् ॥ २२ ॥ उक्त्वारुरोदहाहेतिकुर्वन्क्रोधाज्जगर्हतम् ॥ ततस्तंचाग्रतःकृत्वायेनोक्तंगौर्ममेतिच ॥ २३ ॥
राजवेश्मगताःसर्वेतंपुरस्कृत्यचाब्रुवन् ॥ राजन्गौर्नामदेवेनदंडेनाऽद्यैवघातिता ॥ २४ ॥ पश्यतांसर्वलोकानांमृतातद्वारितिष्ठति॥
तस्मादेवदुराचारोदंडनीयोनसंशयः ॥ २५ ॥ इतिश्रुत्वावचस्तेषांराजाक्रोधसमन्वितः ॥ उवाचवचनंभृत्यानत्युग्रान्वैतुरुष्कका
न् ॥ २६ ॥ भवंतोयांतुभवनंनामदेवस्यदुर्मतेः ॥ हतवानसिगामस्यकस्मादित्याहभूपतिः ॥ २७ ॥ अतःपरंप्रयच्छास्मैजीवोपे
तांचगामिमाम् ॥ तदातेकुशलंनोचेन्म्लेच्छोभवमयासह ॥ २८ ॥ नांगीकरोषिम्लेच्छत्वंतदात्वांघातयिष्यति ॥ इत्याज्ञानृप
तेरत्रयथारुचिकुरुष्वभो ॥ २९ ॥ तावत्त्वयानगंतव्यमितोवैममशासनात् ॥ इतितेषांवचःश्रुत्वासुमतिर्भयविह्वला ॥३० ॥ नामदे
वस्यजननीशोकगद्गदयागिरा ॥ मोहेनाश्रुमुखीदीनानामदेवमुवाचतम् ॥ ३१ ॥ पुत्रोग्रदंडोराजायंघातयिष्यत्यसंशयम् ॥ अत
स्तंशरणंगच्छराजानंचान्यभृत्यवत् ॥३२॥ विहायजातिधर्म्मंचप्राणान्संत्रातुमर्हसि ॥ इतिमातृवचःश्रुत्वानामदेवोतिदुःखितः ॥३३
मातुर्दुःखेनमहतामातरंप्राहहृष्टवत् ॥ मातर्ननिहताचैषामयागौर्नात्रसंशयः ॥ ३४ ॥ वृथामांप्रवदंत्येतेत्यजशोकंममाधुना ॥ गो
विंदंशरणंयामिसकल्याणंकरिष्यति ॥ ३५ ॥ महाभयेमहोत्पातेदुष्टव्याघ्रादिजेभये ॥ भक्तानुग्रहकर्तासौगोविंदःशरणंमम॥ ३६॥
एवंविश्वासमासाद्यत्यजचिंतांभजस्वतम् ॥ इत्युक्त्वातत्रवैरात्रौस्थितावेश्मनिसाधवः ॥ ३७ ॥ तैःसहाच्छाद्यगांतत्रमृदंगतुतुरादि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भिः ॥ श्रीकृष्णंमनसाध्यायन्जगौगीतमनन्यधीः ॥ ३८ ॥ इतिश्रीजयजयमाधवमंगलकारणशरणागतजनविपदुद्धारक ॥ मीनवरा
हकमठरघुनायकरामरामयदुवरसुखदायक ॥ ३९ ॥ नरमृगराजनिगमयदुवामनसदयहृदयनिर्दयअतिपावन ॥ साधुशरणअति
दीनकृपामयाभयपाहिमामिहदरमपनय ॥ ४० ॥ नमोनमोनारायणभगवतेकेशवकृष्णकेशिकंसारे ॥ निजजनवैरिकपटवत्तदवते
जलजवनजभूसुरभूपतिवपुसदयविदयवपुषाजगदवते ॥ ४१ ॥ अशरणशरणचरणपंकजयुगचिंतनपुरजनभयहरते ॥ चक्रायुधगो
पालचतुर्भुजवितरकृपादशमिहपदानिरते ॥ ४२ ॥ गायत्येवंनामदेवेमध्याह्नःसमुपागतः ॥ तदागांजीवयामासकृष्णोभक्तानुकंप
नः ॥ ४३ ॥ पश्यतांसर्वलोकानांगौरुत्थायनिरैक्षत ॥ नामदेवोप्युवाचाथहर्षेणाश्रुपरिप्लुतः ॥ ४४ ॥ अहोगृहाणमा
मेतांप्रसीदत्वांनमाम्यहम् ॥ इतिश्रुत्वावचोधेनुःतंदुष्टमहनद्रुषा ॥ ४५ ॥ शृंगाभ्यामतितीक्ष्णाभ्यांमूर्च्छितःपतितोभुवि ॥
तंदृष्ट्वापतितंभूमौममगौरितिवादिनम् ॥ ४६ ॥ अन्येदुष्टगणाःसर्वेदिशोदशपलायिताः ॥ नामदेवस्तुतंदुष्टंपतितंमूर्च्छितंभुवि
॥ ४७ ॥ हाहाकृत्वांतिकेगत्वास्वांकेतंविनिवेश्यच ॥ पाययित्वाजलंतांतुगांपुनःप्राहकिंकृतम् ॥ ४८ ॥ निजवत्संविचिन्वंतीहं
भारावेणगांतदा ॥ वत्सस्तस्याःसमायातोमेशब्दंविनदन्मुहुः ॥ ४९ ॥ हुंकृत्यपाययंतीतुजिह्वयालेहितंस्मसा ॥ एवंदृष्ट्वामहा
श्चर्यंराजभृत्याद्रुतंययुः ॥ ५० ॥ राजानंप्राहुराश्चर्यंश्रुत्वाराजापिसत्वरम् ॥ तत्रागत्यतथादृष्ट्वाहृष्टस्तंसमुवाचह ॥ ५१ ॥
अहोसत्यंसाधुरसिनामदेवनसंशयः ॥ गृहाणमत्तोयत्किंचिदभिवांच्छसिसुव्रत ॥ ५२ ॥ इतिश्रुत्वावचस्तस्यनामदेवःकृतांज
लिः ॥ किंमेधनेनराजेंद्रगोविंदोममभोजनम् ॥ ५३ ॥ ददात्येतावतैवाहंकृतार्थोस्मिनमोस्तुते ॥ तच्छ्रुत्वानामदेवस्यवाक्यंराजा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तियत्ततः ॥ ५४ ॥ शय्यांददौगृहाणेमामवश्यंप्रीतयेमम ॥ इत्युक्तोजगृहेशय्यांराजापिस्वगृहंगतः ॥ ५५ ॥ नामदेवस्तुतां शय्यांप्राक्षिपद्व.रिणिक्कचित् ॥ साधून्संभोज्यबुभुजेसंध्यायामतिहर्षितः ॥ ५६ ॥ ततःकतिपयेकालेगतेराजासशुश्रुवे ॥ साश य्यावारिण्याक्षिप्तातेनैतत्कस्यचिन्मुखात् ॥ ५७ ॥ अयाचतसमानाय्यनामदेवंसभूपतिः ॥ तांमेचिरंतनींशय्यांदेहिमेऽहंतुते पुनः ॥ ५८ ॥ ददामिनूतनांसाधोनात्रकार्याविचारणा ॥ इतिश्रुत्वावचोराज्ञोराजानंप्रत्युवाचह ॥ ५९ ॥ आगच्छराजन्कातेस्ति निश्चित्यसातिगृह्यताम् ॥ इत्युक्त्वातन्नदीतीरेगत्वाराज्ञामहात्मना ॥ ६० ॥ जलान्निष्कास्यराजाग्रेनानाशय्याधृतास्तथा ॥ कानुममेतिसंदिह्यराजाहस्ताकृतांजलिः ॥६१॥ नामदेवंनमस्कृत्यक्षमस्वेत्यब्रवीन्मुहुः ॥ दर्शयित्वैतदाश्चर्यंनामदेवोगृहंगतः ॥६२॥ राजापिस्वगृहंगत्वाग्रामेसर्वानजिज्ञपत् ॥ अद्यारभ्यममाज्ञेयंनामदेवोममप्रियः ॥ ६३ ॥ यस्तंद्वेष्टिसमेशत्रुस्तंहानिष्याम्यहंपुनः ॥ तथाज्ञांशिरसासर्वेस्वीचक्रुःपुरवासिनः ॥ ६४ ॥ एवंहिभगवान्नित्यंभक्तरक्षापरायणः ॥ अद्यापिवर्ततेलोकेप्रत्यक्षोनात्रसं शयः ॥ ६५ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनामदेवचरितेगोजीवनंशय्याप्रत्यक्षकरणंनामषट्त्रिंशःसर्गः ॥ ३६ ॥ ॥ छ ॥

अपरंनामदेवस्यमाहात्म्यंकीर्त्त्यतेधुना ॥ यदाकर्ण्यभवेद्भक्तिःश्रीकृष्णेपरमात्मनि ॥ १ ॥ एकदानामदेवस्यगृहेलग्नोमहानलः ॥ कस्यचिद्वेश्मसंलग्नोवायुनातन्नसंशयः ॥ २ ॥ निर्वापयितुमायाताजनास्तान्प्रतिषिध्यसः ॥ नामदेवोथगोविंदंगृहीत्वाबहिरागतः ॥ ॥ ३ ॥ हर्षेणमहतासर्वेसिद्धंतेगृह्यतांप्रभो ॥ गोविंदाद्यमहाभाग्यमित्युक्त्वाप्रतिमाग्रतः ॥ ४ ॥ स्थित्वावाद्यंसमादायगायन्भ क्त्यानननर्तह ॥ अथसर्वंगृहंवह्निर्भस्मसादकरोत्क्षणात् ॥ ५ ॥ निर्वापितःस्वयंतत्रभस्मप्रोत्साय्यैवावसत् ॥ मात्रासहचगोविंदंपुनः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

संस्थाप्यभक्तितः ॥ ६ ॥ एवंतत्रैववसतोदिनानिकतिचिद्ययुः ॥ अथमातुर्निदेशेनगृहकर्म्मसमारभत् ॥ ७ ॥ कुतश्चित्काष्ठरज्वा
दिसमानीयाकरोद्गृहम् ॥ छादनार्थीतृणान्वेषीग्रामांतान्नाप्तवांस्तृणम् ॥ ८ ॥ ततोमाताब्रवीद्वाक्यंवत्सनाच्छादितंगृहम् ॥ कथ
मस्मिन्निवत्स्यामिशीतातपसमाकुला ॥ ९ ॥ इतिमातृवचःश्रुत्वादूरंग्रामांतरंययौ ॥ तृणपुंजंसमाबध्यधृत्वाशिरसियत्नतः ॥ १० ॥
आनयन्पथिभारार्तोविवासस्तरोस्तले ॥ सुष्वापतत्रभारार्तोभगवान्भक्तवत्सलः ॥ ११ ॥ आगत्यनामदेवस्यरूपंकृत्वानिजंहरिः ॥
गृहीत्वातृणपुंजंसशिरसाभगवान्प्रभुः ॥ १२ ॥ नामदेवस्यभवनेसमायातोऽतिहर्षितः ॥ तदेवाच्छादयामासमात्रासपुनरर्थितः ॥ १३ ॥
भुक्त्वाच्छादयवेश्मेदंक्षुत्पिपासाकुलोघियत् ॥ इतितस्यावचःश्रुत्वाभक्तरूपधरोहरिः ॥ १४ ॥ प्रातःक्षणेनवेश्मेदंछादयाम्य
विलंबितम् ॥ ततःस्नानंकरिष्यामितावत्त्वंपाकमाचर ॥ १५ ॥ इत्युक्त्वातद्गृहंशीघ्रंछादयामासकेशवः ॥ संच्छाद्यतद्गृहंतूर्णंरज्जु
दात्रादिकंपुनः ॥ १६ ॥ गृहाणेदंगृहेरक्षमातःस्नातुंव्रजाम्यहम् ॥ इत्युक्त्वासगतोदेवोभगवान्भक्तवत्सलः ॥ १७ ॥ नामदेवस्त
तोनिद्रांजहौमायाविमोहितः ॥ अदृष्ट्वातृणपुंजंसनीतंकेनाप्यमन्यत ॥ १८ ॥ ततउत्थायशीघ्रंसआजगामस्वमंदिरम् ॥ उवाच
मातरंमार्गेगृहीत्वातृणसंचयम् ॥ १९ ॥ गृहीतंतत्तुकेनापिएवमेवाहमागतः ॥ नामदेववचःश्रुत्वामाताप्राहाऽतिविस्मिता ॥ २० ॥
किमिदंभाषसेपुत्रकोऽयंतेमातिविभ्रमः ॥ इदानींछादयित्वात्वंरज्जुदात्रादिकंपुनः ॥ २१ ॥ मयिदत्त्वागतःस्नातुंपुनरेवब्रवीषिकिम् ॥
इतिमातृवचःश्रुत्वानामदेवोतिविस्मितः ॥ २२ ॥ प्रणम्यमातरंभूयोजगर्हात्मानमात्मना ॥ धिङ्मांयदर्थंभगवान्पथिशुश्रावकेशवः ॥
॥ २३ ॥ इत्येवंविलपन्भूयोमात्राभोक्तुंसमर्थितः ॥ स्नात्वासंपूज्यगोविंदंबुभुजेऽन्नंहरिंस्मरन् ॥ २४ ॥ इत्येवंनामदेवस्यमाहात्म्यं

[illegible]

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वर्णितंमया ॥ पुनर्वक्ष्यामितस्यैवभक्तिमाहात्म्यमुत्तमम् ॥ २५ ॥ एकदाऽतिथिर्वेलायांमालामुद्राविभूषितः ॥ साधुःसमागतस्त
स्यनामदेवस्यमंदिरे ॥ २६ ॥ उवाचनामदेवंससाधोहंतुबुभुक्षितः ॥ शीघ्रंभोजयमामन्नंक्षुधामांपरिबाधते ॥ २७ ॥ इतिश्रुत्वा
वचस्तस्यनामदेवउवाचतम् ॥ एकादशीव्रतंत्यक्त्वाकथमन्नंबुभुक्षसि ॥ २८ ॥ आमान्नंगृह्यतांमत्तःपक्त्वाभुंक्ष्वयथारुचि ॥ इत्येवंव
चनंश्रुत्वाअतिथिःप्राहतंपुनः ॥ २९ ॥ पक्त्वाहंनैवभोक्ष्यामिममायंनियमोमहान् ॥ यद्गृहंयामितस्यैवपाकान्नेननसंशयः ॥ ३० ॥
अहंभोक्ष्याम्यतस्त्वंतुभुंक्ष्वभुंक्ष्वमयासह ॥ दिनत्रयमहोरात्रंनिराहारंगतंमम ॥ ३१ ॥ अतस्त्वांप्रार्थयाम्येषप्रयच्छान्नंप्रसीदमे ॥ इति
तस्यवचःश्रुत्वानामदेवोतिविस्मितः ॥ ३३ ॥ उवाचशांतयन्भिक्षुंक्षमस्वभगवन्निति ॥ हरिवासरएवैतत्प्राणेभ्योपिप्रियंमम ॥ ३३ ॥
त्यक्ष्यामिजीवनंचाहंनतुचैकादशीव्रतम् ॥ अतस्त्वांप्रार्थयाम्येतत्त्यजैवंनियमंमयि ॥ ३४ ॥ एवंमुहुःप्रार्थ्यमानोनस्वीचक्रेऽथसो
तिथिः ॥ चिंतयापरयाविष्टोनामदेवोन्यवर्तत ॥ ३५ ॥ अतिथिस्तद्गृहद्वारिसुष्वापातिक्षुधार्दितः ॥ एवंदिनंगतंतस्यसंध्याकालउप
स्थिते ॥ ३६ ॥ पुनस्तंप्रार्थयामासनामदेवःकृतांजलिः ॥ नस्वीचकारतद्वाक्यमतिथिर्हठमाश्रितः ॥ ३७ ॥ सनिवर्त्यततो
गेहेरात्रिंजागरणादिना ॥ नियतःप्रातरेवासावागतोभिक्षुमंदिरे ॥ ३८ ॥ उत्तिष्ठभिक्षोभद्रंतेप्रातःकालोऽयमागतः ॥ स्नात्वा
भुंक्ष्वमयासार्द्धंप्रतिज्ञासफलाऽस्तुते ॥ ३९ ॥ मुहुरेवंसमाभाष्यतत्समीपमुपागतः ॥ मुखाद्वस्त्रंसमाकृष्यगतासुमिवमन्यते
॥ ४० ॥ उत्थापयत्स्वहस्ताभ्यांचोत्तस्थौसमृतोपमः ॥ ततोरुरोददुःखार्तोनामदेवोतिविस्मितः ॥ ४१ ॥ श्रुत्वातुरुदितंसर्वे
आगताःपुरवासिनः ॥ सर्वेविस्मयमापन्नाःकिंकुर्मइतिवादिनः ॥ ४२ ॥ तानाहनामदेवोऽथशृणुध्वंवचनंमम ॥ अयंमृतोऽतिथिर्गेहे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्षुधयानात्रसंशयः ॥ ४३ ॥ नदत्तमन्नंभोक्तुंयत्क्षुधार्तस्यापिवैमया ॥ अतोऽस्यहत्यासंप्राप्तामममनास्त्यत्रसंशयः ॥ ४४ ॥
तस्मादस्यचितायांतुसहानेनाऽहमप्यहो ॥ प्रविश्यवह्नौत्यक्ष्यामिजीवनंनात्रसंशयः ॥ ४५ ॥ तस्मादस्यचितायांवैसहाने
नाहमप्यहो ॥ अन्यथानापिवक्तव्यंभवतांशपथोहरेः ॥ ४६ ॥ इतितस्यवचःश्रुत्वासर्वेचितांपरांययुः ॥ नामदेवस्यजननी
रुदतीभृशदुःखिता ॥ ४७ ॥ निवारयामासमुहुःपुत्रोनासौन्यवर्तत ॥ ततःसर्वेमृतंभिक्षुमुत्थाप्यपुरवासिनः ॥ ४८ ॥ श्मशानेप्रा
पयामासुर्नामदेवस्तमन्वगात् ॥ अथतत्रचितांकृत्वाशवंसंस्थाप्यतत्रच ॥ ४९ ॥ स्वयंप्रविश्यवह्निंतुगृहीत्वातन्मुखंययौ ॥ दातुं
व्यवस्थितस्तत्रास्मितंकृत्वाब्रवीन्मृतः ॥ ५० ॥ मामादीपयभोवह्निमुखेमेनमृतोह्यहम् ॥ तवसत्यपरीक्षार्थमेवमेवंकृतंमया ॥ ५१ ॥
तुष्टोहंवरदोब्रूहियदिच्छसिददामितत् ॥ इतिश्रुत्वावचस्तस्यनामदेवोब्रवीत्पुनः ॥ ५२ ॥ कस्त्वंकुतःसमायातइतिसत्यंब्रवीहिमे ॥
श्रुत्वाभिक्षुरब्रवीत्तमनिकेतोह्यनामकः ॥५३॥ वर्णाश्रमबहिर्भूतःपर्यटामियदृच्छया॥तवसत्येनसंतुष्टोब्रूहिकिंकरवामिते॥५४॥ नामदे
वउवाचाथसोसिसोसिनमोस्तुते॥हरिभक्तिर्दृढामेस्तुत्वंभुक्त्वाव्रजमेगृहात्॥५५॥एवमस्त्वितिचोक्त्वासनामदेवगृहंययौ॥ तमन्वयुर्हृ
ष्टचित्तानामदेवपुरःसराः॥५६॥नामदेवस्ततःस्नात्वागोविंदंपरिपूज्यच ॥ भिक्षुंसंभोज्यबुभुजेजनन्यासहसुव्रतः॥५७॥ प्रशशंसनामदेवं
भिक्षुःस्वर्गंपुनर्ययौ ॥ एतद्दृष्ट्वातुचरितंनामदेवस्यवैजनाः ॥५८॥ लेभिरेपरमाश्चर्यंप्रशशंसुःपरस्परम् ॥ एवंहरिःसमागत्यभक्तानुग्रह
विग्रहः ॥ ५९ ॥ कौतुकंकुरुतेऽद्यापिभक्तभक्तिवशीकृतः ॥ नजातिर्नैवचाचारोनमंत्रोनचपूंजनम् ॥ ६० ॥ प्रसादयतिगोविंदंयथा ॥ ६४ ॥
भक्तिःकलौयुगे ॥ दुर्लभासानृणांयस्यवर्ततेधन्यएवसः ॥ ६१ ॥ भगवानपितद्भक्तिंकुरुतेभक्तियंत्रितः ॥ ६२ ॥ ॥ इति श्रीभग

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वद्भक्तिमाहात्म्येनामदेवचरितंनामसप्तत्रिंशःसर्गः ॥ ३७ ॥ छ ॥ ॥ एकदानाममाहात्म्यंनामदेवेनभक्तितः ॥ कथाव्यक्तीकृता
लोकेतदाश्चर्यंनिशामय ॥ १ ॥ महाधनोवणिक्कश्चिद्दिदृक्षुर्विठ्ठलंप्रभुम् ॥समाथातोतिभक्त्यावैधनान्यादायभूरिशः ॥ २ ॥ स्नात्वाभी
मासरित्तोयेदृष्ट्वातंविठ्ठलंहरिम् ॥ संपूज्यविधिवद्भक्त्यारत्नालंकरणादिभिः ॥ ३ ॥ तुलांदानंचकारासौहिरण्यस्ययथाविधि ॥ तैर्द्र
व्यैस्तोषयामासयथायोग्यंद्विजान्मुदा ॥ ४ ॥ अन्यैरपिधनैस्तत्रविठ्ठलप्रीतयेवणिक् ॥ दीनानाथांस्तुसंतोष्यप्राहकोप्यस्त्वनागतः ॥
॥ ५ ॥ नयमानंधनंतस्मैदास्यामितत्रवीप्सितम् ॥ इतितस्यवचःश्रुत्वासर्वेतेग्रामवासिनः ॥ ६ ॥ ऊचुःसादरमास्तेवैनामदेवोतिवै
ष्णवः ॥ अयाचीनियताहारीसदागोविंदपूजकः ॥ ७ ॥ नयातिसक्वचिद्भक्तःसंतुष्टोयेनकेनचित् ॥ इतिश्रुत्वावचस्तेषांवणिगाहनि
जात्मजम् ॥ ८ ॥ गच्छत्वंयत्रयत्रास्तेनामदेवोहरिप्रियः ॥ प्रणिपत्यविनीतात्मातंप्राहाद्यानयेहभो ॥ ९ ॥ इतिपितृवचःश्रुत्वागतः
पुत्रोतिहर्षितः ॥ प्रणम्यनामदेवंतंप्राहमेजनकःप्रभो ॥ १० ॥ त्वांदिदृक्षतिधर्मात्मातत्रत्वंकृपयाचल ॥ श्रुत्वैतद्वचनंतस्यनामदे
वोब्रवीद्वचः ॥ ११ ॥ प्रायोनयामिकुत्रापिकोहंयन्मांदिदृक्षति ॥ सदाताधर्मशीलोद्यमेकिंचिद्दातुमिच्छति ॥ १२ ॥ नजानामिन
मेवांछाधनेवान्यत्रकुत्रचित् ॥ प्राणधारणमाहारंददातिविठ्ठलःप्रभुः ॥ १३ ॥ इतिपित्रेप्रवक्तव्यंगच्छवत्सविचारयन् ॥ ततःस
वैश्यपुत्रस्तुपितुरंतिकमागतः ॥ १४ ॥ उवाचनामदेवस्यवचःसचपुनर्वणिक् ॥ प्राहपुत्रंपुनर्गच्छप्रसाद्यानयतंसुत ॥ १५ ॥ ततः
सग्रामवृद्धैस्तुसाकंतत्रपुनर्गतः ॥ उवाचप्रांजलिर्भूत्वातथाहंपुनरागतः ॥ १६ ॥ शृणुमेपितृवचनंयावत्त्वंनैषिमेगृहम् ॥ तावदन्नं
चपानीयंनग्रहीष्याम्यहंध्रुवम् ॥ १७ ॥ इतिप्रतिज्ञांज्ञात्वासमरणेकृतनिश्चयः ॥ उत्कंठितोभवंतंवैद्रष्टुंनास्त्यत्रसंशयः ॥ १८ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भवंतंभगवद्भक्तंजानातिभक्तवत्सलम् ॥ नायातःस्वयमेवात्रत्वदागमननिश्चयात् ॥ १९ ॥ अथैवंवचनंतेषांवृद्धानांतत्सुतस्यच ॥ श्रुत्वासनामदेवोपिससुत्तस्थौप्रहृष्टवत् ॥ २० ॥ जगामवणिजोगेहेयत्रदानंकरोतिसः ॥ वैश्योदृष्ट्वानामदेवंसमुत्थायातिहर्षितः॥२१॥ पाद्याद्यैःपूजयित्वातंप्रोवाचविहितांजलिः ॥ प्रसीदतुभवानद्ययद्ददामिगृहाणतत् ॥ २२ ॥ तस्यवैश्यवचःश्रुत्वानामदेवोप्यभाषत ॥ अहोतदर्थंनायातोनमेवांच्छाधनादिषु ॥ २३ ॥ इतिजानंत्यमीसर्वेतस्मादेतत्क्षमस्वभो ॥ इतिश्रुत्वातुसवणिक्तत्पादौप्रतिगृह्यच ॥ २४ ॥ नतत्याजसतत्पादौनामदेवोब्रवीत्तदा ॥ देहिमेभिहितंद्रव्यंत्वत्प्रीत्यास्वीकरोम्यहम् ॥ २५ ॥ इत्युक्त्वातुलसीपत्रमेकमादायतत्रह ॥ रामेत्यस्यार्द्धमलिखत्प्राहतंवणिजंपुनः ॥ २६ ॥ एतत्परिमितंद्रव्यंदेहिमेयदिदास्यसि ॥ इतिश्रुत्वावचस्तस्यप्राहतंसवणिक्पुनः ॥ २७ ॥ उपहासोनयोग्यस्तेममभक्तस्यसुव्रत ॥ गृहाणयद्ददामीहस्वेच्छयाहंप्रसीदभो ॥ २८ ॥ श्रुत्वैतद्वचनंतस्यनामदेवोब्रवीत्पुनः ॥ नोपहासंकरोम्यद्यतावत्सर्वाधिकंभवेत् ॥ २९ ॥ सत्यमेतन्नसंदेहोनर्किचित्तत्समंभुवि ॥ इतिश्रुत्वासवैश्यस्तुसुवर्णतोलिकांतुलाम् ॥ ३० ॥ समादायतुतत्पत्रंरामनामार्द्धसंयुतम् ॥ एकतःस्थापयामासहिरण्यमपिचैकतः॥ ॥ ३१ ॥ नसमंतुलसीपत्रेणासीत्तत्कनकंपुनः ॥ सुवर्णानिसमादायपूरयामासयत्नतः ॥ ३२ ॥ नययौतत्रसाम्यंतत्पुनरन्यांतुलांदधे ॥ तत्रापिनययौसाम्यंनामार्द्धस्यतुतद्धनम् ॥ ३३ ॥ पुनर्निर्मायमहतींतुलांसंस्थाप्यसर्वशः ॥ धनानितोलयामाससनययुःसमतां पुनः ॥ ३४ ॥ ततस्तंवणिजंप्राहनामदेवोतिविस्मितम् ॥ अहोयावंतिदानानिव्रतानिचमहीतले ॥ ३५ ॥ तीर्थानिचोपवासाश्चतेषांयत्फलमस्तिवै ॥ संकल्प्यतज्जलंतत्रदत्त्वातोलयपश्यभो ॥ ३६ ॥ इतिश्रुत्वावणिक्तीर्थव्रतादीनांफलानितु ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

संकल्प्यप्रददौतत्रनसाम्यंजग्मुरण्वपि ॥ ३७ ॥ ततस्तुपरमाश्चर्यंदृष्ट्वासर्वेतिविस्मिताः ॥ उवाचनामदेवस्तानेतन्मेपरमं धनम् ॥ ३८ ॥ नैतादृशंधनंलोकेकस्याप्यस्तीत्यतोमया ॥ नयाच्यतेजनःकोपिमत्तःसर्वेहिनिर्धनाः ॥ ३९ ॥ इतितस्यवचःश्रुत्वासाधुसाध्विितिवादिनः ॥ दृष्ट्वातंप्रत्ययंचित्तेजगृहुर्नामचिंतनम् ॥ ४० ॥ एवंवैनाममाहात्म्यंपुराणेपरि कीर्तितम्॥नामोच्चारणमात्रेणगजोमुक्तोबभूवह ॥ ४१ ॥ गणिकाचदिवंयातारामनामप्रभावतः ॥ अजामिलोतिपापिष्ठोनारायणसुत स्यते ॥ ४२ ॥ जगामपरमंधामतस्मान्नामैवतारकम् ॥ कृष्णेतिमंगलंनामयस्यवाचिप्रवर्तते ॥ ४३ ॥ भस्मीभवंतिराजेंद्रमहापात ककोटयः॥इतिस्मृतिरतिव्यक्तामन्यतेऋषिभिःसदा॥४४॥तस्मान्नामसमोनास्तितपोयोगोव्रतंचवा ॥ अन्यानिपुण्यकर्माणिनाशुचिः कर्तुमर्हति॥४५॥तत्रनामस्मृतिर्विष्णोःसर्वशौचोत्तमोत्तमम्॥काम्यानांकर्मणांसिद्धौयदन्यस्तद्वधंस्मृतम्॥४६॥ तत्रांगवैगुण्यकृतोदो षोऽनर्थंकरोतिवै ॥ नामस्मृतौनचांगानिनचवैगुण्यमस्तिवै ॥ ४७ ॥ तस्मान्नामस्मृतिर्लोकेसर्वेभ्योपिगरीयसी ॥ नामैवतावदेवे तिनिर्णीतोमुनिभिःपुरा ॥ ४८ ॥ अश्वमेधादियज्ञेषुनाम्नादत्ताहुतीःसुराः ॥ गृहीत्वावितरंतीष्टमथाप्येतन्नसंशयः ॥ ४९ ॥ वेदेऋ गर्थस्त्वन्योवैयन्नामाक्षरमत्यसौ ॥ तदेवतावकाऋक्प्रातपातेयजतेसुधीः ॥ ॥ ५० ॥ तस्मान्नाम्नस्तुमाहात्म्यंनकोपिवक्तुमर्हति ॥ यस्यनामस्मृतौभक्तिस्तस्यभक्तिर्हरौदृढा ॥५१ ॥ येनैवनाममाहात्म्यमनुभूतंयथापुरा ॥ तथाग्रेकथयिष्यामिग्रंथांतेविस्तराच्चतम् ॥ ॥ ५२ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनामदेवचरितेनाममाहात्म्यंनामाष्टत्रिंशःसर्गः ॥ ३८ ॥ छ ॥ ॥ पुनरग्रेप्रवक्ष्या मिभक्तिमाहात्म्यमुत्तमम् ॥ यच्छ्रुत्वाजायतेभक्तिर्वासुदेवेमहात्मनि ॥१॥ जगन्नाथपुरीप्रांतेदेशेवैचोत्कलाभिधे ॥ बिंदुबिल्वइतिख्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तोग्रामोब्राह्मणसंकुलः ॥ २ तत्रोत्कलेद्विजोजातोजयदेवइतिश्रुतः ॥ विद्याभ्यासरतःशांतःपुरुषोत्तमपूजकः ॥ ३ ॥ अथतत्रैवविप्रो
न्योदेवशर्मेतिविश्रुतः ॥ अनपत्योबभूवासौजगन्नाथमुपागतः ॥ ४ ॥ नमस्कृत्यहरिंमूर्ध्नास्वीचकारकृतांजलिः ॥ यदिमेसंततिर्नाथत्व
त्प्रसादाद्भविष्यति ॥ ५ ॥ अपत्यंप्रथमंतुभ्यमर्पयिष्याम्यसंशयम् ॥ प्रतिश्रुत्यमनस्येवसयातोनिजमंदिरम् ॥ ६ ॥ तत्रकालेनकि
यताकन्यैकाप्रथमाजनि ॥ ततःपुत्रानलभतसाधुवृतान्मनोहरान् ॥ ७ ॥ ततःसमनसास्मृत्वासपत्नीकोद्विजोत्तमः ॥ कन्यांगृहीत्वाह
र्पेणजगन्नाथमुपागतः॥ ८ ॥ नमस्कृत्यजगन्नाथंदेवशर्म्माब्रवीद्वचः ॥ देवदेवजगन्नाथप्रसादःफलितोमम ॥ ९ ॥ प्रथमातनयाजातापु
त्रास्तुतदनंतरम् ॥ अतःप्रतिश्रुतांकन्यांददामिप्रतिगृह्यताम् ॥ १० ॥ इत्युक्त्वातांकरेणासौगृहीत्वातांप्रदर्श्यंच ॥ पूजके
भ्योथवृत्तांतमादितोव्याजहारसः ॥ ११ ॥ ततोबहिःसमागत्यसोवतस्थेक्वचिद्द्विजः ॥ रात्रौतस्यचविप्रस्यपूजकस्यजगत्प्रभुः
॥ १२ ॥ स्वप्नेतंकथयामासजगन्नाथोद्भुतंवचः ॥ देवशर्म्मन्प्रसन्नोस्मिस्वीकृतातेसुतामया ॥ १३ ॥ परंतुजयदेवायदीयतांमत्प्रियो
ह्यसौ ॥ अहमेवसविज्ञेयोनात्रकार्याविचारणा ॥ १४ ॥ पूजकोप्येवमेवाथस्वप्नंदृष्ट्वाप्रबोधितः ॥ देवशर्म्माणमागत्यस्वप्नंप्रोवाचहृ
र्पितः ॥ १५ ॥ श्रुत्वैवंदेवशर्म्मापिस्वप्नंसत्यममन्यत ॥ पूजकंतंनमस्कृत्यगृहीत्वातनयांनिजाम् ॥ १६ ॥ जगामजयदेव
स्यसंनिधौहृष्टमानसः ॥ तंतुपर्णकुटीमध्येग्रामाद्बहिरवैक्षत ॥ १७ ॥ दरिद्रंनिरपेक्षंचशास्त्रंपश्यंतमादरात् ॥ मनसातुजगन्नाथं
ध्यायंतमुदिताननम् ॥ १८ ॥ प्रणम्यजयदेवंतंदेवशर्म्माब्रवीद्वचः ॥ इयंमेतनयाब्रह्मन्जगन्नाथाज्ञयामया ॥ १९ ॥ नाम्नापद्माव
तीतुभ्यंदीयतेऽनुगृहाणताम् ॥ इत्युक्तोजयदेवस्तमुवाचमधुरंवचः ॥२०॥ अहंनकन्यादानस्यपात्रंदीनोऽनिकेतनः ॥ ममापिनजिघृ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्षास्तिकिमिदंभाषसेवृथा ॥ २१ ॥ जगन्नाथाज्ञयेत्युक्त्वायन्मांवंचयसिस्फुटम् ॥ कुतएवंमतिभ्रंशोगच्छगच्छयथासुखम् ॥ २२ ॥
आनाय्यपूजकंतत्तुदेवशर्म्मातियत्नतः ॥ निवेदयामासमुहुस्तांचनस्वीचकारसः ॥२३॥ ततःस्वतनयांतत्रस्थापयित्वाद्विजोब्रवीत् ॥
अयंतुतेपतिःपुत्रित्वयापूज्यश्चसर्वदा ॥ २४ ॥ पतिसेवापरानारीसुखमक्षयमश्नुते ॥ इत्युक्त्वार्तोदेवशर्म्मायायौपत्न्याःसहाश्रमम् ॥
॥ २५ ॥ सापिकन्यास्थितातत्रजयदेवस्यसन्निधौ॥ जयदेवस्तुतांप्राहगतौतौपितरौतव ॥ २६ ॥ त्वांविहायत्वमप्येकाकथंस्थास्य
सिकानने ॥ अथपद्मावतीप्राहभगवन्किंब्रवीषिभो ॥ २७ ॥ स्वमातृपितृदेयांवैसमांतुभ्यंददौपिता ॥ अतस्तवाहंत्वंचेन्मामतिभ
क्तामनागसम् ॥ २८ ॥ त्यक्ष्यसीत्यत्रकिंकुर्य्यांनाहमेकात्वयिस्थिते ॥ पद्मावतीवचःश्रुत्वाजयदेवोप्यचिंतयत् ॥२९॥ अनयासत्य
मुक्तंहित्यागेदोषोमहान्मम ॥ तस्मादस्याःपितुर्गेहंगत्वाहमनयासह ॥ ३० ॥ इमांप्रतिग्रहीष्यामिविधिनानात्रसंशयः ॥ इतिनिश्चि
त्यमनसाजयदेवउवाचताम् ॥ ३१ ॥ एह्यागच्छमयासार्द्धंगच्छामित्वात्पितुर्गृहम् ॥ विधिनातत्रतेपाणिंग्रहीष्यामिनसंशयः ॥ ३२ ॥
इत्येवंवचनंश्रुत्वाप्राहपद्मावतीपुनः ॥ त्वदाज्ञाकरणंधर्म्मइत्येवंमांपिताब्रवीत् ॥ ३३ ॥ अतोमहाप्रसादोयमित्युक्त्वाग्रेस्थिताभ
वत् ॥ जयदेवस्तयासार्धंदेवशर्म्मगृहंगतः ॥ ३४ ॥ तमुक्त्वागद्गदंसर्वंप्रतिगृह्ययथाविधि ॥ पद्मावत्यातयासार्धमाजगामनिजंगृह
म् ॥ ३५ ॥ उभौतौदंपतीतत्रएकप्राणौबभूवतुः ॥ नृत्यंतौचापिगायंतौश्रीकृष्णार्च्चनतत्परौ ॥ ३६ ॥ एकदाजयदेवस्तुमनस्ये
वमचिंतयत् ॥ स्वयंकृतेनगीतेनतोषयिष्याम्यहंहरिम् ॥ ३७ ॥ इतिनिश्चित्यनिर्मायगीतगोविंदनामकम् ॥ गायंस्तुदेवदेवाग्रेप
त्न्यासहननर्तह ॥ ३८ ॥ एवंनित्यव्रतंतस्यतत्रैकस्मिन्दिनेपुनः ॥ निबन्धरासचरितंकृष्णोक्तोराधिकांप्रति ॥ ३९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्मरगरलखं०

शिरस्याधेहिमेपादामित्यर्थंचकरंहृदि ॥ समायांतंनतद्दातुंशशाकेश्वरतांस्मरन् ॥ ४० ॥ अन्यदन्वेषमाणोपिनलेभेतादृशं
पदम् ॥ संस्थाप्यपुस्तकंस्नातुंजगामान्यद्विचिंतयन् ॥ ४१ ॥ तावज्जयदेवरूपेणकृष्णस्तत्रसमागतः ॥ पद्मावतीमुवा
चाथपुस्तकंदेहिमेप्रिये ॥ ४२ ॥ पद्मावतीसमानीयददौतत्पुस्तकंद्रुतम् ॥ गृहीत्वापुस्तकंतत्रजयदेवेनयत्कृतम् ॥
॥ ४३ ॥ मनसाताल्लिलेखासौजयदेवस्वरूपधृक् ॥ पुनरुत्थायसस्नातुंजगामातित्वरान्वितः ॥ ४४ ॥ कश्चित्कालमती
त्याथजयदेवःसमागतः ॥ देवानभ्यर्च्यभुक्त्वाचगृहीत्वापुस्तकंपुनः ॥ ४५ ॥ मनसाकल्पितंपद्यंलिखितुंतुसमुद्यतः ॥ ददर्श
तत्रतत्पद्यंनालिखद्यदयंपुरा ॥ ४६ ॥ अन्येनलिखितंज्ञात्वाप्राहपद्मावतींप्रियाम् ॥ अयेकेनेदमालेखितंजानासिशुचिस्मिते ॥
॥४७॥ नाहमेतत्पदंपूर्वमलिखंनाक्षरंमम ॥ इतिश्रुत्वावचस्तस्यप्राहपद्मावतीप्रिया ॥ ४८ ॥ नाथकोयंभ्रमस्तेद्यजयदेवंवचोब्रवीत् ॥
स्नातुंगतस्तुतत्कालेपुनरागत्यसत्वरम् ॥ ४९ ॥ गृहीत्वापुस्तकंमत्तोलिखित्वात्वंपुनर्गतः ॥ स्नातुमेवंतुजानामिकोन्यस्त्वत्तोऽ
त्रलेखकः ॥ ५० ॥ इतिश्रुत्वाप्रियावाक्यंजयदेवोऽतिविस्मितः ॥ अहर्निशंतमेवार्थंचिंतयन्नालभत्सुखम् ॥ ५१ ॥ तस्मिन्दि
नेरात्रिशेषेस्वप्नेश्रीपुरुषोत्तमः ॥ उवाचजयदेवंतुसुस्वप्नंमुमुदेभृशम् ॥ ५२ ॥ स्वपत्नींसुभगांमेनेपुरुषोत्तमदर्शनात् ॥ तदा
रभ्यातिभक्त्यावैपत्न्यासहहरिंभजन् ॥५३॥ गायन्वैगीतगोविंदंतोषयामासकेशवम् ॥ निर्मायगीतगोविंदंपुस्तकंपुरुषोत्तमे ॥५४॥
निवेद्यकृतकृत्योभूज्जयदेवोमहामनाः ॥ ५५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येजयदेवचरितंनामैकोनचत्वारिंशःसर्गः ॥ ३९ ॥ ॥ ६७ ॥
पुनर्वक्ष्यामितस्यैवचरितंपरमाद्भुतम् ॥ जयदेवस्यविप्रस्यगीतगोविंदसंभवम् ॥ १ ॥ एकदागीतगोविंदंश्रुत्वाराजातिहर्षितः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

निजाग्रेस्थापयित्वातत्काव्यंतादृशमेवच ॥ २ ॥ स्वयंनिर्मायविद्वद्भ्योददावाज्ञांनृपःपुनः ॥ अद्यारभ्यममैतद्वैगीतगोविंदना
मकम् ॥ ३ ॥ पठ्यतांगीयतांसर्वैरन्यथादंडभाग्भवेत् ॥ इत्याज्ञाप्यद्वितीयंतद्गीतगोविंदनामकम् ॥ ४ ॥ प्रख्यापयामासनृपः
काव्यंस्वकृतमेवतु ॥ जयदेवकृतंकोपिनजगौनृपशासनात् ॥ ५ ॥ अथैकस्मिन्दिनेराजाद्रष्टुंश्रीपुरुषोत्तमम् ॥ आगतस्तत्रदेवा
ग्रेजयदेवंददर्शह ॥ ६ ॥ नृत्यंतंस्वकृतंकाव्यंगायंतंनृपआहतम् ॥ अहोमदीयंकाव्यंत्वंकुतोनस्वीकरोषिभो ॥ ७ ॥ श्रुत्वैवंजय
देवस्तुराजानंप्राहभीतवत् ॥ स्वीकृतंभवदीयंतुकाव्यंराजन्नसंशयः ॥ ८ ॥ परन्तुमत्कृतेनायंयथातुष्यतिकेशवः ॥ नतथात्व
त्कृतेनेतिपरीक्षाक्रियतामिह ॥ ९ ॥ एतच्छ्रुत्वातुवचनंजयदेवकृतंस्वकम् ॥ उभयंस्थापयामासजगन्नाथाग्रतःस्वयम् ॥ १० ॥
उवाचदेवंभोस्वामिन्किंतवातिप्रियंद्वयोः ॥ तत्स्थापयोपरिष्टात्तुयामःसर्वेबहिर्गृहात् ॥ ११ ॥ इत्युक्त्वातेबहिर्य्याताद्वारेदत्त्वाक
पाटकम् ॥ राजाचजयदेवश्चयेचान्येतत्रवैद्विजाः ॥ १२ ॥ अग्रेस्थित्वाक्षणंतत्रोद्घाटितंस्वयमेवाहि ॥ कपाटंमंदिरेयाताःसर्वेराजपु
रस्सराः ॥ १३ ॥ ददृशुस्तत्रतेसर्वेजयदेवेननिर्मितम् ॥ उपरिष्टात्स्थापितंतुतदधोराजनिर्मितम् ॥ १४ ॥ दृष्ट्वातत्परमाश्चर्य्यंरा
जाशोकसमन्वितः ॥ तत्याजान्नंचपानीयंरात्रौतत्रैवतास्थितवान् ॥ १५ ॥ नृपःस्वप्नेददर्शाथपुरुषोत्तमरूपधृक् ॥ कश्चित्समागतोब्रू
तेकिमर्थंशोचसेवृथा ॥ १६ ॥ गीतगोविंदसदृशंनान्यत्काव्यंप्रियंमम ॥ त्वत्कृतेनापितुष्यामिभक्तस्त्वंनात्रसंशयः ॥ १७ ॥
परंतुगीतगोविंदंस्वीकरोतुभवानपि ॥ प्रख्यापयतुलोकेस्मिन्ममप्रीतिविवर्धनम् ॥ १८ ॥ एवंपश्यन्नृपःस्वप्नेजहौनिद्रांमुदान्वितः ॥
कृष्णंननाममनसास्वापराधंक्षमापयन् ॥१९॥ तदारभ्यनृपोजातोजयदेवेतिभक्तिमान् ॥ स्वयंतुगीतगोविंदंप्रपठन्भक्तिपूर्वकम्॥२०॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रख्यापयामासपुनर्देशेदेशेनृपोत्तमः ॥ अथापरंप्रवक्ष्यामितस्यैवचरितंशुभम् ॥ २१ ॥ एकदातूत्कलेदेशेपुरुषोत्त
मसन्निधौ ॥ कस्मिंश्चिन्नगरेकाचिच्छाकविक्रयिणीमुदा ॥ २२ ॥ शरत्कालेनिशीथिन्यांचंद्रिकांचितदिग्दशे ॥ गायंतीगीतगोविं
दंवृंताकवनमध्यगा ॥ २३ ॥ वृंताकंचविचिन्वंतीविक्रयार्थमितस्ततः ॥ गायंतीकृष्णचरितंजयदेवविनिर्मितम् ॥ २४ ॥
श्रुत्वागानंतुभगवांस्तस्याःपश्चादितस्ततः ॥ शृण्वन्गीतंसवभ्रामव्रजंतीसायतोयतः ॥ २५ ॥ एवंभक्तिवशःकृष्णोवृंताकविपिनेहरेः॥
वृंताककंटकैश्छिन्नंपरिधानीयमंबरम् ॥ २६ ॥ वृंताकानिगृहीत्वासामंदिरेस्वंययौयदा ॥ तदास्वधामसंप्राप्तोनिशिश्रीपुरुषोत्तमः॥
॥ २७ ॥ प्रभातेतत्रपूजार्थमायातःपूजकोहरेः ॥ पूजासंभारमादायद्रष्टुंराजाप्युपागतः ॥ २८ ॥ प्रोद्घाटचसकपाटंतुगत्वादेव
स्यसन्निधौ ॥ स्नापयन्परिधानीयमपश्यत्खंडशःकृतम् ॥ २९ ॥ वृंताककंटकैर्विद्धंकिमेतदित्यचिंतयत् ॥ आहूयसतुराजानं
दर्शयामासचांबरम् ॥ ३० ॥ कथमेतदभूद्राजन्परमाश्चर्यमित्यहो ॥ मयैवागत्यचपुनःकपाटोद्घाटनंकृतम् ॥ ३१ ॥ नवालो
नापिचोन्मत्तःकश्चिदत्रागतोनिशि ॥ कथमेतद्विजानीयांकेनेदंकृतमीदृशम् ॥ ३२ ॥ इत्युक्त्वापूजयित्वातंसहराजासपूजकः ॥
विस्मितोबहिरागत्यपरांचिंतामुपागतः ॥ ३३ ॥ मुहुर्मुहुश्चिंतयानोनलेभेद्भुतकारणम् ॥ तदाराजापितत्रैवपूजकब्राह्मणेनवै ॥
॥ ३४ ॥ उवासरात्रौश्रीकृष्णंप्रार्थयन्मनसामुहुः ॥ केनेदमासीद्वस्त्रस्यखण्डशःकरणंविभोः ॥ ३५ ॥ एवंचिंतापरौतौतुत्यक्ताश
नजलावुभौ ॥ रात्रौसुषुपतुस्तत्रलेभातेनैवतौसुखम् ॥ ३६ ॥ तदानिशावशेषेतुस्वप्नेश्रीपुरुषोत्तमः ॥ ददर्शतुरुभौदेवंतत्तद्रू
पिणमागतम् ॥ ३७ ॥ राजानंब्राह्मणंचापिवदंतंमधुराक्षरम् ॥ विषीदसिकिमर्थंभोमद्वस्त्रच्छेदनादिना ॥ ३८ ॥ शृणुष्वका

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रणंवासोयेनच्छिन्नमनेकधा ॥ इतोविदूरेवृंताकवाटयांकाचिज्जगौमुदा ॥ ३९ ॥ फलविक्रयिणीगीतगोविंदंममवल्लभम् ॥ तच्छ्रोतुमगमंचाहंवाटयांसार्द्धतयापुनः ॥ ४० ॥ इतस्ततोह्यधावंतुततोवृंताककंटकैः ॥ खण्डशःस्फुटितंवस्त्रंसत्यमेतन्नसंशयः ॥ ॥ ४१ ॥ माविषादंकुरुष्वात्रनैवदोषोऽस्तिकस्याचित् ॥ इतिश्रुत्वावचःस्वप्नेभूपतिःसंचपूजकः ॥ ४२ ॥ उत्थायचततोविप्रोराजसन्निधिमागतः ॥ राजानमुक्तवान्सर्वंस्वप्नेयद्यदवैक्षत ॥ ४३ ॥ श्रुत्वाराजाथतत्सर्वंसत्यमेतदितिब्रुवन् ॥ उवाचस्वप्नेयद्दृष्टंराजापिस्वयमेवाहि ॥ ४४ ॥ परस्परंप्रशंसंतौशाकविक्रयिणीमुभौ ॥ जयदेवकविंचैवराजातुब्राह्मणःसच ॥ ४५ ॥ अथराजातुतांशूद्रींशाकविक्रयिणींतदा ॥ आनाय्यजीविकांदत्त्वावस्त्रैर्वपुरेसदा ॥ ४६ ॥ गायंतीगीतगोविंदंनित्यंश्रीपुरुषोत्तमम् ॥ तोषयेतिनृपस्त्वाज्ञांदत्त्वासंपूज्यकेशवम् ॥ ४७ ॥ भुक्त्वाप्रसादंदेवस्यजगामभवनंनिजम् ॥ जयदेवंततोराजाभक्तराजममन्यत ॥ ४८ ॥ मुहुस्तद्दर्शनाकांक्षीकविवेश्मययौनृपः ॥ एवंभक्तिवशःकृष्णःकिंकिंनकुरुतेप्रभुः ॥ ४९ ॥ तस्माद्द्यापिभक्तिर्हिनृणांसर्वार्थसाधिनी ॥ अथापरंप्रवक्ष्यामिपद्मावत्याविचेष्टितम् ॥ ५० ॥ जयदेवस्यचरितंमहदाश्चर्य्यमुत्तमम् ॥ एकदातत्रनृपतेर्भ्रातांकश्चित्सगोत्रजः ॥ ५१ ॥ ममारकालधर्मेणतत्पत्नीसुव्रतासती ॥ अनुगंतुंमनश्चक्रेनिश्चितंपतिदेवता ॥ ५२ ॥ ततोराजाददौसर्वंसंभारमौर्द्धदेहिकम् ॥ स्वयंतत्रगतोराजापुरवासिजनैर्वृतः ॥ ५३ ॥ तस्मिन्नेवक्षणेराज्ञींद्रष्टुंपद्मावतीययौ ॥ राज्ञीप्रणम्यतांप्राहसतींद्रष्टुंकिमेषिभो ॥ ५४ ॥ इतिश्रुत्वावचोराज्ञ्याःप्राहपद्मावतीसती ॥ अहोपाषंडइत्येषमृतेपत्यौमनास्विनी ॥ ५५ ॥ एवंमतुंमुपायंयत्प्रसाधयसिसुव्रता ॥ अहंतुमन्येभोराज्ञिपत्युर्मरणसंश्रुतम् ॥ ५६ ॥ तत्क्षणाद्देहजेवह्नौभस्मीभूतानयाभवत् ॥ काभक्तिः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

काचतत्प्रीतिःश्वतंतस्याश्चकिंपुनः ॥ ५७ ॥ इतिश्रुत्वावचस्तस्याराज्ञीविस्मयमागता ॥ किमिदंभाषसेसाध्विकथेमवंभविष्य
ति ॥ ५८ ॥ परीक्षांकारयिष्यामिकिंचित्कालंप्रतीक्ष्यच ॥ इतिश्रुत्वावचस्तस्याराज्ञीविस्मयमागता ॥ ५९ ॥ पद्मावत्यपितांरा
ज्ञींसमाभाष्यगृहंययौ ॥ अथैकस्मिन्दिनेराजाद्रष्टुंश्रीपुरुषोत्तमम् ॥ ६० ॥ जगामजयदेवंतंपुरस्कृत्यातिभक्तितः ॥ उवासतत्रतां
रात्रिंजयदेवेनसंगतः ॥ ६१ ॥ अथप्रभातेसंजातेयावद्राजानचागतः ॥ तावदेवतुसाराज्ञीकविपत्नींसमाह्वयत् ॥ ६२ ॥ पद्मावती
समायाताराज्ञींप्राहकरोमिकिम् ॥ तांदृष्ट्वाराजपत्नीसारुरोदाहचविह्वला ॥ ६३ ॥ राजासहकविस्तत्रदेवंद्रष्टुंगतःकिल ॥ तत्रकस्मा
द्विनादुःखंपतिस्तेदेहमत्यजत् ॥ ६४ ॥ तद्दुःखवशगोराजानायातिस्वगृहंपुनः ॥ अमीसमागताभृत्याःकथयंतीदमप्रियम् ॥ ६५ ॥
इतिश्रुत्वावचस्तस्याराज्ञ्याःपद्मावतीसती ॥ अहोकिमिदमित्युक्त्वातूष्णींतस्थौक्षणार्धतः ॥ ६६ ॥ निपपातपृथिव्यांसागतासु
रभवत्तदा ॥ अथराज्ञीसमागत्यहाहाकारंमुहुर्मुहुः ॥ ६७ ॥ कुर्वतीस्वयमेवार्तातामुत्थायपतिव्रता ॥ नोत्तस्थौतांमृतां
ज्ञात्वाराज्ञीशोकसमाकुला ॥ ६८ ॥ भयार्ताविललापाथगर्हयंतीनिजांक्रियाम् ॥ अथतत्रगताःसर्वेराजदाराःसमंततः ॥
॥ ६९ ॥ चुक्रुशुःशोकसंतप्ताःकिंजातमितिचाब्रुवन् ॥ अथराजापिकविनासमायातोतिविस्मितः ॥ ७० ॥ श्रुत्वाकोला
हलंशीघ्रंययावंतःपुरंस्वयम् ॥ जयदेवेनसार्द्धंचतत्रगत्वाददर्शह ॥ ७१ ॥ पद्मावतींमृतांभूमौराजात्वाहप्रियांप्रति ॥ किंजातमस्या
येनेयंमृताकस्मात्कविप्रिया ॥ ७२ ॥ श्रुत्वाराज्ञीनृपवचोभीताप्राहकृतांजलिः ॥ ममदुश्चरितंनाथक्षम्यतांकथयामिते ॥ ७३ ॥
तवभ्रातामृतःपूर्वंतत्पत्नीसातमन्वगात् ॥ तांदृष्ट्वाप्राहमामेषाकोयंपाखंडइत्यहो ॥ ७४ ॥ मृतेपत्यौतत्क्षणात्तुभस्मसादभवन्नया ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तस्यावृथात्रतंप्रीतिरित्येवंममनिश्चयः ॥ ७५ ॥ इतिश्रुत्वावचस्तस्याश्चिकीर्षंतीपरीक्षणम् ॥ अवदंतेपतिःसाध्विमृतोकस्मादिति श्रुतम् ॥ ७६ ॥ तच्छ्रुत्वैवपपातोर्व्यांमृतातत्क्षणमेवहि ॥ इदानींत्वमिहायातःकविनासहसंगतः ॥ ७७ ॥ अतःपरंयत्कर्तव्यंत त्कुरुष्वममप्रभो ॥ इतिश्रुत्वावचस्तस्याराजाप्राहातिविस्मितः ॥ ७८ ॥ वृथेयंघातितादेवित्वयापद्मावतीसती ॥ निवर्त्स्यतिक थंगेहेजयदेवोऽनयाविना ॥ ७९ ॥ अतस्त्यक्ष्याम्यहमपित्वांयथेच्छंव्रजाधुना ॥ घातनेस्त्रीवधोमेस्यादवध्याहिस्त्रियोनृणाम् ॥८० ॥ इतिराजवचःश्रुत्वाजयदेवोब्रवीद्वचः ॥ राजन्ननपराधेयंमहिषीतवसुव्रता ॥ ८१ ॥ नत्यागमर्हत्येषावैनैवंब्रूहिममाग्रतः ॥ कौतुके नमृषावाक्यंभवत्येवनसंशयः ॥ ८२ ॥ वाङ्मात्रेणनतत्रास्तिपातकंकस्यचिन्नृप ॥ किंचक्षणंजगन्नाथंस्मरत्वंसुमनाभव ॥ ८३ ॥ भजेहमपितंदेवंकल्याणंसकरिष्यति ॥ इत्युक्त्वाजयदेवस्तुवाद्यमादायसर्वशः ॥ ८४ ॥ प्रियेचार्वीतियत्स्वोक्तंगीतंतत्परमानसः ॥ जगौततःक्षणादेवपद्मावत्याःकलेवरम् ॥ ८५ ॥ संचचारततःसर्वेविस्मयोत्फुल्ललोचनाः ॥ साधुसाध्वितिचप्रोचुःकंचित्कालंव्यतीत्य सा ॥ ८६ ॥ समुत्थायजगौपत्यासार्द्धंतुपश्यतांनृणाम् ॥ ततोराजाजहर्षाथराज्ञीचापिपुनःसतीम् ॥ ८७ ॥ प्रणनाममुहुर्भक्त्याक्ष म्यतामितिभाषिणी ॥ ततःप्रसन्नःसकविःस्नात्वाभुक्तानृपाज्ञया ॥ ८८ ॥ स्वगृहंप्रययौहृष्टःपद्मावत्यामहोत्सुकः ॥ एवंभगवतो भक्तिर्मृतसंजीविनीनृणाम् ॥ ८९ अद्यापिवर्ततेलोकेनिश्चयोपेक्षितःकिल ॥ ९० ॥ इति श्रीभगवद्भक्तिमाहात्म्येजयदेवचरितंना मचत्वारिंशःसर्गः ॥ ४० ॥ अपरंशृणुवक्ष्यामिकवेःसुचरितंमहत् ॥ जयदेवसमःसाधुर्नभूतोनभविष्यति ॥ १ ॥ सर्वभूतसुहृ ल्लोकेसममात्मसमंपुनः ॥ पश्चात्प्रारब्धभोगस्तुमनुतेकर्म्मबंधनम् ॥ २ ॥ एकदासाक्वचिद्ग्रामेनिमंत्रणवशाद्गतः ॥ तत्रसंमा

प्रियेचारुशीले १८१

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नितःशिष्यैर्वस्त्रालंकरणादिभिः ॥ ३ ॥ भोजयित्वासुवर्णानिदत्त्वाप्रातर्विसर्जितः ॥ आगच्छद्विपिनेमार्गेचिंतयन्पुरुषोत्त मम् ॥ ४ ॥ ततःखड्गधरास्तत्रलुण्ठकाःसमुपागताः ॥ चत्वारोनिर्दयास्तीव्राःकालांतकयमोपमाः ॥ ५ ॥ तान्दृष्ट्वाजयदे वस्तुधनलोभाज्जिघांसतः ॥ उपायमकरोत्तत्रप्राणत्राणायकेवलम् ॥ ६ ॥ तानुवाचकविःप्रेम्णावत्सायूयंक्वगच्छथ ॥ पुरुषो त्तमपुरींयामइत्युक्तस्तैःपुनःसतु ॥ ७ ॥ उवाचतान्मधुरयावाचाभद्रमभूदिह ॥ मयापितत्रगंतव्यंभवद्भिःसाकमेवाहि ॥ ८ ॥ परंतुवृद्धएकाकीगृहीत्वैतद्धनानिभो ॥ गंतुंनशक्तोयूयंचेद्धनमेतत्प्रगृह्यच ॥ ९ ॥ गच्छताग्रमयासार्द्धंतदामेगमनंभवेत् ॥ इत्यु क्त्वातानिवस्त्राणिसुवर्णानिचसर्वशः ॥ १० ॥ तेभ्योदत्त्वासुखंमेनेप्राणत्राणंमुदान्वितः ॥ शनैःशनैस्ततःपश्चात्ततःसोप्यगमत्क विः ॥ ११ ॥ गृहीत्वैतानिवस्तूनिसुखंगच्छत्वमीपुनः ॥ यास्यामिस्वगृहंदेवान्महारिष्टाद्विमोचितः ॥ १२ ॥ अन्यथामाममीलोभा द्घातयेयुर्नसंशयः ॥ इत्येवंचिंतयंतंतंजयदेवंशनैःशनैः ॥ १३ ॥ गच्छंतंपुरतश्चौरादीर्घनादैःसमाह्वयन् ॥ अहोशीघ्रंसमागच्छगृहा णेदंनिजंधनम् ॥ १४ ॥ त्वंतुगंतुंनशक्तोषिदूरंगंतव्यमास्तिनः ॥ इतिश्रुत्वावचस्तेषांजयदेवोतिशंकितः ॥ १५ ॥ किंकरिष्यंत्यमी त्येतांश्चिंतयन्पथि ॥ तावत्तेमंत्रयामासुरयंधूर्तोस्तिवैद्विजः ॥ १६ ॥ अस्माभिरेववस्तूनिप्रापयिष्यातिनःपुनः ॥ घातयिष्य तिगत्वायंस्वग्रामेनात्रसंशयः ॥ १७ ॥ तस्मादेनंनिहत्याथगमिष्यामोनचान्यथा ॥ एवंकेनचिदुक्तेनतन्मध्येकोप्यभाषत ॥ १८ ॥ अहोकिंमरणेनास्यबद्ध्वासंस्थाप्यतांक्वचित् ॥ इत्युक्त्वाजयदेवंतुगृहीत्वातेतिनिर्दयाः ॥ १९ ॥ हस्तौपादौतथैकत्रबद्ध्वाचिक्षिपुरन्य तः ॥ पुनस्तन्मध्यतःकोपिमहादुष्टोतिनिर्दयः ॥ २० ॥ खड्गेनपाणिपादंतद्बद्धंचिच्छेदयत्नतः ॥ ततस्तेगंतुमनसश्चौराजग्मुर्यदृच्छ

मार्गत:

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या ॥ २१ ॥ जयदेवोपिप्रारब्धभोगोयमित्यमन्यत ॥ चिंतयानोजगन्नाथंतत्रारण्येक्षुधार्दितः ॥ २२ ॥ अथतत्रेत्यनृपतिर्मृगयांपर्यटन्वने ॥ एकाकीहयमारूढोधावंतंमृगमन्वगात् ॥२३॥ राजातत्राजगामाथजयदेवसमीपगम् ॥ मृगंदृष्ट्वानविव्याधजयदेवेनशंकितः ॥२४॥ आरोप्यशिबिकायांतमानिनायनिजंपुरम् ॥ तत्रपद्मावतींसाध्वीमानाय्यनृपतिस्तदा ॥ २५ ॥ सेवयामाससवैश्वजयदेवंनृपोत्तमः ॥ ततोराजाप्रतिदिनंजयदेवदिदृक्षया ॥ २६ ॥ जगामतद्गृहंतस्यतदातिथ्यंचकारसः ॥ एवंगतेषुकालेषुकियत्सुचततःकविः ॥ २७ ॥ समाजग्मुस्तुतेचौरामुद्रामात्रविभूषिताः ॥ साधुवेषधरास्तेतमुपकारंदिदृक्षवः ॥ २८ ॥ आगच्छंतोभगवतोगृहमायांत्यसंशयम् ॥ पद्मावतींसमाहूयपाद्याद्यैस्तान्द्विपूजयत् ॥ २९ ॥ ततस्तान्भोजयित्वातमाजुहावनृपंकविः ॥ राजातत्रागतस्तंचजयदेवोभ्यभाषत ॥ ॥ ३० ॥ पुरस्कृत्यचतान्दुष्टानदुष्टेनांतरात्मना ॥ राजन्नेतेगुरुसमामहांतःशास्त्रपारगाः ॥ ३१ ॥ एतेभ्योदेहिवित्तानिपात्रमेतेनसंशयः ॥ इतिश्रुत्वाततोराजारत्नानिविविधानिच ॥ ३२ ॥ वस्त्राण्याभरणादीनिददौपरमभक्तितः ॥ गृहीत्वातद्धनंतेवैयथेष्टंगंतुमुद्यताः ॥ ३३ ॥ तदाप्राहनृपंभूयोजयदेवोतिहर्षितः ॥ अहोमार्गेकियद्दुरंवनमत्यंतभीषणम् ॥ ३४ ॥ तस्यसंतरणार्थायभृत्यंतेभ्योनियोजय ॥ वनाद्बहिरिमान्कृत्वापुनरायातुमेन्तिकम् ॥ ३५ ॥ इतिश्रुत्वाततोराजापदातीन्पंचतान्प्रति ॥ नियोजयामासतदातेजग्मुस्तैःसहाद्भुतम् ॥ ३६ ॥ ततोसर्वनगास्तेतुतरुच्छायामुपाश्रिताः ॥ राजभृत्याःकथाशेषेतानूचुश्चविनीतवत् ॥ ३७ ॥ अहोकवेर्भवंतःकेतद्ब्रूतकृपयासुदा ॥ युष्मदर्थंतुभक्त्यायद्राजानंप्रार्थयत्कविः ॥ ३८ ॥ दापयामासरत्नानिविविधानिधनानिच ॥ नैतादृशंकस्यचिद्वैसत्कारमकरोत्कविः ॥ ३९ ॥ इतिश्रुत्वावचस्तस्यराजभृत्यस्यतेखलाः ॥ ऊचुःप्रशस्यतेसर्वेशृणुकारणमत्रभो ॥ ४० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कर्नाटराजनिकटेवयंभिक्षाशिनःस्थिताः ॥ तत्रायमपिचायातोधनार्थीकाव्यकृद्द्विजः ॥ ४१ ॥ तथैकस्यगृहेचौर्य्यंचकारायंद्विजा
धमः ॥ धनिकेनगृहीत्वाथप्रापितोराजसन्निधौ ॥ ४२ ॥ राजानंप्राहधनिकोनायंविप्रकुलोद्भवः ॥ चौरोयंनित्यचौर्य्येणकदापिप
तितःप्रभो ॥ ४३ ॥ इदानींमद्गृहेभृत्यैर्धृत्वानीतस्तवांतिके ॥ इतिश्रुत्वाततोराजाचांडालायसमर्पयत् ॥ ४४ ॥ गृहीत्वेमंदु
रात्मानंममराज्याद्बहिष्कुरु ॥ अन्यराज्येतुप्रापय्यजहिखड्गेनपापिनम् ॥ ४५ ॥ इत्याज्ञांशिरसाधृत्वाचांडालस्तंप्रगृह्यच ॥ ग
च्छंश्चप्रार्थितोभूयोद्रव्येणापिवशीकृतः ॥ ४६ ॥ अस्माभिरुक्तोनायंभोवध्योयुष्माभिरेवच ॥ देशांतरमवश्यंतुप्रापयित्वांगुलिद्व
यम् ॥ ४७ ॥ छित्त्वायांतुनृपद्वारंप्रत्ययार्थंप्रदश्यताम् ॥ इत्येतदुक्तंस्वीकृत्यनीत्वातंराज्यतोबहिः ॥ ४८ ॥ अत्रराज्येवनेक्वापि
छित्त्वातत्पाणिपादकम् ॥ राज्ञेप्रदर्शजामासुरितियातंपुरास्मभो ॥ ४९ ॥ ततोस्मानर्चयामासराज्ञःस्मृत्वात्मरक्षणम् ॥ इतितेषां
कथयतांतुमुलःखेऽभवध्वनिः ॥ ५० ॥ संपपाताशानिर्घोरंतेषांमूर्द्धसुतत्क्षणात् ॥ ततस्तेराजभृत्यास्तुदृष्ट्वातन्महदद्भुतम् ॥ ५१ ॥
क्षणात्तूष्णींस्थिताःसर्वेसंज्ञांसंप्राप्यतेपुनः ॥ तत्रश्रुत्वानृपंयातंजयदेवस्यमंदिरे ॥ ५२ ॥ तत्रैवतेगताःसर्वेगृहीत्वाधनसंचयम् ॥ रा
जानंप्रणिपत्योचुस्तेबद्धकरसंपुटाः ॥ ५३ ॥ राजंस्तेसाधवोऽरण्येमृतावज्रावघाततः ॥ वस्त्रादिकंगृहीत्वातुवयमेवसमागताः॥ ५४ ॥
इतिश्रुत्वाततोराजाकिंजातमितिचाब्रवीत् ॥ ततस्तेनिजप्रश्नादिवज्रपातांतमब्रुवन् ॥ ५५ ॥ श्रुत्वातुजयदेवस्तुहाहाकृत्वामुहुर्मु
हुः ॥ रुरोदपद्भ्यांहस्ताभ्यांछिन्नाभ्यांताडयन्महीम् ॥ ५६ ॥ तत्क्षणाज्जयदेवस्यपाणिपादंतुपूर्ववत् ॥ प्रादुर्बभूवसर्वेषांपश्यतांनात्रसंश
यः ॥ ५७ ॥ असतांतादृशानांतुमृत्युंश्रुत्वातुदुःखितः ॥ रुरोदच्छद्मनातस्मात्तुतोषपुरुषोत्तमः ॥ ५८ ॥ ददौहस्तौचपादौच ॥ ६१ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

किमाश्चर्यमिदंहरेः ॥ अथराजातिचिंतातोंजयदेवंप्रणम्यच ॥ ५९ ॥ पप्रच्छकिमिदंचित्रंब्रूहिमत्कृपयाद्विज ॥ उवाचजयदेवस्तं
वृत्तांतंपूर्वतःस्वकम् ॥ ६० ॥ चौराणांचयथातत्त्वंततोराजाप्रमोदह ॥ तुष्टावजयदेवंतंधन्योसित्वत्समोनवै ॥ ६१ ॥ दृष्टःश्रु
तोवालोकेस्मिन्मित्रशत्रुसमःपुमान् ॥ धन्योहमितिनीचोपित्वत्संसर्गान्नसंशयः ॥ ६२ ॥ इत्यादिवचसाराजास्तुत्वागत्यस्वमंदिरम् ॥
आश्चर्यपुत्रदारेभ्योमंत्रिभ्यःप्रोक्तवान्स्वयम् ॥ ६३ ॥ अथकालेनकियताजयदेवोजरांगतः ॥ तथापिनित्यकर्मादिनतत्याजकदा
चन ॥ ६४ ॥ गंगास्नानव्रतंतस्यानित्यसंकल्पितंपुरा ॥ एकदाकृतशौचादिश्चलितोजाह्नवीतटम् ॥ ६५ ॥ स्नानमार्गेजराक्रांतोवि
शश्रामक्वचित्क्वचित् ॥ गत्वाकथंचिद्गङ्गायांस्नात्वापीत्वाजलंपुनः ॥६६॥ आगच्छन्पथिवश्रामानिपपातसमूर्च्छंच ॥ ततस्तेपथिका
स्सर्वेसिषिंचुस्तंचवाससा ॥६७॥ छायांचक्रुस्ततोराजास्नात्वातत्राजगामह ॥ दृष्ट्वातंजयदेवंतुतामवस्थामुपागतम् ॥६८॥ आरोप्य
शिबिकायांतुप्रापयामाससमंदिरम् ॥ स्वयमागत्यचपुनःकृतांजलिरुवाचतम् ॥ ६९ ॥ अहोजीर्णतरंचेदंशरीरंतेमहामते ॥ मयाहिपाद
चारेणस्नातुमद्यागतंपुनः ॥ ७० ॥ ददामिशिबिकांतुभ्यंकुरुष्वममभाषितम् ॥ इतिश्रुत्वातुराजानंजयदेवउवाचसः ॥ ७१ ॥ म
मैवशिबिकाराजन्संरक्षभवनेऽधुना ॥ पादाभ्यामेवगत्वाहंस्नास्यामीतिव्रतंमम ॥ ७२ ॥ यथाशक्तिस्ततोयामिमाकुरुष्वाग्रहंपुनः ॥
इतिश्रुत्वाततोराजाजगामभवनंस्वकम् ॥ ७३ ॥ संपूज्यदेवतांभुक्त्वाराजकार्य्यपरोभवत् ॥ अथतस्यांतुरात्र्यांवैराजमान्यःपु
रोहितः ॥ ७४ ॥ राजादृतामहांतोयेतत्रग्रामेद्विजाःस्थिताः ॥ तेसर्वेददृशुःस्वप्नेजयदेवोपिचाद्भुतम् ॥ ७५ ॥ शुक्लांबरधराकाचि
च्छुक्लामकरवाहना ॥ पद्महस्तारविंदाक्षीसमागत्याब्रवीदिदम् ॥ ७६ ॥ अहंभागीरथीदेवीप्रातरादिनिरंतरम् ॥ जयदेवस्यवा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्यांवैनिवसिष्याम्यसंशयम् ॥ ७७ ॥ जानीहिप्रत्ययंतत्रपद्ममेतन्मयासह ॥ आविर्भविष्यतिजलेद्रष्टव्यंभवतापुनः ॥ ७८ ॥
अयंतुजयदेवोमेभक्तोतीवप्रियःसदा ॥ नैतस्यव्रतभंगोस्तिवाप्यांस्नानंकरोत्वयम् ॥ ७९ ॥ त्वयापिबोधनीयःसनान्यथाममभा
षितम् ॥ किंचान्यंप्रत्ययंतत्रप्रोच्यतेतन्निशामय ॥ ८० ॥ जयदेवेनसार्द्धंतुगलत्कुष्ठोपितत्रचेत् ॥ कुष्ठरोगात्प्रमुच्येतस्नातःसप्त
दिनादपि ॥ ८१ ॥ एवंस्वप्नंप्रपश्यंतःप्रबुद्धास्तेसमागताः ॥ एकाग्रेस्वप्नमूचुर्वैकथांकृत्वापरस्परम् ॥ ८२ ॥ नृपोऽमात्यैश्चग्रामवृ
द्धैर्जयदेवस्यमंदिरम् ॥ समागत्याब्रवीत्सर्वंजयदेवायभूपतिः ॥ ८३ ॥ श्रुत्वातज्जयदेवस्तुनिजस्वप्नंस्मरन्हृदि ॥ नृपादीन्प्राहध
न्यावैभवंतोनात्रसंशयः ॥ ८४ ॥ यैर्दृष्टाजाह्नवीदेवीस्वप्नेश्रीरिवरूपिणी ॥ किमाश्चर्य्यंभवद्भिर्यद्दृष्टंस्वप्नेतिदुर्लभम् ॥ ८५ ॥
जगन्मान्याजगन्माताजगदुद्धारकारिणी ॥ आगमिष्यतिवाप्यांसासत्यमेतन्नसंशयः ॥ ८६ ॥ इत्युक्त्वानृपतिस्तूष्णींसामात्यः
सपुरोहितः ॥ सदारस्तत्रस्नानीयंगृहीत्वासमुपापयौ ॥ ८७ ॥ जयदेवोपिपूजार्थमर्घादीन्परिकल्प्यच ॥ जगामतत्रवाप्यांतुस्नातुं
पद्मावतीयुतः ॥ ८८ ॥ तत्रवापीसमीपेतुगत्वातेतुनृपादयः ॥ जयदेवंपुरस्कृत्यसर्वेतत्रावतस्थिरे ॥ ८९ ॥ जयदेवोथस्ना
नीयंमंत्रंभक्त्यापठञ्जले ॥ प्रविवेशतदागंगातत्रप्रादुर्बभूवह ॥ ९० ॥ ऊर्मितंतज्जलंजातंदुग्धकुंदेंदुनिर्मलम् ॥ तादृशीःसिकता
जातायथागंगासरित्स्थिता ॥ ९१ ॥ प्रादुर्बभूवपद्मंतज्जलेदृष्ट्वातिहर्षिताः ॥ राजाचजयदेवश्चतथान्येयेसमागताः ॥ ९२ ॥ तुष्टु
वुस्तांजनास्तत्रगंगांत्रिपथगामिनीम् ॥ जयदेवोपिहर्षाश्रुपरिक्लिन्नदृगंबुजः ॥ ९३ ॥ स्नात्वापाद्यादिभिश्चैवपूजयामासभक्तितः ॥
तस्मिन्सप्तदिनंतत्रदिव्यदेहीबभूवसः ॥ ९४ ॥ एवमन्येपियेतत्रयंयंकृत्वामनोरथम् ॥ स्नानपूजादिकंचक्रुरापुस्तेखिलमी

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्सितम् ॥ ९५ ॥ इत्येतज्जयदेवस्यमाहात्म्यंकथितंमया ॥ यःपठेच्छृणुयाद्वेतत्तस्यभक्तिर्दृढाभवेत् ॥ ९६ ॥ कामीकामानवाप्येत जगन्नाथप्रसादतः ॥ उत्तमांगतिमाप्नोतिदुर्लभामपियोगिनाम् ॥ ९७ ॥ इति श्रीभगवद्भक्तिमाहात्म्येजयदेवचरितंनामैकचत्वारिं शःसर्गः ॥ ४१ ॥ छ ॥ ॥ अथातःश्रीधरस्वामिभक्तिमाहात्म्यमुत्तमम् ॥ विष्णुभक्तिप्रदंनॄणांकथयामियथाश्रुतम् ॥ १ ॥ आसीद्विप्रोमहातेजावेदवेदांगपारगः ॥ शांतोदांतोदयायुक्तःसर्वशास्त्रार्थकोविदः ॥ २ ॥ विधिनासद्विजःश्रेष्ठःकृत्वादारपरिग्रहम् ॥ अग्निमादायविधिवदग्निहोत्रपरायणः ॥ ३ ॥ उत्पादयामाससुतानात्मतुल्यगुणानथ ॥ बभूवभोगाद्विरतोवृद्धःकाशीमवाप्यसः ॥ ४ ॥ संन्यासंविधिवद्दंडीक्षांतोजग्राहसद्विजः ॥ सएवश्रीधरस्वामीत्येवंलोकेतिविश्रुतः ॥ ५ ॥ तत्राप्यध्यापनरतोविष्णुभक्तिपरायणः ॥ अयाचिताशीसंतुष्टःपश्यन्विष्णुमयंजगत् ॥ ६ ॥ श्रीमद्भागवतंस्वामीददर्शैकदिनेशुभम् ॥ दृष्ट्वातद्विष्णुमाहात्म्यमद्भुतंव्यासभाषितम् ॥ ७ ॥ सर्वशास्त्रमयंक्लिष्टंदुर्बोधंपंडितैरपि ॥ संसारसागरोत्तारेपोतोयंदृश्यतेकिल ॥ ८ ॥ दुर्बोधत्वाच्चविद्वद्भिःसेव्यतेनयदृच्छया ॥ अतोव्याख्यांकरिष्येऽस्यप्रसीदेच्चेद्धरिर्मम ॥ ९ ॥ इत्येवंचिंतयानःसनान्यत्किंचित्प्रपश्यति ॥ तन्मनास्तद्गतप्राणोनलेभेतुसुखंक्वचित् ॥ १० ॥ एकदारात्रिशेषेतुस्वप्नेश्रीबिंदुमाधवम् ॥ ददर्शभाषमाणंतुकुरुव्याख्यानमस्यमे ॥ ११ ॥ माहात्म्यमस्तितत्सत्यंप्रकटीकुरुयत्नतः ॥ त्वदुक्तंनानृतंकिंचिद्भविष्यतिकदाचन ॥ १२ ॥ यावन्मन्नामलोकेस्मिंस्तावत्स्थास्यतितेयशः ॥ दृष्ट्वासश्रीधरस्वामीप्रबुद्धोतिजहर्षच ॥ १३ ॥ तस्मिन्नेवक्षणेस्वामीनिबबंधचमंगलम् ॥ तदादिप्रातरारभ्यकृत्वानित्यविधिंपुनः ॥ १४ ॥ अहर्निशंनिर्ममेतांव्याख्यांभागवतींशुभाम् ॥ निर्विघ्नमभवत्पूर्णंव्याख्यानंचास्यवैतदा ॥ १५ ॥ तदाकाशिनिवा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सिभ्योविद्वद्भ्योपिविलिख्यसः ॥ पुस्तकंप्रेषयामासकीदृग्जातमितिब्रुवन् ॥ १६ ॥ तेप्रशशंसुःकतिचिद्दृष्ट्वातत्पुस्तकंजनाः ॥ कोचि
दीर्षापरास्तत्रनिनिंदुर्दुर्जनाःपुनः ॥ १७ ॥ स्वयमारेभिरेटीकांकर्तुंभागवतस्यच ॥ निर्मायसकलांटीकांतेसर्वेदुष्टमानसाः ॥ १८ ॥
प्रख्यापयंतोनिंदंतःश्रीधरस्वामिनिर्मिताम् ॥ एकस्मिन्दिवसेतत्रबिंदुमाधवसन्निधौ ॥ १९ ॥ सभायांपंडिताःसर्वेगृहीत्वास्वस्व
पुस्तकम् ॥ संस्थाप्योचुरहोसर्वेस्वंस्वंनिर्मितपुस्तकम् ॥ २० ॥ बिंदुमाधवपादाब्जादधस्तात्स्थाप्यतांकिल ॥ बहिरेत्यक्षणं
स्थित्वाप्रार्थयित्वाचमाधवम् ॥ २१ ॥ पुनर्गत्वाचपश्यामोयांटीकांतत्पदांबुजे ॥ संस्थापितांप्रपश्यामस्तांसत्कुर्मोनसंश
यः ॥ २२ ॥ इत्थेवंमंत्रयानास्तेश्रीधरस्वामिसन्निधौ ॥ जगामचैकस्तन्मध्येप्राहतस्मैचिकीर्षितम् ॥ २३ ॥ तच्छ्रुत्वा
श्रीधरस्वामीददौस्वकृतपुस्तकम् ॥ गृहाणेदंममकृतंनागंतव्यंमयाद्विज ॥ २४ ॥ भवतांकृतिरेवास्तुसमीचीनेतिमेम
तिः ॥ ममैवसम्यगित्येवंनाग्रहोमयिवर्तते ॥ २५ ॥ इतिश्रुत्वातदाविप्रोगृहीत्वास्वामिनिर्मिताम् ॥ टीकांसभायामायातः
प्राहस्वामिवचश्चतान् ॥ २६ ॥ ततस्तेपुस्तकंसर्वेबिंदुमाधवपादतः ॥ अधस्तात्स्थापयामासुःसंप्रार्थ्यैवंपरस्परम् ॥ २७ ॥ बिंदु
माधवदेवेशभक्तानुग्रहविग्रह ॥ एतेषांपुस्तकानांतुमध्येयत्तेप्रियंविभो ॥ २८ ॥ सद्व्याख्यानमभूत्तत्त्वंस्वपादेस्थापयप्रभो ॥ सर्वेषा
मुपरिष्टात्तुस्थापितंस्यान्नसंशयः ॥ २९ ॥ एवंसंप्रार्थ्यपादाधःसंस्थाप्यसर्वपुस्तकम् ॥ बहिरेत्यक्षणंस्थित्वापुनर्गत्वाथमंदिरम् ॥ ३० ॥
ददृशुःश्रीधरस्वामिनिर्मितांतत्पदाब्जयोः ॥ उपरिस्थापितंसर्वेप्रशशंसुःपरस्परम् ॥ ३१ ॥ शिरसास्वामिरचितांटीकांनत्वाथतेजनाः ॥
स्तुवंतःस्वामिभवनंगत्वोचुःसर्वमादितः ॥ ३२ ॥ श्रुत्वास्वामीतुतद्वाक्यंमात्सर्यरहितोब्रवीत् ॥ यथेष्टंभवतामस्तुनाग्रहोमेऽत्रवर्त

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ते ॥ ३३ ॥ इतिश्रुत्वातुतेसर्वेंगत्वास्वंस्वंचमंदिरम् ॥ श्रीधरस्वामिभक्तिंतेचक्रुर्वैमनसागिरा ॥ ३४ ॥ एवंभक्तवशोद्यापिभगवान्भ
क्तवत्सलः ॥ प्रख्यापयतिलोकेस्मिन्भक्तिमाहात्म्ययंत्रितः ॥ ३५ ॥ अथापरंतुतस्यैवश्रीधरस्वामिनःशुभम् ॥ माहात्म्यंशृणुवक्ष्या
मिमहाश्चर्यंतदुत्तमम् ॥ ३६ ॥ एकदाश्रीधरस्वामीज्वररोगेणपीडितः ॥ उपवासपरोभूत्वाक्षुत्पिपासाविवर्जितः ॥ ३७ ॥ विद्याशि
ष्यस्तुतस्यैकोब्राह्मणोमाधवाह्वयः॥परिचर्यापरोनित्यंगुरुभक्तिपरायणः॥३८॥ सम्यक्सेवांचकारास्यपादसंवाहनादिभिः ॥ अहोरात्रं
ना तुतत्रैवनिवसन्गुरुसन्निधौ ॥ ३९ ॥ तदाज्ञांशिरसाधृत्वाचकारसुमहात्मनः ॥ पंचरात्रंगतंतस्यनिराहारस्यस्वामिनः ॥४० ॥ षष्ठेऽह
निनिशाभागेमाधवस्यापिसोद्विजः ॥ वृद्धोज्वरातुरःसोपिनिराहारःकृशस्तदा ॥ ४१ ॥ मूर्च्छामवापमहतींज्वरदाहेनदारुणाम् ॥ तंह
ष्ट्वामूर्च्छितंमातामाधवस्यतपस्विनी ॥ ४२ ॥ रुरोदोच्चैर्जुहावाथपुत्रंतंमाधवंसती ॥ श्रुत्वातज्जननीवाक्यंमाधवोऽतीवदुःखितः ॥४३ ॥
श्रीधरस्वामिनंभक्त्याप्रणिपत्येदमब्रवीत्॥ स्वामिन्पितामेरोगार्तोमूर्च्छांप्राप्नोतिसांप्रतम्॥४४॥ मातामेरुदतीदीनामामाह्वयतिदुःखि
ता ॥ त्वामप्येतस्यहृदयंपश्याम्यन्योऽथवाभवे ॥ ४५ ॥ स्थातुंगंतुंनशक्नोमितदाज्ञापयमेप्रभो ॥ इतिश्रुत्वावचस्तस्यमाधवस्या
तिदुःखितः ॥ ४६ ॥ उवाचश्रीधरस्वामीवत्सगच्छाधुनैवभो ॥ मदपेक्षयातिविकलःपितातेमूर्च्छितोगृहे ॥ ४७ ॥ रुदतीतवमाता
सात्वामाह्वयतिसुव्रत ॥ गच्छेतिबहुधातेनप्रेषितोमाधवोययौ॥४८॥ दृष्ट्वातुपितरंगेहेमूर्च्छितंगतचेतनम् ॥ रुदन्नुपचचाराथतत्रसामा
जिकाजनाः ॥ ४९ ॥ समागत्योपचेरुस्तेजहौमूर्च्छांततोद्विजः ॥ अथतत्रैवसमयेभग्नःस्वामिज्वरोमहान् ॥ ५० ॥ बुभुक्षातीवसंलग्ना
बलहानिकरीपरा ॥ शशाकगंतुंनोत्थायक्षुधयातीवपीडितः ॥ ५१ ॥ मनसाचिंतयामासलभेपात्रंकथंत्वहम् ॥ एवंचिंतयमानस्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्वामिनोमंदिरेतदा ॥ ५२ ॥ माधवस्यैवरूपेणबिंदुमाधवआययौ ॥ तंदृष्ट्वाश्रीधरस्वामीप्राहकोसीतिचासकृत् ॥ ५३ ॥
तच्छुत्वास्वामिनोवाक्यंप्राहमाधवरूपधृक् ॥ शिष्यस्तेमाधवोहंभोअयंतेकुशलीपिता ॥ ५४ ॥ इत्युवाचतदास्वामीततःसमा
धवोब्रवीत् ॥ कुशलीमेपितास्वामिंत्वत्प्रसादान्नसंशयः ॥ ५५ ॥ भवान्ब्रवीतुकिंचात्रकर्तव्यंप्रकरोम्यहम् ॥ श्रुत्वातुश्रीधर
स्वामीप्रोवाचाहंक्षुधातुरः ॥ ५६ ॥ वत्सान्नंदेहिमेनोचेत्प्राणांस्त्यक्ष्याम्यसंशयम् ॥ श्रुत्वैतत्स्वामिवचनंशीघ्रंकृत्रिममाधवः ॥ ५७ ॥
इच्छाम्यान्नंक्षुधातुल्यंसंपाद्यामलभोजनम् ॥ स्वामिसन्निधिमागत्यभोजयामासयत्नतः ॥ ५८ ॥ यथेष्टंभोजयित्वातंतथोच्छिष्टादि
कंपुनः ॥ संमार्ज्यस्वामिनिकटेतस्थौकृत्रिममाधवः ॥ ५९ ॥ अथतस्मिन्क्षणेशिष्योमाधवःसमुपाययौ ॥ जपागारेतदास्वामी
नमस्कृत्यसमाधवः ॥ ६० ॥ उवाचस्वामिनंरात्रौशरीरंकीदृशंस्थितम् ॥ तच्छुत्वाश्रीधरस्वामीप्राहेदंभाषसेकिमु ॥ ६१ ॥ रा
त्रावन्नादिदानेनजीवितोहंत्वयापुनः ॥ किमिदंप्रोच्यतेसर्वमज्ञातमिवसर्वथा ॥ ६२ ॥ इत्युक्तोमाधवःप्राहस्वामिन्नाहंत्वदंतिके ॥
रात्रावागतवानत्रसत्यमेतन्नसंशयः ॥ ६३ ॥ इतिश्रुत्वाततःस्वामीनिश्चिकायस्वमानसे ॥ बिंदुमाधवएवासौममरक्षार्थमागतः ॥६४॥
अन्यथामतिरेवस्याद्रात्रावन्नंभवेन्नचेत् ॥ तदारभ्यततःस्वामीशरीरेणबलेनच ॥ ६५ ॥ पुपोषरोगनिर्मुक्तोविनापथ्यौषधैरपि ॥
माधवोरात्रिवृत्तांतंकाशीवासिजनेषुच ॥६६॥ संश्राव्यस्वामिसेवायांनिरतोभूदहर्निशम् ॥ इत्येवंवंदितंलोकेश्रीधरस्वामिचेष्टितम् ॥
॥ ६७ ॥ श्रुत्वैतत्परमाख्यातंकृष्णेभक्तिंलभेन्नरः॥६८॥ इति श्रीभगवद्भक्तिमाहात्म्येश्रीधरस्वामिचरितंनामद्विचत्वारिंशःसर्गः॥४२॥
अथापरंप्रवक्ष्यामिभक्तमाहात्म्यमुत्तमम् ॥ यच्छुत्वासर्वपापेभ्योमुक्तोभक्तिंलभेन्नरः ॥ १ ॥ कृष्णवेणानदीतीरेदाक्षिणात्यकुलो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्भवः ॥ धनवान्रूपसंपन्नःपित्राबाल्येतिलालितः ॥ २ ॥ अतोसौवेदविद्यायांशास्त्रेनातिकृतश्रमः ॥ पितर्युपरतेविप्रोयथेष्टंतद्ध
नंस्वयम् ॥ ३ ॥ नाटकेभ्योददौनित्यंगीतनृत्यरतोभवत् ॥ अथाचिरेणकालेनशुश्रुवेकस्यचिन्मुखात् ॥ ४ ॥ चिंतामणिरितिख्या
तांवेश्यांसर्वगुणान्विताम् ॥ कृष्णायास्तुपरेपारेनिवसंतीकलावती ॥ ५ ॥ जगामतद्गृहंविप्रोमर्यादांपरिहायसः ॥ निवारितोपिब
हुधाबंधुभिर्ज्ञातिभिस्तथा ॥ ६ ॥ ननिवृत्तोबभूवासौकामीतस्यावशंगतः ॥ चौरयित्वाप्रतिनिशंनदीमुत्तीर्य्यसर्वदा ॥ ७ ॥ जगा
मतद्गृहंविप्रोरेमेसाकंतयापुनः ॥ एवंगतेषुकालेषुबिल्वमंगलशर्म्मणः ॥ ८ ॥ पितुःक्षयाहःसंप्राप्तःस्मृत्वातामब्रवीद्द्विजः ॥ अ
येप्राणप्रियेद्यैवपितुःश्राद्धदिनंमम ॥ ९ ॥ अतोयामिनचाद्याहमागमिष्यामितेऽतिकम् ॥ इतिमेसुमहद्दुःखंमरणादतिरिच्यते ॥ १० ॥
गच्छेत्युक्तस्तयाविप्रोजगामनिजमंदिरम् ॥ आमंत्र्यब्राह्मणान्विप्रश्चकारश्राद्धकर्मसः ॥ ११ ॥ भोजयित्वाद्विजान्सम्यक्शेषान्नंबु
भुजेस्वयम् ॥ चिंतामणिंस्मरन्नित्यंकथंचित्सादिनंद्विजः ॥ १२ ॥ संध्यामुपासितुंकृष्णातीरेगेहात्समागतः ॥ दृष्ट्वातद्वेश्मसस्मा
रवेश्यांचिंतामणिंद्विजः ॥ १३ ॥ हाप्रियेक्कासिनाद्याहंसास्मितंवीक्षितस्त्वया ॥ कथमेतांतरिष्यामिरात्रिंवर्षशतोपमाम् ॥ १४ ॥
इत्येवंविलपन्भूयोमनसाबिल्वमंगलः ॥ प्रवृद्धांचनदींदृष्ट्वालोकाद्भीतोगृहंययौ ॥ १५ ॥ गत्वाचशयनागारेशय्यायामुपविश्यसः ॥
चिंतयानोनलेभेऽसौनिद्रांब्राह्मणपुंगवः ॥ १६ ॥ चिंतयाजाग्रतस्तस्यनिशार्द्धमगमत्तदा ॥ नशशाकमनोरोद्धुंचिंतामणिगृहंप्रति ॥ १७ ॥
ततउत्थायकामार्तोनदीतीरमुपागतः ॥ महानिशायांघोरायांपर्जन्येप्यतिवर्षति ॥ १८ ॥ पश्यन्प्रवृद्धांकृष्णांतांचिंतयानस्तटे
स्थितः ॥ ददर्शविद्युदुद्योतैःशवमेकंजलेंतिके ॥ १९ ॥ तरंतंवीचिभिस्तंतुपोतोयमित्यमन्यत ॥ मूढःकामेनतंधृत्वासमारुह्यकथंचन ॥

९

CSU-Jaipur Campus Collection

॥ २० ॥ जगामपरपारंसचिंतामणिगृहांतिकम् ॥ तत्रद्वारंददर्शासौकपाटपिहितंदृढम् ॥ २१ ॥ दृष्ट्वाविस्मयमापन्नःकथमंतर्व्रजा
म्यहम् ॥ एतस्मिन्नंतरेतत्रसर्प्पमेकंतुरज्जुवत् ॥ २२ ॥ बिलेमुखंसमादायभित्तौलंबंददर्शह ॥ तंदृष्ट्वालंबमानंतुसर्पंवध्रीधिया
द्विजः ॥ २३ ॥ गृहीत्वाभित्तिमारुह्यविवेशांतर्गृहंद्विजः ॥ तत्रचिंतामणिंदृष्ट्वाचिंतामणिमिवाधनः ॥ २४ ॥ जहर्षचा
गतोहंभोइत्युवाचांतिकंगतः ॥ दृष्ट्वासाहासिकंतंतुचिंतामणिरुवाचह ॥ २५ ॥ अहोमहानिशायांवैपर्ज्जन्येप्यतिवर्षति ॥ प्रवृद्धा
यांमहानद्यांकथमुत्तीर्य्यचागतः ॥ २६ ॥ कपाटपिहितंद्वारंकेनोपायेनचालितम् ॥ इतिश्रुत्वावचस्तस्याबिल्वमंगलआहताम् ॥
॥ २७ ॥ प्रियेद्वारिमहावध्रीभित्तौलग्नास्तितामहम् ॥ गृहीत्वात्रसमायातोनद्यांपोतोधृतोमम ॥ २८ ॥ तमारुह्येहपारंतुसमा
यातःक्षणेनवै ॥ इतिश्रुत्वावचस्तस्यप्राहचिंतामणिर्द्विजम् ॥ २९ ॥ अहोदर्शयमेवध्रींतंपोतंयेनचागतः ॥ इत्युक्तःसतयासार्द्धं
द्वारदेशेसमागतः ॥ ३० ॥ दर्शयामासतंसर्पंप्रियेसैषातुवध्रिका ॥ ततश्चिंतामणिःप्राहमूर्खसर्पोनवध्रिका ॥ ३१ ॥ करता
लादिभिःसाचवहिर्निष्कास्यतंपुनः ॥ प्राहक्वतेसपोतोस्तितंदर्शयममाधुना ॥ ३२ ॥ ततोगृहीत्वातांकृष्णातीरेसबिल्वमंगलः ॥
तंशवंदर्शयामासपोतोयंयेनचागतः ॥ ३३ ॥ तंदृष्ट्वातुशवंवेश्याविप्रंप्राहातिकोपना ॥ नायंपोतःशवःकिंतुत्वंचकामेनमोहितः ॥३४॥
हिताहितंनजानासिदिष्ट्याजीवसिकेवलम् ॥ अहोब्रह्मकुलीनस्त्वंब्राह्मणैःसंस्कृतःपुनः ॥ ३५ ॥ साक्षरोसिनमूर्खस्त्वंमहामूर्खइ
वाधुना ॥ पितृश्राद्धदिनेप्येवंयत्करोषिजुगुप्सितम् ॥ ३६ ॥ काहंवेश्यादुराचाराक्वत्वंब्रह्मकुलोद्भवः ॥ अहोदैवगतिश्चित्रायन्मामे
वमुपागतः ॥ ३७ ॥ धिक्त्वांद्विजाधमंलोकेनिंदितंसाधुबंधुभिः ॥ परित्यज्यनिजंधर्मंयत्कुमार्गरतोस्यलम् ॥ ३८ ॥ अहो

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यथामयिप्रीतिस्तवेयंनिश्चलाद्विज ॥ एवंचेद्भवतिकृष्णेपरमात्मनिकेशवे ॥ ३९ ॥ मतिस्तेयदिसंलग्नातदाधन्योभविष्यसि ॥ किंवृथाममभोगार्थीप्राणापेक्षांसमाचरन् ॥ ४० ॥ किमद्यापिसमायातोमद्गृहंश्राद्धवासरे ॥ पितृश्राद्धदिनेपत्न्यायोद्विजोमैथुनीभवेत् ॥ ४१ ॥ रौरवंनरकंभुक्त्वाजायतेग्रामसूकरः ॥ इत्येवंविप्रवदनाच्छ्रुतंमेद्विजपुंगव ॥ ४२ ॥ त्वंतुसर्वंपरित्यज्यमयारंतुमिहेच्छसि ॥ धिक्त्वामतोद्विजातीनांकलंकोसिनसंशयः ॥ ४३ ॥ त्वयापुत्रेणतेमातापितावानचपुत्रिणौ ॥ इत्येवंभर्त्सितोविप्रःकृष्णातीरेमहानिशि ॥ ४४ ॥ प्रबुबोधतदाविप्रःसंन्यवर्ततदुर्गुणात् ॥ तूष्णींस्थितस्तत्क्षणंप्राहवेश्यांगच्छगृहंप्रति ॥ ४५ ॥ अहंतुरजनीमेतामुषित्वाप्रातरेवहि ॥ यथारुचिगमिष्यामिपरित्यज्यगृहंधनम् ॥ ४६ ॥ इतिश्रुत्वावचस्तस्यवेश्याचिंतामणिःपुनः ॥ बिल्वमंगलमाहेदंतवसाहसदर्शनात् ॥४७॥ मोहादुक्तवतीचास्मिक्षमस्वागच्छमेगृहम् ॥ श्रुत्वैवंवचनंतस्याउवाचबिल्वमंगलः ॥४८॥ अतःपरंनवक्तव्यंकिंचिदेवमपित्वया ॥ ममसद्बुद्धिदानेनश्रीकृष्णस्योपदेशतः ॥ ४९ ॥ गुरुरेवास्तिभवतीमातृतुल्यानसंशयः ॥ प्रणमाम्येवचरणौनकिंचिद्वक्तुमर्हसि ॥ ५० ॥ इत्युक्त्वातांपरित्यज्यययौस्वैरगतिर्द्विजः ॥ अनुवव्राजतंवेश्यातिष्ठतिष्ठेतिचाब्रवीत् ॥ ५१ ॥ नतस्थौचतदाविप्रस्तदावेश्यान्यवर्तत ॥ आजगामगृहंरात्रौचिंतयंतीद्विजंमुहुः ॥ ५२ ॥ ब्राह्मणोपिततोदूरंगत्वातरुतलेक्वचित् ॥ नीत्वारात्रिंपुनःप्रातर्ययौस्वैरगतिर्द्विजः ॥ ५३ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येबिल्वमंगलचरितंनामत्रिचत्वारिंशःसर्गः ॥ ४३ ॥ छ ॥ ॥ चिंतयामासचैकाकीपथिगच्छन्द्विजःसतु ॥ कंयामिशरणंयोमांकथंयास्यामिसद्गतिम् ॥ १ ॥ जन्मारभ्यशुभंकर्मनकृतंक्वचिदप्यहम् ॥ कथंभजामिश्रीकृष्णंसर्वपापहरंहरिम् ॥ २ ॥ एवंचिंतापरोविप्रःपश्चात्तापेनदुःखितः ॥ वृक्ष

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मूलेविशश्रामक्षुत्क्षामःश्रमपीडितः ॥ ३ ॥ ददर्शतत्रस्वपितंपथिसब्राह्मणंद्विजः ॥ सोपितत्रसमागत्यतस्थौविश्रामकांक्षया ॥ ४ ॥
स्थित्वामुहूर्तंपप्रच्छपथिकोबिल्वमंगलम् ॥ कस्त्वंचिंतापरोविप्रकस्मादिहसमागतः ॥ ५ ॥ ब्रह्महत्यामिवपुनःकृत्वाचिंतयसेविभो ॥
इत्युक्तवंतंपथिकंप्राहश्रीबिल्वमंगलः ॥ ६ ॥ जन्मतःसकलंवृत्तंवेश्यावाक्यावधिस्वकम् ॥ पुनःप्राहगुरुंसंतंकंचिदन्वेषया
म्यहम् ॥ ७ ॥ योमेहितोपदेशेनहृत्तापंशमयिष्यति ॥ इतिश्रुत्वावचस्तस्यपथिकःप्राहतंद्विजम् ॥ ८ ॥ बिल्वमंगलमाभैषीः
कृष्णातीरेऽविदूरतः ॥ नाम्नासोमगिरिश्चास्तितपस्वीब्राह्मणान्वयः ॥ ९ ॥ वानप्रस्थेनविधिनावनेतिष्ठतिसंयमी ॥ शांतोदांतोदया
युक्तःसर्वभूतसुहृत्तमः ॥ १० ॥ तमेवशरणंगच्छसतेमंत्रंप्रदास्यति ॥ तन्मंत्रमात्रदानेनकृतार्थस्त्वंभविष्यसि ॥ ११ ॥ इतिश्रुत्वा
वचस्तस्यपथिकस्यमहात्मनः ॥ नमस्कृत्यचतंविप्रंप्रययौबिल्वमंगलः ॥ १२ ॥ यत्रसोमगिरिर्नामतपस्वीतपआस्थितः ॥
तत्रसोमगिरिंदृष्ट्वादंडवत्प्रणिपत्यच ॥ १३ ॥ तस्थौकृतांजलिःश्चाग्रेस्थाणुवद्बिल्वमंगलः ॥ दृष्ट्वाग्रेतंतुतिष्ठंतंप्राहसोमगिरिःस्वयम् ॥
॥ १४ ॥ कोसिकस्मादिहायातःकिमर्थंचात्रतिष्ठसि ॥ कथयाशुनचेन्मांत्वंमुहूर्तंस्थातुमर्हसि ॥ १५ ॥ इत्युक्तःप्रणिपत्याहभक्त्या
श्रीबिल्वमंगलः ॥ जन्मादिवेश्यावाक्यांततःस्वोद्धरणायच ॥ १६ ॥ प्रार्थयित्वाबभूवाथतूष्णींसबिल्वमंगलः ॥ ततःसोमगिरिः
प्राहनिवसात्रगृहेसुखम् ॥ १७ ॥ इदानीमेवतेमंत्रंदास्यामिहितकारकम् ॥ इत्युक्त्वामनसासोमगिरिश्चिंतापरोभवत् ॥ १८ ॥ अ
स्मैकिमुपदेक्ष्यामियेनायंसुकृतीभवेत् ॥ आजन्मपातकीचायंविप्रधर्मबहिर्गतः ॥ १९ ॥ इतिचिंतयमानस्यहृदिसोमगिरेस्तदा ॥
प्रादुर्बभूवतुःश्लोकौकेनाप्युक्ताविति स्फुटम् ॥ २० ॥ कृष्णेतिमंगलंनामयस्यवाचिप्रवर्तते ॥ भस्मीभूतास्तुतस्याशुमहापातकको

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

टयः ॥ २१ ॥ दरिद्रोवारुजार्तोवाग्रहार्तोवापियोनरः ॥ श्रीकृष्णेतिजपन्नामसुखीभवतिनिश्चितम् ॥ २२ ॥ इतिसोमगिरिर्लब्ध्वा मनसाचिंतितंवरम् ॥ सद्योजगामतेजस्वीबिल्वमंगलसन्निधौ ॥ २३ ॥ प्राहागच्छमयासार्द्धंकृष्णातीरेद्विजार्भक ॥ तत्राहंतेप्रदास्यामिमंत्रंसर्वार्थसाधकम् ॥ २४ ॥ तत्रगत्वानदीतीरेस्नात्वासबिल्वमंगलः ॥ गुरुसन्निधिमागत्यतस्थौतत्रकृतांजलिः ॥ २५ ॥ विधिनास्मैददौमंत्रंश्रीकृष्णेत्यक्षरत्रयम् ॥ मूर्ध्निदत्त्वाकरंदक्षकर्णेमंत्रमुवाचह ॥ २६ ॥ तत्करस्पर्शतोमंत्रमाहात्म्याद्बिल्वमंगलः॥विधूतपापस्तत्कालेजज्वालाग्निरिवद्विजः ॥ २७ ॥ दंडवत्प्रणिप्रत्याहगुरुंसोमगिरिंवचः ॥ कृतार्थोहंकृतार्थोहंकिंकरोमीतिशाधिमाम् ॥ २८ ॥ ततःसोमगिरिःप्राहसम्यगाचारवान्भव ॥ वसात्रान्यत्रवाक्वापिजपमंत्रंविमुक्तये ॥ २९ ॥ इत्युक्तोगुरुणाबिल्वमंगलोऽतीवमंगलः ॥ गुरुसेवापरोनित्यमुषित्वागुरुसन्निधौ ॥ ३० ॥ षण्मासाभ्यंतरेचित्रंमहाकविरभूद्द्विजः ॥ सर्वशास्त्रार्थतत्त्वज्ञोविमुक्तोविषयेषुवै ॥ ३१ ॥ ततोगुरुमनुज्ञाप्यश्रीकृष्णदर्शनेच्छया ॥ वृंदावनंजिगमिषुःप्रतस्थेबिल्वमंगलः ॥ ३२ ॥ अथागच्छत्ततोविप्रोनर्म्मदातीरमागतः ॥ माहिष्मतींपुरींतत्रददर्शातिमनोहराम् ॥ ३३ ॥ उवासकतिचिन्मासांस्तत्रकृष्णमनुस्मरन् ॥ एकस्मिन्दिवसेतत्रमहाश्चर्य्यमभूदहो ॥ ३४ ॥ बिल्वमंगलभक्तेस्तुमाहात्म्यंकथयाम्यहम् ॥ एकदानर्मदातीरेययौस्नातुंद्विजोत्तमः ॥ ३५ ॥ ददर्शतत्ररुदतींब्राह्मणींविधवांसतीम् ॥ क्रोडेबालकमादायमृतंकर्मविपाकतः ॥ ३६ ॥ तांतथारुदतींदृष्ट्वादयालुर्बिल्वमंगलः ॥ उवाचास्यचकिंजातंकस्तवायंमृतःशिशुः ॥ ३७ ॥ इतिश्रुत्वावचस्तस्यप्रोवाचरुदतीसती ॥ नाथब्रह्मकुलेजाताब्राह्मणेनविवाहिता ॥ ३८ ॥ बालमेवंसमुत्पाद्यकर्मणामिमृतःपतिः ॥ तदारभ्यशिशुंचैनंपश्यंतीधैर्य्यमास्थिता ॥ ३९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

व्यतीत्ययुःकियच्चित्तुकालंप्रापाद्यवैशिशुः ॥ किंकरोमिक्वगच्छामिपितृभ्रातृविवर्जिता ॥ ४० ॥ सहतेनाथवालेनप्रविशामिचनर्म
दाम् ॥ नान्यंवैतुप्रपश्यामित्वांनमामिपितुःसमम् ॥ ४१ ॥ इतिश्रुत्वावचस्तस्याःकृपयाबिल्वमंगलः ॥ समागत्यसमीपेतंबालंकृ
त्वानिजाग्रतः ॥ ४२ ॥ प्रार्थयामासमनसाजीवयाशुशिशुंविभो ॥ नोचेदहंसहानेनमरिष्यामिनसंशयः ॥ ४३ ॥ एवंनिश्चित
चित्तंतंज्ञात्वाभक्तंजनार्दनः ॥ भक्तिभाववशीभूतोजीवयामासबालकम् ॥ ४४ ॥ जीवंतंबालकंदृष्ट्वाब्राह्मणीहर्षसंयुता ॥ नमश्च
कारबहुधाद्विजंपितृसमंसती ॥ ४५ ॥ सुतमादायविप्रोपिददौतस्यैप्रहृष्टवान् ॥ पश्यतांसर्वलोकानांतदाश्रीबिल्वमंगलः ॥ ४६ ॥
स्नात्वागत्वास्वभवनंपूजयामासकेशवम् ॥ तदारभ्याद्विजस्तत्रदेववद्वंदितोजनैः॥४७॥उवासकतिचित्तत्रदिनानिबिल्वमंगलः ॥४८॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येबिल्वमंगलचरितंनामचतुश्चत्वारिंशःसर्गः॥४४॥ ॥छ॥ ॥ विरक्तोनिरपेक्षोसौपौरैरावेष्टितोजनैः॥
निजकार्यात्ययंमत्वामहोद्विग्नोभवद्द्विजः ॥१॥ उत्थायचलितोद्रष्टुंकृष्णंवृंदावनेद्विजः ॥ पथिगच्छन्ददर्शाथवैश्यपत्नींमनोहराम् ॥२॥
नर्म्मदायांकृतस्नानांगच्छंतींनिजमंदिरम् ॥ सर्वांगसुंदरींरामांपूर्णचंद्रनिभाननाम् ॥ ३ ॥ खेलत्खंजनयुग्माभनेत्रद्वंद्वमनोहराम् ॥
नातिपीनस्तनयुतांतन्वींतांतनुमध्यमाम् ॥ ४ ॥ दृष्ट्वाचतांचापलांगींमोहितोबिल्वमंगलः ॥ तत्पृष्ठतोऽतिचपलःश्लिष्यन्निवजगाम
ह ॥ ५ ॥ आयांतंतंद्विजंदृष्ट्वाकामुकंपृष्ठतःसती ॥ द्रुतगत्याययौगेहंभर्तारमिदमब्रवीत् ॥६॥ भर्तातांप्राहधन्यासितिष्ठात्रैवममाज्ञया॥
आगमिष्यतिचेत्स्वामीतस्मैदेहियदीप्सितम् ॥७॥ पतिव्रताव्रतत्यागोमास्तुतेमदनुज्ञया ॥ एवंकथयतोस्तत्रदम्पत्योर्द्वारदेशतः॥८॥
बिल्वमंगलआगत्यतूष्णींतस्थौततोवणिक् ॥ दंडवत्प्रणिपत्याहभगवन्नेहिमेगृहम् ॥ ९ ॥ इयंदासीचदासोहंयथेच्छसिकुरुप्रभो ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अद्यमेसफलंजन्मभवदागमनेनच ॥ १० ॥ इतिश्रुत्वावचस्तस्यवणिजंबिल्वमंगलः ॥ प्रशशंसतदातौतुतत्पत्नींप्राहहर्षितः ॥ ११॥
आगच्छात्रगृहेसौम्येकिंचिद्वक्तव्यमस्तिमे ॥ इत्युक्तासाथभर्त्रापिनियुक्तातद्गृहेययौ ॥ १२ ॥ एकांतेतांप्रणम्याहभक्त्याश्रीबिल्व
मंगलः ॥ सूचीद्वयंसमादायशीघ्रंमेदेहिसुव्रते ॥ १३ ॥ इत्युक्तासातिशीघ्रंतुददौसूचीद्वयंसती ॥ नीत्वाकराभ्यांतिष्ठन्सस्फोटया
मासचाक्षिणी ॥ १४ ॥ स्वकीयेद्विजशार्दूलोजगामतद्गृहाद्बहिः ॥ स्फोटिताक्षंवहिर्यातंरुधिराप्लुतवक्षसम् ॥ १५ ॥ दृष्ट्वातंबिल
पंतौतौहाहेतिवैश्यदम्पती ॥ विप्रपृष्ठेतुचलितौसंतौप्राहात्रातिष्ठतम् ॥ १६ ॥ नयुवामपराधोस्तिप्रसन्नोयुवयोरहम् ॥ नेत्रदुर्न
यतोत्राहमवशःकाममोहितः ॥ १७ ॥ पर्य्यधावन्निमांसाध्वींतस्मात्तेस्फोटितेमया ॥ यथेष्टंयामिचातोहंभवतंसुखिनौयुवाम् ॥१८॥
तत्रगत्वाथकालिंद्यांस्नात्वास्पृष्ट्वाथकेशवम् ॥ कालिंदीतीरमागत्यतस्थौक्षुत्परिपीडितः ॥ १९ ॥ कोदास्यतिकथंयामिजीवनेना
पिकिंफलम् ॥ इयंहिमथुरामोक्षप्रदाश्रीकृष्णजन्मभूः ॥ २० ॥ अस्यांयदिपतेद्देहःकिंत्वतःपरमुत्तमम् ॥ इतिसंचिंत्यमनसाक्षुधार्तो
वसतास्थिवान् ॥ २१ ॥ एवंतत्रोपविष्टस्ययमुनातीरमंदिरे ॥ अहोरात्रद्वयंजातंनपीतंयमुनोदकम् ॥ २२ ॥ तृतीयेह्निनिशी
थिन्यांभगवान्भक्तवत्सलः ॥ द्विजवेषंसमादायगृहीत्वान्नंसुदुर्लभम् ॥ २३ ॥ बिल्वमंगलमभ्येत्यप्राहोत्तिष्ठद्विजोत्तम ॥ बुभुक्षि
तंततोज्ञात्वाहान्नंनीत्वासमागतः ॥ २४ ॥ उत्तिष्ठभुंक्ष्वपानीयमिदंपिबसुखीभव ॥ बिल्वमंगलइत्युक्तःकृष्णेनद्विजरूपिणा ॥ २५ ॥
प्राहांधोहंनपश्यामिसमागच्छमर्मातिकम् ॥ हस्तेगृहीत्वादेह्यन्नंकृपांकुरुममप्रभो ॥ २६ ॥ इत्युक्तोद्विजरूपस्तुबिल्वमंगलसन्निधि
म् ॥ समागत्यददावन्नंहस्तंधृत्वास्वपाणिना ॥ २७ ॥ स्पर्शाद्वैशिष्ट्यमालक्ष्यगाढंजग्राहतंकविः ॥ कोसिसत्यंकथयमेनोचेत्त्वांन

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्यजाम्यहम् ॥ २८ ॥ इत्युक्तःस्वकरंदेवोबलेनाहृत्यतत्करात् ॥ तस्थौसमीपतस्तूष्णींततःसबिल्वमंगलः ॥ २९ ॥ प्राहज्ञातोसि
बलतोजित्वामांयद्बहिर्गतः ॥ हृदयाद्यदिवागच्छेत्ततोजेयोसिमेप्रभो ॥ ३० ॥ इत्युक्तःपुंडरीकाक्षःप्रसन्नोबिल्वमंगलम् ॥ प्राहज्ञात
स्त्वयाविप्रत्वंमेप्रियतरोह्यसि ॥ ३१ ॥ पुत्रंमित्रंकलत्रंचधनंगेहादिकंचयत् ॥ त्वंपरित्यज्यलोकेस्मिन्मामेकंशरणंगतः ॥ ३२ ॥
अतस्त्वत्सदृशोनास्तिजगत्यांममकश्चन ॥ बिल्वमंगलसत्यंतेप्रतिजानेशृणुष्वतत् ॥ ३३ ॥ नमेभक्तसमःकश्चिन्नश्रीरपितथाप्रि
या ॥ नाकर्तव्यंकिमप्यस्तिभक्तार्थंबिल्वमंगल ॥ ३४ ॥ पश्यगोपकुलेजन्मगोपोच्छिष्टादिभोजनम् ॥ कुब्जादासीसखित्वंचफा
ल्गुनस्यचभृत्यता ॥३५॥ गणिकागजगृध्रादिम्लेच्छाजामिलमित्रता ॥ एवमादीनिकर्माणिममहेतुंविचारय॥३६॥अतस्त्वंमेप्रियोब्रह्म
न्नेत्रेप्राप्नुहिसुंदरे ॥ इदंविप्रस्यरूपंमेपश्यात्रैवाचिराद्द्विज ॥ ३७॥ आवयोःसख्यमेतेनरूपेणास्तुनिरंतरम् ॥ अतोदिव्यंतुतेचक्षुर्द
दाम्यहमनुत्तमम् ॥ ३८ ॥ ततोद्रक्ष्यसिमेरूपंयोगिध्येयंनसंशयः ॥ इत्युक्तश्चक्षुषीप्राप्यप्रहृष्टोबिल्वमंगलः ॥ ३९ ॥ ददर्शद्विजवे
षंतंश्रीकृष्णंपरमेश्वरम् ॥ आनंदाश्रुपरिक्लिन्नःपपातहरिपादयोः ॥ ४० ॥ उत्थापितोमूर्ध्निकरंदत्त्वाकृष्णेनसद्विजः ॥ पुनःप्राहात्रनि
वससुखीत्वंबिल्वमंगल ॥ ४१ ॥ स्मृतोहंतवसान्निध्यमागमिष्यामितत्क्षणात् ॥ अन्नंपानीयमेतत्त्वंप्रत्यहंप्राप्स्यसिद्विज ॥ ४२ ॥
इत्युक्त्वांतर्दधेकृष्णोद्विजरूपधरोहरिः ॥ बुभुजेन्नंसुधाप्रायंतत्कालेबिल्वमंगलः ॥ ४३ ॥ भुक्त्वान्नमुदकंपीत्वातद्रूपंहृदिचिंतयन् ॥
शिश्येसयमुनातीरेमंदिरेबिल्वमंगलः ॥ ४४ ॥ प्रभातेपुनरुत्थायचिंतयामाससद्विजः ॥ किमयंस्वप्नआहोस्विद्भ्रमोयंनात्रसंशयः ॥
॥ ४५ ॥ यत्कृष्णेनचसंवादोमनुष्येणैवमेऽभवत् ॥ एवंचिंतापरोविप्रआश्चर्याद्भ्रांतिमानिव ॥ ४६ ॥ अंतर्मनाःशौचकर्मस्नानादि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कमथाचरत् ॥ अथैकांतेकुटीमध्येसस्मारोक्तंवचोहरेः ॥ ४७ ॥ स्मृतोहमागमिष्यामीत्युक्तमस्तिकरोमितत् ॥ आगमिष्यतिचेत्स
वैसत्यमेवनसंशयः ॥ ४८ ॥ उपविश्यततोनेत्रेनिमील्यविश्वरूपिणम् ॥ रात्रौदृष्टंयथाकृष्णंदध्यौसबिल्वमंगलः ॥ ४९ ॥ तत्काले
भगवान्कृष्णस्तद्रूपेणाजगामह ॥ उवाचाहमिहायातःकिमर्थंचिंतितस्त्वया ॥ ५० ॥ इत्युक्तोविजहौध्यानंदृष्ट्वातंरात्रिवत्स्थितम् ॥
प्रणनामातिहृष्टात्माक्षमस्वेतिकृतांजलिः ॥ ५१ ॥ उक्त्वाहृदयसंदेहंविज्ञाप्याधोमुखःस्थितः ॥ उवाचतंपुनःकृष्णःसंदेहंमाकृथाम
यि ॥ ५२ ॥ सर्वदैवंतवस्नेहात्त्वत्सान्निधिपरोस्म्यहम् ॥ इत्युक्त्वासगतःकृष्णश्चितांतत्याजसद्विजः ॥ ५३ ॥ वसन्वृंदावनेकृष्णंचिंत
यानोदिवानिशम् ॥मेनेकृतार्थमात्मानंसर्वभूतेषुकृष्णधीः ॥ ५४ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येबिल्वमंगलचरितंनामपंचचत्वा
रिंशःसर्गः ॥ ४५ ॥ छ ॥ ॥ अथैकस्मिन्दिनेकृष्णसान्निधौबिल्वमंगलः ॥ स्मृत्वाचिंतामणिंवेश्यामात्मवृत्तानिसर्वशः ॥ १ ॥
कथयामासकृष्णायवेश्यावाक्योपदेशतः ॥ फलमेतादृशंलब्धंदुर्लभंदेवदानवैः ॥ २ ॥ इत्युक्तःकविनाकृष्णःस्मित्वोवाचाद्विजंप्रति ॥
आगमिष्यतिसावेश्येत्युक्त्वान्यत्रजगामह ॥३॥ अथचिंतामणिर्वेश्याविरक्तेबिल्वमंगले॥तत्याजनिजवृत्तिंसाविप्रवैराग्यदुःखिता ॥४॥
अहोमद्वाक्यतोविप्रःसर्वंत्यक्त्वाधनादिकम् ॥ श्रीकृष्णंशरणंयातोधिङ्मांलोकानुरागिणीम् ॥ ५ ॥ अहोवेश्यापुराकाचित्पाठयंतीशु
कंस्वयम् ॥रामनामततोयाताविष्णुलोकमितिस्थितिः॥६॥ततोहमपिकृष्णेतिनाम्नैवाप्यघकारिणी ॥विमोक्ष्यामिनसंदेहोनामवैतारकं
कलौ ॥ ७ ॥ एवंसंचिंत्यमनसावेश्यासानिजमंदिरम् ॥ समागत्यविरक्तेवतस्थौश्रीकृष्णतत्परा ॥ ८ ॥ स्वजनैःप्रार्थ्यमानापिना
नुरक्ताह्युवाचतान् ॥ भवद्भिःक्रियतांसर्वंगृहकृत्यंनसंशयः ॥ ९ ॥ अद्यारभ्यमयात्यक्तानिजवृत्तिर्नसंशयः ॥ वेश्याहंवासुदेवस्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कृष्ण प्रकार०

दासीतस्यैवनान्यथा ॥ १० ॥ प्रीणयंतीतमेवाहंतरिष्यामिभवार्णवम् ॥ इत्युक्त्वानिजबंधुभ्यश्चिंतामणिरुदारधीः ॥ ११ ॥
विसस्मारगृहंमित्रंधनपुत्रादिकंतथा ॥ गायंतीकृष्णचरितंश्रीकृष्णप्रतिमाग्रतः ॥ १२ ॥ नृत्यंतीतन्मनाभूत्वाकदाचित्कंचिदाश्र
मम् ॥ एवंगतेषुकालेषुकृष्णातीरनिवासिनः ॥ १३ ॥ जनानिजगृहात्सर्वेनिर्गत्यैकत्रसंगताः ॥ मथुरांगंतुमुद्युक्ताःकृष्णदर्शनमा
नसाः ॥ १४ ॥ तेषांसमीपमागत्यचिंतामणिरुवाचतान् ॥ अहोहमपिगच्छामिभवद्भिःसाकमेवहि ॥ १५ ॥ मथुरामपिकृष्णोमे
प्रसन्नोभगवान्भवेत् ॥ आगच्छेतिचतैरुक्तासमागत्यततस्तुसा ॥ १६ ॥ गायंतीकृष्णचरितंतैःसाकंमथुरांययौ ॥ तत्रस्नात्वा
थकालिंद्यांवीणामंकेनिधायसा ॥ १७ ॥ प्रणम्यकेशवंदेवंगायंतीप्रननर्तह ॥ आनंदजाश्रुसंसिक्तस्तनयुग्मांकलावतीम् ॥ १८ ॥
नृत्यंतींददृशुःसर्वेसाधुसाध्वितिवादिनः ॥ अथकेशवनैवेद्यंप्रसादंकोपिपूजकः ॥ १९ ॥ चिरकालांतरंतस्यैददौसाशिरसागृहीत् ॥
गृहीत्वापिननर्तासौनततोविरराससा ॥ २० ॥ अथमध्याह्नसमयेकपाटंकेशवालये ॥ दत्त्वास्वस्वालयंसर्वेजग्मुस्तेपूजकाजनाः ॥ २१ ॥
ततश्चिंतामणिरपिनिवृत्तागीतनृत्यतः ॥ यमुनातीरमागत्यबुभुजेपूजकार्पितम् ॥ २२ ॥ तावन्मात्रंतुभुक्त्वासापीत्वाचयमुनो
दकम् ॥ आगच्छंतीददर्शाथबिल्वमंगलमंदिरम् ॥ २३ ॥ तत्रोपविष्टंध्यायंतंददर्शबिल्वमंगलम् ॥ तप्तहाटकवर्णाभंसाक्षात्सू
र्यमिवोदितम् ॥ २४ ॥ तंदृष्ट्वातादृशंवेश्याद्वारसन्मुखतोबहिः ॥ तस्थौक्षणांतरेतांतुददर्शबिल्वमंगलः ॥ २५ ॥ उत्थायबहि
रागत्यप्रणनामचतांद्विजः ॥ तवोपदेशादेवाहंजीवन्मुक्तोभवत्पुनः ॥ २६ ॥ दंडवत्प्रणिपत्याहचिंतामणिरपिद्विजम् ॥ त्वत्संस
र्गवशाद्ब्रह्मन्गणिकाप्यघकारिणी ॥ २७ ॥ विमुक्तासर्वदोषेभ्यःश्रीकृष्णंशरणंगता ॥ एवंपरस्परंतौतुस्तुवंतौभक्तिसंयुतौ ॥ २८ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तस्थतुश्चांगणेहृष्टौवेश्याचबिल्वमंगलः ॥ बिल्वमंगलउत्थायनिजभोजनमागतम् ॥ २९ ॥ गृहादानीयपानीयंददौतस्यैद्विजोत्त
मः ॥ भुक्त्वातदन्नंभक्तासापीत्वापानीयमुत्तमम् ॥ ३० ॥ तस्थौविवक्षुस्तांवेश्यामुवाचबिल्वमंगलः ॥ अहोधन्यासियस्यास्तेश्री
कृष्णेप्रीतिरीदृशी ॥ ३१ ॥ अतःपरंक्वचिद्देशेनिवसाम्यत्रवेश्मनि ॥ इतिश्रुत्वाथतंभक्त्याप्राहचिंतामणिर्द्विजम् ॥ ३२ ॥ एवमेवविवक्षु
स्तामस्मिन्नात्रवसाम्यहम्॥आज्ञापयक्वचिद्यामिकालिंदीतीरवेश्मनि॥३३॥इत्युक्त्वाप्रययौवेश्यागृहेक्वापिस्थिताभवत्॥ध्यायंतीहृदि
गोविंदंगायंतीतद्गुणंमुखे ॥ ३४ ॥ एवमुत्साहतोभूतंदिनद्वयमभोजनम् ॥ तृतीयेदिवसेतस्याअन्नमादायकेशवः ॥ ३५ ॥ स्वप्नेनियु
क्तवान्कंचिन्माथुरंपूजकंद्विजम् ॥ तदारभ्यामृतप्रायमन्नंसाप्यलभत्सुखम् ॥ ३६ ॥ एवंतौमथुरायांवैकृताथौमरणावधि ॥ अंतेगोविं
दसायुज्यंगत्वासुखमवापतुः ॥ ३७ ॥ इत्येतत्कथितंसर्वंबिल्वमंगलचेष्टितम् ॥ चिंतामणेस्तुवेश्यायाभक्तिमाहात्म्यमुत्तमम् ॥३८॥
किमसाध्यंनृणांभक्त्यानित्यंतुष्टेजनार्दने ॥ तस्माद्भक्तिःसदाकार्य्याविद्वद्भिःसर्वसाधिनी ॥ ३९ ॥ नजातिधर्मोनचवर्णधर्मोनप
क्षधर्मोथनयोगकर्म ॥ हरेःप्रसादायनकारणंतथायथेहलोकंपरिहायकीर्तिम् ॥ ४० ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येबिल्वमंगल
चिंतामणिचरितंनामषट्चत्वारिंशःसर्गः ॥ ४६ ॥ ७॥ ॥ अथापरंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ यच्छ्रुत्वासर्वपापेभ्योमुक्तो
भक्तिंलभेन्नरः ॥ १ ॥ मिथिलायामभूद्विप्रोविष्णुशर्म्मेतिविश्रुतः ॥ तरौनीग्रामवासीचवंशेकरमहाह्वये ॥ २ ॥ वेदशास्त्रार्थतत्त्व
ज्ञःकुलीनःकर्म्मतत्परः ॥ कृत्वापाणिग्रहंकालेपुत्रानुत्पाद्यचैकदा ॥ ३ ॥ पत्न्याःकटुवचःश्रुत्वाविरराजक्रुधाद्विजः ॥ गत्वाशिवस
मीपंसयामोपांतेऽतिनिर्मले ॥ ४ ॥ गैरिकंपरिधानीयमुत्तरीयंचगैरिकम् ॥ विधायभस्माभरणेदध्यौचित्तेनशंकरम् ॥ ५ ॥ शिखां

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सूत्रंचबिभ्राणःसंन्यासेचद्विजःस्थितः ॥ अत्रांतरेग्रामवृद्धायुवबालाश्चयेजनाः ॥ ६ ॥ तेसर्वेतत्रगत्वातंवारयामासुरातंवत् ॥ पत्नी
वापिययौतत्रगृहीत्वातनयान्निजान् ॥ ७ ॥ प्रार्थयामासबहुधाननिवृत्तोद्विजोत्तमः ॥ अत्यावेशेकृतेपौरैरुत्थायचलितोद्विजः ॥ ८ ॥
पत्नीचानुजगामार्तातामनादृत्यचक्रुधा ॥ जगामैवविरक्तःसन्ननिवृत्तोबभूवह ॥ ९ ॥ ततस्तेग्रामवृद्धास्तांपत्नींतांस्तनयानपि ॥ गृ
हीत्वाग्राममागत्यस्वंस्वमालयमाययुः ॥ १० ॥ विष्णुशर्म्मातदारभ्यलोकेनिंद्यामवापसः ॥ अयथाविधिसंन्यासाल्लोकेषुपर्यटं
न्सदा ॥ ११ ॥ प्रत्याख्यातोद्विजैःकैश्चित्तरैर्नीग्रामवासिभिः ॥ ससुविद्योमहाप्राज्ञःशिखासूत्रादिमानपि ॥ १२ ॥ तत्याजकर्मजा
लंससंन्यासीवनसंशयः ॥ सजगामशिलानाथोयत्रातिष्ठतिशंकरः ॥ १३ ॥ परिभ्राम्यपृथिवींसकलांविरहातुरः ॥ तस्याङ्गंयत्रदेशेच
पतितस्मतदाहरः ॥ १४ ॥ तस्यापिचतदंगंसंस्थापयामासशंकरः ॥ एवंभ्रमन्पृथिव्यांतुमिथिलामागतःपुनः ॥ १५ ॥ जनकस्यचरा
जर्षेर्गृहाद्वैयोजनद्वये ॥ सरबिंदुह्रदोनामतीर्थंपापहरंपरम् ॥ १६ ॥ तत्पश्चात्कमलानद्यादक्षिणेधरणीतले ॥ सत्याःप्रपतितंदे
व्याउदरंनाभिसंयुतम् ॥ १७ ॥ शिवोप्ययपातयत्तत्रस्वोदरंनाभिसंयुतम् ॥ ततोब्रह्माचविष्णुश्चसमागत्यकृतांजलिः ॥ १८ ॥
आसाद्यशंकरंदेवमूचतुःपरमेश्वरौ ॥ किमिदंक्रियतेनाथदेहपातनमद्भुतम् ॥ १९ ॥ वस्तुतस्तेनदेहोस्तिप.तनंतस्यवैकुतः ॥
तथापिजगतांभूत्यैदेहवानसिशंकर ॥ २० ॥ इतिश्रुत्वातयोर्वाक्यंविहस्यपरमेश्वरः ॥ उवाचविष्णुंब्रह्माणंगुह्यंलोकानुकं
पया ॥ २१ ॥ शृणुब्रह्मन्नथोविष्णोगुह्यंलोकहितंपरम् ॥ लोकोपकारायमयादेहोयंपात्यतेभुवि ॥ २२ ॥ पूर्वंबिंदुसरो
नामतीर्थमेतत्सनातनम् ॥ अत्रावयोर्देहपाताद्विशिष्टमभवत्पुनः ॥ २३ ॥ सरबिंदुह्रदेस्नात्वाकमलायांतथानरः ॥ आव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

योरुदरंदृष्ट्वाब्रह्महत्यांव्यपोहति ॥ २४ ॥ यद्यत्कामयतेलोकः पुत्रदारधनादिकम् ॥ मासमेकमिहासीनोममाराधनतत्परः ॥
॥ २५ ॥ तत्रतस्मैप्रयच्छामिसत्यमेतन्नसंशयः ॥ युवांजानीतमेतद्धिमणिकर्ण्यासमंसरः ॥ २६ ॥ अहंविश्वेश्वरःसाक्षा
न्मुक्तिदश्चनिरंतरम् ॥ वसाम्यत्रमृतानांतुमुक्तिदातुंनसंशयः ॥ २७ ॥ सिद्धिक्षेत्रमिदंदेवैर्जानीतमावयोःप्रियम् ॥ अचि
राल्लभतेसिद्धिंपुरश्चर्य्यापरोनरः ॥ २८ ॥ इत्युक्त्वास्वोदरेशंभुःप्रविवेशाथपश्यतोः ॥ तयोःप्रस्तुवतोर्भक्त्याब्रह्मकेशवयोरथ ॥
॥ २९ ॥ ब्रह्मापिकेशवश्चापिनिजनाम्नातिसुंदरम् ॥ शिवलिंगंप्रतिष्ठाप्यजग्मतुःस्वंस्वमालयम् ॥ ३० ॥ एवंभूतःशिलानाथःशं
करोभक्तवत्सलः ॥ तत्रगत्वाविष्णुशर्म्माशिवाराधनतत्परः ॥ ३१ ॥ तत्रैकंवत्सरंविप्रउवासब्रह्मचर्य्यवान् ॥ वत्सरांतेशिलाना
थोरात्रौस्वप्नेब्रवीद्वचः ॥ ३२ परितुष्टोस्मिभद्रंतेतवाराधनतोद्विज ॥ वैष्णवंमंत्रराजंतेददामिसर्वसिद्धये ॥ ३३ ॥ तन्मंत्रंजप
त्वंनित्यंममाराधनतत्परः ॥ भुक्त्वाभोगानशेषांस्तुमृतोमोक्षमवाप्स्यसि ॥ ३४ ॥ तवास्तिदीर्घमायुष्यंपुनर्दारपरिग्रहः ॥ भवि
ष्यतिशुभातत्रसंततिर्वंशवर्द्धिनी ॥३५॥ इत्युक्त्वाद्वादशार्णंतुदत्त्वामंत्रंसदाशिवः ॥ तापसोद्विजरूपेणतत्रैवांतरधीयत ॥३६॥ विष्णु
शर्म्मासमुत्थायस्वप्नंसंस्मृत्यविस्मितः ॥ भविष्यतिकथंचैतदितिचिंतापरोभवत् ॥ ३७ ॥ द्वादशार्णंजपन्नित्यंतुलसीदामभूषितः ॥
अयाचिताशीतत्रासीदेकदाशिवरात्रके ॥ ३८ ॥ सर्वेग्रामात्समायाताःशिवदर्शनमानसाः ॥ तद्ग्रामीणाअपिजनाःसमायातादिदृक्षवः ॥
॥३९॥ पूजयित्वाशिलानाथंविष्णुशर्म्माणमेत्यते ॥ परितोष्यवचोभिस्तंनिन्युस्वंग्राममेवहि ॥४०॥ तत्रपूर्वगृहंत्यक्त्वातस्थावन्यत्रस
द्विजः ॥ पुनःपाणिग्रहस्तत्रपुत्रमुत्पाद्यकालतः ॥४१॥ वैष्णवप्रवरोभूत्वागृहिण्यावैद्विजर्षभः ॥ सर्वानामंत्र्यबंधून्सजगामपुरुषोत्तमम्॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥४२॥ भक्तिरत्नावलींकृत्वाग्रंथंभागवतोत्तमम् ॥ श्रावयित्वाजगन्नाथंतंसमर्प्यंततोभ्यगात् ॥४३॥ आगत्यकाशींतस्थौसबिंदुमाधव
सन्निधौ ॥ जगन्नाथंहृदिध्यात्वामंत्रंवैद्वादशाक्षरम् ॥४४॥ जपन्नानंदपूर्वंसतस्थावानंदकानने॥एकदाश्रीजगन्नाथपूजकेभ्योनिशात्यये॥
॥ ४५ ॥ भक्तिरत्नावलीमालांदेहिमह्यमितिस्वयम्॥ उवाचस्वप्नेसातीवप्रियाममनसंशयः ॥४६॥ विष्णुशर्म्मकृतासातुकाश्यांतिष्ठति
सद्विजः ॥ मन्नाम्नायातुवैयत्रभक्तिरत्नावलींततः ॥ ४७ ॥ गृहीत्वापुनरायातुमत्कंठेतांनियोजय ॥ तावन्मणिमयीमेतांमालांत्य
क्ष्याम्यसंशयम् ॥ ४८ ॥ एवमुक्तास्तुतेसर्वेनिद्रांत्यक्त्वासमुत्थिताः ॥ आश्चर्य्यंपरमंमत्वाराज्ञेप्रोचुर्यथार्थतः ॥ ४९ ॥ राजा
पिस्वप्नेतत्सर्वंदृष्टवान्सोब्रवीच्चतान् ॥ वयंयूयंगमिष्यामःश्रीजगन्नाथमंदिरे ॥५० ॥ तत्रोपायंकरिष्यामिभक्तिरत्नावलीयथा ॥
शीघ्रंप्रयातचेत्युक्ताःसर्वेराजपुरस्सराः ॥५१ ॥ आगत्यमंदिरेदृश्यमालांरत्नमयींपुरः ॥ पतितांभुविकेनापिनिक्षिप्तामिवतद्गला
त् ॥ ५२ ॥ तंदृष्ट्वामहदाश्चर्य्यंराजापत्रंलिलेखतत् ॥ दूतान्द्रुतगतीन्काश्यांराजाश्रीविष्णुशर्म्मणे ॥ ५३ ॥ तेगत्वातत्रतत्पत्रं
ददुःश्रीविष्णुशर्म्मणे ॥ विष्णुशर्म्मापितत्पत्रंजग्राहशिरसाद्विजः ॥ ५४ ॥ आनंदांभोधिसंमग्नस्तान्परिष्वज्ययत्नतः ॥ पाद्यास
नार्घ्यदानेनतेषांसत्कारमाचरत् ॥ ५५ ॥ तेप्यूचुर्नवयंब्रह्मन्निवसामोत्रवैनिशि॥आज्ञाराज्ञोस्तिनःकार्य्यंद्रुतमेतन्नसंशयः ॥ ५६ ॥
इत्युक्तोविष्णुशर्म्माथस्वहस्तलिखितांततः ॥ भक्तिरत्नावलींतेभ्योददौहर्षसमन्वितः ॥ ५७ ॥ नमस्कृत्यचतान्सर्वान्विससर्जकृ
तांजलिः ॥ भक्तिरत्नावलींनीत्वाद्रुतंराज्ञेन्यवेदयन् ॥ ५८ ॥ राजापितांसमादायविद्वद्ब्राह्मणवक्त्रतः ॥ ॥ श्रावयामासगोविंदंभ
क्तिरत्नावलींमुहुः ॥ ५९ ॥ पुनःस्वप्नेददर्शाथराजाश्रीपुरुषोत्तमम् ॥ भक्तिरत्नावलीश्लोकगुलिकांविनिधायभो ॥ ६० ॥ मा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

लांकृत्वाप्रयच्छाशुततःप्रीतोभवाम्यहम् ॥ इत्युक्तःप्रातरुत्थायतथैवकृतवान्नृपः ॥ ६१ ॥ भक्तिरत्नावलींमालांददौकृष्णायवैपु
नः ॥ ततःप्रसन्नोभगवान्मालामन्यांदधौहरिः ॥ ६२ ॥ एवंप्रभावःसुव्यक्तोभक्तेर्वैविष्णुशर्म्मणः ॥ यइदंशृणुयाल्लोकेभक्तिमाहा
त्म्यमुत्तमम् ॥ ६३ ॥ सर्वपापविनिर्मुक्तोभक्तिमान्स्यान्नसंशयः ॥ ६४ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येविष्णुशर्म्मचरितंनाम
सप्तचत्वारिंशःसर्गः ॥ ४७ ॥ अथवक्ष्येविष्णुभक्तान्संप्रदायप्रवर्तकान् ॥ चतुरोलोकविख्यातान्कीर्तिमान्मुक्तिमुक्तिमान् ॥ १ ॥
विष्णुस्वामीप्रथमतोनिंबादित्यस्ततःपरम् ॥ मध्वाचार्य्यस्तृतीयस्तुतुर्योरामानुजःस्मृतः ॥ २ ॥ एतेवैष्णवमुख्यावैसंप्रदायप्रवर्त
काः ॥ शिष्यप्रशिष्याएतेषांमाहात्म्यात्पूज्यतांगताः ॥ ३ ॥ अद्यापिपृथिवींमेतामलंकुर्वंतिभक्तितः ॥ विष्णुस्वामिकुलेतत्रवल्लभा
चार्य्यसंभवः ॥ ४ ॥ दाक्षिणात्येषुतैलङ्गोजात्याविप्रोतिभक्तिमान् ॥ परित्यज्यनिजंदेशंसस्त्रीकोगोकुलेऽवसत् ॥ ५ ॥ अयाच
नाशीसंतुष्टःश्रीकृष्णार्चनतत्परः ॥ माहात्म्यात्तस्यविप्रस्यशिष्याःसर्वेनृपादयः ॥ ६ ॥ प्रतीक्षंतस्तदाज्ञांवैचक्रुःसर्वेसमीहितम् ॥ ए
कदातस्यगेहेतुसाधुरेकःसमागतः ॥ ७ ॥ शालग्रामशिलांबद्धागलेकौशेयवाससा ॥ आचार्य्यद्वारदेशेतुक्षेमंकरतरौसतु ॥ ८ ॥
शालग्रामंनिधायाथवल्लभाचार्य्यसन्निधौ ॥ गत्वाप्रणम्यद्रक्ष्यामिमंदिरेतवकेशवम् ॥ ९ ॥ आज्ञापयेतिश्रुत्वावैगच्छेत्युक्तो
महात्मनाः ॥ गत्वातन्मंदिरेदृष्ट्वाशालग्रामशिलाचयम् ॥ १० ॥ तुलसीदामभिःश्वैतैश्चंदनैश्चयवैस्तिलैः ॥ नानासुगंधिकुसुमैः
सुरभीकृतमंदिरैः ॥ ११ ॥ पूजितंपरमप्रीत्याप्रणम्यद्वारमागतः ॥ क्षेमंकरतरुंगत्वाशालग्रामशिलांनिजाम् ॥ १२ ॥
नापश्यद्विललापार्तोवल्लभाचार्यसन्निधौ ॥ समागत्याब्रवीद्वाक्यंशालग्रामशिलाममम ॥ १३ ॥ क्षेमंकरतरौबद्धाकेनाप्यपहृ

अरे मन श्री वल्लभ गुण०

१ वैष्णवजन गोपीनगोपा०

२ भजियेश्रीव कृष्णनाके०

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ताशुभा ॥ अतःपरंनजीवामिशालग्रामशिलांविना ॥ १४ ॥ इतिश्रुत्वावचस्तस्यसाधोराचार्यआहतम् ॥ माविषादंकुरुत्वं
वैगच्छमेदेवमंदिरम् ॥ १५ ॥ यामिच्छसिशिलांतांत्वंगृहाणात्रनसंशयः ॥ इत्युक्तःप्रत्युवाचाथनास्तितेतादृशीशिला ॥
॥ १६ ॥ किंकरोम्यन्यथानाथशिलांतांचविनाविभो ॥ श्रुत्वेदंवह्लभाचार्यःपुनराहव्रजेतितम् ॥ १७ ॥ ततोगत्वापुनःसाधुर्भगवन्मं
दिरंशुभम् ॥ दृष्ट्वातत्रशिलाःसर्वाःस्वशिलासदृशीःशुभाः ॥ १८ ॥ आश्चर्याद्बहिरागत्यतमाचार्यमुवाचतत् ॥ पुनराचार्यावचना
त्क्षेमंकरतरोस्तले ॥ १९ ॥ गत्वातद्वृक्षबद्धांस्वांशालग्रामशिलांपुनः ॥ संप्राप्यकृतकृत्योभूदाचार्यनिलयेऽवसत् ॥ २० ॥ एवमा
दीनिचित्राणिबहून्यत्रमहात्मनः ॥ कर्माणिपृथिवीमध्येसंतिव्यक्ततराणिच ॥ २१ ॥ अत्रैववंशेविख्यातोज्ञानदेवइतिश्रुतः ॥ कथां
तस्यप्रवक्ष्यामिशृण्वतांपापनाशिनीम् ॥ २२ ॥ दक्षिणस्यामथेंद्राणीनदीपुण्यजलाशुभा ॥ तत्तीरेक्वचिदानंदक्षेत्रंद्विजगणाकुलम् ॥
॥ २३ ॥ तत्रैकोब्राह्मणःकश्चित्पत्न्याकलहतोरुषा ॥ वंचयित्वाथतांपत्नींसंन्यासंजगृहेस्वयम् ॥२४॥ अथकालेकतिपयेयातेज्ञातस्त
यासतु ॥ सासमागत्यभर्तारंमांगृहाणेतिचाब्रवीत् ॥ २५ ॥ सोऽब्रवीद्गच्छभद्रंतेनचभर्ताहमस्मिते ॥ इत्युक्तासातुतत्पत्नीतद्गुरुंप्रणि
पत्यच ॥ २६ ॥ प्राहनाथाऽनपत्याहंपितृमातृविवर्जिता ॥ कंयामिशरणंब्रूहिपतिस्तेशिष्यतांगतः ॥ २७ ॥ इतिश्रुत्वावचस्तस्या
गुरुःस्वाम्यतिदुःखितः ॥ आहूयविप्रंतंशिष्यंप्राह्येथंसुव्रतासती ॥ २८ ॥ नैनांत्यजगृहाणेमांमद्वाक्यान्मास्तुतेभयम् ॥ अकर्तव्यं
कृतंचैतन्मयाप्यज्ञानतोमहत् ॥ २९ ॥ भविष्यंतिसुतास्तस्यांतववंशविवर्द्धनाः ॥ माहात्म्याद्देवताःसर्वेभविष्यंतिद्विजोत्तमाः ॥३०॥
इत्याज्ञयागुरोःसोथपत्नीमादायसुव्रताम् ॥ उवासक्वचिदेकांतेभिक्षुधर्मंसमाचरन् ॥ ३१ ॥ मनसानकदाचित्तांसोकामयतसुव्रतः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋतावेवचकामार्ताजगामकाममोहितः ॥ ३२ ॥ एवंपुत्रास्त्रयोजाताःकालेयस्यमहात्मनः ॥ तेषांज्येष्ठोज्ञानदेवोजातस्तुसप्तहायनः ॥
॥ ३३ ॥ तंगृहीत्वायतीग्रामेगतोब्राह्मणमंदिरम् ॥ एषमेतनयोब्रह्मन्भवद्भिरुपनीयताम् ॥ ३४ ॥ अध्याप्यतांश्रुतिंविप्रायुष्माकंशरणं
गतः ॥ इतिश्रुत्वावचस्तस्यजहसुस्तेपरस्परम् ॥३५॥ एषसंन्यस्तवान्पत्नींसंजग्राहततःसुतम् ॥ समुत्पाद्याध्यापयितुमायातश्चात्रमं
दधीः॥३६॥ इतिसंचिंत्यमहिषंददृशुस्तेतिसन्निधौ ॥ तमालंभ्यात्रुवन्सर्वेविद्यामदविमोहिताः ॥३७॥ अहोवयंपाठयामोयद्येषमहिषोधु
ना ॥ पठेद्वेदंतुदैत्यैतत्प्रतिज्ञैषानसंशयः॥३८॥इत्युक्तःसतुतूष्णींवैतस्थौयतिरधोमुखः॥ज्ञानदेवउवाचाथतान्विप्रान्मधुराक्षरम्॥३९॥
असंभावितमेतत्तुप्रतिजानीतकिंद्विजाः ॥ तथापिसत्यंचेद्विप्राःकोवेदहरिचेष्टितम् ॥ ४० ॥ इत्युक्तास्तेपुनर्विप्रास्तथैवजहसुस्तदा ॥
ज्ञानदेवस्तुतंदृष्ट्वामहिषंप्राहसस्मितः ॥ ४१ ॥ अतोमहिषरूपेणभवानपिहरिःस्वयम् ॥ स्वभक्तमयशःसिद्धौमग्नंसंरक्षमाधव ॥४२॥
भक्तसंकल्पसिद्धयर्थमाविर्भवतिभूरिशः ॥ इतिश्रुत्वावचस्तस्यज्ञानदेवस्यतत्क्षणात् ॥ ४३ ॥ महिषःसस्वरंवेदानपठत्पश्यतां
नृणाम् ॥ ततस्तेब्राह्मणाःसर्वेमहाश्चर्य्यैणविस्मिताः ॥ ४४ ॥ श्रुत्वान्येप्यागतावृद्धाग्रामेथेवैदिकाद्विजाः ॥ तेसर्वेतंयतिंप्राहुर्ज्ञानदे
वंचसादरम् ॥ ४५ ॥ अहोधन्योसिधन्योयंतवपुत्रोनसंशयः ॥ यत्कृतेमहिषेप्येत्यविष्णुर्वेदंसमर्पयत् ॥ ४६ ॥ युवामतःक्षमेया
थांपाठयामोवयंश्रुतिम् ॥ इत्युक्तोज्ञानदेवस्तुमहिषंप्रणिपत्यतम् ॥ ४७ ॥ कृतांजलिपुटःप्राहक्षमस्वातःपरंविभो ॥ इत्युक्तोविररा
मासौमहिषःश्रुतिपाठतः ॥ ४८ ॥ ब्राह्मणाअपितंबालंविज्ञापयितुमादरात् ॥ निन्युर्निजगृहंसर्वेव्रतबंधमकारयत् ॥ ४९ ॥ ततःक
तिपयैरेवमासैर्वेदत्रयींपठन् ॥ शास्त्राणिचततस्तंतुपाठयामासुरादरात् ॥ ५० ॥ इत्याश्चर्यमभूत्तत्रसिद्धएकःसमागतः ॥ सपंक्ति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्वाप्रतोदंवैव्याघ्रमारुह्यनिर्भयः ॥ ५१ ॥ कुत्रास्तिज्ञानदेवःसइतिपृच्छन्जनान्प्रति ॥ इतिश्रुत्वाज्ञानदेवोभित्तिमारुह्यतस्थिवा
न् ॥५२॥ भित्तिंप्राहमहाभागेसिद्धआयातिमांप्रति ॥ तदग्रेयाभिमांतत्रनयत्वंप्रणतोस्म्यहम् ॥५३॥ इत्युक्ताचलिताभित्तिःसर्पतीसि
द्धसन्मुखम् ॥ दृष्ट्वातौव्याघ्रभित्तिस्थौलोकाविस्मयमागताः ॥ ५४ ॥ अहोखलुमहाश्चर्यमित्यूचुस्तेपरस्परम् ॥ ततःसिद्धस्तु
तंदृष्ट्वाभित्तिस्थंज्ञानदेवकम् ॥ ५५ ॥ साधुसाध्वितिसंपूज्यसस्नेहंहृदयेन्यधात् ॥ ज्ञानदेवोपितंप्राहभवतांकृपयात्विदम् ॥ ५६ ॥
एवंपरस्परालापंकृत्वासिद्धोययथारुचि ॥ जगामज्ञानदेवोपिपद्म्यामेवाययौगृहम् ॥ ५७ ॥ यइदंशृणुयाद्भक्त्याज्ञानदेवस्यचेष्टि
तम् ॥ अभीष्टंलभतेलोकेपरत्रसुखमश्नुते ॥ ५८ ॥ इति श्रीभगवद्भक्तिमाहात्म्येवल्लभाचार्यज्ञानदेवचरितंनामाष्टचत्वारिंशः
सर्गः ॥ ४८ ॥ छ ॥ ॥ ज्ञानदेवस्यशिष्यौद्वौनामदेवत्रिलोचनौ ॥ नामदेवकथाचात्रकथ्यतेवैसमासतः ॥ १ ॥ त्रिलोचनस्सप
त्नीकोदरिद्रोवैद्विजोत्तमः ॥ भिक्षाशीनित्यसंतुष्टोविष्णुभक्तिपरायणः ॥ २ ॥ आमध्याह्नंयाचयित्वानित्यंविप्रेषुभोजनम् ॥ दत्त्वास्व
यंतुबुभुजेव्रतमेतद्द्विजन्मनः ॥३॥ परंतुहरिरित्येतदक्षरद्वयमुत्तमम् ॥ पलमेकंनतत्याजजाग्रद्विप्रःकथंचन ॥४॥ तद्भक्त्यापुंडरीकाक्षः
समागत्याथतद्गृहे ॥ समाययौविप्ररूपोवृद्धोंतर्यामिसंज्ञकः ॥५॥ त्रिलोचनेनसाकंतुबहुधाभिक्षितुंययौ ॥ दृष्ट्वाभारपरिश्रांतंभिक्षान्नेन
त्रिलोचनम् ॥ ६ ॥ अंतर्यामीस्वयंनीत्वाययौतेनसमंगृहे ॥ विप्राणांभोजनांतेतुभोक्तव्यमितिनिश्चयः॥ ७ ॥यावदन्नंमिलत्यस्यभुंक्ते
तावन्नसंशयः ॥ अंतर्यामीयातुनैवभुंजन्नित्यब्रवीद्वचः ॥ ८ ॥ त्रिलोचनस्यमहिषीभोजयित्वाद्विजानथ ॥ शिष्टमन्नंददौनित्यमंतर्यामी
द्विजायसा॥९॥स्वयंबुभुक्षितेवासीत्तृप्तोस्मीतिनसोब्रवीत् ॥ एवंदुःखपरानित्यंतत्पत्नीचातिसुव्रता ॥ १० ॥ एकस्मिन्दिवसेजातमन

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्वंत्यादिनत्रयम् ॥ सामाजिकासखीकाचिदाजगामगृहंप्रति ॥ ११ ॥ कथमेतांदशांयाताविनारोगेणतेसखि ॥ किंवारोगोस्तिमेब्रूहिप्रती
कारंकरोम्यहम् ॥१२॥ इत्युक्तासाप्युवाचाथनरोगोममवर्तते ॥ भिक्षातुप्रमितायातिसर्वेषांभोजनांतरे ॥ १३ ॥ अंतर्यामीभुनक्त्येष
तृप्तोस्मीतिनभाषते ॥ अतोदिनत्रयंमेद्यजातमन्नंविनासखि ॥ १४ ॥ इत्युक्तातत्सखीप्राहकोसौकस्मादिहागतः ॥ कथमेषाप्रि
योनित्यंतवभर्तुर्वरानने ॥ १५ ॥ त्रिलोचनप्रियेत्युक्तासख्यासाहतुतांपुनः ॥ अहोतस्याप्रियेणैवकश्चिद्दृष्टोमयासखि ॥ १६ ॥
कोवेदकुतआयातःकिमर्थमिहतिष्ठति ॥ श्रुत्वैवंभाषितंतस्याअंतर्यामीतुतत्क्षणात् ॥ १७ ॥ अंतर्दधेजगामाथनिजघानततोह
रिः ॥ अथत्रिलोचनःसायंप्राहपत्नींपतिव्रताम् ॥ १८ ॥ अंतर्यामीनदृष्टोद्यगतःक्वापिविवित्सिकिम् ॥ इत्युक्ताप्राहपत्नीतंनाहंजानामि
कुत्रसः ॥ १९ ॥ भुक्त्वाजगामनायातःपुनरत्रगृहेमम ॥ अथत्रिलोचनःसंध्यामुपास्यैतस्ततःपुनः ॥ २० ॥ अंतर्यामिनमुच्चैस्तु
जुहावस्नेहयंत्रितः ॥ अनागतंतंविलपंस्तस्यशोकेनदुःखितः ॥ २१ ॥ बुभुजेनैवरात्रौसतस्यांचिंतापरायणः ॥ अथत्रिलोचनंस्व
प्नेप्रोवाचभगवान्हरिः ॥ २२ ॥ माशुचस्त्वंमहाभागत्रिलोचनममप्रिय ॥ त्वद्भक्त्याहंतवगृहेह्यवात्संविप्ररूपधृक् ॥ २३ ॥ अ
द्यारभ्यांतरिक्षेतुतववेश्मनिसंततम् ॥ निवसामिनसंदेहस्त्वमिदंकुरुमद्वचः ॥ २४ ॥ प्रातरारभ्यभिक्षायांमागच्छत्वंक्वचिद्द्विज ॥
जरयादुर्बलोसित्वंत्वद्दुःखाद्दुःखितोस्म्यहम् ॥ २५ ॥ गृहेतेयानिभांडानिसदापूर्णानिसंतुवै ॥ तैलंघृतंतथान्नंचह्यौषध्योद्रव्यमेवच ॥
॥ २६ ॥ अक्षयंतेगृहंविप्रभविष्यतिनसंशयः ॥ तेनैवशतशोविप्रान्भोजयित्वास्वयंपुनः ॥ २७ ॥ भुंक्ष्वत्वंकिंचसर्वेभ्योदेह्यन्नानि
सदाव्रती ॥ यावज्जीवंप्रसादान्मेसर्वंपूर्णंभविष्यति ॥ २८ ॥ इतिलब्ध्वावरंस्वप्नेप्रभातेसत्रिलोचनः ॥ ददर्शस्वान्नसंभारान्गृहेस

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वान्सुसंस्कृतान् ॥ २९ ॥ जहर्षपत्नीमाभाष्यविप्रानाहूयनित्यशः ॥ भोजयामासबुभुजेस्वयंपत्न्यासहद्विजः ॥ ३० ॥ एवंभ
क्त्याभगवतोद्विजःसर्वसमृद्धिमान् ॥ इहलोकेसुखंप्राप्यमृतोमोक्षमवाप्नुयात् ॥ ३१ ॥ यइदंशृणुयाल्लोकेभक्तिमाहात्म्यमुत्तमम् ॥
दरिद्रोलभतेवित्तंनामोच्चारणतत्परः ॥ ३२ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येत्रिलोचनचरितंनामैकोनपंचाशत्तमःसर्गः ॥४९॥ अथा
न्यत्संप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ नीलाचलेमहात्माभूद्राजावैकुलशेखरः ॥ १ ॥ सीतारामजपासक्तःसीतारामप्रपूजकः ॥ सी
तारामपदद्वंद्वेषट्पदीकृतमानसः ॥ २ ॥ दयाधर्मरतोनित्यंसदाव्रतपरायणः ॥ आमध्याह्नंराजकर्मकृत्वारामंहृदिस्मरन् ॥ ३ ॥
ततोपराह्णेशुश्रावरामायणमनन्यधीः ॥ तस्यपौराणिकस्तंतुरामार्थेत्यक्तजीवितम् ॥ ४ ॥ ज्ञात्वारामस्यदुःखादिसीतायाहरणादि
कम् ॥ जातुनश्रावयामासजानन्वैराजनिश्चयम् ॥ ५ ॥ पौराणिकस्त्वेकदातुक्लिष्टोभूज्ज्वररोगतः ॥ तत्पुत्रःश्रावयामासराज्ञेरामा
यणंतदा ॥ ६ ॥ रावणेनकृतंसर्वंश्रावयामासपुत्रकः ॥ श्रुत्वातद्दुःखदंवाक्यंसीतायाहरणादिकम् ॥ ७ ॥ ॥ गृहीत्वाखड्ग
मुत्थायशीघ्रमश्वंसमानय ॥ अद्याहंरावणंहत्वानयिष्यामिचजानकीम् ॥ ८ ॥ मयिजीवतिमेमातासीतारक्षोहृताभवेत् ॥ अ
होधिगस्तुमामद्येत्युक्त्वाश्वंससमारुहत् ॥ ९ ॥ धावयित्वाश्वमुख्यंतंपयोनिधिसमीपगः ॥ पुनरश्वंकशाघातैःसमुद्रेपातयद्रुषा ॥
॥ १० ॥ अश्वेनैवचपाथोब्धिंतीर्त्वाहत्वाचरावणम् ॥ सीतामद्यानयिष्यामीत्येवंनिश्चितमानसः ॥ ११ ॥ अथैवंनिश्चयंतस्यज्ञा
त्वाश्रीरघुनंदनः ॥ लक्ष्मणेनसहभ्रात्रासीतयासहनौस्थितः ॥ १२ ॥ आविर्बभूवसहसाकर्णधारेणसंयुतः ॥ आविर्भूयसमुद्रेतंक
र्णधारोऽब्रवीन्नृपम् ॥ १३ ॥ किमर्थंयासिलंकांत्वंहत्वारावणमाहवे ॥ सीतांनीत्वामहाभ्रातायात्ययोध्यापुरीमयम् ॥ १४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

निवर्तस्वपुरींगच्छतद्वाक्यात्कुलशेखरः ॥ ततोविमानमायातंसमारूढन्ददर्शह ॥ १५ ॥ एवंनिरीक्ष्यतान्सर्वान्श्रुत्वाचतस्य भाषितम् ॥ निवर्तयामासनृपोपयोधेरंतरात्स्वयम् ॥ १६ ॥ जलाद्बहिःसमागत्यददर्शनिजवाहिनीम् ॥ तयानमस्कृतोराजातू ष्णींभुवनमाययौ ॥ १७ ॥ पौराणिकंसमभ्येत्यदृष्टंचित्रंन्यवेदयत् ॥ श्रुत्वाचित्रंद्विजःसोपिराजानमभ्यनंदयत् ॥ १८ ॥ तवभ क्त्यामहाराजसत्यंसत्यंनसंशयः ॥ समुद्रेप्रविशंतंत्वांज्ञात्वासभक्तवत्सलः ॥१९॥ स्वयंनिवारयामासदर्शयित्वात्मविग्रहम् ॥ धन्यो सित्वंमहाराजधन्येयंधरणीत्वया ॥ २० ॥ त्वद्भक्त्यायोगिदृश्योसौरामस्त्वद्दृक्पथंगतः ॥ इतिश्रुत्वाथवचनंपौराणिकसमीरितम्॥ ॥ २१ ॥ तदाबुबोधनृपतिःशौर्य्यावेशाच्चनिर्गतः ॥ पश्चात्तापंचकारोच्चैस्तदाज्ञातोनमेप्रभुः ॥ २२ ॥ शौर्य्यदुर्मददुष्टेनचित्ते नातोधिगस्तुमाम् ॥ इतिचिंतापरोराजातद्रूपंहृदिचिंतयन् ॥ २३ ॥ नियमंपूर्वमास्थायस्थितोवेश्मनिभक्तितः ॥ एवंसराजाध र्मात्माभक्तिमान्कुलशेखरः ॥ २४ ॥ कलावपिहरिंसाक्षादपश्यद्भक्तियोगतः ॥ २५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येकुलशे खरचरितंनामपंचाशत्तमःसर्गः ॥ ५० ॥ ॥ छ ॥ कुलशेखरमाहात्म्यमपरंपापनाशनम् ॥ वक्ष्याम्याश्चर्यजनकंसाधोर्भक्ति विवर्धनम् ॥ १ ॥ एकदामाघवेमासिशुक्लपक्षेनृपोत्तमः ॥ चतुर्दश्यांनृसिंहस्यप्रादुर्भावादिचेष्टितम् ॥ २ ॥ भक्त्यानुकारयामास राजाश्रीकुलशेखरः ॥ कश्चिद्धिरण्यकशिपुःकश्चित्प्रह्लादरूपधृक् ॥ ३ ॥ विप्रःकश्चिदुपाध्यायःसभाचैवतुतादृशी ॥ प्रह्लादशा सनंतादृक्प्रह्लादोक्तिस्तुतादृशी ॥ ४ ॥ सभास्तंभेनिलीयैकःस्थितोनृहरिरूपधृक् ॥ हस्तिपादतलेदानमग्नौनिक्षेपणंपुनः ॥ ॥ ५ ॥ सर्पदंशनकर्मादिकारयित्वाततःस्वयम् ॥ हिरण्यकशिपुःसोयंगृहीत्वाखड्गमुत्तमम् ॥ ६ ॥ प्रह्लादंतुकरे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

धृत्वावामेनैवतुपाणिना ॥ दक्षिणेनासिमुद्यम्यप्रह्लादंप्राहमंदधीः ॥ ७ ॥ क्वतेरामःक्वतेकृष्णःयद्बलान्नशृणोषिमे ॥ दर्शयाद्यनचे
न्मूढघातयामिनसंशयः ॥ ८ ॥ इत्युक्तःपितरंप्राहप्रह्लादोभक्तिमान्वचः ॥ तातक्वास्तेइतिपदंतवनोयुज्यतेहृदि ॥ ९ ॥ सर्व
दासर्ववर्तीसिरामःसर्वमयोमहान् ॥ तत्रायंयुज्यतेनैवप्रश्नस्तेइतिमेमतिः ॥ १० ॥ इत्युक्तःप्राहयद्येवंस्तंभेस्मिन्वर्ततेकिमु ॥ व
र्ततेसत्यमेवैतदुक्तःपुत्रेणदैत्यराट् ॥ ११ ॥ हस्तेनस्तंवंसंताडचक्वास्तेसंदर्शयाधुना ॥ एवंब्रुवंतंदैत्येंद्रंनिर्गत्यस्तंबतोबली ॥
॥ १२ ॥ नृसिंहरूपिजग्राहकराभ्यांलीलयापुनः ॥ भूमौनिपात्यहृदयंदारयामासवैनखैः ॥ १३ ॥ ममारचततःसाधुर्हिरण्यक
शिपुश्चयः ॥ नृसिंहरूपीजज्वालक्रोधेनमहतावृतः ॥ १४ ॥ हाहाशब्दोमहानासीत्तास्मिन्नद्भुतकर्मणि ॥ ततोराजासमुत्थायधूप
नीराजनादिभिः ॥ १५ ॥ संपूज्यनरसिंहंतंभक्तियुक्तेनचेतसा ॥ प्रह्लादंदर्शयामासततःशांतोबभूवसः ॥ १६ ॥ ऊचुःकेचिद
होद्वेषादनेनघातितःस्वयम् ॥ कर्णंकर्णेवदंतिस्मकातिचित्तत्रवैजनाः ॥ १७ ॥ राजापिश्रुत्वातांवार्तामेनेतानल्पचेतनात् ॥
तस्मिन्नेवाश्विनेमासिरामकीर्तनमद्भुतम् ॥ १८ ॥ राजातुकारयामासयथाविधिमहाधनैः ॥ नृसिंहचरितेयस्तुनृसिंहोभूद्द्विजो
त्तमः ॥ १९ ॥ दशरथःसएवात्रजाताअन्येन्यनामकाः ॥ कौशल्याकैकयीवाथसुमित्रामंथरातथा ॥ २० ॥ जानकीलक्ष्म
णश्चैवभरतश्चतथाविधः ॥ शत्रुघ्नश्चसुमंत्रश्चवसिष्ठाद्यामहर्षयः ॥ २१ ॥ एतेचान्येचरामस्यलीलयातत्स्वरूपिणः ॥ जन्मा
दियौवराज्यांतकथांतेवनवाससः ॥ २२ ॥ रामंप्रस्थानसमयेमिथ्यादशरथस्यच ॥ प्राणत्यागोबभूवाथमहाश्चर्यंप्रपश्यताम्
॥ २३ ॥ तेषामपिनृणांचित्तेविश्वासःसुमहानभूत् ॥ अहोसत्यंव्रतोगोप्यःपूतनारिष्टधेनुकान् ॥ २४ ॥ दुष्टानप्यनुकुर्वंतोजग्मुः ॥ ७६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीकृष्णसन्निधिम् ॥ अहोमाहात्म्यमेतत्तुभक्तेरेवनसंशयः ॥ २८ ॥ अनुकुर्वन्तदात्मानंप्राप्यमुक्तिंव्रजंतुयत् ॥ नास्तिभक्ते
रसाध्यंतुकिंचापिभुविवैनृणाम् ॥ २६ ॥ यइदंशृणुयाल्लोकेमाहात्म्यंश्रद्धयान्वितः ॥ सर्वान्कामानवाप्नोतिभक्तिंचपुरुषोत्तमे
॥ २७ ॥ इति श्रीभगवद्भक्तिमाहात्म्येकुलशेखरचरितंनामैकपंचाशत्तमःसर्गः ॥ ५१ ॥ अथान्यत्संप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्त
मम् ॥ शृण्वतांप्रीतिजननंकृष्णभक्तिप्रदायकम् ॥ १ ॥ एकारतिमतीनाम्नाब्राह्मणीदाक्षिणात्यजा ॥ पतिपुत्रविहीनासाधनिनी
धर्मवत्सला ॥ २ ॥ कदाचिद्भवनेतस्याःसायंकालेसमागतः ॥ साधुःश्रीकृष्णभक्तश्चबालगोविंदपूजकः ॥ ३ ॥ तंदृष्ट्वासास
मुत्थायहर्षिताप्रणनामतम् ॥ पाद्यमाचमनीयंचपानीयमुदकंशुचिः ॥ ४ ॥ अन्नंस्वादुददौतस्मैद्विजायातिथयेमुदा ॥ गृही
त्वासर्वमातिथ्यंविप्रःसंध्यामुपास्तवान् ॥ ५ ॥ बालगोविंदप्रतिमांबहिःसंस्थाप्यतत्पुनः ॥ निवेद्यसर्वंतुष्टावक्षणंनेत्रेनिमील्यच ॥६॥
भोजयित्वाथसंस्थाप्यस्वयंहिबुभुजेपुनः ॥ रतिमतीददर्शाथबालगोविंदमद्भुतम् ॥ ७ ॥ विप्रंप्राहातिभक्त्यासाकृतांजलिःपुरा
सती ॥ अहोब्रह्मकुलेजातापतिपुत्रविवर्जिता ॥ ८ ॥ कांगतिंयामिनोयानेकथंस्यात्सद्गतिर्मम ॥ अद्यावधिचपापानिजानं
त्यानकृतानिभो ॥ ९ ॥ धर्मंचापिनवाकार्यंपतिपुत्रशुचार्दिता ॥ अद्यैवबालगोविंदंदृष्ट्वामेमतिरुत्थिता ॥ १० ॥ एतादृ
शममुंदेवंकारयित्वास्ववेश्मनि ॥ संस्थाप्यपूजयिष्यामिइत्याज्ञांदेहिसुव्रत ॥ ११ ॥ तन्मंत्रंदेहिमेविप्रपूजोपकरणंवद ॥ शि
ल्पिनंचसमाहूयकारयामिगृहोत्तमम्॥ १२ ॥ तावत्त्वयात्रवस्तव्यंप्रसन्नोभवसुव्रत ॥ इत्युक्तोब्राह्मणःसोथप्राहतांब्राह्मणस्त्रियम् ॥१३॥
पूर्वकर्मविपाकेनविधवात्वमपुत्रिणी ॥ इदानींत्वंतुधन्यासियस्यास्तेमतिरीदृशी ॥ १४ ॥ दृष्ट्वेमंबालगोविंदंजातातेभक्तिरुत्तमा ॥ न

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मंत्रोनैवसामग्रीभक्त्यातुष्यतिकेशवः ॥ १५॥ सुप्रसन्नोददातीष्टंप्रेमरज्जुनियंत्रितः ॥ श्रीकृष्णायनमस्त्वेतद्गृहाणमंत्रमुत्तमम्॥१६॥ पतिपुत्रेयथाप्रेमतथास्यायदिकेशवे ॥ तदाशीघ्रंसगोविंदोददात्यभिमतंप्रभुः ॥ १७ ॥ तावत्तिष्ठामित्वद्भक्त्याशीघ्रमानयाशिल्पिनम् ॥ एवमुक्तारतिमतीशीघ्रमाहूयशिल्पिनम् ॥ १८ ॥ दर्शयामाससगोविंदंप्रतिमामीदृशींकुरु ॥ इत्याज्ञाप्यद्विजंचाथतर्पयित्वाधनांबरैः ॥ १९ ॥ विससर्जतदाविप्रंगोविंदंहृदिसंस्मरन् ॥ गतेविप्रेरतिमतीगोविंदप्रतिमांशुभाम् ॥ २० ॥ स्थापयामाससद्भक्त्यामहोत्सवपुरःसरम् ॥ एकपुत्रेवजननीतंबालमिवसर्वदा ॥ २१ ॥ कर्मणामनसावाचामुदापरिचचारसा ॥ बिभीतकफलैःसार्द्धमरिष्टफलमालया ॥ २२ ॥ अलंचकारगोविंदंदृष्टिदोषभयेनसा ॥ सर्वालंकरणैर्युक्तंमुखंकज्जललांछितम् ॥ २३ ॥ दृष्टिदोषोपशांत्यर्थंमातेवपुत्रवत्सला ॥ चकारशीतसमयेददावुष्णंतथौषधम् ॥ २४ ॥ रात्रौसातंतुगोविंदंसंस्थाप्यबालवद्धृदि ॥ आच्छाद्यांचलवस्त्रेणततःसुष्वापसर्वतः ॥ २५ ॥ मृत्काष्ठनिर्मितंचैवबालक्रीडनकंतुसा ॥ तस्याग्रेस्थापयित्वासाक्रीडयंतीजहर्षच ॥ २६ ॥ प्रातःकालादिनाचैवतैलाभ्यंगादिकंतदा ॥ आह्लादभाषणंवापिकुर्वतीसामुमोदह ॥ २७ ॥ एवंतुपुत्रबुद्ध्यासापूजयंतीजगत्पतिम्॥ गतेकतिपयेकालेशृण्वंतीचरितंहरेः ॥२८॥ श्रीमद्भागवतंनामपुराणंद्विजविश्रुतः ॥ नवनीतस्यचौर्यंतुयशोदायाविभीषिका ॥२९॥ पलायनंभगवतोमातुस्तस्यानुधावनम् ॥ श्रीकृष्णग्रहणंचैवमात्राताडनमेवच ॥ ३० ॥ मृद्भक्षणंततःश्रुत्वापुत्रस्नेहेनतत्रसा ॥ ततोयशोदयादाम्नाबद्धःकृष्णोदृढंरुषा ॥ ३१ ॥ श्रुत्वात्वेवंरतिमतीहाहाकृष्णेतिभाषिणी ॥ मूर्च्छितापतिताभूमौप्राणांस्तत्याजतत्क्षणात् ॥ ३२ ॥ ततोहाहाकृताःसर्वेजनास्तत्रसमागताः ॥ कश्चिदुत्थापयामासनोत्तस्थौसामृतायतः ॥ ३३ ॥ कृष्णप्रेमव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शादेषामृतारतिमतीपुनः ॥ जगामकृष्णसान्निध्यंयशोदेवनसंशयः ॥ ३४ ॥ नयोगोनतपोध्यानंनज्ञानंनापिसत्क्रिया ॥ प्रेम्णार
तिमतीमुक्ताभक्तेर्माहात्म्यतोध्रुवम् ॥ ३५ ॥ बलिगेहेगतोविष्णुर्हर्तुंवामनरूपधृक् ॥ तंदृष्ट्वाबलिपुत्रीसामनस्येवमचिंतयत् ॥ ३६॥
अहोतिसुंदरोबालोधन्यामातानसंशयः ॥ यद्येवंतनयोमेस्यात्पाययिष्यामिस्वंस्तनम् ॥ ३७ ॥ कृतार्थास्यामितिमुदासंकल्पमन
साकृतम् ॥ सैवागत्यव्रजेजातापूतनाबालघातिनी ॥ ३८ ॥ पाययित्वास्तनंद्वेषाद्यशोदागतिमाययौ ॥ एवंद्वेषादपिगतामुक्तिंराक्षस
कन्यका ॥ किंपुनर्ब्राह्मणीपुण्याकृष्णप्रेमपरायणा ॥ ३९ ॥ इति श्रीभगवद्भक्तिमाहात्म्येरतिमतीचरितंनामद्विपंचाशत्तमःसर्गः॥५२॥
पुरुषोत्तमपुरेराजाबभूववैष्णवोत्तमः ॥ शांतोदांतोदयायुक्तोभक्तिमान्पुरुषोत्तमे ॥ १ ॥ एकदासनृपोगेहेचिक्रीडातेचतुष्पदीम् ॥ अ
स्मिन्नेवक्षणेश्रीमज्जगन्नाथस्यपूजकः ॥ २ ॥ पूजांकृत्वातत्प्रसादभूतांमालांकरेणच ॥ समादायगतोराज्ञेदातुंतस्थौततोनृपः ॥ ३ ॥
क्रीडासक्तेनमनसावामंहस्तंप्रसारयत् ॥ मालांगृहीतुमुद्युक्तःसतदापूजकोद्विजः ॥ ४ ॥ नवार्तानददौमालांतदातस्मैमहीभुजे ॥ अ
यंराज्यमदाविद्धोयद्वामेनेहपाणिना ॥ ५ ॥ मालांगृहीतुमुद्युक्तस्तस्मान्नास्मैददाम्यहम् ॥ इतिनिश्चित्यसगतःपूजकोनिजमंदिरम्॥६॥
राजास्मृत्वापितंविप्रंविवृत्तमपमानतः ॥ पश्चात्तापेनमहताखिन्नोभूदातिचिंतया ॥ ७ ॥ तस्माच्चद्यूतमक्षंचमहाशोकपरोभवत् ॥ जग
द्धन्नात्मनात्मानंनलेभेशर्मकुत्रचित् ॥ ८ ॥ जगन्नाथप्रसादस्यमालायाअवमानतः ॥ दंडःसमुचितोमेद्यइतिसंचिंत्यभूपतिः ॥ ९ ॥
स्वहस्तंदक्षिणंछेत्तुंमनश्चक्रेनृपोत्तमः ॥ पिशाचव्याजतोहस्तंस्वयंवैछेदयाम्यहम् ॥ १० ॥ इतिनिश्चित्यमनसामहाशोकाकुलोभ
वत् ॥ तंदृष्ट्वातिकृशंदीनंभृत्योराज्ञोतिवल्लभः ॥ ११ ॥ बद्धांजलिपुटोभूपंपप्रच्छरहसिस्थितः॥ महाराजकुतश्चिंताभवेयंकाद्यर्क।रि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

णी ॥ १२ ॥ ब्रूहिमेयादियोग्यंस्यात्तस्योपायंकरोम्यहम् ॥ इतिश्रुत्वासनृपतिस्तंप्राहकपटाद्वचः ॥ १३ ॥ अहोरात्रंसमागत्य
पिशाचोतिभयंकरः ॥ शयानंदंडहस्तोमांबिभीषयतिनित्यशः ॥ १४ ॥ तस्मान्मेचिंतयानैवनिद्रानापिसुखंक्वचित् ॥ अद्यत्वंश
यनागारेतिष्ठतावत्स्वपाम्यहम् ॥ १५ ॥ तदाद्रक्ष्यसितंप्रेतंयेनेयंममदुर्दशा ॥ इत्युक्तःसतुभृत्योवैराजपर्यंकसन्निधौ ॥ १६ ॥
निष्कोशखड्गमादायतस्थौतत्परमानसः ॥ अथार्द्धरात्रसमयेसभृत्योनिद्रयाकुलः ॥ १७ ॥ किंचिदुपविशन्नेवसुष्वापाथनृपस्तदा ॥
स्वशय्यायांनिजाकारंवस्त्रंसंस्थाप्ययत्नतः॥ १८॥ बहिरागत्यभित्तेस्तुगवाक्षद्वारमागतः॥ दक्षहस्तेनदंडेनताडयामासतंनृपम्॥ १९॥
निजाकारंस्वशय्यायामथोत्तस्थौसपुरुषः ॥ ददर्शहस्तदंडेनताडयंतंनृपासनम् ॥ २० ॥ खड्गमुद्यम्यभृत्योपिकरंचिच्छेदसत्वर
म् ॥ तताश्छिन्नेस्वहस्तेतुराजाचगृहमागतः ॥ २१ ॥ दृष्ट्वातंछिन्नहस्तंतुसभृत्योभूपतेर्भयात् ॥ वेपमानोग्रतोनैवबद्धांजलिपुटः
स्थितः ॥ २२ ॥ तमाहभूपतिस्तत्रनापराधोस्तिकश्चन ॥ मयैवैतत्कृतंसर्वंस्वहस्तच्छेदनायभोः ॥ २३ ॥ जगन्नाथप्रसादस्तुमो
हान्नानेनपाणिना ॥ याचितोऽतस्तुदंडोयंहस्तच्छेदोमयाकृतः ॥ २४ ॥ माभैस्त्वंममभृत्योसिप्रियःप्राणसमःसखा ॥ इत्युक्त्वासोऽ
वशिष्टांतुनिन्येतेननिशांनृपः ॥ २५ ॥ अथतस्मिन्क्षणेरात्रौददर्शपूजकोद्विजः ॥ जगन्नाथंकृपासिंधुंभाषमाणमिदंवचः ॥ २६ ॥
अहोसनृपतिस्तस्मिन्दिनेवदवमानिता ॥ ममपालाततस्तस्यपश्चात्तापोमहानभूत्॥ २७ ॥ प्रसादात्तस्यतज्ज्ञ।तंवामहस्तप्रसारणम्॥
इदानींसतुतद्दोषाच्छेदयामासदक्षिणम् ॥ २८ ॥करंस्वकीयंनृपतिर्मद्भक्तोतीवमत्प्रियः ॥ अतस्त्वंप्रातरेवाशुप्रसादंचस्रजंमम॥ २९॥
गृहीत्वादेहिभूपायततःस्वस्थोभविष्यति ॥ यदाछिन्नेनहस्तेनमत्प्रसादंगृहीष्यति ॥ ३० ॥ तदातस्मिन्क्षणेतस्यहस्तःसम्यग्भ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विष्यति ॥ तस्ययद्धस्तखंडंतुवर्ततेखलुतद्गृहे ॥ ३१ ॥ तदानायित्वावाटयांमेरोपयाशुततःपुनः ॥ दमनोमेप्रिये(वृक्षोभविष्य
तिनसंशयः ॥ ३२ ॥ एवमुक्तस्ततोदेवपूजकःसमुत्थितः ॥ प्रातःप्रसादमादाययथौराजनिकेतनम् ॥ ३३ ॥ राजापितंद्वि
जंदृष्ट्वासमुत्थायातिभक्तितः ॥ प्रणनामततःसोपिस्वप्नमुक्त्वाथपूजकः ॥ ३४ ॥ मालांप्रसादंप्रददौकराभ्यांनृपतिस्तदा ॥ गृही
तुमुत्थितोनत्वाहस्ताभ्यांदक्षिणस्तदा॥ ३५॥ करःप्राग्वदभूत्तस्यजगृहेतेनतांस्रजम् ॥ ततःसर्वंप्रमुदिताहृष्ट्वातत्परमाद्भुतम्॥३६॥
पूजकोनृपतेःपाणिंछिन्नंनीत्वाययौगृहम् ॥ वाटयांसरोपयामासततोभूद्दमनस्तरुः ॥ ३७ ॥ तत्पत्रेणचपुष्पेणपूजितःपुरुषोत
मः ॥ अद्यापिवरदोभूत्वाददात्यभिमतंनृणाम् ॥ ३८ ॥ तस्माद्भक्तेःसमंनैवकिंचिदन्यत्प्रसादनम् ॥ विद्यतेश्रीहरेरेतज्ज्ञात्वाभ
क्तिसमाचरेत् ॥ ३९ ॥ इत्येतत्कथितंभक्तेर्माहात्म्यंपरमाद्भुतम् ॥ श्रद्धयेदंनरःश्रुत्वाभक्तिप्राप्नोत्यनुत्तमाम् ॥ ४० ॥ ॥
इति श्रीभगवद्भक्तिमाहात्म्येपुरुषोत्तमपुरराजचरितंनामत्रिपंचाशत्तमःसर्गः ॥ ५३ ॥ अथान्यत्संप्रवक्ष्यामिभक्तिमाहात्म्यमु
त्तमम् ॥ महदाश्चर्यजनकंमहाभक्तिप्रवर्द्धनम् ॥ १ ॥ पश्चिमेपुष्करप्रांतेकर्मानाम्नेतिविश्रुता ॥ ब्राह्मणीपतिपुत्राभ्यांरहिता
बंधुवर्जिता ॥ २ ॥ निर्धनापिशुभाचाराभिक्षामात्रपरायणा ॥ एकदापर्यटंतीसाभिक्षार्थंब्राह्मणीसती ॥ ३ ॥ श्री
जगन्नाथमाहात्म्यपुराणंशुश्रुवेक्वचित् ॥ तत्रगत्वाजगन्नाथंदृष्ट्वासर्वेतिपापिनः ॥ ४ ॥ मुच्यंतेपापराशिभ्यःसत्यंसत्यंनसंशयः ॥
किंचित्तत्रतुयःकश्चिदन्नंतस्मैन्यवेदयेत् ॥ ५ ॥ भुक्त्वान्नंपरमंप्रीत्यातस्मैतुष्यतिवैहरिः ॥ इहभुक्त्वापरान्भोगानंतेप्राप्नोतिसद्ग
तिम् ॥ ६ ॥ इतिश्रुत्वापुराणंसामाहात्म्यंभगवद्विभोः ॥ तत्रैवगत्वास्थास्यामियावज्जीवंव्यचिंतयत् ॥ ७ ॥ तावद्द्यामियर्तिकाचि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

छुप्स्यामिभिक्षयान्वहम् ॥ सर्वंनिवेद्यभोक्ष्यामिव्रतमेतत्कृतंमया ॥ ८ ॥ एवंनिश्चित्यमनसाभिक्षाटनपरायणा ॥ प्राप्तकालंतदारभ्य
निवेद्यहरयेपुनः ॥ ९ ॥ स्वयंसाबुभुजेनित्यंभाक्तिभावपरायणा ॥ अथैकस्मिन्दिनेश्रीमज्जगन्नाथंदिदृक्षवः ॥ १० ॥ आगतावैष्ण
वास्तत्रमार्गक्रमवशादतः ॥ सद्ग्रामीणाअपिजनास्तैःसाकंगंतुमुद्यता ॥ ११ ॥ सातिकर्मेतिविख्याताब्राह्मणीवैष्णवैःसह ॥ जगाम
श्रीजगन्नाथंद्रष्टुंभक्तिपरायणा ॥ १२ ॥ तत्रगत्वाजगन्नाथंदृष्ट्वाहृष्टाबभूवसा ॥ भुक्त्वामृतसमंतत्रप्रसादान्नंमुमोदसा ॥ १३ ॥ एवं
दिनक्षयेजातेनस्वार्थंसाययाचवै ॥ अतोन्नंहरयेनैवददौभुक्तंस्वयंपुनः ॥ १४ ॥ तृतीयेदिवसेसातुसंस्मारनिजकर्मतत् ॥ ततोति
चिंतयाविष्टामहाशोकपराभवत् ॥ १५ ॥ आहस्वमनसिधिङ्मांयददत्त्वातुविष्णवे ॥ भुक्तंदिनद्वयंचात्रतस्मादद्यकरोमिकिम्॥ १६॥
इतिसंचिंत्यमनसाकश्चित्पप्रच्छवैष्णवम् ॥ किमद्याहंकरिष्यामितद्ब्रूहिभगवन्मम ॥ १७ ॥ निवेद्यहरयेचान्नंभोक्तव्यमितिमेव्र
तम् ॥ तदन्नंदिनयुग्मंतुभुक्तंनैवेद्यभोजनात् ॥ १८ ॥ अतःपरमदत्त्वान्नंजगन्नाथायविष्णवे ॥ नभोक्तुमुत्सहेतस्माद्यथायोग्यंवदस्व
मे ॥ १९ ॥ इतिश्रुत्वावचस्तस्यावैष्णवोवाक्यमब्रवीत् ॥ यद्येवंतेदृढाभक्तिस्तदानैवास्तिदूषणम् ॥ २० ॥ कुरुष्वनिजहस्तेनपा
कंसंभोज्यकेशवम् ॥ स्वयंभुंक्ष्वनसंदेहोभक्त्यातुष्यतिवैहरिः ॥ २१ ॥ इतिश्रुत्वावचस्तस्यकर्मानाम्नीतिहार्षिता ॥ भिक्षयातंडुला
दीनिसमादायजलस्थले ॥ २२ ॥ पक्त्वानित्यंनिवेद्यास्मैबुभुजेभक्तितत्परा ॥ एकस्मिन्दिवसेसातुमहाभोगंददर्शह ॥ २३ ॥ दृष्ट्वा
सर्वरसोपेतंपरमान्नमनल्पकम् ॥ मनसाचिंतयामाससाचाचारपरायणा ॥ २४ ॥ अहोसर्वरसोपेतमन्नंभुक्तवतेपुनः ॥ ददाम्यहंकद
न्नंवैकथंभोक्ष्यत्ययंप्रभुः ॥ २५ ॥ अतोहंप्रातरुत्थायकृत्वान्नंकृसरंद्रुतम् ॥ भोजयामिसदाप्रातःक्षुधयाभोक्ष्यतिप्रभुः ॥ २६ ॥ वि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चार्य्यैवंह्यदानित्यंप्रातरुत्थायसापुनः ॥ अकृत्वाशौचमस्नात्वामसंमार्ज्यस्थलंपुनः ॥ २७ ॥ मृत्पात्रेकृसरान्नंवैशैघ्यात्संपाद्यभ
क्तितः ॥ निवेद्यहरयेपश्चात्स्वयंस्नानंचकारसा ॥ २८ ॥ स्नात्वादृष्ट्वाजगन्नाथंपश्चात्तद्बुभुजेस्वयम् ॥ एवंभक्तिपरासातुकृसरान्नंददौ
मुदा ॥ २९ ॥ तद्भक्तिवशगोनित्यंजगन्नाथःकृपामयः ॥ बुभुजेकृसरान्नंतुसतस्याअंतरिक्षगः ॥ ३० ॥ एवंगतेषुका
लेषुकदाचित्कोपिवैष्णवः ॥ कर्माग्रहेसमायातःकृसरान्नार्पणक्षणे ॥ ३१ ॥ अनाचारेणतंदृष्ट्वाहरेरन्नार्पणंसतु ॥ जगर्हकर्म्मसा
धुःसआचारंचाप्यशिक्षयत् ॥ ३२ ॥ किमिदंकुरुषेमूढेह्यनाचारनिवेदनम् ॥ नेदंभोक्ष्यतिदेवेशस्तस्मादाचारतोर्पय ॥ ३३ ॥ उष
स्युत्थायसंमार्ज्यगोमयेनोपलिप्यच ॥ गृहंतत्रशुचिःस्नात्वापक्त्वाभक्ष्यंसमर्पय ॥ ३४ ॥ इत्युक्त्वासगतःसाधुःकर्माचिंतामवा
पसा ॥ अहोद्यावधियदन्नंहरयेऽन्नंमुदामया ॥ ३५ ॥ नभुक्तंतत्तुहरिणाममानाचारदूषणम् ॥ धिगस्तुमांततोमूढांक्षम्यतांमेहरिःप्र
भुः ॥३६॥ इतिनिर्भर्त्स्यचात्मानमन्यस्मिन्दिवसेतुसा ॥ स्नात्वावैचार्द्रवस्त्रेणसंपाद्यान्नंशुचौशुचिः ॥३७॥ बहुप्रकारंतद्भक्त्याजग
न्नाथायचार्पयत् ॥ अथागत्यहरिस्तस्याबुभुजेभक्तियंत्रितः ॥ ३८ ॥ परंतुतस्याआचारकरणेकष्टदर्शनात् ॥ स्वयमुद्विग्नचि
त्तोभूज्जगन्नाथःकृपामयः ॥ ३९ ॥ स्वमठेपूजकैर्दत्तमन्नंनैवाददत्प्रभुः ॥ यतोमहत्प्रणालीतोवारिनैवागमद्बहिः ॥ ४० ॥ किंचो
च्छिष्टंमुखेलग्नंदर्शयामासपूजकान् ॥ जगन्नाथस्ततःसर्वैर्दृष्ट्वातत्परमाद्भुतम् ॥ ४१ ॥ तत्रतेपूजकाश्चिंतांप्राप्नुवंतिमहत्तराम् ॥
बुभुक्षिताःस्थितारात्रौददृशुःस्वप्नमुत्तमम् ॥ ४२ ॥ जगन्नाथःसमागत्यभाषतेस्मानिदंवचः ॥ अहोद्यान्नंनभुक्तंयच्छृणुतस्यतुकार
णम् ॥ ४३ ॥ कर्मानाम्नीतिमद्भक्त्याब्राह्मणीमत्परायणा ॥ तयानिवेदितंनित्यंकृसरान्नमुखोस्म्यहम् ॥ ४४ ॥ भुंजानोती

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वसंतुष्टस्तद्भक्त्यानात्रसंशयः ॥ तान्तुकाश्चिदुवाचाथमूढेनाचारतःकथम् ॥ ४५ ॥ कृसरान्नंददास्येतन्नभोक्ष्यातिहरिःस्वयम् ॥
तस्मादाचारपूर्वंहिकृत्वान्नंहरयेर्पय ॥ ४६ ॥ इतितस्यवचःश्रुत्वाकर्माचातिविदुःखिता ॥ महाकष्टेनसंपाद्यनैवेद्यंमेसमर्पयत् ॥
॥ ४७ ॥ तन्नैवेद्यमहंभुक्त्वातद्दुःखेनातिदुखितः ॥ युष्माभिर्दत्तमप्यन्नंनस्पृष्टंपाणिनामया ॥ ४८ ॥ मत्तपोद्विग्नमनसाविस्मितं
मुखमार्जनम् ॥ ततउच्छिष्टमन्नंमेलग्नमेतद्धिवर्तते ॥ ४९ ॥ तस्माद्भवंतःशृण्वंतुसंभोक्ष्यामिनिजेप्सितम् ॥ साकर्मातीवमेभक्त्या
यथापूर्वंयदृच्छया ॥ ५० ॥ कृसरान्नंददात्येषानतुक्लिश्यतुमत्कृते ॥ अद्यारभ्यैषनियमोममसर्वैर्विमृश्यताम् ॥ ५१ ॥ कर्मायाःकृस
रान्नंतुपूर्वंभोक्ष्याम्यहंमुदा ॥ ततःपरंभवद्दत्तमन्येषांननिवेदितम् ॥ ५२ ॥ भोक्ष्याम्यत्रनसंदेहस्तस्मात्कुरुमदीरितम् ॥ उक्तवान्यः
सदाचारंतस्मैतेनसमंपुनः ॥ ५३ ॥ भवंतोयांतितद्गेहेकर्मांसंबोधयंतुवै ॥ कृसरान्नंयथापूर्वंकृत्वामह्यंददातुसा ॥ ५४ ॥ ततो
हंपरितुष्टःस्यांभोक्ष्यामिभवदर्पितम् ॥ एवंदृष्ट्वातुतेस्वप्नेवदंतंपुरुषोत्तमम् ॥ ५५ ॥ प्रातरुत्थायचैकत्रभुक्त्वागत्वातदालयम् ॥
तंवैष्णवंसमादायसदाचारप्रवादिनम् ॥ ५६ ॥ कृत्वाग्रतस्तुतेसर्वेकर्मांप्राहुर्विनीतवत् ॥ कर्मेदेविनमस्तुभ्यंधन्यासित्वंशुचिव्र
ते ॥ ५७ ॥ त्वदर्थंखिद्यतेदेवःश्रीमान्वैपुरुषोत्तमः ॥ नैवेद्यंत्वंयथापूर्वंदत्तवत्यसिसुव्रते ॥ ५८ ॥ तथैवदेहिदेवायमाचिरंकुरुकष्टद
म् ॥ त्वत्क्लेशात्कष्टमाप्नोतिजगन्नाथोमहाप्रभुः ॥ ५९ ॥ तस्मात्त्यजश्रमंभद्रेनिवेदययथारुचि ॥ अनेनोक्तंतुयत्पूर्वमाचारादन्नम
र्पय ॥ ६० ॥ तदभक्तस्यजानीहिभक्तौनाचारचिंतनम् ॥ तवान्नंप्रथमंभुक्त्वाकृसरंवैततःपरम् ॥ ६१ ॥ अन्यार्पितंप्रसादंतुग्र
हीष्यतितदाहरिः ॥ अद्यारभ्यततस्त्वंतुस्वेच्छयान्नंविधायच ॥ ६२ ॥ समर्पययथापूर्वंजगन्नाथायभक्तितः ॥ इत्येतदर्थमाया

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तावयंसर्वैतवाश्रमम् ॥ ६३ ॥ अद्यारभ्यकुरुष्वैतत्प्रार्थयामोवयंमुहुः ॥ इतिश्रुत्वावचस्तेषांकर्मादेव्यतिहर्षिता ॥ ६४ ॥ उवा चवचनंतांस्तुप्रणम्यविहितांजलिः ॥ अहोनजानेहंकिंचिदाचारंवातथापरम् ॥ ६५ ॥ भवादृशोक्तमेवाहंश्रुत्वाकारिषमर्चनम् ॥ अतःपरंभवंतस्तुयद्वदंतिकरोमितत् ॥ ६६ ॥ इत्युक्त्वासासमुत्थायनैवेद्यस्यचसाधनम् ॥ कर्तुंव्यवसितासाध्वीकर्मादेव्यतिभ क्तितः ॥ ६७ ॥ पूर्ववत्कृसरान्नंसासम्पाद्यहरयेर्पयत् ॥ तेपिवैपूजकाविप्राःसमागत्यस्वमंदिरम् ॥ ६८ ॥ कृताह्निकाःसर्वे रसमन्नंसंपाद्यभक्तितः ॥ निवेदयामासुर्मुदाजगन्नाथायदृष्टवत् ॥ ६९ ॥ यथापूर्वंसजग्राहतत्सर्वंपुरुषोत्तमः ॥ मठप्रणालिका द्वाराद्बहिर्जातंजलंतदा ॥ ७० ॥ दृष्ट्वामुमुदिरेसर्वेयथापूर्वंचपूजकाः ॥ एवंप्रभावःकर्मायाभक्तेर्वैवर्णितोमया ॥ ७१ ॥ अद्या पितस्याःकृसरमत्तिपूर्वंजनार्दनः ॥ तस्माद्भक्तिर्हिसर्वेषांकर्मणांवैगरीयसी ॥ ७२ ॥ तयासंतोष्यवहुशस्तेरुःसंसारसागरम् ॥७३॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येकर्माचरितंनामचतुःपंचाशत्तमःसर्गः ॥ ५४ ॥ अथान्ययोःप्रवक्ष्यामिकन्ययोर्भक्तिचेष्टितम् ॥ यदाक र्ण्यनरोभक्तिंलभतेनात्रसंशयः ॥ १ ॥ एकग्रामेतुकन्यासीदपराराजपुत्रिका ॥ उभयोःपरमाप्रीतिर्नृपजासेवनीपरा ॥ २ ॥ एकदा तत्रकोप्यासीद्वैष्णवोतीवभक्तिमान् ॥ तंद्रष्टुंराजमातातुकन्याभ्यांसहिताययौ ॥ ३ ॥ तत्रगत्वाथसंपूज्यवैष्णवंभक्तितत्परा ॥ प्रण म्यचलितागेहंराज्ञीकन्याद्वयंतथा ॥ ४ ॥ वैष्णवंतंतुविज्ञायप्रार्थयामासभूरिशः ॥ पूजार्थंदेहिमेदेवंगुरोसाधोनमोस्तुते ॥ ५ ॥ इतिश्रुत्वातयोर्वाक्यंसएववैष्णवोत्तमः ॥ शिलाखंडद्वयंताभ्यांकन्याभ्यांप्रददौहसत् ॥ ६ ॥ आहनामतयोःसाधुःशिलापिष्ठेतिहा सितः ॥ तेउभेभक्तितस्तौद्वौशिलाखंडौप्रगृह्यच ॥ ७ ॥ प्रणम्यतंगुरुंसाधुंसमागत्यनिजालये ॥ पूजयामासतुस्तेद्वेकन्येभक्त्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शिलाद्वयम् ॥ ८ ॥ तद्भक्त्याभगवांस्तत्रसर्वव्यापीनिरंतरम् ॥ प्रतिजग्राहपूजांतांताभ्यांनिष्कामतःकृताम् ॥ ९ ॥ अत्रोतिहासमुभयोःप्रत्येकंकथयाम्यहम् ॥ ग्रामाधीशस्यकन्यायाराजपुत्र्यास्तथैवसः ॥ १० ॥ ग्रामाधीशस्यदायादःशत्रुभूतस्तुवैकदा ॥ बलेनमहतायुक्तःसमागत्याथतद्गृहम् ॥ ११ ॥ सर्वंलुंठितवांस्तत्रकन्यायाअपिसाशिला ॥ मंजूषायांस्थितायत्रसापितेनचलुंठिता ॥ १२ ॥ ग्रामाधीशादयःसर्वेधनशोकेनदुःखिताः ॥ राजद्वारंययुस्तस्मैनिवेदयितुमातुराः ॥ १३ ॥ साकन्यागृहमध्येतुतामदृष्ट्वानिजांशिलाम् ॥ शोकार्ताप्ररुरोदाथत्यक्त्वाहारादिकाःशुचा ॥ १४ ॥ पित्रामात्राबंधुवर्गैर्बोधितापिदृढव्रता ॥ नस्वीचकारपानीयमपिचान्नस्यकाकथा ॥ १५ ॥ ततस्तुबांधवाःसर्वेतामूचुःकन्यकांपुनः ॥ गच्छतस्यगृहंत्वंतुतामानयशिलांनिजाम् ॥१६॥ नोचेदन्योनास्तियत्नःकश्चित्तवशिलांप्रति ॥ इतिश्रुत्वावचस्तेषांसाकन्यातीवहर्षिता ॥ १७ ॥ शूद्रींकांचित्समादाययथौदायादमंदिरम् ॥ दायादश्चापितांद्वारिन्यवारयतयत्नतः ॥ १८ ॥ किमर्थमागताचात्रवदमागच्छमंदिरम् ॥ इतिश्रुत्वावचस्तस्यदायादस्यातिनिष्ठुरम् ॥ १९ ॥ उवाचवचनंकन्यादेवंमेनीतवानसि ॥ तंदेहिमेतदर्थंतेद्वारेहंसमुपागता ॥ २० ॥ इतिश्रुत्वावचस्तस्यादायादःपुनरब्रवीत् ॥ मिथ्यापाखंडमेतत्तेगच्छमूढेगृहंस्वकम् ॥ २१ ॥ नोचेद्देवोस्तिसत्यस्तेतंसमाहूयतेंतिकम् ॥ आगमिष्यतितंनीत्वागमिष्यसिस्वमंदिरम् ॥ २२ ॥ इतिश्रुत्वावचस्तस्यकन्याऽन्नाहारतःकृशा ॥ रुरोदार्तस्वरेणैवव्याजहारपुनःपुनः ॥ २३ ॥ ततःसभगवांस्तत्रमंजूषायांस्थितःप्रभुः ॥ सामंजूषासमुत्पत्यकन्याग्रेसमुपागता ॥ २४ ॥ तांदृष्ट्वानिजमंजूषांसामुमोददृढव्रता ॥ गृहीत्वाचलितागेहमथतत्रातिपामरम् ॥ २५ ॥ दायादःप्रत्युवाचाथकिमत्रास्तीतिदर्शय ॥ तदाकर्ण्यतुसाशीघ्रंदर्शयामासतांशिलाम् ॥२६॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दृष्ट्वाशिलांतुदायादोनिवृत्तःस्वगृहंगतः ॥ साकन्यापिशिलांनीत्वासमायातापितुर्गृहम् ॥ २७ ॥ संपूज्यचाशिलाभित्तांनिवे
द्यान्नंततःस्वयम् ॥ उपोषिताहिसाकन्याबुभुजेप्रीतमानसा ॥ २८ ॥ एवंप्रभावःकन्यायावक्ष्येराजसुताकथाम् ॥ राजकन्यापितांय
त्नाच्छिलांसंपूज्यप्रेमतः ॥ २९ ॥ तस्यैपितृगृहेकालेविवाहसमयेपिता ॥ कारयामासनृपतेःपुत्रेणपरमादरात् ॥ ३० ॥ विवाहमथ
तांपत्नींसचादायगृहंययौ ॥ निन्येतत्रापिसाकन्याशिलाभित्तांनवैजहौ ॥ ३१ ॥ मंजूषायांतुसंस्थाप्यधृत्वास्वाशिबिकोपरि ॥ आगता
पतिगेहेपिराजपुत्र्यतिभक्तितः ॥ ३२ ॥ शिल्लापिल्लेतिनाम्नावैपूजयंतीसदाहरिम् ॥ एवंगतेषुकालेषुकदाचिद्दैवयोगतः ॥ ३३ ॥
पूजयंतींशिलाखंडंपतिरेवंददर्शह ॥ पप्रच्छकिमिदंकांतेकरोषिकथयस्वनः ॥३४॥ श्रुत्वैतत्प्राहतंस्मित्वादेवपूजांकरोम्यहम् ॥ अने
नैवतुसर्वेषामैहिकामुष्मिकंसुखम् ॥ ३५ ॥ इतिश्रुत्वावचस्तस्याश्चुकोपसनृपात्मजः ॥ अज्ञातपूजानामासौद्वितीयइवनास्तिकः ॥
॥ ३६ ॥ पादेनपूजासामग्रींचिक्षेपसशिलांतदा ॥ ततःसराजतनयाहाहाकृत्वारुरोदह ॥ ३७ ॥ ततोधिकतरःक्रुद्धोराजपुत्रोतिमंदधीः ॥
स्वयमुत्थायतांसर्वांशालग्रामशिलांतदा ॥३८॥ गृहद्वारिसरिन्मध्येजलेचिक्षेपकोपतः ॥ साद्दृष्ट्वातुजलागाधेक्षिप्तंदेवंनृपात्मजा ॥३९ ॥
उद्बंधनादिनामर्तुमुपचक्रेदृढव्रता ॥ ततोनिवारयामासबांधवामरणोन्मुखीम् ॥ ४० ॥ तांराजतनयांप्रोचुर्दास्यामस्तेशिलांतुताम् ॥
ततोनिवृत्तामरणात्प्राप्तकामानिजांशिलाम् ॥ ४१ ॥ अगाधेपतितांतांतुज्ञात्वासर्वेपराङ्मुखाः ॥ यत्रतत्रगतास्सर्वेसाकन्यैकारुरो
दह ॥ ४२ ॥ एवंदिनद्वयंयातंतस्याअन्नादिकंविना ॥ मरणेकृतसंकल्पाशिलाखंडंविनासती ॥ ४३ ॥ तृतीयेदिवसेप्राप्तेपतिस्त
स्याःसमागतः ॥ निष्कास्यखड्गंमूढात्मात्रासयामासनिष्ठुरम् ॥ ४४ ॥ किमिदंखिद्यसेमूढेमपद्यनकरिष्यसि ॥ मदुक्तंपश्यमेखड्गंह

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

न्मित्वांनात्रसंशयः ॥ ४५ ॥ इतिभर्तृवचःश्रुत्वाप्रहस्यसहसैवसा ॥ अहोस्माकंतुकर्तव्यंयत्तदार्य्यकृतंत्वया ॥ ४६ ॥ मर्तव्यमेव
तंदेवंविनानास्त्यत्रसंशयः ॥ तद्भवद्भिर्विनायत्नंममसंपादितंस्वयम् ॥ ४७ ॥ इतिश्रुत्वावचस्तस्याःपत्न्याःसराजपुत्रकः ॥ चिंतया
मासमनसाकिंकरोमिततःपरम् ॥ ४८ ॥ मरणेकृतसंकल्पाशिलाखंडंविनाकुधीः ॥ कथमेवशिलाप्राप्तिर्भविष्यतिकरोमिकिम्॥४९॥
इतिनिश्चित्यतांस्नेहात्पुनराहनृपात्मजः ॥ शिलागाधेजलेक्षिप्ताकथंप्राप्स्यसितांशुभे ॥ ५० ॥ गृहाणान्यांशिलांमत्तःप्रसादंकुरुमत्कृ
ते ॥ इतिभर्तृवचःश्रुत्वासाराजतनयाब्रवीत् ॥ ५१ ॥ निर्भयागतशोकावैमरणेकृतनिश्चया ॥ स्वामिन्प्रसीदमेद्यत्वंयद्ब्रवीमिकुरुष्व
तत् ॥ ५२ ॥ स्वयंघातयमांत्वंवानयतत्रजलाशये ॥ निमज्याहंकरिष्यामिप्राणत्यागंशिलांविना ॥ ५३ ॥ कथंचिदपितेगेहेनावस्था
नंममाधुना ॥ श्रुत्वैतद्वचनंसोपितामुवाचव्रजाधुना ॥ ५४ ॥ नाहंत्वांघातयिष्यामिकुरुतत्रयथारुचि ॥ ततःसाराजकन्यावैजनैःक
तिपयैर्वृता ॥ ५५ ॥ स्नानव्याजेनवव्राजनदीतीरेऽतिगोपिता ॥ वाहनान्निर्गतासद्योजगामागाधवारिणि ॥ ५६ ॥ स्मरंतीतंनिजंदेहे
शिल्लपिल्लहरिंमुदा ॥ अथांतरेतुभगवान्ज्ञात्वातस्यादृढांमतिम् ॥ ५७ ॥ मंजूषाशिल्लपिल्लस्यपादलग्नाचकारह ॥ ततःपादेतुसंल
ग्नेकिमिदंकिमिदंत्विति ॥ ५८ ॥ गृहीत्वापाणिनातोयान्निष्कास्यैक्षतसुव्रता ॥ ददर्शतांतुमंजूषांजहर्षसाश्रुलोचना ॥ ५९ ॥
संस्थाप्यशिबिकायांतांमंजूषांसापुनर्द्रुतम् ॥ स्नात्वाहर्षाश्रुनयनासमायातास्वमंदिरम् ॥ ६० ॥ मर्तुंवारिप्रविष्टाहंतदामेमिलितो
हरिः ॥ पश्यनाथकृतार्थास्मिशिल्लपिल्लप्रसाधनम् ॥ ६१ ॥ स्वयंसोपिदुराचारान्निवृत्तोहरिकीर्तने ॥ कृत्वामतिंराजपुत्रो
पुत्रपौत्रैर्मुमोदह ॥ ६२ ॥ एवंतद्भक्तिसंसर्गाद्राष्ट्रजाभक्तियुतोभवत् ॥ विष्णुभक्तिप्रभावेनजग्मतुस्तौहरेःपदम् ॥ ६३ ॥ तस्मा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्यथातथाचित्तमेकाग्रंचेद्धरौभवेत् ॥ सनशोचेतकुत्रापिसत्यमेतन्नसंशयः ॥ ६४ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्ये
कन्याद्वयचरितंनामपंचपंचाशत्तमःसर्गः ॥ ५५ ॥ छ ॥ ॥ अथान्यत्संप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ परमाश्चर्य्य
जननंशृण्वतांलोमहर्षणम् ॥ १ ॥ आसीत्पांचालदेशेतुराजावैष्णवपूजकः ॥ सर्वदातिथिपूजायांनिरतःसत्यवाक्शुचिः ॥
॥ २ ॥ पतिव्रताप्रियातस्यप्राणेभ्योपिगरीयसी ॥ पत्युःप्रियकरीनित्यंप्राणैरपिधनैरपि ॥ ३ ॥ एकदातद्गृहेकोपिविष्णुभ
क्तःसमागतः ॥ शिष्यैश्चबहुभिःसार्द्धंवासार्थमंबुदागमे ॥ ४ ॥ दृष्ट्वातंवैष्णवंराजाभक्तिपूर्वंप्रणम्यच ॥ वासायाश्रममेकंतुब
हुन्नोदंददौनृपः ॥ ५ ॥ तत्रगत्वासभक्तस्तुप्रत्यहंसुखमास्थितः ॥ राज्ञासंमानितोनित्यमुत्तरोत्तरवृद्धितः ॥ ६ ॥ निवृत्तेऽ
म्बुदकालेतुभक्तशिष्यगणोऽब्रवीत् ॥ स्वामिन्प्रावृड्गतात्रैवातिष्ठतीतिभवान्किमु ॥ ७ ॥ तदास्मान्वदद्दृष्ट्वातंजगन्नाथंतवांतिकम् ॥
आयास्यामोवयंपश्चात्तथाशुचकरिष्यसि ॥ ८ ॥ इति श्रुत्वावचस्तेषांशिष्याणांवैष्णवोत्तमः ॥ राजानंप्राहयास्यामिदेह्याज्ञांनृपस
त्तम ॥ ९ ॥ श्रुत्वाराजापितद्वाक्यंकर्णशूलमिवस्वयम् ॥ अमन्यतपरंतस्मैभक्ततोषायचाब्रवीत् ॥ १० ॥ वनंप्रयास्यसिविभोश्वःपर
श्वोनसंशयः ॥ परंतुनिवसंत्वद्यभवंतइतिमेमतिः ॥ ११ ॥ इतिश्रुत्वावचोराज्ञोभक्तःप्राहनृपंमुदा ॥ आगमिष्याम्यहंराजंस्तवगेहेपुनः
पुनः ॥ १२ ॥ इतिश्रुत्वाततोराजापरश्वोगंतुमर्हसि ॥ इत्युक्त्वागृहमागत्यविमनास्समुपाविशत् ॥ १३ ॥ दृष्ट्वातंविमनस्कंतुतत्पत्नी
पतिमब्रवीत् ॥ कुतोद्यविमनाःस्वामिन्यदियोग्यंवदप्रभो ॥ १४ ॥ इतिश्रुत्वावचस्तस्याराजोवाचाप्रियांप्रति ॥ अद्योक्तंतेनभक्तेनगमि
ष्यामीत्यनंतरम् ॥ १५ ॥ गमिष्यसिपरश्वश्वेत्युक्तंतत्तुष्टयेमया ॥ अतःपरश्वोगंतासहरिभक्तोनसंशयः ॥ १६ ॥ तस्मिन्गतेहरेर्नाम

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कीर्तनंतत्कथापिवा ॥ नभविष्यतिचात्रातोविस्मयोमेमहानभूत् ॥ १७ ॥ इतिभर्तृवचःश्रुत्वासापिदीनापतिव्रता ॥ चिंतयामासमन
साभक्तावस्थानकारणम् ॥ १८ ॥ एवंतयोश्चिंतयतोर्दिनद्वयमथात्यगात् ॥ तृतीयेदिवसेप्राप्तेभक्तःशिष्यैःसहागतः ॥ १९ ॥ यया
चेनृपतिंराजन्नाज्ञापयगतोस्म्यहम् ॥ इतिश्रुत्वाततोराजाप्रातर्गतासिनिश्चितम् ॥ २० ॥ अद्येहनिवसस्वामिन्क्षमस्वाविनयंमम ॥ इ
तिश्रुत्वानवृत्तेभक्तोभक्तिवशीकृतः ॥ २१ ॥ अथराजान्नपानादितत्याजविरहातुरः ॥ पत्न्यादिपरितोषायभुक्तवान्वैयथातथा ॥२२॥
राज्ञीतदानिश्चिकायगतेभक्तेपतिर्मम ॥ हरिकीर्तनविश्लेषात्तद्भक्तविरहादपि ॥ २३ ॥ नजीविष्यतिकेनापिप्रकारेणेतिमेमतिः ॥ मृ
तेपत्यौवरस्त्रीणांधिक्सुतंजीवनंधनम्॥२४॥तस्मादुपायंकिंचिद्वैकरिष्यामिनिवर्तने॥भक्तेनिवृत्तेराजापिसुखीस्थास्यत्यसंशयम्॥२५॥
इतिनिश्चित्यमनसारात्रौसाराजवल्लभा ॥ बालायस्वस्यपुत्रायमहानिशिविषंददौ ॥२६॥ मृतेसुतेनचान्येनाजिविष्यातिप्रयत्नतः ॥ अ
तएनंमृतंज्ञात्वानगमिष्यतिवैष्णवः ॥२७॥ ततोराजापिनिर्विघ्नंनिवत्स्यंतिनिजालये ॥ विचार्य्यैवंतुतत्कर्म्मचकारपरमाद्भुतम् ॥२८॥
अथदंडद्वयेरात्रिशेषेसाराजवल्लभा ॥ रुरोदोच्चैःस्वरेणांतःपुरेहाहेतिवादिनी ॥ २९ ॥ श्रुत्वातद्रुदितंसर्वेयथास्थानमुपागताः ॥ कि
मिदंकिमिदंचेतिवदंतोऽतित्वरान्विताः ॥ ३० ॥ राजापिसमुपायातोभक्तस्तत्राप्युपाययौ ॥ ददर्शतंमृतंबालंनिमग्नःशोकसागरे॥३१॥
पत्नींपप्रच्छराजातुप्रियेजानासिकारणम् ॥ इतिश्रुत्वाब्रवीद्राज्ञीचेत्क्षमस्वब्रवीम्यहम् ॥ ३२ ॥ वदनैवापराधंतेपश्यामिवरवर्णिनि ॥ इ
त्युक्तासाप्युवाचाथशिशोर्मरणकारणम् ॥ ३३ ॥ भक्तेगतेतुभवतोदुर्लभंवतजीवनम् ॥ मृतेत्वयितुतेनालंजीवितेनधनेनवा ॥
॥ ३४ ॥ इतिविज्ञायशिशवेविषंदत्तंमयाप्रभो ॥ मृतेऽस्मिन्वैष्णवःस्वामीप्रातःस्थास्यतिनिश्चितम् ॥ ३५ ॥ भवानप्येकदिवसं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जीवेदितिमनोरथम् ॥ कृत्वाघातितवत्यस्मिस्वसुतंनात्रसंशयः ॥ ३६ ॥ इतितस्यावचःश्रुत्वाराजापिसुमुदेह्लादि ॥ प्रशशं
सचतांपत्नींभक्तावस्थानलभतः ॥ ३७ ॥ एवंदृष्ट्वातयोर्भक्तिंससाधुर्वैष्णवोत्तमः ॥ गर्हयित्वात्मनात्मानंस्वापराधममन्यत ॥ ३८ ॥
अथाहूयस्वशिष्यांस्तुप्राहराज्ञीविचेष्टितम् ॥ तेपिश्रुत्वामहाश्चर्यंदृष्ट्वाबालंशुचार्दिताः ॥ ३९ ॥ भक्तोगुरुस्तदाशिष्यैःप्रतिजज्ञे
महाद्भुतम् ॥ शृण्वतांसर्वलोकानांतदद्भुतमिवाभवत् ॥ ४० ॥ अहोनयामदर्थेयत्स्वयंपुत्रोनिपातितः ॥ तस्मादस्याइमंपुत्रंजीव
यिष्यतिचेद्धरिः ॥ ४१ ॥ तदातुवयमापद्यजीविष्यामोन्यथानहि ॥ हुताशनंप्रवेक्ष्यामःसत्यंसत्यंनसंशयः ॥ ४२ ॥ इत्येवंते
प्रतिज्ञायविचिंत्यमनसाहरिम् ॥ मंत्रैःस्तोत्रैस्तथागीतैस्तुष्टुवुर्गरुडध्वजम् ॥ ४३ ॥ एवंगतेर्द्धदिवसेबालोनेत्रेप्रचालयन् ॥ उ
त्तानशयनात्पार्श्वंसबालोह्युदतिष्ठत ॥ ४४ ॥ दृष्ट्वातत्परमाश्चर्यंसर्वेतत्रत्यमानवाः ॥ हर्षाश्रुनयनाःसर्वेचित्रवत्संस्थताभुवि
॥ ४५ ॥ अहोक्षणेनचोत्तस्थौसबालःपश्यतांनृणाम् ॥ दृष्ट्वातमुत्थितंबालंभक्तस्तुतत्समीपगः ॥ ४६ ॥ क्रोडेकृत्वामुखंतस्यमार्ज
यामासपाणिना ॥ ततोराजानमाहूयतस्यक्रोडेशिशुंददौ ॥ ४७ ॥ दृष्ट्वाननंदतंबालंभक्तंप्राहमहीपतिः ॥ नमेपुत्रेणमित्रेणधनेना
स्तिप्रयोजनम् ॥ ४८ ॥ तवसंतोषएवैकःसततंप्रार्थ्यतेमया ॥ इतिश्रुत्वावचस्तस्यराज्ञःसविष्णुवल्लभः ॥ ४९ ॥ उवाचशिष्या
नाहूयराजभक्तिवशीकृतः ॥ यावज्जीवाम्यहंशिष्यानत्यक्ष्यामित्विदंपदम् ॥ ५० ॥ एतादृशमहाभक्तदारत्यागेस्तिदूषणम् ॥ त
स्मान्नाहमितोशिष्यागंतुमिच्छामिकुत्रचित् ॥ ५१ ॥ इत्येवंतेगुरोर्वाक्यंश्रुत्वाशिष्यास्ततःपरम् ॥ गंतुमभ्युद्यतास्सर्वेततोराजाऽ
ब्रवीत्चतान् ॥ ५२ ॥ कृतांजलिपुटोभूत्वाप्रणम्यविनयान्वितः ॥ स्नात्वाभुक्त्वाप्रगंतव्यंकर्तव्योमय्यनुग्रहः ॥ ५३ ॥ श्रुत्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तद्वचनंराज्ञःशिष्याःसर्वेततःपरम् ॥ स्नात्वासमागताराजमंदिरंगंतुमुद्यताः ॥ ५४ ॥ राजापिभोजयामासतान्सर्वान्भक्तितःस्व
यम् ॥ कंबलाजिनवासोभिःसंपूज्यविससर्जह ॥ ५५ ॥ ततस्तेषांगुरोभक्तोराजातुस्वयमेवाहि ॥ दासवत्परिचर्य्यांतुचकारसदिने
दिने ॥ ५६ ॥ एवंसराजाराज्ञीचसएववैष्णवोत्तमः ॥ कृत्वातुविविधांभक्तिंजगामहरिमंदिरम् ॥ ५७ ॥ पत्नीतुतस्यराज्ञःसाबभू
वसंहगामिनी ॥ ततोभक्तोपितत्पुत्रंराज्येसंस्थाप्यचस्वयम् ॥ ५८ ॥ ययौस्वैरगतिर्विष्णुंचिंतयमानोतिभक्तितः ॥ एवंभक्तेस्तु
माहात्म्यंयत्किंचित्कथितंमया ॥ ५९ ॥ शृण्वन्नेतन्नरोभक्तिंश्रीकृष्णेलभतेपराम् ॥ ६० ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येपां
चालराजचरितंनामषट्पंचाशत्तमःसर्गः ॥५६॥ ॥अथान्यत्संप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ महाश्चर्य्यकरंनृणांशृण्वतांरोमहर्षण
म् ॥ १ ॥ देशेवैपुष्करप्रांतेराजाकोप्यतिभक्तिमान् ॥ प्रजापालनसंसक्तोदातावैष्णवपूजकः ॥२॥ तस्यासीत्तनयाचैकाकुमारइववर्द्धि
ता ॥ निरीक्ष्यतताचरितंसातिभक्ताबभूवह ॥ ३ ॥ प्रत्यहंवैष्णवानांतुजलंपादावनेजनम् ॥ धृत्वाशिरसिपीत्वातुबुभुजेन्नादिकंशुभ
म् ॥ ४ ॥ एवंभक्तिपरायास्तुतस्याःपाणिग्रहंपिता ॥ कारयामासधनिनाराजपुत्रेणहर्षितः॥५॥ सागतापतिवेश्माथतत्रसर्वान्हिवैष्णवा
न् ॥ दृष्ट्वाशोकपरांस्तत्रराजकन्यातिदुःखिता ॥ ६ ॥ पतिंसाप्रार्थयामासविष्णुपूजार्थमादरात् ॥ सराजपुत्रोविष्णोर्हिनाममात्रं
नवास्मरत ॥७॥ ततोऽब्रवीत्पतिस्तांतुकोविष्णुःकिंचपूजनम् ॥ कोपिनैवात्रजानातिप्रियेकिंभाषसेवृथा ॥८॥ श्रुत्वैतद्वचनंपत्युर्नृपक
न्यातिचिंतया ॥ तूष्णींतस्थौददर्शाथपत्युःकुलविचेष्टितम् ॥ ९ ॥ कस्यापिमुखतोनैवविष्णुनामानुकीर्त्तनम् ॥ नदयानापिधर्मोऽ
न्यःसर्वेहिंसापरायणाः ॥ १० ॥ कस्मैकिंकथयाम्यद्यनश्रोष्यतिमतंमम ॥ एवंनिश्चित्यमनसातूष्णींतस्थौनृपात्मजा ॥ ११ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

महाचिंतापरानित्यंदृष्ट्वाभक्तिपराङ्मुखान् ॥ तथापिसाध्वीभावात्तद्गृहेतस्थौमनस्विनी ॥ १२ ॥ एवंगतेषुकालेषुपुत्रमेकमसूतसा ॥
सुमुहूर्तेऽथतंदृष्ट्वासर्वैर्हर्षसमन्विताः ॥ १३ ॥ राजाचराजपुत्रश्चयेचान्येराजसेवकाः ॥ पुत्रंचप्राणभूतंचसर्वेमन्यंतनित्यशः ॥१४॥
अथद्वित्राब्दकेयातेबालेसर्वमनोहरे ॥ साराजतनयादासींशिक्षयामासयत्नतः ॥ १५ ॥ अस्मिन्ग्रामेयदासाधुरेकोप्यायातिवैष्ण
वः ॥ तदैवमांत्वंकथयतंचदास्याम्यभीप्सितम् ॥ १६ ॥ सादासीशिरसानत्वास्वीचकारतदीरितम् ॥ पश्यंतीवैष्णवंनित्यंसायंका
लेसमागतम् ॥१७॥ एकदाद्वारकायास्तेसमायाताःसुवैष्णवाः ॥ प्राप्तेराजपुरेतेपिनिवासार्थंययाचिरे ॥१८॥ नकोपिस्वीचकाराथ
तेषांवासोनरस्तदा ॥ तेसर्ववैष्णवाग्रामाद्बाह्येवापीसमीपतः ॥ १९ ॥ तरोरधस्तादाच्छाद्यतृणानितत्रभूरिशः ॥ प्रक्षाल्यहस्तौपा
दौचक्षुधार्तादीनचेतसः ॥ २० ॥ तान्दृष्ट्वाश्रमितान्दासीपृष्ट्वाकस्मादिहागताः ॥ क्वगमिष्यथचेत्येवंपप्रच्छविनयान्विता ॥ २१ ॥
श्रुत्वातस्यावचस्तेस्तुवैष्णवाःशांतमानसाः ॥ ऊचुस्तांदासपत्नींतेद्वारावत्याःसमागताः ॥ २२ ॥ जगन्नाथंप्रयास्यामोवयंवैष्णवस
त्तमाः ॥ इतितेषांवचःश्रुत्वाययौराज्ञीसमीपतः ॥ २३ ॥ उवाचनत्वाशिरसादेविभक्ताःसमागताः ॥ संपूर्णेनगरेभ्रांत्वालेभिरेनयदा
स्थलम् ॥ २४ ॥ तदावापीसमीपेतुतरोस्तलमुपागताः ॥ तृणमाच्छाद्यसुषुपुःक्षुधयापीडिताअपि ॥ २५ ॥ श्रुत्वैतद्राजपत्नीसा
भक्तराजसुतासती ॥ दृष्ट्वाददौस्वपुत्रायविषंहालाहलंस्वयम् ॥ २६ ॥ भुंजन्नेवंविषंबालोममारक्षणमध्यतः ॥ ततस्तुजननीभक्तरा
जपुत्रीरुरोदह ॥ २७ ॥ श्रुत्वातद्रुदितंशब्दंपतिस्तत्रसमागतः ॥ किंजातमितितांपत्नींपप्रच्छातिशुचारुदन् ॥ २८ ॥ सोवाचजानेनै
वाहंकस्मादेपसुतोमृतः ॥ ततःसर्वेसमायाताअंतःपुरचराजनाः ॥ २९ ॥ दृष्ट्वाबालंमृतंतत्ररुरुदुश्चातिदुःखिताः ॥ हाहाकारंप्रकुर्वं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तोमूर्च्छामापुश्चतेतदा ॥ ३० तदातज्जननीराजकन्याप्रोवाचतान्प्रति ॥ ममम‍ातृगृहेचेत्थंममभ्राताामृतस्तथा ॥ ३१ ॥ तदामेजन
कोभक्तान्वैष्णवान्प्रणिपत्यच ॥ आनीयस्वगृहेऽभ्यर्च्यतत्पादोदकवारिणा ॥ ३२ ॥ स्नापयित्वामृतंबालंजीवयामासवैष्णवैः ॥ वैष्ण
वाःपूजितास्सर्वैर्मृतबालस्यसन्निधौ ॥ ३३ ॥ स्तुत्वानारायणंदेवंजीवयामासुराशुवै ॥ एवंदृष्टंमयासत्यंनिजमातृगृहेपुनः ॥ ३४ ॥
बहुधान्यत्रनगरेपितुरेवंबभूवह ॥ तस्मादिहापिचेत्कोपिभक्तोग्रामेसमागतः ॥ ३५ ॥ स्यात्तदातंसमानीयभवंतोजीवयंत्वसुम् ॥ इति
तस्यावचःश्रुत्वापप्रच्छुस्तांपुनस्तुते ॥ ३६ ॥ कथंहिभक्तोज्ञातव्यःकीदृशःसचतद्वद ॥ नाद्यावधिहरेर्भक्तोदृष्टोस्माभिःश्रुतोथवा
॥ ३७ ॥ श्रुत्वातेषांवचोहृष्टाराजपुत्रीजगादह ॥ इयंदासीविजानातिसाधून्मात्पितृमंदिरे ॥ ३८ ॥ गताहृष्टवतीभक्तान्पितृपूज्यान्गृहे
स्थितान् ॥ इतितस्यावचःश्रुत्वासुस्वरस्तांसमाह्वयत् ॥ ३९ ॥ आगतांतामुवाचाथराजादासींत्वरान्वितः ॥ त्वंविजानासिभक्तो
वैग्रामेस्मिन्नद्यकोपिचेत् ॥ ४० ॥ समायातस्तंचत्वंतुद्रुतंमांदर्शयाधुना ॥ इतिश्रुत्वाथराज्ञेचदासीप्राहकृतांजलिः ॥ ४१ ॥ महा
राजाद्यदृष्टामेसायंभक्ताःसमगताः ॥ वापीसमीपेवृक्षस्यच्छायामाश्रित्यसंस्थिताः ॥ ४२ ॥ द्वारकायाःसमायाताजगन्नाथंव्रजंतिते ॥
इतितस्यावचःश्रुत्वाराजाचातीवहर्षितः ॥ ४३ ॥ तत्क्षणंतत्रगत्वातान्वैष्णवान्प्रणिपत्यच ॥ महाभक्त्यासमानीयसंपूज्यविधिव
त्स्वयम् ॥४४॥ तत्पादोदकतीर्थेनस्नापयामासतंशिशुम्॥ततस्तान्वैष्णवान्सोपिराजातुप्राहचाद्भुतम्॥४५॥शृण्वंतुकारणंभक्ताःकथ
यामियथार्थतः ॥ अयंपौत्रोमृतोमेद्यविनारोगेणबालकः ॥४६॥ ततोस्यमातामांप्राहयदिकोप्यत्रवैष्णवः ॥ तमानयित्वासंपूज्यतत्पा
दोदकवारिणा ॥ ४७ ॥ स्नापयित्वामृतंबालंवैष्णवंप्रार्थयाधुना ॥ ततस्तेजीवयिष्यंतिबालमेतन्नसंशयः ॥ ४८ ॥ स्वपितुर्भवने

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दृष्टंकतिधातत्प्रयत्नतः ॥ इतिसामेस्नुषासत्यंकृत्वास्मानब्रवीद्वचः ॥४९॥ ततोहमद्यभवतःसमानीयात्रभक्तितः ॥ पूजयित्वाभवत्पाद
वारिणासुमृतंशिशुम् ॥५०॥ स्नापयित्वाथभवतांसमीपेस्थापितोमया ॥ अतःपरंतुभवतामिच्छयास्यशुभाशुभम् ॥५१॥ भविष्य
तिनसंदेहोसाधवःसमदर्शनाः ॥ श्रुत्वैतद्वचनंराज्ञोवैष्णवास्तेव्यचिंतयन् ॥५२॥ परस्परंनिरीक्षंतस्तूष्णींतस्थुःक्षणंतदा ॥ तेषांमध्ये
वृद्धएकोहरौविश्वासितोब्रवीत् ॥५३॥ अहोपश्यंतुनृपतेःस्नुषायाभक्तिमुत्तमाम् ॥ एवंवदतियद्भक्तानतःकिंचिद्ब्रवीम्यहम् ॥५४॥इतो
स्माभिर्नगंतव्यंजीवेद्यावन्नचेदयम्॥जीवयिष्यतिवैबालंकृष्णोहिभक्तवत्सलः॥५५॥नोचेत्सर्वेमरिष्यामोवयमत्रनसंशयः ॥ इतिश्रुत्वाव
चस्तस्यवृद्धस्यान्येपिवैष्णवाः ॥५६॥ स्वीचक्रेत्दृष्टमनसोवस्त्रेणाच्छाद्यतंमृतम् ॥ तुष्टुवुःस्तोत्रगीताद्यैःश्रीकृष्णंभक्तवत्सलम् ॥५७॥
स्तुवतांभक्तिपूर्वंतुतेषामस्तंगतोरविः ॥ सर्वेराजादयस्तत्रजनास्तस्थुर्मृताइव ॥५८॥ एवंदिनेव्यतीतेतुसंध्यामस्तंगतेरवौ ॥ संचचार
शिशोरंगंहस्तपादादिकंतथा ॥ ५९ ॥ दृष्ट्वांगस्यचसंचारंसर्वेमुमुदिरेजनाः ॥ वैष्णवाअपिदेवेशंश्रीकृष्णंपरितुष्टुवुः ॥ ६० ॥ ततो
मुहूर्ताद्बालंतुतमुत्थायनिरैक्षत ॥ उत्थितेबालकेराजाहर्षेणमहतावृतः ॥ ६१ ॥ पपातवैष्णवानांतुचरणेष्वतिभक्तितः ॥ उवाचक्ष
म्यतांभक्ताःजीवितोयंमृतःशिशुः ॥ ६२ ॥ श्रुत्वातद्राजवचनंवैष्णवाअपिहर्षिताः ॥ समुन्मील्याक्षितेसर्वेदहशुर्जीवितांशिशुम्॥६३॥
न्यवर्ततंततस्तेपिराज्ञासंप्रार्थितास्तदा ॥ आगत्यराज्ञीभक्तानांपादौजग्राहभक्तितः ॥ ६४ ॥ ततोराजाथतान्भक्तान्स्नापयित्वाथभ
क्तितः ॥ भोजयित्वातुविविधैरन्नैश्चबुभुजेस्वयम् ॥ ६५ ॥ तदासर्वेमहानंदमग्नाःसर्वेनृपादयः ॥ वैष्णवान्प्रार्थयन्मासुरवस्थानायते
मुहुः ॥ ६६ ॥ ततस्तेवैष्णवाःसर्वेराजानामिदमब्रुवन् ॥ जगन्नाथंनिरीक्ष्यामोगमिष्यामोवयंपुनः ॥ ६७ ॥ तावत्त्वंहरिसेवायांनिर

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तोभवसुव्रत ॥ हिंसांत्यक्त्वाहरिंनित्यंपूजयन्भक्तिमाचर ॥ ६८ ॥ ग्रामेराज्येचसर्वत्रदेह्याज्ञांनृपसत्तम ॥ इत्युक्त्वातेगताःसर्वेवैष्ण
वाराजपूजिताः ॥ ६९ ॥ नीलाचलेजगन्नाथंद्रष्टुंश्रीपुरुषोत्तमम् ॥ तेषांवाक्यंतुशिरसादधारनृपसत्तमः ॥ ७० ॥ पूजयंतुहरिंसर्वेतद्भ
क्तान्प्रणमंतुच ॥ तदारभ्यतुतद्देशेग्रामेग्रामेगृहेगृहे ॥ ७१ ॥ विष्णुपूजांहरेर्भक्तिंवैष्णवानांसमर्चनम् ॥ स्थापयामासहिंसादीस्त
त्याजातिदयापरः ॥ ७२ ॥ एवंसराजानृपपुत्रपौत्रपत्नीधनंप्राप्यहरौसुभक्तिम् ॥ भुक्त्वास्वराज्यंहतकंटकंमृतोवैकुंठमापामरलो
कदुर्लभम् ॥ ७३ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येराजपुत्रीभक्तिचरितंनामसप्तपंचाशत्तमःसर्गः ॥५७॥ छ ॥ ॥ अथापरंप्रवक्ष्या
मिभक्तेर्माहात्म्यमुत्तमम् ॥ आश्चर्य्यकारकंविष्णोर्दृढभक्तिप्रदायकम् ॥ १ ॥ दक्षिणेद्रविडेदेशेग्रामःश्रीरंगपत्तनः ॥ तत्रश्रीरंगना
म्नासीद्विष्णुर्भक्तसुरद्रुमः ॥ २ ॥ तत्रवेदैश्चशास्त्रैश्चब्राह्मणास्तंजपंतिहि ॥ अन्येपियेवसंतिस्मतेपिभक्तिंप्रकुर्वते ॥ ३ ॥ तत्रास्तां
स्वर्णकारौद्वौमातुलोभागिनेयकः ॥ केनापिवैष्णवेनाथताबुभाबुपदेशितौ ॥ ४ ॥ ततस्तौस्वर्णकारौतुमहाभक्तौबभूवतुः ॥ अथैक
दातयोश्चित्तेबभूवाकस्मिकंत्विदम् ॥ ५ ॥ श्रीरंगमठनिर्माणमावांकुर्यावयत्नतः ॥ परंतुनधनंवास्तिकथमेतद्भविष्यति ॥
॥ ६ ॥ इतिचिंतापरौतौद्वौपरस्परमभाषताम् ॥ अहोयंनास्तिकोग्रामोमहाधनसमृद्धिमान् ॥ ७ ॥ तत्रतद्भृत्यव्याजेनआवां
तद्गृहगौपुनः ॥ चोरयित्वातुतद्द्रव्यंकुर्यावैतेनतन्मठम् ॥ ८ ॥ इतिनिश्चित्यमनसागतौतौनास्तिकालयम् ॥ तमुक्त्वावांभवत्स
वैकृत्वातद्वेतनेनच ॥ ९ ॥ जीविकांप्रकरिष्यावोयदितेऽभिमतंविभो ॥ इतिश्रुत्वातयोर्वाक्यंतिष्ठेतामितिसोब्रवीत् ॥ १० ॥ ततस्तौ
स्वर्णकारौतद्गृहेभृत्यवत्स्थितौ ॥ परस्परंचिंतयंतौचोरयावोधनंकिमु ॥ ११ ॥ नापश्यतांत्ववश्यंतुधनंतद्देवताभृते ॥ देवतातुत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दीयासीत्सुवर्णप्रतिमामयी ॥ १२ ॥ महार्घरत्नघटिताबहुमौल्यातिसुंदरी ॥ दृष्ट्वातांप्रतिमांतौतुचक्रातेहरणेमनः ॥ १३ ॥ अथै
कदानिशायांतुसुप्तेलोकेततस्तुतौ ॥ प्रतिमांमठमारुह्यगवाक्षंददृशेमहत् ॥ १४ ॥ द्वारेकपाटसंरोधात्तेनमार्गेणमातुलः ॥ कष्टा
त्कष्टतरेणाथययौमंदिरमध्यतः ॥ १५ ॥ उत्थाप्यप्रतिमांतांतुभागिनेयायचार्पयत् ॥ ततःस्वयंतुतेनैवमार्गेणागंतुमुद्यतः ॥ १६ ॥
नशशाकबहिर्गंतुंद्वारालपत्ववशादसौ ॥ ततोब्रवीद्भागिनेयंमातुलोमठमध्यगः ॥ १७ ॥ अतःपरंयद्वक्ष्यामितत्कुरुष्वाविचारितम् ॥
उपायोस्तिनचान्योत्रकुरुशीघ्रंमदीरितम् ॥ १८ ॥ छित्त्वामेमस्तकंयाहिगृहीत्वाप्रतिमामिमाम् ॥ नोचेत्पश्यंतिमांप्रातरुभयोर्म
रणंध्रुवम् ॥ १९ ॥ इत्थंमयिमृतेत्वंतुगृहीत्वामांविनाधनम् ॥ श्रीरंगमठनिर्माणंकुरुष्वममशासनात् ॥ २० ॥ एतावदेवकर्तव्य
मासीद्बहुदिनावधि ॥ मातुलस्येतिवचनंश्रुत्वातद्भागिनेयकः ॥ २१ ॥ छित्त्वाशिरोमातुलस्यनीत्वातांप्रतिमांद्रुतम् ॥ ययौस्वभ
वनंरात्रौसंस्थाप्यप्रतिमांतुताम् ॥ २२ ॥ प्रययौसपुनस्तस्यनास्तिकस्यनिवेशनम् ॥ सुष्वापपूर्ववत्स्वर्णकारःशय्यातलेनिजे ॥
॥ २३ ॥ अथास्यमातुलस्यापिशिरश्छेदंयदाकरोत् ॥ तदैवपुनरेवास्यशिरःप्रादुर्बभूवह ॥ २४ ॥ उद्घाटितःकपाटोपिस्वयंश्री
रंगभक्तितः ॥ मातुलोपिमठद्वारमार्गेणागत्यतद्बहिः ॥ २५ ॥ भागिनेयस्यनिकटेसुष्वापातिमुदान्वितः ॥ ततःप्रातःसमुत्थाय
निरीक्षेतांपरस्परम् ॥ २६ ॥ किमिदंचेतिपप्रच्छभागिनेयःस्वमातुलम् ॥ मातुलोपितदाप्राहश्रीरंगकृपयाह्यहम् ॥२७॥ भूत्वावैपूर्वव
च्चात्रसमायातोस्मितेऽतिके ॥ इत्येवमुक्त्वावचनंप्रातरारभ्यतौपुनः ॥ २८ ॥ स्वकार्यैनिरतौभूत्वाचक्रातेभृत्यतामुभौ ॥ अथो
त्थायततोजैनोदृष्ट्वादेवस्यमंदिरे ॥ २९ ॥ उद्घाटितंकपाटंचमहाशंकामुपागतः ॥ द्रुतंगत्वामठेनैवद्दर्शप्रतिमांचताम् ॥ ३० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सुमोहशोकाज्जैनःस्वचिंतामापदुरत्ययाम् ॥ रुदित्वाबहुदुःखार्तस्तौभृत्यावाहकोपतः ॥ ३१ ॥ अहोभवद्भ्यांगंतव्यमिदानीमेवमेगृहात् ॥
स्थितयोर्युवयोरेवगृहेचौर्यमभून्मम ॥ ३२ ॥ ततोनैवास्तिमेकिंचित्फलंसंरक्ष्यवैयुवाम् ॥ इतिजैनेनतावुक्तौचौरौतुस्वर्णकारकौ ॥ ३३ ॥ महा
प्रसादइत्युक्तोत्तस्थतुस्तौततोगृहात् ॥ आगत्यस्वगृहंतौतुकिंचित्कालंव्यतीत्यच ॥ ३४ ॥ प्रतिमाभूषणैरत्नैश्चक्रारमठमुत्तमम् ॥ एवंभक्ते
स्तुमाहात्म्यंशिरश्छेदोपियत्पुनः ॥ ३५ ॥ शिरोवभूवलग्नंतुकपाटःस्फुटितःस्वयम् ॥ श्रीरंगेद्यापिजल्पंतिवृत्तमेतत्पुरातनम् ॥ ३६ ॥
तस्मान्नाश्चर्यभूतंहिकिंचिद्भक्तेर्हिविद्यते ॥ ३७ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येस्वर्णकारचरितंनामाष्टपंचाशत्तमःसर्गः ॥
॥ ५८ ॥ छ ॥ ॥ अथान्यत्संप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणसंदेहातोंपिमुच्यते ॥ १ ॥ आसीद्वैमथु
राप्रांतेराजावैकोपिधार्मिकः ॥ पूर्वकर्मविपाकेनसतुकुष्ठीबभूवह ॥ २ ॥ औषधानिवहून्यस्यजातानिपृथिवीतले ॥ नशांतिमगमद्रोगो
राजाचातिविदुःखितः ॥ ३ ॥ मरणेकृतसंकल्पःप्रयागेगंतुमुद्यतः ॥ अथैतस्मिन्क्षणेकोपिवैद्यस्तत्रसमागतः ॥ ४ ॥ राजानमाहभो
भूपमतुंमागच्छसांप्रतम् ॥ इमंतेकुष्ठरोगंतुत्रिदिनान्नाशयाम्यहम् ॥ ५ ॥ सत्यमेतन्नसंदेहःप्रतिजानामितेपुरः ॥ परंतुहंसमेकंमेह्यौ
षधार्थंसमर्पय ॥ ६ ॥ त्वंजीवंतमेकंवैतद्वैद्यस्यवचनंनृपः ॥ श्रुत्वाजहर्षतत्कालंव्याधमाहूयचाब्रवीत् ॥ ७ ॥ अरेजीवंतमेकंवैहंसमान
ययत्नतः ॥ औषधार्थंत्वरायुक्तोगच्छेदानींममाज्ञया ॥ ८ ॥ इतिराजवचःश्रुत्वाव्याधस्तत्कालमेवहि ॥ चतुर्दिक्षुगतोधर्तुंहंसंजीवंतमे
वहि ॥ ९ ॥ अथससरसीतीरेदृष्ट्वाहंसयुगंतदा ॥ उपायंधर्तुंकामस्तुचकारतदनंतरम् ॥ १० ॥ उड्डीयप्रगतौतस्मात्सरोवरतटादुभौ ॥
एवंबहुदिनंयातंनतंधर्तुंशशाकह ॥ ११ ॥ ततोराजातिकोपेनव्याधमाहूयचाब्रवीत् ॥ दिनत्रयेणचेद्धंसंनप्रदास्यासित्वंचभो ॥ १२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तदात्वांसकुटुंबंतुहनिष्यामिनसंशयः ॥ इतिराज्ञोवचःश्रुत्वासर्वेव्याधाःपलायिताः ॥ १३ ॥ एकएवस्थितस्तत्रराजसेवापरायणः ॥
तन्मध्यैकःसरस्तीरेहर्तुंहंसंप्रयत्नतः ॥ १४ ॥ तत्रगत्वाददर्शाथहंसयुग्मंसरस्तटे ॥ तत्रैकंवैष्णवंस्नात्वापूजयंतंहरिंस्थितम् ॥ १५ ॥
तदग्रेहंसमिथुनंविचचाराकुतोभयम् ॥ दृष्ट्वातत्परमाश्चर्यंव्याधोपिनिश्चिकायतम् ॥१६॥ अहोवैष्णवरूपेणबहुधानबिभेत्ययम् ॥ अतो
हमपितद्रूपंकृत्वाप्रातर्निजेच्छया॥१७॥धरिष्यामिनसंदेहोराजकार्यंभविष्यति ॥ इतिनिश्चित्यमनसासायमागतवान्गृहम् ॥१८॥ विधा
यमालांमुद्रांचकृत्वातिलकमुज्ज्वलम् ॥ तुलसीमाल्यकंठस्तुरामेत्युच्चैर्वदन्मुहुः॥१९॥ययौससरसीतीरेधर्तुंहंसंप्रयत्नतः ॥ दृष्ट्वातंव्याध
मायांतंधर्तुंहंसोब्रवीद्वचः॥२०॥ हंसोभयातुरःपत्नींपश्येमंदुष्टचारिणम् ॥ विधायवैष्णवंरूपंधर्तुमायात्यसौखलः ॥२१॥ इतिभर्तृवचः
श्रुत्वाहंसीप्राहाद्भुतंवचः ॥ अहोसत्यंसमायातिधर्तुमेवनसंशयः ॥ २२ ॥ तथापिनैवभेतव्यमावाभ्यामितिमेमतिः॥नूनंव्याधःसएवाद्य
यःपूर्वंदिवसत्रयम् ॥ २३ ॥ धर्तुमागतवान्दृष्ट्वायमावाभ्यांपलायितम् ॥ पूर्वंतुदृष्टमेवात्रदृष्ट्वावांवैष्णवांतिके ॥ २४ ॥ निर्भयंवि
चरंतौचततोवैष्णववेषधृक् ॥ धर्तुमायातिधूर्तोसौसत्यमेवनसंशयः ॥ २५ ॥ तस्माद्वैष्णवरूपंतुयदस्मद्धरणायवै ॥ कृतवान्यद्भव
त्वस्यनवेषोस्यमृषाभवेत् ॥ २६ ॥ भगवद्भक्तवेषस्यसाफल्येनतुतद्भयम् ॥ तस्माद्भगवद्भक्तस्यतन्नामोच्चारणस्यच ॥ २७ ॥
छलेनापिकृतस्यास्यभवितावांछितंफलम् ॥ यद्यप्ययंगृहीत्वावांमारयिष्यत्यसंशयम् ॥ २८ ॥ तथापिनैवगंतव्यंधर्मएवमतोमम ॥
अवश्यमेवमर्तव्यंप्राप्यजन्मनसंशयः ॥ २९ ॥ इतिहंसीवचःश्रुत्वाहंसोपिस्वीचकारह ॥ नचेलतुस्ततस्तस्मात्स्थानाद्दिव्यौचपक्षि
णौ ॥ ३० ॥ अथागत्यतुसव्याधोहंसंधृत्वाचचालह ॥ ततोहंसीनतत्याजहंसंस्नेहवशंकिता ॥ ३१ ॥ बलादागत्यव्याधस्यकरो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

परिपपातह ॥ तामप्यथदधाराशुव्याधोहिंसापरायणः ॥ ३२ ॥ आगत्यस्वंगृहंव्याधःकृत्वातौपंजरेतुसः ॥ राज्ञःसन्निधिमागत्यद
दौहंसद्वयंमुदा ॥ ३३ ॥ ततोराजातिसंतुष्टोदापयित्वाचवेतनम् ॥ आनिन्येभिषजेतस्मैदर्शयामासपक्षिणौ ॥ ३४ ॥ दृष्ट्वातद्धंसामि
थुनंवैद्योपिमुमुदेभृशम् ॥ कर्तुमुद्युक्तवान्राज्ञोरोगशांत्यर्थमौषधम् ॥ ३५ ॥ उवाचराज्ञींभूपंत्वंस्नात्वाभुक्त्वाविशात्रभो ॥ शो
णितेनास्यहंसस्यस्नापयित्वाक्षतस्थले ॥ ३६ ॥ लेपनंतुप्रदास्यामिमुहुर्यामचतुष्टये ॥ एवंदिनत्रयेजातेरोगःशांतोभविष्यति ॥३७॥
इत्युक्तवतिवैद्येतुराज्ञीतत्कर्तुमुद्यता ॥ द्विजरूपेणभगवानाययौभक्तवत्सलः ॥ ३८ ॥ मद्भक्तवेषंमिथ्यापिकृतवान्यत्तुहिंसकः ॥ ज्ञा
त्वावेषं फलंदातुंमरणेकृतनिश्चयौ ॥ ३९ ॥ नोड्डीययतुःक्वापिस्वयमेवतुधारितौ ॥ तस्मादेतौमहाभक्तौरक्षिष्यामिनसंशयः ॥४०॥
इतिनिश्चित्यभगवान्नीत्वातैलंसमागतः ॥ भूत्वावैद्योपिकुशलःप्रोवाचराजसन्निधौ ॥ ४१ ॥ राजन्वृथाकिमर्थंत्वंपक्षिणौहंतुमिच्छसि ॥
ममास्त्यपूर्वंतैलंहिकुष्ठरोगविनाशनम् ॥ ४२ ॥ एकेनस्पर्शमात्रेणकुष्ठरोगःप्रणश्यति ॥ पश्याद्यैवमहाराजवृथाहिंसांपरित्यज॥४३॥
इत्युक्तस्तेनहरिणावैद्यरूपधरेणच ॥ नृपतिःस्वीचकाराथददौतैलंभिषग्वरः ॥ ४४ ॥ तत्तैलंहस्तपादेतुयापयामासभूपतिः ॥ तत्क्ष
णान्निर्विषंयातंस्फुटितंगलितंतुयत् ॥ ४५ ॥ सर्वंपूर्ववदासीच्चनृपांगमतिसुंदरम् ॥ दृष्ट्वासर्वेंमुमुदिरेमहाश्चर्य्यंतदाजनाः ॥ ४६ ॥ अ
साध्यःखलुसंसारेरोगोयंतत्क्षयंगतः ॥ निवृत्तेरोगदुष्टेतुराजाहर्षसमन्वितः ॥ ४७ ॥ वैद्यराजनमस्तुभ्यंफलितोमेमनोरथः ॥ महारोगा
र्णवेमग्नंत्वंमामुद्धृतवानसि ॥ ४८ ॥ अतोवरयविप्रेंद्रयावत्तेऽभिमतधनम् ॥ इतिश्रुत्वावचस्तस्यराज्ञःसवैद्यरूपधृक् ॥ ४९ ॥ उवाच
सस्मितंवाक्यंराजानमतिहर्षितः ॥ राजन्हंसाविमौदेहियादितुष्टोसिमांप्रति ॥ ५० ॥ किंचान्यद्यत्तुदातव्यंतदस्मैगुरवेर्पय ॥ अयंनै

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वविजानातिवैद्यराजस्तुमामिह ॥ ५१ ॥ अहंत्वस्यगृहेस्थित्वापाठितंवहुवत्सरम् ॥ इत्युक्तातस्यवैद्यस्यनामग्रामादिकंहरिः ॥ ॥ ५२ ॥ उवाचतत्पितुर्नामतत्पत्न्याश्चापिसास्मितम् ॥ निश्चित्यतुततःसर्वैशिष्योस्यायंनसंशयः ॥ ५३ ॥ राजापिप्रददौ हंसौहरयेवैद्यरूपिणे ॥ हरिर्वैद्योगृहीत्वातौहंसौप्रचलितस्ततः ॥ ५४ ॥ आगत्यनगराद्बाह्येतत्याजभगवान्खगौ ॥ माययामोहितौ तौतुहंसौवैद्यमवोचत ॥ ५५ ॥ अहोधन्योसिभद्रंतेयदावांरक्षितौत्वया ॥ नोचेदयंवृथाराजाघातयेन्नचसंशयः ॥ ५६ ॥ इत्युक्त्वातौगतौहंसौहरिर्वैकुंठमागतः ॥ राजापितस्मैवैद्यायदत्त्वाबहुधनंतदा ॥ ५७ ॥ विसर्जयामासमुदाविजहारसुखी स्वयम् ॥ व्याधोपिसचतद्रूपंतत्याजेतिविचिंत्यवै ॥ ५८ ॥ अहोमिथ्यापितद्वेषंभक्तस्यधृतवानहम् ॥ पक्षिणावपिविश्वा सान्नभसस्तत्समागतौ ॥ ५९ ॥ सत्यंचेन्ममतद्रूपंस्यात्तदाकिमुदुर्लभम् ॥ इतिसंचिंत्यतद्रूपंहरेर्नामानुकीर्तनम् ॥ ६० ॥ तदारभ्यनतत्याजव्याधोपिभक्तिमानभूत् ॥ एवंभक्तेस्तुमाहात्म्यंहंससंबंधियन्मया ॥ ६१ ॥ श्रुतंतत्पठितंवापिशृण्वतांशांति वर्द्धनम् ॥ एवंभगवतोभक्तिर्भक्तरक्षाकरीसदा ॥ ६२ ॥ भगवानपिसर्वत्रसर्वस्मिन्निातिवैक्षणे ॥ स्वभक्तंचापितद्भक्तंरक्षत्येवनसंश यः ॥ ६३ ॥ विश्वासःकेवलंचित्तेनृणामेकोह्यपेक्षितः ॥ ६४ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येहंसव्याधचरितंनामैकोनषष्टि तमःसर्गः ॥ ५९ ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणहरिभक्तिःप्रजायते ॥ १ ॥ आसीद्द्वैपश्चिमेदे शेकश्चिद्धनसमृद्धिमान् ॥ अनपत्यत्वदुःखेनमहाचिंताकुलःसदा ॥ २ ॥ एकदाकोपिभक्तस्तुसमायातोवणिग्गृहे ॥ तंसंपूज्यव णिक्पश्चादुवाचदुःखमात्मनः ॥ ३ ॥ अहोमेसंततिर्नास्तिकोभोक्ष्यतिधनंमम ॥ तस्माद्वदमहाभागयथास्यात्संततिर्मम ॥ ४ ॥ इत्यु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्तस्तेनवणिजासभक्तस्तमुवाचह ॥ सत्यंवदसिवैश्यत्वंनपुत्रेणविनासुखम् ॥५॥विशेषतोगृहस्थस्यजन्मैवतुनिरर्थकम् ॥ तस्मात्तेहंप्र
वक्ष्यामियथास्यात्संततिःशुभा ॥ ६ ॥ अद्यारभ्यवणिक्श्रेष्ठसाधुसेवापरोभव ॥ प्रीणातिभगवान्कृष्णःसाधुसेवनतःसदा ॥ ७ ॥ त
स्मिन्प्रीतेभगवतिकिमसाध्यंशरीरिणाम् ॥ इत्युक्त्वासगतोभक्तःसवैश्योपिहितादिनात् ॥ ८ ॥ साधुसेवांसमारेभेकर्मणामनसागिरा॥
एवंगतेषुकालेषुतस्यैकातनयाभवत् ॥९॥ दृष्ट्वातांतनयांवैश्यःपुत्रवत्प्रीतिमानभूत् ॥ अनपत्यस्यकन्यापिसुखायपुत्रवर्द्धिनी॥१०॥
अथतस्मात्तृतीयेब्देजातःपुत्रोतिशोभनः॥अमन्यतवणिक्साधुसेवनस्यफलंत्विदम्॥११॥तदारभ्यवणिक्साधूनातिभक्त्याप्रपूजयन् ॥
ददातिवित्तवस्त्राणिसाधुभ्योयद्यदीप्सितम्॥१२॥अथैकस्मिन्दिनेरोगीभक्तएकःसमागतः॥ दृष्ट्वातंरोगिणंभक्तंभक्तिमान्सवणिक्स्वयम्
॥१३॥निनायस्वगृहेतंतुदापयामासचौषधम्॥ औषधैश्चतथापथ्यैर्द्रुतंसनीरुजोभवत्॥१४॥ततस्तंवणिजंप्राहभक्तोतिविनयान्वितः ॥
त्वयाहंजीवितोरोगादनाथोनात्रसंशयः ॥ १५ ॥ अहंवैश्यकुलेजातोमृतौचपितरौमम ॥ बाल्येततःसाधुभिश्चजीवितोहंयथातथा ॥
॥ १६ ॥ इदानींत्वद्गृहान्नैवगंतुमिच्छाम्यहंक्वचित् ॥ भोजनंत्वेकदाचेत्स्यात्तदात्रैववसाम्यहम् ॥ १७ ॥ इतिश्रुत्वावचस्तस्यवै
श्यश्चसाधुभक्तिमान् ॥ उवाचप्रांजलिर्वाक्यंसर्वंहिभवतामिदम् ॥ १८ ॥ यथेच्छसितथाभुंक्ष्ववयंतेकिंकराअमी ॥ इत्युक्तोवणिजा
भक्तस्तस्थौतस्यगृहेसुखी ॥ १९ ॥ एवंगतेषुकालेषुसभक्तोवैश्यमंदिरे ॥ स्ववेश्मनिवसंस्तस्थौवैश्योविश्वस्तवानभूत् ॥ २० ॥
वैश्यपुत्रस्तुयोबालःसतंभक्तंपितुःसमम् ॥ अमन्यताथभक्तोपिपुत्रवत्तंनिरैक्षत ॥ २१ ॥ एकस्मिन्दिवसेतत्रग्रामस्यनिकटेवने ॥
श्रीकृष्णप्रतिमांरम्यांद्रष्टुंसर्वेगतास्ततः ॥ २२ ॥ वैश्यपत्नीचभक्तश्चतस्यबालश्चकन्यका ॥ देवंद्रष्टुंगताःसर्वेसाकंवैग्रामवासिभिः ॥
॥ २३ ॥ दृष्ट्वागत्यपुनःसर्वेतस्थुःस्वेस्वेगृहेजनाः ॥ वैश्यपुत्रस्तुतंभक्तंमुहुरुत्कंठितोब्रवीत् ॥ २४ ॥ नयमांतत्रयत्रास्तेदेवोप्रेक्ष्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

म्यहंतुतम् ॥ इतिबालवचःश्रुत्वाभक्तस्तंपरिगृह्यच ॥ २५ ॥ दर्शयामासतंदेवंपुनरानीतवान्गृहम् ॥ एवंमुहुर्मुहुस्तंतुदर्शयामा
सवैष्णवः ॥ २६ ॥ एकदातस्यभक्तस्यमतिरासीत्सुदारुणा ॥ तंनीत्वावैश्यबालंतुधनालंकारसंयुतम् ॥ २७ ॥ मारयित्वाथतंबा
लंतस्यालंकरणानिसः ॥ तंबालंमृतकंभूमौखनित्वातद्गृहंययौ ॥ २८ ॥ तत्रालंकरणंतस्यवस्त्रेबद्धान्यधापयत् ॥ प्रातर्गतुमना
भूत्वातूष्णींतस्थौसचोरवत् ॥ २९ ॥ अथसावैश्यपत्नीतुबहुकालगतंसुतम् ॥ विचिन्वतीनपश्यंतीतदापप्रच्छवैष्णवम् ॥ ३० ॥
सभक्तस्तामुवाचाथनागतोह्यममांतिकम् ॥ ततःसातीवसंत्रस्तावैश्यंप्राहातिविह्वला ॥ ३१ ॥ पतेपुत्रोगृहेनैवबहुकालाद्विवर्तते ॥
श्रुत्वैतद्वचनंतस्याःसवैश्यश्चातिचिंतया ॥ ३२ ॥ दासींप्राहनिरीक्षस्वकुत्रास्तेसतुबालकः ॥ श्रुत्वातद्वचनंदासीग्राममध्येद्रुतं
ययौ ॥ ३३ ॥ पप्रच्छचजनान्सर्वान्दासीपुत्रंनदृष्टवान् ॥ परावृत्यनिजंगेहमागच्छंतींततस्तुताम् ॥ ३४ ॥ उवाचपथिकोप्येकःसं
न्यासीदासयोषितम् ॥ अयंयस्त्वद्गृहेभक्तोवैष्णवःखलुतिष्ठति ॥ ३५ ॥ तेनैवनिहतोबालोनूनंनास्त्यत्रसंशयः ॥ अद्यैवाहंवनेऽप
श्यद्रक्तंतंदुर्गमस्थले ॥ ३६ ॥ भूमौखनित्वाकिंचित्तुसंस्थाप्यापूरयन्मृदा ॥ श्रुत्वैतद्वचनंतस्यस्वामिनोदासवल्लभा ॥ ३७ ॥
प्रणिपत्याब्रवीन्नाथदर्शयस्वस्थलंहितत् ॥ ततःसभिक्षुकोदासींदर्शयामासतत्स्थलम् ॥ ३८ ॥ दृष्ट्वादासीशोणिताक्तंतत्स्थलंप्ररुरो
दसा ॥ उत्पाट्यबालकंदृष्ट्वामृतकंसापुनस्तथा ॥ ३९ ॥ भूमौनिखन्यचायातास्वामिनंवैश्यमब्रवीत् ॥ नाथानेनतुभक्ते
नबालस्तेघातितोवने ॥ ४० ॥ दृष्ट्वाहंमृतकंबालमागतास्मितवांतिकम् ॥ केनापिस्वामिनादृष्टस्तस्मिन्स्थानेत्वयंवने ॥ ४१ ॥
भूमौखनित्वानिक्षिप्यकिंचिद्वैपूरयन्मृदा ॥ ततस्तेनैवतत्स्थानंदर्शितंमेऽथभिक्षुणा ॥ ४२ ॥ अहंतुबालमुत्पाट्यदृष्ट्वातंस्थाप्यपूर्व

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वत् ॥ समागतास्मिभवनंसत्यमेतन्नसंशयः ॥ ४३ ॥ इतिश्रुत्वावचस्तस्यास्तत्रासौगतवांस्तदा ॥ ददर्शतंनिजंबालंगतासुंस्था
पितंभुवि ॥ ४४ ॥ पूरयित्वास्वयंमृद्भिःसमायातोतिहृष्टवत् ॥ उवाचसर्वंभार्यायैनिजकर्मविचेष्टितम् ॥ ४५ ॥ साधुसेवाप्रसादे
नदत्तोयंहरिणाशिशुः ॥ तेनैवनिहतोयंचेत्तदानास्त्यस्यदूषणम् ॥ ४६ ॥ अतःपरंनवक्तव्यंत्वयात्रशपथोमम ॥ शृणुचैकंमतंमेऽ
द्ययथास्यादावयोःसुखम् ॥ ४७ ॥ मृतोयंबालकोदैवाज्जीवनंनसुखायनौ ॥ ततस्त्वेषातुयापुत्रीकृपणातांतुभक्तितः ॥ ४८ ॥ भ
क्तायास्मैप्रदायाथगत्वाचावांमहापथम् ॥ हिमाद्रौप्रतपिष्यावोहितमेतन्मतंमम ॥४९॥ इतिपत्युर्वचःश्रुत्वास्वीचक्रेसापिसुव्रता ॥ तत
स्तस्मिन्दिनेवैश्यस्तंभक्तंप्राहतंस्तुवन् ॥ ५० ॥ अहोमेतनयोजातोभवतामेवसेवनात् ॥ दुर्दैवदोषतोनष्टइदानीमितिमेमतिः ॥५१॥
अतोमयाहितंकिंचित्पत्न्यासहविचारितम् ॥ अनुमोदस्वतत्त्वंतुकृपांकुरुममोपरि ॥ ५२ ॥ इतिश्रुत्वावचस्तस्यसभक्तोतीवशंकि
तः ॥ नोवाचकिंचित्स्वंकर्मस्मृत्त्वासोतीवभीतवत् ॥ ५३ ॥ मुहुरेवंप्रार्थ्यमानःशनैराहकिमित्यहो ॥ ततोवैश्योब्रवीद्भक्तंभवा
न्भक्तःसुहृन्मम ॥ ५४ ॥ मज्जातीयोसितस्मात्त्वांस्वाभीष्टंप्रार्थयाम्यहम् ॥ बालोहृतोविधात्राथकन्येयंवर्ततेधुना ॥ ५५ ॥
इमंतुभ्यंप्रदायाथयास्यावश्चोत्तरापथम् ॥ इदंधनमिमेभृत्यायशश्चापीहयत्स्थितम् ॥ ५६ ॥ नतत्ररमतेचित्तमावयोरतिदुःखिनोः ॥
तस्मात्स्वीकुरुमद्वाक्यंगृहाणेमांसुतांमम ॥ ५७ ॥ धनानिचैवसर्वाणितवैतानिनसंशयः ॥ यत्त्वयाचिंत्यतेचित्तेस्मृत्वाकर्मस्वयं
कृतम् ॥ ५८ ॥ नतत्रतवदोषोस्तिकर्त्तानारायणःस्वयम् ॥ इतिवैश्यवचःश्रुत्वानस्वीचक्रेथवैष्णवः ॥ ५८ ॥ म्लानमुखोबहिर्ग
त्वामर्तुमैच्छतसोप्यथ ॥ अथतस्मिन्क्षणेकृष्णोभक्तस्यगुरुवेषधृक् ॥ ६० ॥ तेषांसंरक्षणार्थायसमायातोतिसत्वरम् ॥ दृष्ट्वातंगुरु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मायांतंसभक्तोतीवलज्जितः ॥ ६१ ॥ ज्ञात्वादुश्चरितंमेद्यगुरुर्मेकिंवदिष्यति ॥ इतिचिंतापरोप्येषस्वीचकारगुरुःस्वयम् ॥ ६२ ॥
वैश्योपितद्गुरुंभक्त्यासंपूज्याहनिजेप्सितम् ॥ गुरुस्तुश्रुत्वातत्सर्वंवैश्यंप्राहातिसत्वरम् ॥.६३ ॥ सम्यग्विचारितंवैश्यत्वयैतत्समयो
चितम् ॥ कन्यादानंकुरुष्वाद्ययात्रायांयुवयोस्तुयत् ॥ ६४ ॥ करिष्यतिहरिस्तत्तेसत्यमेवनसंशयः ॥ इत्युक्तोगुरुणावैश्यःसमानी
यपुरोहितम् ॥६५॥ तस्मैभक्तायतनयांददौसविधिपूर्वकम् ॥ अथदानक्षणेलाजहोमस्यसमयेगुरुः ॥६६ ॥ प्राहलाजास्तुकन्यायाभ्रा
तुर्हस्तात्प्रगृह्यते ॥ इतिसर्वत्रासिद्धांतस्तस्माद्भ्रातास्तिवानवा ॥ ६७ ॥ इतिश्रुत्वावचस्तस्यगुरोर्वैश्यसुहृज्जनाः ॥ रुरुदुर्भृशदुः
खार्तावैश्यस्ततप्रत्यषेधयत् ॥ ६८ ॥ अथसोपिगुरुःप्राहवर्ततेस्याःसहोदरः ॥ आयातिकेनाचित्सार्द्धंक्षणादेवनसंशयः ॥ ६९ ॥
इतितस्यगुरोर्वाक्यंश्रुत्वासर्वेतिविस्मिताः ॥ अथैकस्तत्रविपिनेपत्राद्यानयितुगतः ॥ ७० ॥ तद्ग्रामीणस्तुतंबालंदृष्ट्वावैश्यस्यचेत्य
यम् ॥ वनेकथमिहायातइतिसंचिंत्यतंपुनः ॥ ७१ ॥ गृहीत्वावैश्यभवनेनिनायातित्वरान्वितः ॥ दृष्ट्वातंबालकंसर्वेसाधुसाध्वितितं
गुरुम् ॥ ७२ ॥ प्रणेमुःपूजयित्वाथगुरुस्तंबालकंस्वयम् ॥ गृहीत्वापाणिनालाजान्दापयामासतत्करात् ॥ ७३ ॥ ततोविवाहेसंजा
तेवैश्यःपत्नीसमन्वितः ॥ किमयंस्वप्नआहोस्विद्भ्रमोयमित्यचिंतयत् ॥ ७४ ॥ साधुसेवाफलंचैतदित्येवंनिश्चिकायसः ॥ अथप्रा
तर्गुरुस्तस्माद्वैश्यागारात्त्वरान्वितः ॥ ७५ ॥ गंतुमुत्कंठितोवैश्यस्तंहिसंपूज्यभक्तितः ॥ प्रस्थापयामासमुदादत्त्वाधनमनेकशः ॥
॥ ७६ ॥ अथवैश्यःपरावृत्यभक्तेनसहहर्षितः ॥ सुतंदृष्ट्वाऽक्षतंहृष्टोसाधुसेवापरोभवत् ॥ ७७ ॥ भक्तोपितस्यबालस्यस्वर्णालंकर
णानितु ॥ परिधायचतंबालमुवाचस्वस्यकिल्बिषम् ॥ ७८ ॥ वैश्यःश्रुत्वातुतत्सर्वंज्ञातपूर्वंनविव्यथे ॥ संतोषवाक्यंभक्तायप्रो

CSU-Jaipur Campus Collection

वाचाथप्रहर्षितः ॥ ७९ ॥ नतेदोषोस्तिजामातःसर्वंहरिविचेष्टितम् ॥ एवंवैश्यस्यभक्त्यावैभगवान्भक्तवत्सलः ॥ ८० ॥ आग
त्यजीवयामासवैश्यनिश्चययंत्रितः ॥ क्वपुत्रमरणंतेनभक्तेनेतिनिशम्यसः ॥ ८१ ॥ क्वभक्तिंतुपुनस्तस्यचकाराथदृढव्रतः ॥ एवं
निश्चित्यबुद्धितुकलावपिजगन्मयः ॥ ८२ ॥ नदूरेस्तीतिमंतव्यंसत्यंसत्यंनसंशयः ॥८३॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येवैश्यभक्तिच
रितंनामषष्टितमःसर्गः ॥ ६० ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणश्रीकृष्णेभक्तिमाप्नुयात् ॥ १ ॥ पश्चिमे
गढचित्तेतुराजासीत्कृष्णपूजकः ॥ चतुर्भुजाहरेर्मूर्तिस्तस्यगेहेप्रतिष्ठिता ॥ २ ॥ तेषांमध्येस्थितश्चैकःसेनानीराजवल्लभः ॥ तस्यसर्वा
धिकोमानोवेतनंत्वाधिकंतथा ॥ ३ ॥ विश्वासोपिहितस्यैवराज्ञःसर्वाधिकःकिल ॥ नाम्नाभुवनसिंहस्तुजात्याचौभानसंज्ञितः ॥ ४ ॥
महावीरःस्वामिकार्य्येमरणेकृतनिश्चयः ॥ एकदासतुराजावैमृगयायांगतोवने ॥ ५ ॥ तत्रहत्वामृगान्व्याघ्रान्गृहमागंतुमुद्यतः ॥ तदै
काहरिणीराज्ञःसमीपात्प्रपलायिता ॥ ६ ॥ तदान्यांस्तत्रसंस्थाप्यनीत्वातान्भुवनंनृपः ॥ चलितोहरिणींहंतुंहयेनातिजवेनवै ॥ ७ ॥
अथारण्येसरस्तीरेकर्दमोदकभीतितः ॥ नगंतुंहरिणीशक्राततोराजाब्रवीद्वचः ॥८॥ तस्मैभुवनसिंहायजहीमंमृगमुत्तमम् ॥ श्रुत्वातद्व
चनंराज्ञोद्रुतंसभुवनाह्वयः ॥९॥ खड्गेनतांजघानाशुहरिणींराजशासनात् ॥ उदरेनिहतासातुआसन्नप्रसवायदा ॥१०॥ तस्याउदरमध्या
त्तुशिशुयुग्मंपपातह ॥ दृष्ट्वातुमृगजौतौतुराजाकिंचिद्दयान्वितः ॥ ११ ॥ तत्याजहिंसासंवादंकृष्णभक्तिरतोभवत् ॥ खड्गंतत्या
जतंहस्तान्निर्माय्यासिंसदारुजम् ॥ १२ ॥ कोशेकृत्वाकरेदध्रेजीविकार्थंनृपांतिके ॥ चतुर्भुजमहोरात्रंध्यायंस्तन्नामसंस्मरन् ॥ १३ ॥
हिंसाविरतराजानंसिषेवेसचवैष्णवः ॥ एकस्मिन्दिवसेतस्यज्ञातयोन्येविरोधिनः ॥ १४ ॥ राजानमूचुःसर्वेपिभुवनस्यविचेष्टितम् ॥

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN
CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भुवनोयंमहाराजामिथ्यासेवांकरोतिवै ॥ १५ ॥ मालांजग्राहस्वंखड्गंतत्याजदारुजंत्विदम् ॥ कृत्वासिंकोशमध्येतुधृत्वातंधार्य्यतेक
रे ॥ १६ ॥ त्वंतुधूर्तस्यतस्यैवविश्वासंकुरुषेसदा ॥ इतिश्रुत्वावचस्तेषांजनानांसनृपस्तदा ॥ १७ ॥ तानुवाचास्यशीघ्रंवैकरिष्या
मिविनिश्चयम् ॥ इतिश्रुत्वाततोराजानिनायकतिंचिद्दिनम् ॥ १८ ॥ अथैकस्मिन्दिनेराजाद्रष्टुमाराममुत्तमम् ॥ आययौसर्वभृत्यैश्च
भुवनेनापिसंयुतः ॥ १९ ॥ तत्ररंभावनंपक्वंफलाढ्यंसददर्शह ॥ दृष्ट्वैकंकदलींपक्वफलाढ्यांनृपतिःस्वयम् ॥ २० ॥ छित्वासिनाफ
लंतस्यस्थापयामासचैकतः ॥ अथोवाचसतान्सर्वान्भुवनंचापिभूपतिः ॥ २१ ॥ एवंरंभातरुंछित्त्वानयध्वंतत्फलानिभोः ॥ इतिश्रुत्वा
वचस्तस्यसर्वेतेवैविरोधिनः ॥ २२ ॥ तदैवरंभांछित्त्वावैफलंभूपतयेददुः ॥ अथचिंताकुलस्तत्रभुवनश्चातिशंकितः ॥२३ ॥ सस्मा
रतंनिजंदेवंचतुर्भुजमनन्यधीः ॥ अथतस्मित्क्षणेराजातंवैभुवनमब्रवीत् ॥ २४ ॥ कस्मात्त्वंनैवसंछिद्यरंभामानयसीहभोः ॥ इतिश्रु
त्वावचस्तस्यराज्ञःसभुवनाह्वयः ॥ २५ ॥ चतुर्भुजमुवाचेदंमनसाचातिविस्मितः ॥ अद्यमेजीवितंकीर्तिस्त्वदधीनेचतुर्भुज ॥ २६ ॥
रक्षचागमयात्रैवयथेच्छसितथाकुरु ॥ इत्युक्त्वासिंकरेकृत्वावामेवैदक्षपाणिना॥२७॥ कोशात्खड्गंविनिष्कास्याचिच्छेदकदलीतरुम्॥
निरीक्ष्यखड्गंतेसर्वेघोरंविद्युत्समद्युतिम् ॥२८॥ निमील्याक्षिणीभीत्याराजाद्यास्तत्रसंस्थिताः ॥ राजाभुवनसिंहंतंप्रोवाचातीवविस्मितः
॥२९॥कस्मादिहागतोयंतेखड्गंपश्यामिदेहिमे ॥ इतिश्रुत्वावचोराज्ञःसतदाभुवनाह्वयः ॥३०॥ ददौखड्गंकरेराज्ञोददर्शासिंमहाद्भुतम् ॥
ततोराजातिकोपेनभ्रुकुटीभीषणाननः ॥३१॥ विरोधिनोददर्शाथराजानंतेविरोधिनः ॥ ऊचुःप्रणम्यभोस्वामिन्खड्गोयंदारुनिर्मितः
॥ ३२ ॥ सत्यमेतन्नसंदेहःपृच्छत्वंभुवनंनृप ॥ ततोराजातुतंखड्गंदत्त्वाभुवनमब्रवीत् ॥ ३३ ॥ किमिदंभुवनैतेत्वांवदंतिदृढनिश्चयाः ॥

फलितं च
भरोसो।

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्वंसत्यंवदकिंचास्तिकारणंकलहायवै॥३४॥इतिराज्ञोवचःश्रुत्वाभुवनोवाक्यमब्रवीत्॥राजन्सत्यंवदंत्येतेनमिथ्यावादिनोह्यमी ॥३५॥
शृणुष्वममवृत्तांतंकथयामियथार्थतः ॥ तस्मिन्दिनेमृगीराजन्यदाघातितवानहम् ॥ ३६ ॥ दृष्ट्वातत्पोतयुगलंबभूवातीवमेदया ॥ वै
राग्यंचसमुत्पन्नंत्यक्ताहिंसाततोमया ॥ ३७ ॥ ध्यायंश्चतुर्भुजंदेवंकपटेनापितेनृप ॥ सेवांकुर्वञ्जीविकायैतिष्ठामितवसान्निधौ ॥३८॥
एषदारुमयःखड्गोमयानिर्मायितःकिल ॥ धृत्वाकोशंकरेकृत्वातिष्ठामिपुरतस्तव ॥ ३९ ॥ अद्यकोवेदकियातंयद्दारुमयएव
सः ॥ बभूवोत्तमखड्गस्तुकोवेदहरिचेष्टितम् ॥ ४० ॥ जहिरंभातरुंवेतिश्रुत्वाज्ञांशंकितोभवम् ॥ ध्यात्वाचतुर्भुजंदेवंत्वत्समक्षंनृपोत्तम
॥ ४१ ॥ कोशान्निष्काशितःखड्गोदृष्टमेवमहाद्भुतम् ॥ इतिश्रुत्वावचोराजाभुवनस्यमहात्मनः ॥ ४२ ॥ प्रोवाचखड्गंकोशाद्वैपुनर्नि
ष्कास्यतांत्वय ॥ श्रुत्वानृपवचःसोपिभुवनोसिंतुकोशतः ॥४३॥ निष्कास्यदर्शयामासखड्गंदारुमयंतदा ॥ राजादृष्ट्वाथतंदारुमयंख
ड्गंस्वयंतदा ॥ ४४ ॥ प्रशशंसास्यभक्तिंसप्रोवाचभुवनंवचः ॥ एतत्तेभक्तिमाहात्म्यंभुवनास्तिनसंशयः ॥ ४५ ॥ चतुर्भुजस्तवप्रीतस्ते
नेदंसकलंकृतम् ॥ अतःपरंस्वगेहेत्वंस्थित्वातद्भजनंकुरु ॥ ४६ ॥ गृहाणवेतनंमत्तोद्विगुणंनात्रसंशयः ॥ निवसस्वगृहेकृष्णंभज
स्वत्वंनिजेच्छया ॥ ४७ ॥ ममापिदर्शनंदेहिसत्यमेतन्नसंशयः ॥ इत्युक्तोभुवनोभूपंप्राहाज्ञांतेकरोम्यहम् ॥ ४८ ॥ इतिदृष्ट्वामहाश्च
र्यंराजाद्यागृहमागताः ॥ भुवनंतंप्रशंसंतोमनसाकर्मणागिरा ॥ ४९ ॥ यावज्जीवंसभुवनश्चतुर्भुजमुपास्यवै ॥ मृतोजगामपरमंधामकृ
ष्णप्रसादतः ॥ ५० ॥ एवंतुकथितंसर्वंभुवनस्यविचेष्टितम् ॥ शृण्वन्कृष्णेपरांभक्तिंलभतेनात्रसंशयः ॥ ५१ ॥ ॥ इति श्रीभग
वद्भक्तिमाहात्म्येभुवनचौभानचरितंनामैकषष्टितमःसर्गः ॥ ६१ ॥ छ ॥ ॥ अस्यैवराज्ञोभक्तेस्तुमाहात्म्यंपरमाद्भुतम् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वक्ष्यामिभक्तिजनकंशृण्वतांप्रीतिवर्द्धनम् ॥ १ ॥ चितौरगढराजस्यकृष्णमूर्तिश्चतुर्भुजी ॥ आसीत्तस्यास्तुपूजायांनियुक्तोब्राह्मणोत्तमः ॥ २ ॥ देवाजीइतिनाम्नासभक्तिमान्वैष्णवःशुचिः ॥ राजाज्ञयात्रिकालंसपूजयामासभक्तितः ॥ ३ ॥ राजातुप्रत्यहंतत्रकृतनित्यक्रियःशुचिः ॥ समागत्यनमस्कृत्यचतुर्भुजमनन्यधीः ॥ ४ ॥ जगामराजकार्यार्थमेवंतस्यव्रतंदृढम् ॥ देवाजीतुततस्तस्मैराज्ञेरात्र्यर्पितांस्रजम् ॥५॥ प्रसादंप्रत्यहंप्रीत्याप्रददौप्रीतिहेतवे ॥ राजातुशिरसानत्वापर्यधात्तांस्रजंतदा ॥ ६ ॥ एकस्मिन्दिवसेतत्रदेवाजीब्राह्मणोत्तमः ॥ उपोष्यैकादशींप्रातर्द्वादश्यांप्रातरेवहि ॥ ७ ॥ चतुर्भुजंसमभ्यर्च्यराजार्थंचस्रजंस्वके ॥ गलेनिधायसंतस्थौराजागमनकांक्षया ॥८॥ अथागच्छंतमालोक्यशीघ्रंमालांगलात्तुसः ॥ उत्तार्यस्थाल्यांसंस्थाप्यराज्ञेदातुंव्यवस्थितः ॥ ९ ॥ अथराजातुभक्त्यातांगृहीत्वास्रजमुत्तमाम् ॥ परिधायददर्शाथमालायांधवलाःकचाः ॥१०॥ सक्रुद्धोनृपतिर्ज्ञात्वामालानेनधृतागले॥अतएवास्यवृद्धस्यलग्नाःशुभ्राःकचाइह॥११॥इतिसंचिंत्यतंविप्रंप्राहराजाद्भुतंवचः॥अहोवृद्धोबभूवासौकिमयंतुचतुर्भुजः ॥ १२ ॥ राजंतेधवलाःकेशास्तस्यमूर्धनिसंस्थिताः ॥ इतिश्रुत्वावचोराज्ञोदेवाजीवापिशंकितः ॥ १३ ॥ उवाचनृपतिंधैर्याद्राजन्वृद्धोहिकीदृशः ॥ विधेरपिविधातायःसकिंवृद्धोनभूपते ॥ १४ ॥ केशाःशुक्लास्तथाकृष्णानिष्केशत्वंतथापुनः ॥ सर्वमैच्छिकमेतस्यसंदेहंमाकुरुप्रभो ॥ १५ ॥ इतिश्रुत्वावचस्तस्यद्विजस्यसतुभूपतिः ॥ उवाचप्रातर्द्रक्ष्यामिवृद्धंवाशिशुमेववा ॥ १६ ॥ अद्यतुद्वादशीस्वल्पापारणार्थंत्वरान्वितः ॥ व्रजामिपाकशालायांभोक्तुंब्राह्मणसत्तम ॥ १७ ॥ इतिश्रुत्वावचस्तस्यदेवाजीनृपतेर्भयात् ॥ शंकांतुमहतींप्राप्यभुक्तवान्नैवकिंचन ॥ १८ ॥ अहोराज्ञापरिज्ञातमुपभुक्तास्रगर्पिता ॥ ततःक्रुद्धेनमनसासक्षिप्रंवाक्यमब्रवीत् ॥ १९ ॥ पलायित्वाक्वगंतव्यमवस्था

CSU-Jaipur Campus Collection

अहिल्यापाषाणः

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मेजरातुरा ॥ तस्माच्चतुर्भुजोमेह्यशरणंकोपिनापरः ॥ २० ॥ इतिनिश्चित्यतस्याग्रेसुष्वापसद्विजोत्तमः ॥ त्यक्तान्नजलपानंससंध्या
पूजांविधायच ॥ २१ ॥ सुप्तमात्रस्यतस्याथचतुर्भुजउवाचहं ॥ उत्तिष्ठविप्रभुंक्ष्वान्नंत्यजशोकंनिरर्थकम् ॥ २२ ॥ त्वदुक्तंनमृषा
विप्रराजाज्ञास्यत्यसंशयम् ॥ पश्यमेमस्तकेकेशाःशुभ्रावक्षःस्थलेतथा ॥२३॥ आगत्यराजामांदृष्ट्वावृद्धंतेभक्तिमुत्तमाम् ॥ करिष्यति
नसंदेहस्तस्मात्त्वंभुंक्ष्वसांप्रतम् ॥ २४ ॥ इतिदृष्ट्वाहरिंस्वप्नेदेवाजीचातिहर्षितः ॥ उत्थायतस्यदेवस्यमस्तकंहृदयंतथा ॥ २५ ॥
शुभ्रकेशःपरिवृतमपश्यद्वृद्धवच्चतम् ॥ हरिंदृष्ट्वाब्रह्मरूपंजहर्षद्विजसत्तमः ॥ २६ ॥ बुभुजेफलमूलादिस्वप्नवृत्तमनुस्मरन् ॥ अथप्र
भातेराजापिकृतनित्यक्रियःशुचिः ॥ २७ ॥ द्रष्टुंचतुर्भुजंदेवंचागतोब्राह्मणैस्सह ॥ नमस्कृत्यस्थितस्तत्रदेवाजीतुततःपरम् ॥ २८ ॥
उवाचवचनंराज्ञेसाक्षेपंस्मितपूर्वकम् ॥ चतुर्भुजंपश्यराजन्वृद्धोयमथवायुवा ॥ २९ ॥ इतिविप्रवचःश्रुत्वाराजाकिंचित्प्रकुप्यच ॥
मूर्तेःसमीपमागत्यददर्शतंचतुर्भुजम् ॥ ३० ॥ मस्तकेधवलाःकेशास्तथावक्षसिसंस्थिताः ॥ राज्ञादृष्टस्तदाराजामहाश्चर्य
ममन्यत ॥ ३१ ॥ दर्शयामासतान्सर्वान्ब्राह्मणांश्चपुनःपुनः ॥ समीपमेत्यदेवस्यददर्शातिप्रयत्नतः ॥ ३२ ॥ देवाजीतुततोवस्त्रंमुकु
टंदेवतांगतः ॥ पृथक्कृत्याब्रवीद्वाक्यंपश्यसर्वंनराधिप ॥ ३३ ॥ ततोदृष्ट्वामहाराजोब्राह्मणैःसहितःस्वयम् ॥ शिखाकेशद्वयंधृत्वा
संदेहाद्विचकर्षच ॥ ३४ ॥ ततश्चोत्पाटितंकेशद्वयंतस्माच्चशोणितम् ॥ निःससारततोराजादृष्ट्वाभीतोऽतिशंकितः ॥ ३५ ॥
देवाजीब्राह्मणस्याथपादयोःपतितोनृपः ॥ त्राहिब्रह्मन्दुराचारंसापराधंतुमामिह ॥ ३६ ॥ गतोमेत्वयिसंदेहःपश्याग्येवंचतुर्भु
जम् ॥ केशोत्पाटनतःशीर्षादसृग्धारापतत्यसौ ॥ ३७ ॥ निवारयद्रुतंत्वंतुप्रार्थयित्वाहरिंद्विज ॥ श्रुत्वैतद्वचनंतस्यदेवाजीमू ॥ ९२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तिंसन्निधौ ॥ ३८ ॥ उवाचभगवंतंसक्षम्यतांमूर्खचेष्टितम् ॥ ततोरुधिरधारासान्यवर्तताशिखास्थलात् ॥ ३९ ॥ राजातुभी तवत्तत्रबद्धांजलिपुटःस्थितः ॥ देवाजीतुततोदेवंसंपूज्यवहिरागतः ॥ ४० ॥ सांत्वयामासराजानंमाचिंतांकुरुभूपते ॥ जातोमहाननर्थस्तुत्वत्तोनैवात्रसंशयः ॥ ४१ ॥ क्षम्यतेभगवानेषसापराधस्यतेप्रभो ॥ गच्छस्वभवनेराजंस्त्यजचिंतां मनोगताम् ॥ ४२ ॥ इत्युक्तस्सनृपस्तेनजगामगृहमात्मनः ॥ चिंतयन्स्वापराधंहिमहाचिंतापरोभवत् ॥ ४३ ॥ उपवासपरोभूत्वारात्रौसुष्वापभूपतिः ॥ ततःस्वप्नेददर्शाथकंचिद्विप्रंतपस्विनम् ॥ ४४ ॥ आगत्यब्रूतेभोराजन्किमर्थंखि द्यसेवृथा ॥ अतःपरंतुभगवान्गतोन्यत्रचतुर्भुजः ॥ ४५ ॥ इदंतुत्वदवस्थानंम्लेच्छस्तद्वैग्रहीष्यति ॥ इतिदृष्ट्वानृपःस्वप्नंभयात्त्वरितं तमुत्थितः ॥ ४६ ॥ चिंतयामासबहुशोमंत्रिणःसमुवाचतत् ॥ अथयातिकतिपयेकालेदिल्लीश्वरोनृपः ॥ ४७ ॥ म्लेच्छोज ग्राहतत्स्थानंततोदेवंचतुर्भुजम् ॥ नीत्वातेपूजकाःसर्वेअंतर्वेदमुपागमन् ॥ ४८ ॥ अद्यापिगोकुलस्थास्तेपूजयन्त्यतिभक्तितः ॥ एवंचतुर्भुजेभक्तिर्द्विजस्यपरिवर्णिता ॥ ४९ ॥ श्रुतेयंभक्तिदानॄणांपातकध्वंसकारिणी ॥ ५० ॥ ॥ इति श्रीभगवद्भक्तिमा हात्म्येदेवाजीभक्तिचरितंनामद्विषष्टितमःसर्गः ॥ ६२ ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणदृ ढाभक्तिर्भवेन्नृणाम् ॥ १ ॥ राजोदयपुरस्यासीज्जात्यारावेतिविश्रुतः ॥ तस्यासीत्क्षत्रियोभृत्योमहाशूरोनृपप्रियः ॥ २ ॥ संग्रामेनिहतःसोथसंमुखंराज्ञिपश्यति ॥ ततोनरपतिस्तस्यपुत्रानाहूययत्नतः ॥ ३ ॥ संतोष्यचतुरोबंधून्रक्षपृथिवीपतिः ॥ तेषां मध्येत्रयोनित्यंराजसेवापरायणाः ॥ ४ ॥ तेषांकामध्वजोनाम्नाकनीयानतिभक्तिमान् ॥ सराजभवनंगत्वासिषेवेचनराधिपम् ॥ ५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रातरुत्थायभवनाद्वनंगत्वातरोस्तले ॥ रामेतिप्रजपन्नित्यंमध्याह्नेतुपुनर्गृहान् ॥ ६ ॥ आगत्यान्नमशित्वाचपुनर्यातिवनंद्रुतम् ॥
दृष्ट्वैवंचरितंतस्यभ्रातुस्तेबांधवाःक्रुधा ॥ ७ ॥ ऊचुःक्रोधयुतंवाक्यंभर्त्सयंतोतिनिर्दयाः ॥ अरेमूर्खगृहंत्यक्त्वाप्रातरुत्थायगच्छ
सि ॥ ८ ॥ भोक्तुंपुनःसमायासिपुनर्यासिगृहाद्वनम् ॥ केयंतेमतिरुत्पन्नाकेनेत्थंशिक्षितोह्यसि ॥ ९ ॥ राज्ञोभृत्यावयंसर्वेयामो
नित्यंनृपांतिके ॥ त्रयोवयंयातुनत्वंतत्रगच्छसिमूर्खवत् ॥ १० ॥ राजात्वामीदृशंज्ञात्वाकिंकरिष्यतिधर्मवित् ॥ योददातिपि
तुर्भक्तिंसंस्मृत्याद्यापिनोधनम् ॥ ११ ॥ तस्मादस्माभिरेवाथसहागच्छनृपांतिकम् ॥ नोचेत्क्रुद्धोनृपःसर्वंहरिष्यतिनसंशयः ॥
॥१२॥ इतिश्रुत्वाकामध्वजोबंधूनांवचनंहितम् ॥ उवाचविनयाद्भ्रातॄन्स्मितपूर्वमिदंवचः ॥ १३ ॥ सत्यंवदतयूयंभोभ्रातरोनात्रसंश
यः ॥ परंत्वहंतुचैकस्यराज्ञोभृत्यत्वमाप्तवान् ॥ १४ ॥ त्यक्त्वायोध्यापतिंतंतुराजराजेश्वरंप्रभुम् ॥ नान्यंसेवितुमायामिसत्यमे
तद्ब्रवीमिवः ॥ १५ ॥ राजायंसेवितःपित्रायुष्माभिःसेव्यतेपुनः ॥ युष्मासुपरितुष्टोस्तिमयिकोपेनतस्यकिम् ॥ १६ ॥ मद्वेत
नस्यहर्ताचेद्भविष्यतिभवत्वयम् ॥ इत्युक्त्वाविररामाथभ्रातॄन्कामध्वजस्तदा ॥ १७ ॥ भ्रातरोपिचतंभ्रांतचित्तमुन्मेनिरेपुनः॥
ऊचुःसर्वेदयायुक्ताअरेवेश्मनिसंवस ॥ १८ ॥ मायाहिविपिनंघोरंसिंहव्याघ्रभयंकरम् ॥ किंचिद्दैवान्मृतंत्वांतुकोधक्ष्यतिवनेपुनः ॥
॥ १९ ॥ किंचतत्रवृकाव्याघ्राभक्षिष्यंतिकलेवरम् ॥ तस्मादिहैवनिवसभ्रातर्मागच्छकाननम् ॥ २० ॥ इतिश्रुत्वावचस्तेषां
भ्रातॄणांचदयान्वितम् ॥ उवाचतान्कामध्वजःप्रहसन्विनयान्वितः॥ २१ ॥ भ्रातरःसत्यमेवेदंयुष्माभिर्यदुदाहृतम् ॥ परंतुयस्यभृत्योऽ
हंसमांधक्ष्यतिनिश्चितम्॥२२॥तस्ययोजायतेदेवानागायक्षाश्चराक्षसाः ॥ नोपसर्पंतितंभक्तंव्याघ्रादीनांतुकाकथा ॥२३॥ नतस्यभृत्यः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कोप्यस्तिदुःखितोवाधरातले॥इतियूयंविजानीतमांचिंतांत्यजताधुना॥२४॥ इत्युक्त्वान्कामध्वजोह्रदिरामंविचिंतयन्॥जगामविपिनंत
त्रसस्मारपूर्ववद्धरिम्॥२५॥एवंप्रत्यहमेवासौवनमागत्यवैहरिम् ॥ चिंत्यमानस्तुमध्याह्नेभोक्तुमायातिमंदिरम् ॥२६॥ भ्रातृभिश्चापिवि
ज्ञातोविक्षिप्तोयंनसंशयः ॥ तदारभ्यनकिंचित्तमूचुरौदास्यमाश्रिताः ॥ २७ ॥ एवंगतेषुकालेषुचैकस्मिन्दिवसेसतु ॥ कामध्वजो
ममाराथचिंतयन्रघुनायकम् ॥ २८ ॥ ततस्तंतुमृतंज्ञात्वाभगवान्भक्तवत्सलः ॥ प्रेषयामासशतशोवानरांस्तस्यसन्निधौ ॥ २९ ॥
दग्धुंकामध्वजंभक्तंमृतंज्ञात्वातिसत्वराः ॥ ततस्तेवानरास्तत्रसमागत्यसुशंकितम् ॥ ३० ॥ उत्थाप्यतंशवंनद्यास्तीरेनीत्वाशुचि
स्थले ॥ काष्ठान्यानीयशुष्कानितस्योपरिनिधायते ॥ ३१ ॥ ददुरग्निंमुखेतस्यमध्याह्नेसमुपस्थिते ॥ अथतस्यतुयेयत्रभ्रातरो
गृहसंस्थिताः ॥ ३२ ॥ सस्मरुस्तंकामध्वजमद्यासौनागतःकुतः ॥ ततस्तेषांतुभ्रातृणामेकस्तत्रगतोवने ॥ ३३ ॥ द्रष्टुंतंभ्रात
रंभ्रातापश्यंस्तत्स्थानमुत्तमम् ॥ शुष्ककाष्ठस्यनिचयेस्थापितंमृतकंतुतम् ॥ ३४ ॥ वानराःप्रादहंतिस्मदृष्ट्वेदंप्ररुरोदह ॥ अथ
वानरभीत्यासतत्रगंतुंशशाकन ॥ ३५ ॥ द्रुतमागत्यभवनेभ्रातॄनाहरुदन्सवै ॥ श्रुत्वातद्वचनंतौतुभ्रातरौचातिदुःखितौ ॥ ३६ ॥ आ
जग्मतुर्ग्रामवृद्धैःरुदंतौतत्समीपतः ॥ दृष्ट्वातानागतान्सर्वान्मनुष्यान्वानराश्चते ॥ ३७ ॥ तस्मात्स्थानादुपक्रम्यतस्थुर्नैवातिदूरतः ॥
ततस्तेभ्रातरोन्येचग्रामवृद्धास्तथापरे ॥ ३८ ॥ चितासमीपमागत्यददृशुःकामध्वजंतदा ॥ तेषांसंदर्शनार्थायनाग्निस्तस्यमुखंपु
रा ॥ ३९ ॥ ददाहदृष्टंतैःसर्वैःभस्मसादकरोत्क्षणात् ॥ ततस्तौभ्रातरौतेचग्रामीणाःशोकदुःखिताः ॥ ४० ॥ ततःप्रचलितांस्तां
स्तुवानरान्ददृशुस्त्वमे ॥ स्नात्वानद्यांजलंतस्मैदत्त्वाकामध्वजायते ॥ ४१ ॥ जग्मुर्विपिनमध्येतुतदाश्चर्यमिवाभवत् ॥ अथसर्वे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पितेग्राममागत्यचौर्द्ध्वदैहिकम् ॥ ४२ ॥ चक्रुःकामध्वजस्याथददुरन्नंधनानिच ॥ पश्येदंपरमाश्चर्यंप्रशशंसुर्जनाश्चतम् ॥ ४३ ॥
एवंकामध्वजोभक्तिंकृत्वाप्राप्यहरेःपदम् ॥ ददाहभगवांस्तस्यशत्रवंभक्त्यावशीकृतः ॥ ४४ ॥ यःशृणोत्येतदाख्यानंदुर्गतिस्तस्यन
श्यति ॥ प्रसन्नोभगवांस्तस्मैददात्यभिमतंपदम् ॥ ४५ ॥ इति श्रीभगवद्भक्तिमाहात्म्येकामध्वजचरितंनामत्रिषष्टितमःसर्गः॥ ६३॥
अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणभक्तिमाञ्जायतेनरः ॥ १ ॥ मरुदेशेबभूवैकोराजाजैमल्लसंज्ञकः ॥
सोपिमूर्तिंचतुर्बाहुंश्रीकृष्णस्यातिभक्तितः ॥ २ ॥ गृहेसंस्थाप्यतत्पूजांचकारप्रत्यहंनृपः ॥ यद्यद्वस्तुगृहेतस्यराज्येचासीन्महोत्त
मम् ॥ ३ ॥ तत्सर्वंविष्णवेतस्मैभक्त्यादत्त्वातुवैस्वयम् ॥ धनंपुत्रांस्तथादारानात्मानंचसमर्प्यसः ॥ ४ ॥ कृतकृत्योबभूवाथरा
जापरमभक्तिमान् ॥ उदयात्प्रहरंचैकंकृष्णपूजापरायणः ॥ ५ ॥ शृणोतिनान्यन्नोब्रूतेनान्यंपश्यतिभूपतिः ॥ एवंहिनियम
स्तस्यभूपतेःपरमोदृढः ॥ ६ ॥ कियत्यथगतेकालेशत्रवस्तस्यभूपतेः ॥ विचार्यमनसासर्वेराज्यंहर्तुंव्यवस्थिताः ॥ ७ ॥
अयंनृपोयाममेकंनपूजागृहतोऽन्यतः ॥ निर्यात्येवंव्रतंतस्यतावन्मध्येवयंपुनः ॥ ८ ॥ परिवार्यपुरींसर्वांजयमल्लंनिहत्यवै ॥ इति
निश्चित्यतेसर्वेजयमल्लस्यशत्रवः ॥ ९ ॥ एकस्मिन्दिवसेसर्वेपुरीमावव्रुराशुगाः ॥ दृष्ट्वातान्मंत्रिणःसर्वेजयमल्लस्याचिंतया ॥ १० ॥
पूजागृहद्वारिबहिःस्थित्वोचुर्विनयान्विताः ॥ राजंस्तेरिपवोऽभ्येत्यपरिवेष्ट्यपुरीमिमाम् ॥ ११ ॥ जिघांसंतःसमायांतिकिंकुर्मस्तद्व
दस्वनः ॥ इतिश्रुत्वावचस्तेषांमंत्रिणांनृपसत्तमः ॥ १२ ॥ नोवाचकिंचिन्मौनस्थःपूजयंस्तंचतुर्भुजम् ॥ एवंनिवेद्यबहुधामंत्रिणो
थयदोत्तरम् ॥ १३ ॥ नप्रापुश्चतदातेषामेकोवृद्धस्त्वरान्वितः ॥ सैन्यमाज्ञापयामासद्रुतंसन्नह्यतामिति ॥ १४ ॥ श्रुत्वातस्यवचः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रपलायिताः ॥३३॥ वयंतुदुर्गतिंप्राप्तारणभूमौमृताइव ॥ मरिष्यामःक्षतार्तावैक्षुत्पिपासार्दिताःकिल ॥३४॥ इतिश्रुत्वावचस्तस्यच्छि
न्नाङ्गस्यमहीपतिः॥अवतीर्यहयात्तस्मात्प्रणनाममुहुश्वतम्॥३५॥अहोधन्याभवंतोवैनशोचताकिमप्यथ ॥ आगच्छतगृहंमेद्यविक्षतान्प्र
करोमिवः ॥३६॥ इत्युक्त्वातान्समारोप्यवाहनेषुनृपोत्तमः॥ निनायनगरेसर्वानौषधैस्तानजीवयत् ॥३७॥ येमृतास्तत्रसंग्रामेतज्जाती
यास्तुतानपि ॥ स्वस्वजात्युक्तसंस्कारंकारयामासभूपतिः ॥ ३८ ॥ अथयेजीवितास्तांस्तुबहुमानपुरस्सरम् ॥ दत्त्वाधनान्नपानादि
प्रेषयामासतान्गृहान् ॥ ३९ ॥ तदातेमंत्रिणस्तंतुराजानंप्रोचुरानताः ॥ महाराजमहानेषसंशयोह्यदिवर्तते ॥ ४० ॥ शत्रुपक्षकराः
शूराःयेस्थितारणभूमिगाः ॥ मृतप्रायामृतावापिकृतास्तेषांचसत्क्रियाः ॥ ४१ ॥ अवतीर्यहयात्तांस्तुध्यात्वादेवंचतुर्भुजम् ॥
आहतेरिपवोभग्नामृताश्छिन्नाश्चयेनवै ॥ ४२ ॥ तंश्रीचतुर्भुजंतेवैममरक्षापरायणम् ॥ दृष्टवंतःस्वचक्षुर्भिर्धन्याएतेनसंशयः ॥ ४३ ॥
इतिज्ञात्वानमस्कारंतेषांवैकृतवानहम् ॥ इतिश्रुत्वावचस्तस्यराज्ञस्तेमंत्रिणस्तदा ॥ ४४ ॥ नमस्कृत्यचराजानंततस्तेस्वगृहंययुः ॥
राजापिस्वगृहेनित्यंचिंतयन्वैचतुर्भुजम् ॥ ४५ ॥ कृत्वाजगामतत्पूजांवैष्णवंपदमुत्तमम् ॥ एवंतुजयमल्लस्यभक्तिमाहात्म्यमुत्तम
म् ॥४६॥ श्रुत्वाभक्तिमवाप्नोतिमानवोनात्रसंशयः ॥४७॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येजयमल्लचरितंनामचतुःषष्टितमःसर्गः ॥
॥ ६४ ॥ छ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणभक्तिर्भवतिवैष्णवी ॥ १ ॥ जयमल्लस्यराज्ञो
वैगोपालोनगरेभवत् ॥ तस्यैकाजननीगेहेनान्यःकोपिनिजोजनः ॥ २ ॥ एकातुमहिषीतस्याद्दुग्धेनैवतुजीविका ॥ चारयामासविपि
नेगोपालोमहिषींस्वयम् ॥ ३ ॥ सायमागत्यनिलयेपयस्तस्याःप्रगृह्यवै ॥ दत्त्वामात्रेस्वयंभुक्तासुष्वापप्रत्यहंसतु ॥ ४ ॥ परंतुविपि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नेसाधुसेवायांनिरतोभवत् ॥ पत्रैःपुष्पैःफलैश्चैवपाकार्थमिंधनैरपि ॥ ५ ॥ सेवयामाससैवसाधून्गोपालोप्यतिभक्तितः ॥ केनापिशि
क्षितोरण्येनामस्मरणमाचर ॥ ६ ॥ तदाह्यनुपलंगोपोहरिनामस्मरन्हृदि ॥ साधुसेवांचकाराथमहिषीमपिचारयन् ॥ ७ ॥ एकस्मि
न्दिवसेसाधुसेवायांनिरतोवने ॥ विसस्मारांनिजांगोपोमहिषीमप्यरण्यगाम् ॥ ८ ॥ तदाचोरेणमहिषीहृतागोपस्यतस्यवै ॥ यमुना
याःपरेपारेनीत्वातांमहिषींययौ ॥ ९ ॥ संध्यायांसतुगोपालःस्मृत्वातांमहिषींनिजाम् ॥ अरण्येपर्यटन्द्रष्टुंनापश्यन्महिषींचताम् ॥
॥ १० ॥ ततोनिववृतेतस्मादागच्छन्निजमंदिरे ॥ मातुर्भयेनचिंतातोंगोपोगृहमुपागतः ॥ ११ ॥ दृष्टोजनन्यापृष्टस्तुम
हिषीकुत्रपुत्रक ॥ श्रुत्वैतद्वचनंमातुःप्रोवाचभयतोमृषा ॥ १२ ॥ मातर्मयासामहिषीन्यस्ताकस्मैद्विजन्मने ॥ पालयित्वा
घृतंतस्याःसंततिश्चापियापुनः ॥ १३ ॥ वर्षत्रयेणतत्सर्वंप्रदास्यातिनसंशयः ॥ तक्रमात्रेणजीवन्मेसकुटुंबस्यगोपकः ॥ १४ ॥
भविष्यतिचनिर्वाहःउपकारोमहानयम् ॥ इतिश्रुत्वावचस्तस्यगोपस्यजननीतदा ॥ १५ ॥ नाभ्यनंदततद्वाक्यात्तू
ष्णींतस्थौगृहेतुसा ॥ अथतस्यैजनन्यैसगोपालोन्नंत्वनिछया ॥ १६ ॥ प्रादायदत्त्वाविपिनेस्वयंसाधुजनैःसह ॥ फलमूलादि
भुंजानोनिन्येहानिसुखेनवै ॥ १७ ॥ अथतस्यतुभक्त्यापितुष्टोदेवश्चतुर्भुजः ॥ गोपायमहिषींदातुंमनश्चक्रेजनार्दनः ॥ १८ ॥
वर्षत्रयेव्यतीतेतुमहिषीमेवतस्करः ॥ नीत्वाथयमुनातोयेस्नापयन्स्वयमागतः ॥ १९ ॥ तस्याःपुत्रीत्रयंजातंपुत्र्यैकातुस्थितापु
रा ॥ एवंपंचाभवंस्तत्रमहिष्यश्चौरमंदिरे ॥ २० ॥ चौरेणतासांदुग्धादिविक्रीयापितुयद्धनम् ॥ तस्यालंकरणंकृत्वातासांग्रीवाव
बंधह ॥ २१ ॥ अथस्वात्योमहिष्यस्तायमुनायांचतस्करैः ॥ दंडेननिहतास्तोयाद्बाहिर्नैत्तंसमंततः ॥ २२ ॥ अथतासांतुस्थ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विराचतुर्णांजननीतुसा ॥ तांकृष्णःस्मारयामासननिवृत्तावभूवसा ॥ २३ ॥ ततस्तस्याश्चतस्रस्तुपुत्र्यस्तुययुरुत्सुकाः ॥ अथ
तेतस्कराःसर्वेनिपेतुंतत्तुमुत्सुकाः ॥ २४ ॥ नशेकुर्भीषिताःसर्वैतरंगैर्जलजंतुभिः ॥ माहिष्यस्तास्तुतत्तीर्य्यपरंपारंययुर्मुदा ॥ २५ ॥
ततोपिचसमेत्याशुगोपगेहंययुर्मुदा ॥ दृष्ट्वागोपस्तुमहिषीस्वांवृद्धांज्ञातवांस्तदा ॥ २६ ॥ तेसृष्टलग्नाअन्यास्तुसपुत्रीस्तत्सुता
इति ॥ ज्ञात्वानिनायभवनेगोपोमातरमब्रवीत् ॥ २७ ॥ ममेयंमहिषीमातर्ब्राह्मणेनसमर्पिता ॥ घृतमूल्यधनेनापिदत्त्वालंकरणंग
ले ॥ २८ ॥ अपत्यसहिताअद्यदत्तामेसत्यवादिना ॥ इतिश्रुत्वावचस्तस्यपुत्रस्यजननीतदा ॥ २९ ॥ दूर्वाक्षतैस्तांसंपूज्यनिना
यनिजमंदिरे ॥ अथगोपस्यजननीदृष्ट्वालंकरणानिसा ॥ ३० ॥ बहुमूल्यानिविज्ञायदधारोतार्यतद्गलात् ॥ अथतासांतुसर्वासां
दुग्धैस्तैश्चधनैरपि ॥ ३१ ॥ महाधनवतीजातागोपस्यजननीतदा ॥ विवाहंकारयामासपुत्रस्यसुमहोत्सवैः ॥ ३२ ॥ गोपस्तु
साधुसेवायांनिरतःसर्वदासदा ॥ स्मरन्नामान्नापानाद्यैर्वस्त्रैर्भक्तानतोषयत् ॥ ३३ ॥ पुत्रपौत्रैःसुखंभुक्त्वामृतोऽगादुत्तमांगतिम् ॥
एवंसज्जनसेवायाःफलंकलियुगेपिच ॥ ३४ ॥ भक्तेकृतायाःपश्यन्वैसुखार्थीतांसमाचरेत् ॥ ३५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्ये
गोपालचरितंनामपंचषष्टितमःसर्गः ॥ ६५ ॥ पुनर्भूयःप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणनरोमुच्येतसंसृतेः ॥ १ ॥
पूर्वंयःकथितोत्रैनश्रीधरस्वामिसंज्ञकः ॥ पूर्वावस्थितिजातंचभक्तिमाहात्म्यमुच्यते ॥ २ ॥ सएकदागृहेतिष्ठन्वेदशास्त्रार्थपारगः ॥
आहूतोधनिनैकस्मिन्दिनेकेनचिदध्वरे ॥ ३ ॥ तत्रगत्वाप्तवान्विप्रोधनानिकतिचिद्द्विजः ॥ गृहीत्वातानिचैकाकीश्रीधरोगृहमा
व्रजत् ॥ ४ ॥ मार्गमध्येमार्गचौरैरनुयातःसुविस्मितः ॥ ततस्तान्श्रीधरोज्ञात्वाशस्त्रपाणीन्भयंकरान् ॥ ५ ॥ त्रस्तःश्रीराम

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कवचंभक्त्यासस्मारसद्विजः ॥ कवचस्यकृतेपाठेभ्रातरौरामलक्ष्मणौ ॥ ६ ॥ धनुर्बाणधरौवीरौश्यामगौरकलेवरौ ॥ श्रीधर स्यसमीपेतुगच्छंतौभीषयन्बलात् ॥ ७ ॥ नावेत्सश्रीधरःकश्चिच्चोराद्दृष्ट्वातुतौपथि ॥ नप्रहर्तुंशक्नुवंतःश्रीधरंयेसमागताः ॥ ८ ॥ दृष्ट्वातयोःसौकुमार्यंसौंदर्यंचाप्यनुत्तमम् ॥ मोहितानप्रहर्तुंवैशक्तास्तद्भयतःखलाः ॥ ९ ॥ अथश्रीधर विप्रोपिनिजग्रामंयदागतः ॥ तदातौभ्रातरावंतर्दधातेरामलक्ष्मणौ ॥ १० ॥ अथचोराअदृष्ट्वातौवीरौचापशरायुधौ ॥ वि रहार्ताःश्रीधरस्यद्वार्यागत्यसमास्थिताः ॥ ११ ॥ दृष्ट्वाऽन्ताञ्श्रीधरोविप्रःपप्रच्छविनयान्वितः ॥ यूयंत्वद्यसमायातायेमयासह तेध्रुवम् ॥ १२ ॥ किमत्रब्रूतकार्यंवोयदर्थमिहतिष्ठत ॥ निवासिष्यतचेदद्यवसतात्रगृहेमम ॥ १३ ॥ इत्युक्ताःश्रीधरेणाहुस्तेहिचोरा इदंवचः ॥ नवस्तुमिच्छामवयंत्वयासहसमागताः ॥ १४ ॥ मार्गेऽद्राक्ष्मचयौवीरौश्यामगौरकलेवरौ ॥ चापबाणधरौवीरावागच्छंतौ त्वयासह ॥ १५ ॥ तौवयंद्रष्टुमिच्छामःक्वगतौतौप्रदर्शय ॥ दृष्ट्वातौसुंदरौवीरौगच्छामोद्यनसंशयः ॥ १६ ॥ श्रुत्वातेषांवचोविप्रःश्री धरःप्राहतान्पुनः ॥ अहोकिंवदताश्चर्यंयूयंसत्यवचःकिमु ॥ १७ ॥ केयूयंकुत्रवोवेश्मकावावृत्तिरिहास्तिवः ॥ ब्रूतसत्यंततोहंतौ दर्शयिष्याम्यसंशयम् ॥ १८ ॥ इतिश्रुत्वावचस्तस्यचोराःसत्यंबभाषिरे ॥ वयंविप्रकुलेजाताधर्म्मकर्म्मविवर्जिताः ॥ १९ ॥ स्थि त्वातास्मिन्वनेचौरवृत्त्यास्माकंतुजीवनम् ॥ दृष्ट्वावयंभवंतंहिसधनंहिंसितुंतदा ॥ २० ॥ समायातास्तदादृष्ट्वावीरौचापशरायुधौ ॥ भी पयंतौतुतावस्मांस्तद्भयेनवयंपुनः ॥ २१ ॥ नाहिंसितोभवांस्ततुत्वयासहसमागतौ ॥ प्रविष्टौगृहांतरितौनदृष्टौतौपुनर्द्विज ॥ २२ ॥ इतिश्रुत्वावचस्तेषांश्रीधरोविनयान्वितः ॥ प्रणम्यधन्यायूयंतुइत्युवाचपुनःपुनः ॥ २३ ॥ ततस्तेतमपृच्छंतकिमिदंभाषसेद्विज ॥ तौ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दर्शयमहाभागप्रतिज्ञातंपुरात्वया ॥ २४ ॥ श्रुत्वैतद्वचनंतेषांश्रीधरःप्राहतान्पुनः ॥ अहोनतौगृहेस्तोमेभ्रातरौरामलक्ष्मणौ ॥ २५ ॥
ज्ञात्वातुभवतोऽहंवैहिंसितुंमांसमागतान् ॥ तदाश्रीरामकवचमपठंविपिनेभयात् ॥२६॥ रक्षितुंमांसमायातौदेवौतौभक्तवत्सलौ ॥ ग्रा
मपर्यंतमायातावंतर्द्धानंगतौतदा ॥ २७ ॥ धन्याभवंतःपुण्यावैभाग्यवंतोनसंशयः ॥ यैर्दृष्टौजगतांनाथौलोचनैरामलक्ष्मणौ ॥
॥ २८ ॥ इतिश्रुत्वावचस्तस्यश्रीधरस्यचतस्कराः ॥ अस्त्राणिचूर्णयित्वातेवैराग्यंपरमंययुः ॥ २९ ॥ नमस्कृत्यचतंविप्रंश्रीधरंविनया
न्विताः ॥ यदृच्छयागताःसर्वेचिंतयंतस्तुतौमुदा ॥३०॥ तेपिजातामहाभक्ताश्चोराअपिकलौयुगे ॥ तस्माद्भक्तिसमंनास्तिनृणांसुखक
रंभुवि ॥ ३१ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येश्रीधरचरितंनामषट्षष्टितमःसर्गः ॥ ६६ ॥ ७ ॥ ॥ अथापरंप्रवक्ष्यामिभक्ते
र्माहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणलभतेभक्तिमुत्तमाम् ॥ १ ॥ पुरासीन्मथुराप्रांतेब्राह्मणःकोपिधार्मिकः ॥ मातैकातस्यभवने
नान्यःकोपिसुहृज्जनः ॥ २ ॥ सएकदाद्विजःपत्नींनीत्वाश्वशुरमंदिरात् ॥ आगच्छन्निजवेश्मासौकृष्णभक्तोतिवैष्णवः ॥ ३ ॥ मार्गम
ध्येवनेतस्यलुंठकामिलितास्तदा ॥ दृष्ट्वातानस्त्रशस्त्राढ्यान्विप्रोभयसमाकुलः ॥ ४ ॥ क्वचित्तरुतलेतस्थौपत्न्यासहमहामतिः ॥ स्ना
नादिकर्तुमुद्युक्तस्तमूचुस्तेचघातिनः ॥ ५ ॥ किमत्रकुरुषेविप्रस्नानपूजादिकंवृथा ॥ योजनद्वयमग्रेस्तिवनमेतन्महद्भयम् ॥ ६ ॥
उल्लंघ्यतत्ततःस्नानंकरिष्यसिसुनिर्भयः ॥ अस्माभिःसाकमेवंहियास्यामोऽथवयंद्रुतम् ॥ ७ ॥ इत्युक्तस्तैस्तुलुंठाकैर्ब्राह्मणोतीवभी
तवत् ॥ उवाचनाहंगच्छामिभवद्भिःसाकमेवहि ॥ ८ ॥ गंतव्यंभवतांपूर्वंगमिष्यामिततस्त्वहम् ॥ नाज्ञातकुलशीलैश्चसाकंगच्छेद्वने
बुधः ॥९॥ इत्युक्तास्तेपुनःप्राहुर्ब्राह्मणंतेतिवंचकाः ॥ माभयंकुरुभोविप्रकथयामोभवद्धितम् ॥१०॥ आवयोरंतरेदेवःश्रीकृष्णोनात्रसं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शयः ॥ यस्यात्रपापबुद्धिःस्यात्तस्यदंडंकरिष्यति ॥ ११ ॥ इतिश्रुत्वावचस्तस्यचोरस्यैकस्यसद्विजः ॥ विश्वस्यगमनंचक्रेसाकंतैः कृष्णभक्तिमान् ॥ १२ ॥ अथतेहिंसकाःसर्वेद्विजंयांतंमहावने ॥ घातयामासुःखड्गेनगृहीत्वांतत्स्थितंधनम् ॥१३॥ पत्नींहंतुंद्रुतंसर्वे तत्समीपमुपागताः ॥ ऊचुर्दोलाहरान्सर्वेलुंठकाअतिनिर्दयाः ॥१४॥ क्वगच्छथअरेभृत्यानायंवासःपथोहिनः ॥ दक्षिणेनपथायातगृहमस्माकमेवहि ॥ १५ ॥ नोचेद्युष्मान्निहन्मोद्यविप्रवन्नात्रसंशयः ॥ इतिश्रुत्वावचस्तेषांदोलावाहाभयार्दिताः ॥१६ ॥ स्वगृहाभिमुखाजग्मुःप्राणरक्षापरायणाः ॥ इतिश्रुत्वावचस्तेषांचोराणांब्राह्मणीसुता॥१७॥रुरोदार्तातिदुःखेनपत्युर्मरणसंश्रवात् ॥ कृष्णःकुत्रास्तिभोस्वामिंस्तवेष्टोयस्यनामतः ॥ १८ ॥ विश्वस्यैतैःसमायातोमहारण्येतिहिंसकैः ॥ एवंवदंतीसाबालारुरोदचमुहुर्मुहुः ॥ १९ ॥ अथतेनैवमार्गेणचत्वारोहयवाहकाः ॥ निष्कोशखड्गहस्तास्तेतिष्ठतिष्ठेतिवादिनः ॥ २० ॥ चोरान्संत्रासयामासुःसमागत्यतदंतिकम् ॥ जघ्नुःखड्गेनतान्सर्वान्दोलावाहान्यवर्तत ॥ २१ ॥ तामूचुर्विप्रपत्नींवैमाभयंकुरुपुत्रिके ॥ आगच्छास्माभिरेवात्रपत्यासहयुताभव ॥२२ ॥ इत्युक्तातेतुतामार्तांनिन्युःपत्युःसमीपतः ॥ ददृशुस्तंमृतंविप्रंशयानंधरणीतले ॥ २३ ॥ विप्रपत्नीरुरोदार्तातांदृष्ट्वातेकृपान्विताः ॥ अभयंप्रददुस्तस्यैतेषामेकस्त्ववातरत्॥२४॥अश्वात्तस्यतुविप्रस्यशिरःकायेनियोज्यच॥ वस्त्रेणाच्छाद्यगहनेवनेजग्मुर्यदृच्छया॥२५॥ अथाच्छादितमात्रस्तुसद्विजोजीवसंयुतः ॥ उत्तस्थौतत्क्षणादेवत्यक्तनिद्रोयथानरः ॥२६॥ दृष्ट्वातंजीवितंविप्रंदोलावाहाश्चहर्षिताः॥ ऊचुःसर्वेतुयज्जातंमृतेतस्मिन्द्विजन्मनि ॥ २७ ॥ पत्नीचापितथोवाचश्रुत्वाविप्रोतिविस्मितः ॥ श्रीकृष्णेपरमांभक्तिंचकारपूर्वतोऽधिकाम् ॥ २८ ॥ ततस्तस्मात्समुत्पत्यसहपत्न्यातिहर्षितः ॥ आजगामगृहंमातुर्नमश्चक्रेपदांबुजम् ॥ २९ ॥ माताश्रुत्वातु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तत्सर्वंपथिवृत्तंसुतस्यवै ॥ रुदतीकृष्णभक्त्यैवजीवितश्चेत्यमन्यत॥३०॥एवंसवैद्विजोजीवञ्छ्रीकृष्णचरणांबुजम् ॥ ध्यायन्सपरमंधाम
जगामकृष्णभक्तितः ॥३१॥ एवंभक्तस्यवशगःश्रीकृष्णोद्यापिभूतले ॥ आपद्भ्यश्चःपालयतिस्वंभक्तंनात्रसंशयः ॥३२ ॥ ॥ इति श्री
भगवद्भक्तिमाहात्म्येकृष्णभक्तिचरितंनामसप्तषष्टितमःसर्गः ॥६७॥ ॥ छ ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम्॥ यस्यश्रवण
मात्रेणश्रीकृष्णेप्रीतिरुत्तमा ॥१॥ मरुदेशेबभूवैकोब्राह्मणोधनवाञ्छुचिः ॥ हरिपालेतिनाम्नावैवृद्धावस्थांगतोयदा ॥२॥ अपुत्रोदेवयज
नात्पुत्रमेकमवापसः ॥ जातेपुत्रेतिहर्षेणब्राह्मणेभ्योधनंददौ ॥ ३ ॥ अथकालेनपुत्रस्तुवर्द्धमानोदिनेदिने ॥ उपनीयविवाहंचकारयामा
सवैपिता ॥ ४ ॥ अतिस्नेहेनबाल्येसापित्रानातीवपाठितः ॥ परंतुभगवद्भक्तौमतिस्तस्यस्वभावजा ॥ ५ ॥ पात्रवस्त्रादिभक्तेभ्योदी
नेभ्योदाद्धनंमुहुः ॥ सत्कार्य्यमितिविज्ञायन्यवर्ततततःपिता ॥ ६ ॥ अथकालेनरोगात्तौहरिपालोमृतस्तदा ॥ तस्यपत्नीमहाभागाब
भूवसहगामिनी ॥ ७ ॥ अथतस्यसुतःसोपिपत्न्यासहगृहेवसन् ॥ भुंजानःस्वधनंनित्यं ।धुभ्योपिददौमुदा ॥ ८ ॥ एवंगतेषुका
लेषुविप्रःक्षीणधनोभवत् ॥ तथापिसाधुसत्कारंनतत्याजातिभक्तिमान् ॥ ९ ॥ पात्रवस्त्रादिकंयद्यत्पत्न्यलंकरणानिच ॥ विक्रीयसा
धुसंतोपंचक्रेसद्विजसत्तमः ॥ १० ॥ ऋणंकृत्वाततोविप्रःसहस्रावधिसंख्यया ॥ पितुःप्रतिष्ठामासाद्यतोषयामाससज्जनान् ॥ ११ ॥
अथतेनधनंनापियदालब्धंद्विजन्मना ॥ ग्रामेग्रामेतुभिक्षित्वातर्पयामासचातिथीन् ॥ १२ ॥ ततःसर्वैर्ज्ञातिवर्गैरन्यैःसामाजिकैर
पि ॥ असानितोपिलज्जांवैनलेभेभक्तियंत्रितः ॥ १३ ॥ ततःसर्वैर्द्विजंतंतुज्ञात्वानिष्किंचनंजनाः ॥ निष्किंचनेतिनाम्नावैचक्रुःस
र्वेहसन्मुखाः ॥ १४ ॥ तदादिसद्विजःख्यातोनाम्नानिष्किंचनेतिवै ॥ अथनिष्किंचनोभिक्षांनाप्तवांस्तादृशींयथा ॥ १५ ॥ सर्वेषामति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

थीनांतुवैसंपद्येतभोजनम् ॥ तदानिष्किंचनश्चौर्य्यंचक्रेसावतिनिर्भयः॥१६॥चौर्य्यानीतधनैःसाधून्भोजयामासकेवलम्॥ स्वयंतुविषव
न्मत्वानाग्रहीद्भार्य्ययासह ॥ १७ ॥ चौर्य्येणापियदापूर्तिर्नाभूदतिथिभोजने ॥ तदावनेलुंठयित्वाशस्त्रपाणिर्जनान्स्वयम् ॥ १८ ॥
धनमादायागतेभ्योददौनित्यंचभोजनम् ॥ परंतुधनमात्रंसजग्राहातिविभीषया ॥ १९ ॥ नजघानवनेकिंचिद्धिंसादोषमनुस्मरन् ॥
तत्रापिवैष्णवान्विप्रान्नलुंठतिद्विजोत्तमः ॥ २० ॥ एवंकतिपयेकालेगतेचैकदिनेयदा ॥ लुंठनेनापिनैवाप्तंधनंकिंचिद्द्विजन्मना ॥२१॥
समागत्यगृहेसायंचिंतितःप्रिययासह ॥ क्षुधार्तएवसुष्वापभोजनाभावतोद्विजः ॥ २२ ॥ प्रातःकालेतुसंप्राप्तेजगामविपिनंद्विजः ॥
निष्किंचनोनापकिंचिन्मध्याह्नेह्यगतोगृहे ॥ २३ ॥ तत्रापश्यत्समायातानतिथीनातिवैष्णवान् ॥ पत्नीदत्तासनेसर्वानुपविष्टान्प्र
णम्यसः ॥ २४ ॥ गृहमध्येसमागत्यपत्नींप्राहकरोमिकिम् ॥ एतेसमागताःसर्वेतिष्ठंतिचबुभुक्षिताः ॥ २५ ॥ अभोजयित्वाचैतान्वै
मरिष्येनात्रसंशयः ॥ इतिश्रुत्वापतिवचःपत्नीप्राहातिविस्मिता ॥ २६ ॥ तवेयंचेद्गतिर्नाथममाप्येतद्विनिश्चितम् ॥ तवानुगमनेनैं
वप्राणांस्त्यक्ष्याम्यसंशयम् ॥ २७ ॥ परंतुसाधूनेतान्वैस्नातुंप्रेषयनिष्ठुरम् ॥ ततपश्चान्मरणोपायंकरिष्यामिनचेदिमे ॥ २८ ॥ मर्तुंदा
स्यंतिवैचात्रसाधवोतिदयालवः ॥ वारयिष्यंतिचात्रावांमरणेकृतनिश्चयौ ॥ २९ ॥ इतिश्रुत्वावचस्तस्याःपत्न्याःसद्विजपुंगवः ॥
आगत्यद्वारितान्सर्वान्स्नातुंगच्छेतिजल्पितः ॥ ३० ॥ एतस्मिन्नंतरेकृष्णोरुक्मिणींप्राहयाम्यहम् ॥ लुंठाकरूपोभक्तोस्तिदातुंत
स्मैधनानिच ॥ ३१ ॥ श्रुत्वैतत्प्राहसादेवीसहैवनयमामपि ॥ श्रुत्वैतद्वचनंतस्याःप्राहकृष्णोहसन्निव ॥ ३२ ॥ आगच्छकिंतुमांत्वां
सलुंठिष्यतिनसंशयः ॥ तत्रैकामुद्रिकादेविनदेयासहसात्वया ॥ ३३ ॥ एवंपत्न्याविचार्य्यासौभगवान्भक्तवत्सलः ॥ रक्षणायस्व

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भक्तस्यविनोदंकर्तुमागतः ॥ ३४ ॥ अथश्रीभगवान्कृष्णोज्ञात्वातौमरणोन्मुखौ ॥ वैश्यरूपंसमादायरुक्मिण्याभार्ययासह ॥
॥ ३५ ॥ तद्गृहद्वारमागत्यकुत्रनिष्किंचनोद्विजः ॥ इत्युवाचततस्तौतुदृष्ट्वानिष्किंचनस्तदा ॥ ३६ ॥ स्वर्णालंकरणैर्युक्तौना
नावस्त्रोपशोभितौ ॥ पथिकाविवितितौमत्वाजहर्षमनसिद्विजः॥३७॥ स्नानंकुरुतभोयूयमित्युक्तातांस्तुवैष्णवान् ॥ प्रेषयामाससह
साहर्षेणमहतावृतः ॥ ३८ ॥ प्राहनिष्किंचनोहंवैकिंकार्यंतद्वदस्वमे ॥ इतिश्रुत्वावचस्तस्यप्रत्युवाचहसंस्तदा ॥ ३९ ॥ अहंतत्रग
मिष्यामिमार्गेतस्मिन्वनेक्वचित् ॥ श्रूयंतेयत्रलुंठाकालुंठंतिपथिकान्जनान् ॥ ४० ॥ वैश्योहंस्त्रीसहायश्चस्वर्णालंकारभूषितः ॥ मया
द्रष्टुंनशक्नोमितस्मात्त्वंचात्रतिष्ठसि ॥ ४१ ॥ यथासुखंगमिष्यामिवनेस्मिन्द्विजसत्तम ॥ तथाकुरूपकारंत्वंकिंचिद्दास्यामितेधनम् ॥
॥ ४२ ॥ इतिश्रुत्वावचस्तस्यकृष्णस्यवैश्यरूपिणः ॥ निष्किंचनोहृष्टमनाःप्रोवाचमधुराक्षरम् ॥ ४३ ॥ आगच्छत्वंमयासार्द्धं
मेषतत्रैवयाम्यहम् ॥ मदग्रेन्येतुलुंठाकालुंठिष्यंतिकथंचन ॥ ४४ ॥ इत्युक्त्वासससमादायगृहीत्वावणिजौपथि ॥ चलितःप्राहपत्नीं
तुपाकंकुरुयदृच्छया ॥ ४५ ॥ अहंशीघ्रंसमायामिप्रेष्येमौवैश्यदंपती ॥ इत्युक्त्वाप्रययौताभ्यांवनंनिष्किंचनोद्विजः॥ ४६ ॥ गत्वार
ण्येसमुद्यम्यभीषयन्वैश्यमब्रवीत् ॥ देहिशीघ्रंधनंवैश्यसर्वालंकरणानिच ॥ ४७ ॥ नोचेत्त्वांपातयाम्यत्रसपत्नीकंनसंशयः ॥ निष्किं
चनवचःश्रुत्वावैश्यरूपोऽब्रवीद्धरिः ॥ ४८ ॥ अहोकिमर्थंकुरुषेपापंभूत्वाद्विजन्मनिः ॥ उवाचनाहंभोक्ष्येवैकरोम्येतदघंवने ॥ ४९ ॥
ममैकंतुव्रतंवैश्यबाल्यमारभ्यनिश्चितम् ॥ विष्णुभक्ताश्चयेकेचित्समागच्छंतिमद्गृहे ॥ ५० ॥ एकोवाथशतानीहभोजयेतान्नसंशयः॥
पापंचेदस्तुमेवैश्यप्रीयतांभगवान्मम ॥ ५१ ॥ यस्मिन्दिनेक्षुधार्तास्तेगमिष्यंतिममाश्रमात् ॥ मरिष्येहंतदैवेतिव्रतमेतद्दृढंमम ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ ५२ ॥ सपत्नीकस्यमेचैतद्विषमेदनसंशयः ॥ तस्मात्कृष्णस्यप्रीत्यर्थंकरोम्येतत्सुदारुणम् ॥ ५३ ॥ देहिशीघ्रंधनंवैश्यद्वारितिष्ठं
तिवैष्णवाः ॥ मध्याह्नोल्लंघनंतेषांभोजनेहिभविष्यति ॥ ५४ ॥ नोचेत्त्वांघातयिष्यामिसपत्नीकंनसंशयः ॥ श्रुत्वैतद्वचनंतस्यवैश्य
रूपधरोहरिः ॥ ५५ ॥ ददौधनानिवस्त्राणिसर्वाण्याभरणानिच ॥ रुक्मिण्यपिददौसर्वंधनंमुद्रिकयाविना ॥५६॥ निष्किंचनोथदृष्ट्वातां
मुद्रिकांतत्करेस्थिताम् ॥ देहीत्युवाचनादायतदानिष्किंचनःस्वयम् ॥ ५७ ॥ गृहीत्वापाणिनापाणिंरुक्मिण्याश्चातिनिर्दयः ॥ त्रोट
यित्वांगुलिंतस्याआजहारसमुद्रिकाम् ॥ ५८ ॥ अनयातुशतंभोक्ष्येसाधूनितिवदन्वचः ॥ सर्ववस्त्रेनिबध्यायंचलितःस्वगृहंप्रति ॥
॥ ५९ ॥ ततःकृष्णोहसन्प्राहनिष्किंचनमिदंवचः ॥ अरेनिष्किञ्चनेयंतुमुद्रिकातीवदुर्लभा ॥ ६० ॥ इमांरक्षगृहेसम्यग्दत्तेयंवै
ष्णवेनमे ॥ साधुसेवार्थमेषावैददातिसकलंधनम् ॥ ६१ ॥ स्वीकृत्यशीघ्रमायातोमंदिरंसतुवैष्णवः ॥ पत्न्यैददौधनंसर्वंमुद्रिका
पृथगर्पिता ॥ ६२ ॥ उक्त्वातस्यागुणंतस्यैसातयापरिरक्षिता ॥ अतिथीन्भोजयित्वातुवैष्णवान्संविसृज्यसः ॥ ६३ ॥ आ
त्मार्थंप्रययौग्रामेभिक्षितुंसतुहर्षितः ॥ आनीयभिक्षांरात्रौसबुभुजेभार्ययासह ॥ ६४ ॥ ततस्तस्मिन्धनेक्षीणेप्रार्थयित्वासमुद्रिकाम् ॥
लब्ध्वाततोधनंतेनतोषयामाससज्जनान् ॥६५॥ इत्थंनिष्किंचनोयावज्जीवमाराध्यसज्जनान् ॥ अंतेजगामवैकुंठंभार्ययासहवैद्विजः॥६६॥
भगवानपिरुक्मिण्यासहतुष्टोययौगृहम् ॥ एवंभक्तेस्तुमाहात्म्यंनिष्किंचनसमुद्भवम् ॥ ६७ ॥ किंचिदेवात्रकथितंसम्यग्वक्तुंक्षमोहि
कः ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनिष्किंचनचरितंनामाष्टषष्टितमःसर्गः ॥ ६८ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तिमाहात्म्य
मुत्तमम् ॥ यस्यश्रवणमात्रेणभक्तिर्भवतिशाश्वती ॥ १ ॥ अस्तिगौडेषुविख्यातोग्रामःक्षुरदहाइति ॥ तत्रासीद्ब्राह्मणकुलेशास्त्राध्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यनतत्परम् ॥ २ ॥ तत्रासीद्ब्राह्मणश्चैकोधनवानतिधार्मिकः ॥ स्त्रीपुत्रकन्यासहितोविरक्तइवस्वेगृहे ॥ ३ ॥ एकदातीर्थयात्रा
यांमनश्चक्रेद्विजोत्तमः ॥ ततश्चिंताकुलोजातोनिरीक्ष्यात्मजरांद्विजः ॥ ४ ॥ कथमेकाकिनोमेद्यवृद्धस्यगमनंभवेत् ॥ इतिश्रुत्वा
वचस्तस्यकश्चिद्विप्रोतिहर्षितः ॥ ५ ॥ उवाचवचनंतस्मैवृद्धायातिविनीतवत् ॥ पितृभ्यांरहितोविप्रोकृतदारपरिग्रहः ॥ ६ ॥
दृष्ट्वाशक्तंत्वयातेनगंतव्यमितिनिश्चयः ॥ सहायेनविनानैवकंचिद्देशंसमाश्रयेत् ॥ ७ ॥ इतिचिंतयतस्तस्यपुरेएकोद्विजन्मनः ॥
आजगामाथतद्ग्रामवासीकृष्णस्यभक्तिमान् ॥ ८ ॥ पितृभ्यांरहितोविप्रोकृतदारपरिग्रहः ॥ दृष्ट्वातंप्राहवृद्धस्तुसम्यगागतवान
सि ॥ ९ ॥ तीर्थयात्रांचिकीर्षामिवृद्धावस्थांविलोक्यभोः ॥ मयासहव्रजेस्त्वंचेत्तदामेगमनंभवेत् ॥ १० ॥ इतिश्रुत्वावचस्त
स्यसविप्रोथातिहर्षितः ॥ उवाचवचनंतस्मैवृद्धायातिविनीतवत् ॥ ११ ॥ अहोममापियात्रायांमतिर्बहुदिनावधि ॥ वर्ततेनगृ
हेकोपिपितामाताथवासुहृत् ॥ १२ ॥ तस्मात्सत्यंगमिष्यामिकुरूद्योगंयथोचितम् ॥ इतिश्रुत्वासवृद्धस्तुपुत्रंपत्नींसुहृज्जनान्॥१३॥
उक्त्वातत्कालमेवासौप्रतस्थेस्थविरोद्विजः ॥ अथसोपियुवाविप्रःस्वमादायांबरादिकम् ॥ १४ ॥ आगतस्तेनसार्द्धंतुचलितःस
चहृष्टवत् ॥ गयामागत्यप्रथमंश्राद्धंकृत्वातुभक्तितः ॥ १५ ॥ काशींप्राजग्मतुर्हृष्टौतत्रयात्रांप्रचक्रतुः ॥ ततःप्रयागमागत्यस्थि
त्वामासंतुतत्रवै ॥ १६ ॥ ततोजग्मतुर्मथुरांस्थित्वायात्रांप्रचक्रतुः ॥ अथरोगातुरोवृद्धस्तापंप्राप्तोथदैवतः ॥ १७ ॥ तंवृद्धंसेव
यामाससतावद्भक्तिसंयुतः ॥ अथरोगाद्विनिर्मुक्तःसवृद्धःसुखवानभूत् ॥ १८ ॥ दृष्ट्वासेवांप्रहृष्टोभूत्तंयुवानमुवाचह ॥ अहोत्वया
कृतासेवाममातिवस्वतातवत् ॥ १९ ॥ अतस्तेपरितुष्टोहंयद्ब्रवीमिशृणुष्वतत् ॥ ममयावर्ततेकन्यागृहेसातेर्पितामया ॥ २० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तत्रगत्वाप्रदास्यामिविधिनातांनसंशयः ॥ इतिश्रुत्वावचस्तस्यसयुवावाक्यमब्रवीत् ॥ २१ ॥ अहोनेदंप्रवक्तव्यमयोग्यंद्विजसत्तम ॥ इतिश्रुत्वावचस्तस्यवृद्धःप्रोवाचतंद्विजम् ॥ २२ ॥ अहोमयिस्थितेकोन्योदातुमर्हतिकन्यकाम् ॥ पितृदेयाहिकन्यास्यादितिशास्त्रविनिश्चयः ॥ २३ ॥ तस्माद्दत्तामयाकन्यासाक्षीगोपालएवनौ ॥ इत्युक्त्वातत्रगोपालंसाक्षिणंतौप्रचक्रतुः ॥ २४ ॥ ऊचतुस्तंतुगोपालंत्वंसाक्षीभवचावयोः ॥ इत्युक्त्वाकतिचित्कालंस्थित्वानत्वाथकेशवम् ॥ २५ ॥ चलितौतौनिजंदेशंमार्गेवृद्धंयुवापुनः॥ सेवयामासभक्त्यावैपूर्वतोप्यतिभक्तितः ॥ २६ ॥ एवंसमागतौतौतुक्षेमपूर्वंनिजेगृहे ॥ अथवृद्धःस्ववृद्धायैपत्न्यैबंधुभ्यएवच ॥२७॥ उवाचस्वस्यदुःखादिब्राह्मणस्यचसेवनम् ॥ कन्यादानप्रतिज्ञांतांश्रुत्वापुत्रादयोब्रुवन् ॥ २८ ॥ किमिदंभाषसेव्यर्थंकेयंतेमतिरीदृशी ॥ नैवंविधायविप्रायदेयाकन्याकुलेमम ॥ २९ ॥ जातिबाह्योभविष्यामिदत्त्वास्मैकन्यकामिमाम् ॥ तस्मात्त्वंतिष्ठतूष्णींसविवदामोवयंद्विजम् ॥ ३० ॥ इतितेषांवचःश्रुत्वास्वीचक्रेसोपितद्वचः ॥ अथासौब्राह्मणोवृद्धदत्तांकन्यामयाचत ॥ ३१ ॥ श्रुत्वातद्वचनंतेतुवृद्धपुत्रादयःक्रुधा ॥ ब्राह्मणंतर्जयामासुर्गालिदानादिभिस्तदा ॥ ३२ ॥ अथसब्राह्मणःक्रोधाद्राजद्वारमुपागतः ॥ नृपायोक्तंतुसत्सर्वंश्रुत्वाराजाचुकोपसः ॥ ३३ ॥ आनयित्वाथतान्सर्वान्विद्वांसंसमयाचत ॥ उक्तवान्विदुषेराजावादःकन्यानिमित्तकः ॥ ३४ ॥ एतयोःसुमहानस्तितत्रधर्म्मंवदैतयोः॥ इतिराजाज्ञयाविद्वान्सभांकृत्वाथतत्रह ॥ ३५ ॥ स्थित्वावृद्धजनैःसार्द्धंशुश्रावोभयभाषितम् ॥ अन्येचशुश्रुवुःसर्वेयेचतत्रसभासदः ॥३६॥ कन्यादानंकनिष्ठायजात्यानैवतुजायते ॥ एवंस्वदेशमर्य्यादाछेत्तव्यानकथंचन ॥ ३७ ॥ तस्मादेनंतुयुक्त्यावैकरिष्यामोनिरुत्तरम् ॥ इतिवृद्धसुतादीनांकुलीनानांचपंडितः ॥३८॥ सभासद्भिः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पक्षपातंचक्रेधर्मंचविस्मरन् ॥ प्राहतंब्राह्मणंकोपिजानात्येवंत्वदीरितम् ॥ ३९ ॥ लिखितंचास्तिवृद्धस्यसाक्षीवाकोपिचास्तिभोः ॥
तद्दर्शयगृहाणास्यकन्यारत्नमनुत्तमम् ॥ ४० ॥ इतिश्रुत्वावचस्तस्यविदुषोविप्रआहतम् ॥ लिखितंनास्तिमेविद्वन्साक्षीनैवास्ति
मानुषः ॥ ४१ ॥ गोपालोमथुरायांतुममेसाक्षीहवर्तते ॥ वृद्धेनचमयाचापिधृतःसाक्षीतदाहरिः ॥ ४२ ॥ श्रुत्वैतद्वचनंविद्वन्सभास
द्भिरुवाचतम् ॥ आगत्यसाक्षीसदसिसब्रूयात्सत्यमेवतत् ॥ ४३ ॥ तदाकन्यांप्रदास्यामोवयंसर्वेनसंशयः ॥ इतिश्रुत्वावचस्तेषांसवि
प्रश्चातिदुःखितः ॥ ४४ ॥ उवाचयामितंदेवंगोपालंशरणंत्वहम् ॥ अतःपरंगतिर्नास्तिवर्ततेममसर्वथा ॥ ४५ ॥ यत्करिष्यतिगोपाल
स्तदेवचहितंमम ॥ परंत्वेकंतुमद्वाक्यंसर्वेशृण्वंतुमेमतम् ॥ ४६ ॥ श्रुत्वायुक्तंप्रकर्तव्यमयुक्तंत्यज्यतांध्रुवम् ॥ मासैश्चतुर्भिर्यास्यामिप्र
यास्यामिपुनर्गृहम् ॥ ४७ ॥ तावदस्यात्मजांयोवैगृह्णीयात्सतुविग्रहा ॥ एवंप्रतिज्ञांकुरुतयूयंसर्वेत्रधार्म्मिकाः ॥ ४८ ॥ तदाहंतुगमिष्या
मिगत्वायास्यामिचद्रुतम् ॥ इतिश्रुत्वावचस्तस्यविद्यावंतःसभासदः ॥ ४९ ॥ ऊचुस्तंसत्यमात्थत्वंतत्रापिशृणुनोवचः ॥ अद्यारभ्यगते
चैवचतुर्मासेथपंचमे ॥ ५० ॥ प्रथमेदिवसेकन्यांदास्यामस्तांनसंशयः ॥ सोपिस्वीकृत्यविप्रस्तुजगाममथुरांपुरीम् ॥ ५१ ॥ मासेनैकेनदुः
खार्तश्चितयंतंहरिंद्विजः ॥ गोपालमंदिरस्याग्रेतत्रगत्वास्थितोभवत् ॥ ५२ ॥ गोपालमुक्त्वाचैकांतेविप्रःसर्वजनैःकृतम् ॥ नागच्छसिय
दित्वंभोत्यक्ष्याम्यत्रैवजीवितम् ॥ ५३ ॥ इतिनिश्चित्यविप्रस्तुसुष्वापातिबुभुक्षितः ॥ गोपालस्तुतदारात्रौभक्तानुग्रहवान्प्रभुः ॥ ५४ ॥
स्वप्नंतंकथमामासभक्तंश्रांतंबुभुक्षितम् ॥ माचिंतांकुरुविप्रत्वंगमिष्यामित्वयासह ॥ ५५ ॥ कथयिष्यामिसत्यंतद्द्रुतंतवहितायच ॥ त्वं
तुप्रातःसमुत्थायस्नात्वान्नंभुंक्ष्वसत्वरम् ॥ ५६ ॥ ततोर्द्धरात्रिसमयेप्रस्थास्यामिमठादहम् ॥ त्वमग्रेव्रजपादाभ्यांत्वत्पृष्ठस्थोत्र ॥१०१॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जाम्यहम् ॥ ८७ ॥ मत्पादनूपुररवंशृण्वन्गच्छत्वमग्रतः ॥ नमांविलोकयक्कापिभ्रांत्यापिद्विजसत्तम ॥ ८८ ॥ ततोग्रेनगमिष्यामि यत्रत्वंद्रक्ष्यसिद्विज ॥ इतिमेसमयोविप्रचित्तेस्थाप्यनिरंतरम् ॥ ८९ ॥ इतिस्वप्नेद्विजोदृष्ट्वाप्रातरुत्थायसत्वरम् ॥ स्नात्वाभुक्त्वाथ मुदितोमंदिरस्याग्रतःस्थितः ॥ ६० ॥ कदायास्यतिरात्रिर्वैइत्युवाचातिभक्तितः ॥ अथरात्र्यामागतायांमहानिशिमहाप्रभुः ॥ ६१ ॥ गोपालोमंदिराद्वाह्येसमायातोथदांगणे ॥ तदासतुद्विजोजाग्रत्सुश्रावनूपुरध्वनिम् ॥६२॥ स्ववस्त्रादिकमादायवहिरेत्याग्रतोययौ॥६३॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसाक्षिगोपालचरितंनामैकोनसप्ततितमःसर्गः ॥ ६९ ॥ ॥ छ ॥ ॥ अथभक्तवशोदेवोगोपालोभक्त वत्सलः ॥ गौडब्राह्मणपृष्ठस्थोगौडदेशंजगामह ॥ १ ॥ सतुविप्रोनिजग्रामसमीपंतुयदागतः ॥ तदाऽस्तंप्रययौसूर्योनिशायामप्यगा द्विजः ॥२॥ नीत्वागोपालमद्याहमागतश्चेतिहर्षितः ॥ विस्मृत्यसमयंपृष्ठेव्यलोकयतसद्विजः ॥ ३ ॥ ततस्तत्रैवगोपालःप्रादुर्भूयस्थितोऽ भवत् ॥ अथविप्रस्तुतंदृष्ट्वाहर्षाश्रुव्याकुलेक्षणः ॥ ४ ॥ स्तुत्वाध्यात्वामुहुस्तत्रतांरात्रिंस्थितवान्मुदा ॥ एकाकिनंतंगोपालंत्यक्त्वा नैवागतोगृहे ॥ ५ ॥ अथतस्यांतुरात्र्यांवैराजाद्याग्रामवासिनः ॥ स्वप्नेददृशुरायातौगोपालोब्राह्मणःसच ॥ ६ ॥ वदतिस्मस्वप्नेवासौ ब्राह्मणेनार्पितात्मजा ॥ कृत्वामांसाक्षिणंचास्मैद्विजायप्रतिपादने ॥ ७ ॥ इतिराजातथामात्यःसचविद्वान्सभासदः ॥ तद्ग्रामवासिनोऽ न्येचददृशुश्चाद्भुतंनिशि ॥ ८ ॥ प्रातरुत्थायतेऽन्येवंचिंतयत्सुपरस्परम् ॥ प्रातरेकोययौग्रामात्पश्चिमेकार्य्यगौरवात् ॥ ९ ॥ ददर्श तत्रतंविप्रंप्रतिमांवैष्णवींतथा ॥ दृष्ट्वासमीपमागत्यनमस्कृत्यद्विजंमुदा ॥ १० ॥ आगतोह्येषगोपालोविप्रःसचाकिमागतः ॥ धन्योसी त्यभिधायासौत्वरितोग्राममागतः ॥११॥ उवाचसर्वान्ग्रामीणान्गोपालोत्रसमागतः ॥ ब्राह्मणस्यतुकार्यार्थंसाक्ष्यंदातुंनसंशयः ॥ १२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अथतेग्रामनिलयाःसर्वेंतत्रसमागताः ॥ राजापिचाययौतत्रदृष्ट्वागोपालमद्भुतम् ॥ १३ ॥ हर्षगद्गदयावाचाश्रुतंतज्जगदीश्वरम् ॥
ब्राह्मणस्यपदांभोजेनिपपाततिभक्तिमान् ॥ १४ ॥ अथराजातुतत्कालमाहूयाथद्विजंतुतम् ॥ भक्त्यायदापयामासकन्यां
विप्रायसत्कृताम् ॥ १५ ॥ स्वयंददौधनंभूरितस्मैविप्रायभूपतिः ॥ ग्रामंक्षुरदहाख्यातंजीविकायैददौनृपः ॥ १६ ॥
गोपालस्यमठंराजाधनैर्बहुभिरादरात् ॥ कारयामासत्वरितंसमाहूयतुशिल्पिनः ॥ १७ ॥ सविप्रस्तत्रनिवसन्कन्यांप्राप्यकुलोद्भ
वाम् ॥ गोपालगतचित्तोसौगोपालस्मृतितत्परः ॥ १८ ॥ गोपालसेवांचक्रेसकर्मणामनसागिरा ॥ राजाद्यास्तुजनाःसर्वेविप्रंभ
क्त्यासिषेविरे ॥ १९ ॥ साक्षीभूत्वायदागत्यस्थितस्तत्रमहाप्रभुः ॥ साक्षिगोपालइत्येतन्नामतस्याभवत्ततः ॥ २० ॥ अ
द्यापितत्रदेवेशःसाक्षिगोपालनामतः ॥ तिष्ठतीत्यद्भुतंलोकाःपश्यंतुभक्तिचेष्टितम् ॥ २१ ॥ अथासीन्मथुरायांवैमहाचिंतानृ
णांतदा ॥ गोपालःक्वगतःकेननीतोस्माकंतुजीवनम् ॥ २२ ॥ चालितुंनहिशक्यःसमनुष्येणेतिनिश्चितम् ॥ तस्माद्देवाश्चदैत्याश्च
जहुर्देवंनसंशयः ॥ २३ ॥ इतिचिंताकुलाःसर्वेनाकिंचित्कर्तुमुद्यताः ॥ अथतस्मिन्क्षणेविप्रोगौडदेशात्समागतः ॥ २४ ॥ स्ना
त्वाविश्रामतीर्थेषुदृष्ट्वादेवंचकेशवम् ॥ गोपालमंदिरस्याग्रेसमायातोदिदृक्षया ॥ २५ ॥ ज्ञात्वैतत्तत्रवृत्तांतंदृष्ट्वासर्वान्सुचिंतितान् ॥
उवाचब्राह्मणांस्तान्वैमाचिंतांकुरुतद्विजाः ॥ २६ ॥ अहंवक्ष्यामिशृणुतगोपालोयत्रतिष्ठति ॥ इतिश्रुत्वावचस्तस्यपप्रच्छु
स्तंमुदान्विताः ॥ २७ ॥ वदविप्रमहाभागत्वंभाग्यादत्रचागतः ॥ नोचेद्विनातंगोपालंविद्धचस्मांस्त्यक्तजीविकान् ॥ २८ ॥ इ
तितेषांवचःश्रुत्वाप्रोवाचब्राह्मणःसतान् ॥ मद्देशेश्रीजगन्नाथःपश्चिमेयोजनोपरि ॥ २९ ॥ ग्रामःक्षुरदहाख्योस्तिगोपालस्तत्रातिष्ठति॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यथाब्राह्मणयोर्जातोविवादःकन्यकाकृते ॥ ३० ॥ विदुषोवचनंतद्वत्सामाजिकवचस्तथा ॥ आनेतुंसाक्षिणंदेवंपुनर्विप्रागमंतथा ॥
॥ ३१ ॥ गोपालागमनंतत्रराजभक्तिंतथाद्विजः ॥ उवाचसर्ववृत्तांतंश्रुत्वातेतिप्रहर्षिताः ॥ ३२ ॥ तेनैवब्राह्मणेनाथसाकंसर्वेप्रतस्थि
रे ॥ गतास्तेयत्रगोपालोदृष्ट्वातंरुरुदुश्चते ॥ ३३ ॥ ऊचुःसर्वेतुतंदेवकिमिदंकृतवानसि ॥ इत्युक्त्वातत्रतेसर्वेप्रतिमासन्निधिंगताः॥
॥ ३४ ॥ उत्थापयितुमुद्युक्तानोत्तस्थौप्रतिमाततः ॥ तस्थुस्त्यक्तान्नपानादिनिराहाराःस्थिताद्विजाः ॥ ३५ ॥ अथरात्रौतुगोपालस्ता
न्स्वप्नेवाक्यमब्रवीत् ॥ यूयंगच्छततत्रैवमथुरायामितोद्विजाः ॥ ३६ ॥ नेयंमूर्तिरितस्तत्रगमिष्यतिकथंचन ॥ अयंमेस्तीहयोभक्तस्त
द्वशेहंस्थितःकिल ॥ ३७ ॥ युष्माभिस्तत्रगंतव्यंनीत्वान्यांप्रतिमांमम ॥ स्थाप्यतांमंदिरेतत्रतस्मिन्स्थास्याम्यहंसदा ॥ ३८ ॥ एवं
वदंतंतेसर्वेगोपालंददृशुर्निशि॥प्रातरुत्थायसुस्नातागोपालंतंप्रणम्यच ॥ ३९ ॥ चलिताश्चततस्तान्वैभोजयामासवैद्विजः॥भोजयित्वा
ददौतेभ्योधनानिविविधानिच ॥ ४० ॥ विसर्जयामासतदाप्रेमास्रावितलोचनाः ॥ सभक्तोवैद्विजश्रेष्ठोमहाश्चर्यममन्यत ॥ ४१ ॥ अ
थतेत्वरिताःसर्वेब्राह्मणामथुरांययुः॥ गोपालप्रतिमांकृत्वास्थापयामासुरानताः ॥४२॥ पूर्ववत्पूजयंतिस्मतत्रतेपूजकाद्विजाः ॥ सर्वेत
त्रप्रमुदितामथुरावासिनोनराः॥४३॥ एवंभक्तिवशीभूतःश्रीकृष्णोभक्तवत्सलः ॥ पूरयत्यखिलान्कामान्निजभक्तस्यसर्वदा ॥४४॥श्रुत्वे
दंपरमाश्चर्यंद्विजभक्तिविचेष्टितम् ॥ लभतेसकलान्कामान्कृष्णभक्तिंलभेतवै ॥ ४५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसाक्षिगोपाल
चरितंनामसप्ततितमःसर्गः ॥ ७० ॥ छ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्यमुत्तमम् ॥ परमाश्चर्यजनकंहरिभक्तिप्रदायकम् ॥
॥ १ ॥ द्वारकायास्तुपूर्वस्यांडाकोरइतिविश्रुतः ॥ महाग्रामोस्तितत्रासीद्ब्राह्मणोभक्तिसंयुतः ॥ २ ॥ रामदासइतिख्यातःकुटुंबीहरिपू

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जकः ॥ प्रतिमासंद्विजःसोथगत्वाद्वारावतींमुदा ॥ ३ ॥ उपोष्यैकादशींतत्रकृत्वाजागरणंनिशि ॥ समाययौनिजंगेहमितितस्यदृढं
व्रतम्॥४॥गेहेपिसाधुसेवायांनिरतःसर्वदाद्विजः॥ भिक्षयान्नानिचादायसाधुभ्यःप्रददौमुदा ॥५॥ एवंगतेषुकालेषुरामदासोजरांगतः॥त
थापिद्वारकायात्रांरणछूरहरेःपुरा॥६॥उपवासंजागरणंचक्रेकृच्छ्रेणसद्विजः॥एवंश्रुत्वाव्रतंकर्तुमशक्तोब्राह्मणोत्तमः ॥७॥ नचतस्थौद्वार
कायांकुटुंबभरणायसः ॥ डाकोरग्राममागत्यचक्रेपुत्रादिपालनम् ॥ ८ ॥ अथैकस्मिन्दिनेविप्रोरामदासोजरातुरः ॥ एकादश्यांगत
स्तत्ररणशूरसमीपतः ॥९॥ अतिश्रमाज्जरादोषादतिम्लानोबभूवसः ॥ तथाप्युपोषितोरामदासःकृत्वातुजागरम् ॥१०॥ द्वादश्यांपार
णंकृत्वानगंतुंशक्तिमानभूत् ॥ ततस्तत्रैवसुष्वापरणछूरस्यसन्निधौ ॥ ११ ॥ अथस्वप्नेरामदासंरणछूरउवाचतम् ॥ अहोमांनयतत्रैव
यत्रत्वंवससिद्विज ॥ १२ ॥ आनीयशकटंतत्रमामारोप्यमहानिशि ॥ इतःप्रयाहित्वद्भक्त्यागमिष्यामिनसंशयः ॥ १३ ॥ इतिदृष्ट्वा
थस्वप्नंसःप्रातरुत्थायहर्षितः ॥ द्विजोथगृहमागत्यनीत्वाशकटमुत्तमम् ॥ १४ ॥ एकादश्यांरामदासोद्वारकायांसमागमत् ॥ सतु
रात्रौस्थितस्तत्रव्रतीजागरणंचरन् ॥ १५ ॥ द्वादश्यांपारणंकृत्वानिशायामर्द्धरात्रके ॥ उत्ताय्यालंकृतान्सर्वान्संस्थाप्यतन्मठे
पुनः ॥ १६ ॥ रणछूरंसमुत्थाप्यसंस्थाप्यशकटोपरि ॥ निर्जगामद्वारकायाभयादतिजवेनसः ॥ १७ ॥ अथप्रभातेद्वादश्यांरणछू
रस्यपूजकाः ॥ अदृष्ट्वारणछूरंतुचिंतांजग्मुर्दुरत्ययाम् ॥ १८ ॥ केननीतोयमस्माकंरणछूरःप्रतापवान् ॥ इतिसंचिंत्यतेसर्वेतत्रत्या
न्ददृशुर्नरान् ॥ १९ ॥ कोनास्तिवास्तिपूर्वेद्युरागतानांनृणामिति ॥ जिज्ञासवोरामदासमदृष्ट्वातेथपूजकाः ॥ २० ॥ शकटंचा
प्यदृष्ट्वातेसर्वैरेतद्विनिश्चितम् ॥ अनेनैवतुनीतोसौनिशायांनात्रसंशयः ॥ २१ ॥ अतोवैशकटंनीत्वापूर्वेद्युरिहचागतः ॥ अर्द्धरात्रौ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रामदासोजगामशकटेनवै ॥ २२ ॥ इतितत्रत्यमनुजैरुक्तास्तेपूजकास्तदा ॥ उत्थायदुद्रुवुःसर्वेरामदासंप्रतिद्विजाः ॥ २३ ॥ रामदा
सःसमायातोयदास्वग्रामसन्निधौ ॥ तदातेपूजकास्तत्रददृशुस्तंद्विजोत्तमम् ॥ २४ ॥ रामदासोपितान्सर्वान्ददर्शातित्वरागतान् ॥
विज्ञायमूर्तिमुत्थायवाप्यांचिक्षेपभीतिमान् ॥ २५ ॥ स्वयमागत्यशकटेरामदासःस्थितोभवत् ॥ अथतेपूजकास्तत्रसमायातास्त्व
रान्विताः ॥ २६ ॥ ददृशुःशकटंतत्रनापश्यन्प्रतिमांशुभाम् ॥ तन्मध्येकोप्युवाचाथवापीतीरेगतोह्ययम् ॥ २७ ॥ कोवेदतत्रनि
क्षिप्यपुनरागतवानसौ ॥ इत्युक्त्वातत्रतेसर्वेवापीतीरमुपागताः ॥ २८ ॥ पश्यंतोजलमध्यंतेददृशुःप्रतिमांहरेः ॥ उत्थापयितुमा
रेभेसर्वेतेपूजकास्तदा ॥ २९ ॥ नोत्तस्थौप्रतिमातत्रसर्वेचिंतासमाकुलाः ॥ ग्रामादग्र्यान्बलिष्ठान्वैयथाशतसहस्रशः ॥ ३० ॥ प्रा
र्थ्यानीयचतैश्चापिनोत्थिताप्रतिमास्थलात् ॥ ततःसर्वेनिवृत्तास्तेज्ञात्वाहरिविचेष्टितम् ॥ ३१ ॥ रामदासेनचैकेनप्रतिमेयंसमु
त्थिता ॥ सैवास्माभिस्तुबलिभिःसहस्रैरपिनोत्थिता ॥३२॥ अतोनैवहरेस्तत्रगंतुमिच्छास्तिनिश्चितम् ॥ तथाचात्रैवचत्स्यामोवयंचै
वनसंशयः॥३३॥इतिनिश्चित्यतेसर्वेतस्थुस्त्यक्ताशनोदकाः ॥ निशायांरणछोरस्तुतानुवाचवचोहितम्॥३४॥स्वप्नेनाहमितोयामिरा
मदासस्यभक्तितः ॥ यूयंयातद्वारकायांस्वर्णनीत्वातुतत्समम् ॥ ३५ ॥ तत्रान्यमूर्तिंकृत्वामेस्थापयध्वंत्वहंपुनः ॥ तत्रापिभवतां
भक्त्यातिष्ठाम्येवनसंशयः ॥ ३६ ॥ तानुक्त्वैवंततोरामदासंस्वप्नेऽवदत्प्रभुः ॥ मत्तुल्यकनकंप्रातर्दत्त्वातेभ्योतिभक्तितः ॥ ३७ ॥
पूजकेभ्योथतान्भक्त्याविसृज्यमांपुनर्गृहे ॥ संस्थाप्यार्चयतिष्ठामित्वद्गृहेनात्रसंशयः ॥ ३८ ॥ इत्युक्त्वारामदासायस्वप्नंतस्यास्त्रियं
पुनः ॥ स्वप्नेप्रोवाचभगवान्भक्तानुग्रहकारकः ॥ ३९ ॥ कर्णालंकरणंयत्तुरक्तिकात्रयमास्तिते ॥ तदर्पयतुलायांतुतत्समोपिभवा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

याम्यहम् ॥ ४० ॥ इतिदृष्ट्वाथतेस्वप्नमुत्तस्थुःप्रातरेवहि ॥ पूजकारामदासस्यगृहद्वारिसमागताः ॥ ४१ ॥ देहिनःप्रतिमातुल्यंस्वर्ण
यामोगृहंवयम् ॥ इतितेषांवचःश्रुत्वारामदासोतिविस्मितः ॥ ४२ ॥ उवाचसत्यमेतद्धैममाप्याहजनार्दनः ॥ परंतुकनकंतद्धद्वर्ततेकुत्र
मेद्विजाः ॥ ४३ ॥ तथापिपत्नींपृष्ट्वाहंसमागच्छामितिष्ठत ॥ इत्युक्त्वातान्गतःपत्नीसमीपंप्राहसास्वयम् ॥ ४४ ॥ अहोकिमर्थंखि
न्नोसिभगवान्भक्तवत्सलः ॥ मामुवाचाथस्वप्नेयत्कर्णेस्तितेहिरण्यकम् ॥ ४५ ॥ तेनैवतुलितोभद्रेभविष्यामिनसंशयः ॥ इत्युक्त्वा
कर्णदेशात्साकनकंप्रददौसती ॥ ४६ ॥ हर्षयंतीरामदासंवचनैर्भक्तिसंयुतैः ॥ अहोयोनमनुष्यैस्तुसहस्रैरुत्थितःप्रभुः ॥ ४७ ॥
कथंसतुत्वयैकेनस्थापितःशकटेहरिः ॥ कथंचात्रजलेन्यस्तस्तत्सर्वंहृदिचिंतय ॥ ४८ ॥ माकुरुष्वात्रसंदेहंतुलितःस्यादनेन
सः ॥ इतितस्यावचःश्रुत्वागृहीत्वाकनकंतुतत् ॥ ४९ ॥ तुलामादायमहतींरणछोरंन्यधापयत् ॥ श्रुत्वैतत्सर्ववृत्तांतमागताग्रामवा
सिनः ॥ ५० ॥ तेषामग्रेतुलायांतुरामदासोऽतिभक्तितः ॥ रणछोरंस्थापयित्वाददौतत्कनकंस्वयम् ॥ ५१ ॥ ततःप्रजहसुःसर्वेदृष्ट्वात
त्कनकंजनाः ॥ पूजाकालेसमूचुस्तंकिमिदंकुरुषेद्विज ॥ ५२ ॥ एतावतीकथंमूर्तिरनेनतुलिताभवेत् ॥ इतितेषांवचःश्रुत्वाराम
दासोब्रवीद्वचः ॥ ५३ ॥ तोलयंतुभवंतोत्रमाकुरुध्वंचसंशयम् ॥ गुरुतालघुताचेतिसर्वंकृष्णस्यलीलया ॥ ५४ ॥ सहस्रैर्नोत्थि
तोयोसौपश्यतैकेनचोत्थितः ॥ इतिश्रुत्वावचस्तस्यरामदासस्यपूजकाः ॥ ५५ ॥ सत्यंमत्वाथतन्मध्येएकोवोत्थायचागतः ॥
तुलामुत्थापयामासतेनैवतुलितःप्रभुः ॥ ५६ ॥ ततःसर्वेमहाश्चर्यंमेनिरेभक्तिसंयुतम् ॥ अथतेषांपूजकानांमध्येचैकोतिमूर्खवत् ॥
॥ ५७ ॥ हरिंनेतुंमनःकृत्वातमुत्थापयितुंगतः ॥ बहुप्रयासंकृतवान्नोत्तस्थौसमहाप्रभुः ॥ ५८ ॥ ततःसर्वेहसंतस्तंवारयामासुरा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तुरम् ॥ अथतेब्राह्मणास्तावद्गृहीत्वाकनकंमुदा ॥ ५९ ॥ भोजितारामदासेनजग्मुर्द्वारावतींपुरीम् ॥ रामदासोपितांमूर्तिंरणछो
रस्यभक्तितः ॥ ६० ॥ स्थापयामासभवनेसिषेवेतामहर्निशम् ॥ संपूज्यसरणछोरंयावज्जीवंकृतार्थधीः ॥ ६१ ॥ मृतोवैकुंठभु
वनंययौकृष्णमनुस्मरन् ॥ अद्यापिसहरिस्तत्रडाकोरग्राममध्यतः ॥ ६२ ॥ तिष्ठत्येवजनान्भक्तान्कृतार्थींकर्तुमात्मनः ॥ धन्यो
वैरामदासस्तुधन्यातद्भक्तिरुत्तमा ॥ ६३ ॥ यदर्थंद्वारकांत्यक्त्वारणछोरःसमागतः ॥ ६४ ॥ ॥ इति श्रीभगवद्भक्तिमाहा
त्म्येरामदासचरितंनामैकसप्ततितमःसर्गः ॥ ७१ ॥ ॥ छ ॥ ॥ अंतर्वेदेजसूइयामोनाम्नासीद्वैष्णवःकिल ॥ तस्यैकोवृषभो
गेहेनान्यत्किंचिद्धनादिकम् ॥ १ ॥ तेनक्षेत्रंचकारासौभक्तेभ्यःप्रददौमुदा ॥ एकदातस्यवृषभश्चौरेणापहृतोवने ॥ २ ॥
जसूइयामोतिखिन्नोभूदलब्ध्वावृषभंवने ॥ चिंतयामासमनसाकिंकरोम्यहमद्यवै ॥ ३ ॥ वृषभोपिहृतश्चौरैःकथंक्षेत्रंभविष्यतिं ॥
क्षेत्राभावेहिसाधूनांसेवनंनभविष्यति ॥ ४ ॥ मृतिरेववरंमन्येसाधुसेवांविनामम ॥ तस्माद्द्यैवमर्तव्यंगृहेगत्वानसंशयः ॥ ५ ॥ इति
निश्चित्यमनसासमागच्छद्गृहंप्रति ॥ ज्ञातोभगवतासौतुमरिष्यतिनसंशयः ॥ ६ ॥ तादृशोवृषभस्तस्यसमीपेग्रेनिवेशित ॥ अथा
सौतुजसूइयामोदृष्ट्वातंवृषभंस्वकम् ॥ ७ ॥ जहर्षत्वरितस्तंतुजग्राहवृषभंमुदा ॥ गृहीत्वागृहमायातोभक्तसेवापरायणः ॥ ८ ॥ कृ
त्वाक्षेत्रंतदुत्पन्नैस्तर्पयामाससज्जनान् ॥ एवंसंवत्सरेजातेसचौरस्तत्रचागतः ॥ ९ ॥ कृष्यंतंक्षेत्रंक्षेत्रेसतादृशंवृषभंतथा ॥ दृष्ट्वाक
स्मात्समायातोसएववृषभोमम ॥ १० ॥ इतिसंचिंत्यगेहेस्वेसमायातोथतस्करः ॥ ददर्शवृषभंतंतुपुनस्तत्रसमागतः ॥ ११ ॥ तत्रा
प्यपश्यद्वृषभंपुनरेवगृहंययौ ॥ एवंपुनःपुनश्चौरोदृष्ट्वाश्चर्यमहांस्तदा ॥ १२ ॥ जसूइयामस्यचरणेनिपत्येदमुवाचह ॥ अहोमया

१९

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वृषोनीतोवनात्तवनसंशयः ॥ १३ ॥ पुनस्तवायंवृषभस्तादृशोदृश्यतेमया ॥ इतीदंमेमहच्चित्रंजायतेभक्तसत्तम ॥ १४ ॥ तस्मा
त्त्वद्वृषभंनीत्वातुभ्यंदातुंसमागतः ॥ गृहाणेदंवृषंस्वामिन्कुरुशिष्यंचमामिह ॥ १५ ॥ अद्यारभ्यमयाचौर्य्यंत्यक्तंसत्यंनसंशयः ॥ तस्मा
त्त्वांशरणंप्राप्तःकृतार्थंकुरुमांविभो ॥ १६ ॥ इत्युक्तस्तेनचौरेणजसूश्यामोदयान्वितः ॥ प्रददौगोपचौरायमंत्रंभक्तिविवर्धनम् ॥ १७ ॥
गृहीत्वातस्यमंत्रंसप्रदायवृषभंचतम् ॥ आगत्यस्वगृहेगोपोमहाभक्तोबभूवह ॥ १८ ॥ दधिदुग्धादिकंनीत्वाजसूश्यामस्यसेवनम् ॥ च
कारप्रत्यहंगोपःसोतिभक्तोबभूवह ॥ १९ ॥ एवंचौरोपिभक्तस्यसंसर्गाद्भक्तिमानभूत् ॥ तस्मात्सज्जनसंसर्गोनृणांसर्वार्थसाधकः ॥ २० ॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येजसूश्यामचरितंनामद्विसप्ततितमःसर्गः ॥ ७२ ॥ छ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तेर्माहात्म्य
मुत्तमम् ॥ महाश्चर्य्यप्रदंनृणांहरिभक्तिप्रदायकम् ॥ १ ॥ गंगायाउत्तरेकूलेनैमिषारण्यपश्चिमे ॥ आस्तेनाम्नाबरेलीतिग्रामो
ब्राह्मणसंकुलः ॥ २ ॥ तत्राभूद्ब्राह्मणश्चैकोनंददासइतिश्रुतः ॥ अविद्योनिर्द्धनःशांतःकृषिकर्म्मचकारसः ॥ ३ ॥ परंतुहरि
भक्तोसौसाधुसेवापरायणः ॥ संध्यायामागतान्सर्वान्ददात्यन्नंसभक्तितः ॥ ४ ॥ तंदृष्ट्वानिरपेक्षंतुतत्रत्यायेसुदुर्ज्जनाः ॥ तंकदर्थ
यितुंसर्वेमंत्रंचक्रुःपरस्परम् ॥ ५ ॥ अहोस्मिन्नगरेनीचःसर्वस्मादप्ययंद्विजः ॥ सर्वेभ्योमहतींलोकेप्रतिष्ठांप्रापदंभतः ॥ ६ ॥
सायंसमागतेभ्योसौददात्यन्नंयतस्ततः ॥ ख्यातोलोकेषुसर्वत्रग्रामेसर्वाधिकोभवत् ॥ ७ ॥ अतस्तथाप्रकर्तव्यंयेनतस्यचमंदिरे ॥
नगच्छेत्कोपितंदूरात्त्यजेच्चांडालवद्द्विजः ॥ ८ ॥ सर्वेभ्योमहतींलोकेप्रतिष्ठांप्रापदंभतः ॥ तथाकेनापिदोषेणअप्रतिष्ठाभवेद्यथा ॥ ९ ॥
इत्येवंमंत्रयित्वातेमृतांवत्सतरींखलाः ॥ तत्क्षेत्रेस्थापयामासुःसुप्तेलोकेमहानिशि ॥ १० ॥ अथप्रातस्सस्वक्षेत्रेनंददासोगतःस्वयम् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तदैवतेद्रुतंतत्रगताःक्षेत्रेतिदुर्जनाः ॥११॥ दृष्ट्वावत्सतरींतांतुनंददासंतथाद्विजम् ॥ ऊचुर्धिक्शब्दमुच्चार्य्यनंददासंमहाशुचिम् ॥१२॥
अरेविप्रकुलेजातःकथमेषाहतात्वया ॥ वृथामुद्रांचमालांचवहसित्वंद्विजाधम ॥ १३ ॥ दंभेननगरेनूनंसर्वान्वंचयासिस्वयम् ॥ इ
त्युक्त्वातेसमाजग्मुर्ग्रामेदर्शयितुंजनान् ॥ १४ ॥ उक्त्वानीत्वाचसर्वांस्तेगतास्तत्रातिदुर्जनाः ॥ दर्शयामासुरुद्विग्नंनंददासंचतां
मृताम् ॥ १५ ॥ निनिंदुर्दुर्जनास्तत्रसज्जनामौनमास्थिताः ॥ नोचुःकिंचिन्नंददासंपरावृत्यस्वकंगृहम् ॥ १६ ॥ अथतान्नंददा
सस्तुप्रोवाचातिप्रहृष्टवत् ॥ मयानघातितेयंचेत्येतद्वक्ष्याम्यहंमृतम् ॥ १७ ॥ अत्रैतेसाक्षिणःसंतिब्राह्मणाअतिधार्म्मिकाः ॥
तस्माद्भवंतोगच्छंतुश्रुत्वैकंवचनंमम ॥ १८ ॥ जीवयिष्यतिचेदेतांरामोवत्सतरींप्रभुः ॥ तदानयासहाहंभोआगमिष्यामिमन्दिर
म् ॥ १९ ॥ नोचेद्यत्रगताचेयंतत्रयास्याम्यसंशयम् ॥ इतिश्रुत्वावचस्तस्यसर्वेग्रामसुपागताः ॥ २० ॥ नंददासस्तुतत्रैववत्स
तर्य्याःसमीपतः ॥ स्थित्वाराममेतिमंत्रंवैभक्तिपूर्वंजजापह ॥ २१ ॥ ततोमध्याह्नसमयेप्रोत्तस्थौसाक्षुधातुरा ॥ श्रीरामकृपयावत्सा
चचारक्षेत्रजान्यशान् ॥ २२ ॥ चारयित्वाथतांरामदासःकृत्वाग्रतःस्वयम् ॥ समायातोथनगरेशिष्टब्राह्मणसन्निधौ ॥ २३ ॥ तेदृष्ट्वा
तंप्रणम्योचुःधन्यस्त्वंद्विजसत्तम ॥ त्वत्समोनास्तिकोप्यन्योभगवद्भक्तिमान्द्विज ॥ २४ ॥ तेचदृष्ट्वातुतांवत्सांजीवितामतिविस्मि
ताः ॥ अधोमुखाःस्थितास्तूष्णींमहाशोकातुराइव ॥ २५ ॥ अथवत्सतरीसातुहुंभारावैःस्वमातरम् ॥ आह्वयंतीमुहुस्तस्यामा
ताश्रुत्वातुतद्ध्वनिम् ॥ २६ ॥ छित्त्वास्वबंधनंतत्रसमायाताथतत्क्षणात् ॥ गोस्वाम्यपिसमायातोगोपृष्ठेतुगतस्त्वरन् ॥ २७ ॥
दृष्ट्वावत्सतरींसागौःपाययामासवैस्तनम् ॥ तदागोस्वामिनंसर्वेपप्रच्छुःकथमत्रते ॥ २८ ॥ वत्सेयमागताविप्रब्रूहिसत्यंयथार्थतः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इतिश्रुत्वावचस्तेषांगोस्वामीवकुमुद्यतः ॥ २९ ॥ अथांतरेसमायातोग्रामाधीशस्तुतत्रवै ॥ सोपिपप्रच्छतंविप्रंयथार्थंवदमेद्विज
॥ ३० ॥ तदाहविप्रोगोस्वामीसत्यमेवब्रवीम्यहम् ॥ एषावत्सतरीचास्यागौर्मृतामममन्दिरे ॥ ३१ ॥ तृतीयदिवसेपश्चादिमांगे
हात्तुचर्म्मकृत् ॥ तत्याजबहिरित्येतज्जानेहंनात्रसंशयः ॥ ३२ ॥ गौरियंतुतदारभ्यहुंभारावैःसुदुःखदैः ॥ उद्वेजयंतीघासंवैनजघासशु
चाकुला ॥३३॥ अद्यवत्सारवंश्रुत्वात्रोटयित्वास्वबंधनम् ॥ आगतात्रततःपश्चादहमागतवानिह ॥३४॥ इतिश्रुत्वावचस्तस्यगोप्रभोस्तु
नराधिपः ॥ प्रणम्यनंददासंतुविससर्जगृहंप्रति ॥३५॥ तान्दुष्टान्ब्राह्मणान्सर्वानानाय्यचनराधिपः॥निंदयित्वाबहिश्चक्रेस्वराज्यादातिको
पतः॥३६॥तदादिनंददासस्ययशोतीवबभूवह ॥ पूर्वस्मादप्ययंनंददासोदीनवदास्थितः॥३७॥श्रीरामंचिंतयन्नित्यंसाधुसेवापरायणः॥
यावज्जीवंस्थितस्तत्रमृतोरामांतिकंययौ॥३८॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येनंददासचरितंनामत्रिसप्ततितमःसर्गः॥७३॥ छ॥ ॥
अथापरंप्रवक्ष्यामिमाहात्म्यंपरमाद्भुतम् ॥ अह्लदासस्यभक्तस्यभक्तेर्भक्तिविवर्धनम् ॥ १ ॥ गंगायाउत्तरेकूलेब्रह्मावर्तसमीपतः ॥ अ
ह्लदासोमहानासीद्विष्णुभक्तोविमत्सरः ॥ २ ॥ आब्रह्मकीटपर्यंतंपश्यन्विष्णुंसनातनम् ॥ आजीवंब्रह्मसेवायांनिरतोद्विजसत्तमः ॥
॥ ३ ॥ एकदासतुभक्तोवैनैमिषारण्यमुत्तमम् ॥ तीर्थंगंतुंमनश्चक्रेनीत्वैकंशिष्यमुत्तमम् ॥ ४ ॥ चलितोनैमिषारण्यंकियद्दूरंगतोय
दा ॥ ततोमार्गेददर्शासावाम्रवृक्षवनंमहत् ॥ ५ ॥ निदाघघर्मतप्तांगोविशश्रामवनेतदा ॥ तस्यशिष्योददर्शैकंमहोच्चंवृक्षमुत्तमम् ॥
॥ ६ ॥ तस्योपरिस्थशाखायांफलान्यासन्महांतिवै ॥ पक्वानिपीतरक्तानिदृष्ट्वाशिष्योतिहर्षितः ॥ ७ ॥ अह्लादंतमुवाचेदंस्वामिन्देह्य
स्यमेफलम् ॥ महांतंपीतरक्तंतुदृष्ट्वालुब्धंमनोमम ॥८॥ इतिश्रुत्वावचस्तस्यशिष्यस्यसगुरुस्तदा ॥ अयाचतफलंतंवैशिष्यार्थंवन

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रक्षकम् ॥ ९ ॥ श्रुत्वाह्लादस्यवचनंवनरक्षाकरोऽब्रवीत् ॥ अहोकश्चास्यशिरसिनरोगंतुमिहार्हति ॥ १० ॥ कदाचित्पतितस्त
स्मान्म्रियेतैवनसंशयः ॥ सतूपहासपुनःप्राहवनरक्षाकरोहसन् ॥ ११ ॥ त्वंतुसिद्धोसिभक्तोसिब्रूह्येनंवृक्षमुत्तमम् ॥ सतेश्रुत्वावचो
भक्तनम्रोभूत्वार्पयिष्यति ॥ १२ ॥ सतूपहाससंयुक्तंश्रुत्वेतिवचनंगुरुः ॥ तमुवाचातिसंतुष्टःकिमसाध्यंजगत्प्रभोः ॥ १३ ॥ इत्यु
क्त्वातंतरुंविष्णुंहृदिमत्वाब्रवीद्वचः ॥ अहोभवानपिहरिर्महान्साधुस्वरूपवान् ॥ १४ ॥ परार्थंजन्मचादायतिष्ठसीहधरातले ॥ पत्रैः
पुष्पैःफलैर्मूलैरुपकर्ताजनानिह ॥ १५ ॥ अतोयंबालकोदृष्ट्वात्वत्फलंनैवगच्छति ॥ याचतेमांफलंत्वत्तःकथमस्मैददाम्यहम् ॥१६॥
तस्मात्तेयदिभोवृतदयास्याद्देहिबालकम् ॥ तदाचगमनंमेस्यादतस्त्वंतुप्रसीदमे ॥ १७ ॥ इतिश्रुत्वावचस्तस्यअह्लादासस्यवै
तदा ॥ नम्रीकृत्योर्ध्वगांशाखांतस्थौपक्वफलैर्मुदा ॥ १८ ॥ अह्लदासस्ततस्तंतुवनरक्षाकरंनरम् ॥ पप्रच्छभवतोवाक्यादेवंभूतो
बभूवह ॥ १९ ॥ अतःपरंफलान्यस्मैदेहियानीप्सितानिते ॥ इतिश्रुत्वावचस्तस्यवनरक्षाकरस्तदा ॥ २० ॥ साष्टांगंप्रणि
पत्याहस्वामिन्मेक्षम्यतामिह ॥ नचैवैतद्वनंसर्वंगृह्यतांयावदिच्छसि ॥ २१ ॥ इत्युक्तस्तेनविप्रेणवनरक्षाकरेणसः ॥ उवाच
गृह्यतांशिष्यंफलान्यस्यतरोस्त्वया ॥ २२ ॥ इतिश्रुत्वागुरोर्वाक्यंशिष्यस्तत्रफलानिसः ॥ पंचैवत्रोटयामासजग्राहस्वस्यवा
ससा ॥ २३ ॥ पुनराहाह्लदासस्तुरसालत्वंसुखीभव ॥ पूर्ववत्तिष्ठबालोयंकृतपूर्णमनोरथः ॥ २४ ॥ अथतत्रवने
ह्यासन्येकेचवनरक्षकाः ॥ दृष्ट्वातदद्भुतंतूर्णंतदेवोचुर्गृहेगृहे ॥ २५ ॥ श्रुत्वातद्वचनंसर्वेतदैवाजग्मुरुत्सुकाः ॥ ददृशुस्तेमहाश्चर्यं
वृक्षसन्नमनादिकम् ॥ २६ ॥ अथाह्लदासश्चलितःशिष्यैःसार्द्धंत्वरान्वितः ॥ अनुयातास्ततस्तस्मैग्रामीणाअतिभक्तितः ॥ २७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्थित्वैकत्रचतान्सर्वान्नमस्कृत्यविसृष्टवान् ॥ स्वयंतुनैमिषारण्यंजगामशिष्यसंयुतः ॥२८॥ इत्येतत्कथितंपुण्यंभक्तेर्माहात्म्यमुत्तमम् ॥ श्रद्दधानोनरःश्रुत्वामुच्यतेसर्वसंशयैः ॥ २९ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येअह्लदासचरितंनामचतुःसप्ततितमःसर्गः ॥ ॥ ७४ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणकृष्णेभक्तिर्दृढाभवेत् ॥ १ ॥ श्रीरंगनाथोयश्चास्तिदक्षिणेतीवविश्रुतः ॥ तत्समीपेवभूवैकावेश्याकामकलावती ॥ २ ॥ गीतनृत्यादिकुशलामोहिनीसर्वदेहिनाम् ॥ धनाढ्याऽतिथिभक्ताचसाधुसेवापरायणा ॥ ३ ॥ एकदातद्गृहद्वारंदृष्ट्वास्फीतंसुसंस्कृतम् ॥ महानुभावश्चैकस्तुविद्वान्धर्माकुलोद्विजः ॥ ४ ॥ ब्राह्मणाश्रमइत्येवंज्ञात्वातत्रोपविष्टवान् ॥ अथदृष्ट्वाथसावेश्याविद्वांसमागतंद्विजम् ॥ ५ ॥ रत्नानिस्वर्णमुद्राश्चकृत्वारजतभाजने ॥ ब्राह्मणाग्रेनिधायाथनत्वांजलिपुटास्थिता ॥ ६ ॥ अथविप्रस्तुतांदृष्ट्वाविनीतांददतींधनम् ॥ उवाचकासिकल्याणिकस्यत्वंदयितावद ॥ ७ ॥ श्रुत्वेदंवचनंतस्यवारनारीवचोऽब्रवीत् ॥ स्वामिन्नहंतुदुर्भाग्यावेश्यास्मिन्नगरेस्थिता ॥ ८ ॥ प्रतिश्रुत्यवचस्तस्यामहाभागवतोऽब्रवीत् ॥ बालेनाहंतवार्हामिधनमेतन्नसंशयः ॥ ९ ॥ इत्थमेवहितुष्टोस्मीत्युक्त्वागंतुमनाअभूत् ॥ ततोवेश्याप्रणम्याहकृतांजलिपुटाद्विजम् ॥ १० ॥ ब्रह्मन्निदंधनंतुभ्यंमयासंकल्पितंहृदि ॥ कथंनेष्यामितद्ब्रूहिकिंचैकंप्रार्थयाम्यहम् ॥ ११ ॥ भवादृशानांविप्राणांनयोग्यायद्यहंविभो ॥ तदाकथंमेप्रीयेतभगवान्पुरुषोत्तमः ॥ १२ ॥ इतिश्रुत्वावचस्तस्याद्विजोवचनमब्रवीत् ॥ त्वयितुष्टोस्तिश्रीरंगोभगवान्भक्तवत्सलः ॥ १३ ॥ वेश्यापित्वंशुभाचारासाधुसेवापरायणा ॥ अतोजानामितेतुष्टोवर्ततेजगदीश्वरः ॥ १४ ॥ इदंतुयद्धनंमह्यंदत्तंतस्यतुशोभनम् ॥ कारयित्वाचमुकुटंश्रीरंगायसमर्पय ॥ १५ ॥ इत्युक्तवंतंतंविप्रंवेश्याप्राहकृतांजलिः ॥ भवानेव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नगृह्णातिश्रीरंगश्चकथंस्पृशेत् ॥ १६ ॥ इतिश्रुत्वावचस्तस्याःपुनर्विप्रउवाचताम् ॥ भक्तिप्रियोसौलोकेषुनिरपेक्ष्योग्रहीष्य
ति ॥ १७ ॥ इत्युक्त्वासगतोविप्रोग्रामांतरमुदारधीः ॥ सापिवेश्यातिभक्त्यावैस्वर्णकारमथाह्वयत् ॥ १८ ॥ अन्यानपिसुव
र्णानिदत्त्वातस्मिन्सुवर्णके ॥ मुकुटंकारयामासरत्नैश्चखचितंशुभम् ॥ १९ ॥ एकस्मिन्दिवसेवेश्यामुकुटंरत्नमंडितम् ॥ श्रीरंगस्वा
मिनेदातुंमनश्चक्रेतदानिशि ॥ २० ॥ तस्यामेवतुश्रीरंगःस्वप्नेसेवकमब्रवीत् ॥ प्रातरेष्यतिसावेश्यादातुंमेमुकुटंशुभम् ॥ २१ ॥
दृष्ट्वामांपुष्पिणीसावैभविष्यतिनसंशयः ॥ स्वहस्तादेवमुकुटंमस्तकेमेयथार्पयेत् ॥ २२ ॥ तथात्वयाप्रकर्तव्यंप्रीतयेममपूज
क ॥ संदेहोत्रनकर्त्तव्यःसाममातीवदुर्लभा ॥ २३ ॥ इतिदृष्ट्वातुस्वप्नंसपूजकःप्रातरुत्थितः ॥ उक्त्वान्येभ्यश्चविप्रेभ्यःपूजां
कर्तुंमठेगतः ॥ २४ ॥ अथसावारयोषापिस्नात्वाशुक्लांबरस्रजा ॥ शुक्लचंदनलिप्तांगीमुकुटंरौप्यभाजने ॥ २५ ॥ कृत्वाकरे
णचादायदासीभिर्बंधुभिःसह ॥ जगामसामठद्वारिमहाभक्तिसमन्विता ॥ २६ ॥ दृष्ट्वातांपूजकःसत्यंरात्रिस्वप्नममन्यत ॥
आगत्यतामुवाचाथसमागच्छभयंजहि ॥ २७ ॥ तवाज्ञावर्त्ततेविष्णोर्मुकुटंदातुमुत्तमम् ॥ धन्यासित्वंयतोभक्त्याएवंप्रीतोस्तिवैह
रिः ॥ २८ ॥ इतिश्रुत्वावचस्तस्यपूजकस्यचसापुनः ॥ नमस्कृत्यजगामांतर्मठस्यमुदितातदा ॥ २९ ॥ दृष्ट्वाश्रीरंगनाथंसामहा
नंदेममज्जह ॥ रजस्वलातदैवाभूद्वेश्यातीवचलज्जिता ॥ ३० ॥ तस्थौतत्रैवसंत्रस्तापूजकस्तांतदाऽब्रवीत् ॥ किंतिष्ठसिशुभेगच्छ
देह्यस्मैमुकुटंशुभम् ॥३१॥ श्रुत्वेदंप्राहसावेश्यास्प्रष्टुंनार्हास्म्यहंहरिम् ॥ दर्शनादेवदेवस्यजातास्मिचरजस्वला ॥३२॥ इतिश्रुत्वाव
चस्तस्याःपूजकःप्राहसस्मितः ॥ नतेदोषोस्तिसुश्रोणिदेह्यस्मैमुकुटंस्वयम् ॥ ३३ ॥ इतिश्रुत्वापिसावेश्यासंस्थाप्यमुकुटंमठे ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वहिरागत्यसुस्नातावासोन्यत्परिधायसा ॥ ३४ ॥ मठेगत्वाथमुकुटंनीत्वारंगसमीपतः ॥ दातुंमुकुटमारेभेनममौमस्तकेहरेः ॥३५॥
प्रतिमायाःस्वपंत्यास्तुमस्तकंचाल्पसंस्थितम् ॥ तदासाचिंतितावेश्याकिमर्थंमुकुटंकृतम् ॥ ३६ ॥ एवंसंचिंत्यसुदतीतस्थौसभ
गवांस्तदा ॥ उत्थाप्यतंस्वाशिरसिजग्राहमुकुटंशुभम् ॥ ३७ ॥ पश्यतांसर्वलोकानांमहाश्चर्यमभूदिह ॥ अथसावारयोषापिधन्या
हर्षाश्रुलोचना ॥ ३८ ॥ ननर्तगीतंगायंतीचानाय्यस्वगृहाद्धनम् ॥ दीनानाथदरिद्रेभ्योददौश्रीरंगतुष्टये ॥ ३९ ॥ तुष्टुवुस्तांवार
योषांधन्याधन्येतिवादिनः ॥ सावेश्याविजहौस्वीयंकर्मश्रीरंगसन्निधौ ॥ ४० ॥ कृत्वाकुटीमुवासाथभुक्त्वाकिंचिद्दयान्वितम् ॥ नृ
त्यगीतैश्चसततंतोषयामाससैवहरिम् ॥ ४१ ॥ एवंभक्तिपरावेश्यात्यक्त्वाकर्म्मतुलौकिकम् ॥ श्रीरंगोपासनांकृत्वासंप्राप्यहरिमंदि
रम् ॥ ४२ ॥ जातिभ्रष्टोमहापापीकृतघ्नोगोघ्नएवच ॥ भक्त्याहरिंव्रजेदेवसत्यंसत्यंनसंशयः ॥ ४३ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्ये
वेश्याभक्तिचरितंनामपञ्चसप्ततितमःसर्गः ॥ ७५ ॥ ॥ छ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ यस्यश्रवणमात्रेणपर
मांभक्तिमाप्नुयात् ॥ १ ॥ पांचालेषुवभूवैकोराजाभक्तिसमन्वितः ॥ विष्णुपूजापरोनित्यंनामोच्चारणतत्परः ॥२ ॥ प्रातरारभ्यसायां
तंसायादिप्रातरंततः ॥ वैष्णवेभ्योधनंनित्यंददौनान्यत्रकुत्रचित् ॥ ३ ॥ अन्यंजनंविष्णुभक्त्यानमतिस्मतुभक्तितः ॥ चौरोवापति
तोवापिभक्तरूपधरोहियः ॥ ४ ॥ तममन्यतभक्त्यावैददौतस्मैयथेप्सितम् ॥ इतितस्यव्रतंराज्ञोदृढंज्ञात्वाजनास्तदा ॥५॥ स्तुवंत्यश्चा
तिनिंदंत्यआसंस्तस्यप्रजास्तुवै ॥ एकदातस्यक्रीडार्थंभंडापेनगरेस्थिताः ॥ ६ ॥ तेसर्वेमंत्रयामासुःवंचयित्वावयंनृपम् ॥ ग्रहीष्यामो
धनंचेतिनिश्चित्यैकत्रसंस्थिताः ॥ ७ ॥ कृत्वावैष्णवरूपंतेमालातिलकभूषितम् ॥ हरिनामवदंतस्तुराजद्वारिसमागताः ॥ ८ ॥ ऊचु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दौवारिकंब्रूहिराजानंवयमागताः ॥ श्रुत्वातेषांवचोद्वारपालोराजासमीपतः ॥ ९ ॥ राजन्भक्ताःसमायाताद्वारेतिष्ठंतिसांप्रतम् ॥ श्रुत्वा
तद्वचनंराजाययौतत्रत्वरान्वितः ॥ १० ॥ दृष्ट्वातान्वैष्णवान्भक्त्याप्रणम्यसतुभूपतिः ॥ उवाचयूयंधन्याश्चविरक्ताविचरंतिहि ॥
॥ ११ ॥ पुत्रदारधनादीनांमोहंत्यक्त्वानिराकुलाः ॥ कुतआगच्छतब्रूतगंतुमिच्छथकुत्रवै ॥ १२ ॥ श्रुत्वाराज्ञोवचस्तेपिप्रोचुःकृ
त्रिमवैष्णवाः ॥ द्वारकायाःसमायाताअयोध्यांगंतुमुत्सुकाः ॥ १३ ॥ त्वांश्रुत्वावैष्णवंभूपंद्रष्टुकामाइहागताः ॥ इतिश्रुत्वावचस्तेषां
राजोवाचकृतांजलिः ॥ १४ ॥ स्नात्वाभुक्त्वाद्यवसथगमिष्यथदिनांतरे ॥ श्रुत्वाराजवचःसर्वेशंकिताभंडवैष्णवाः ॥ १५ ॥ जानी
यादथचेद्राजागंतव्यंचततोधुना॥ इतिनिश्चित्यराजानमाहुःसर्वेत्वरान्विताः ॥१६॥ इदानीमेवगच्छामोराजन्स्थातुंनशक्नुमः ॥इतिश्रु
त्वावचस्तेषांराजावस्त्रैर्धनैर्मुदा ॥ १७॥ तोषयामासतान्सर्वान्रत्नैश्चविविधैरपि ॥ अथसर्वंगृहीत्वातेभंडाराजाग्रतस्तदा ॥ १८ ॥
भंडित्वंस्वंदर्शयंतोननृतुश्चापिपूर्ववत्॥दृष्ट्वाराज्ञ्यापिराजासनचुकोपातिभक्तिमान्॥१९॥दृष्ट्वातान्भक्तरूपान्वैनमश्चक्रेविसृज्यवै ॥ अ
थांतःपुरमायातोराजातेप्यथभंडिकाः ॥ २० ॥ राज्ञायन्निश्चिताएतेभक्तास्तस्मात्तुतेपिवै ॥ तत्क्षणादभवन्सर्वेविरक्ताःस्त्रीसुतादि
षु ॥ २१ ॥ राजदत्तंधनंतद्वैदत्त्वाविप्रेभ्यएवते ॥ दिशोदशगताःसर्वेचिंतयंतोहरिंमुदा ॥ २२ ॥ तेपियातामहाभक्ताभक्तिनिश्चय
तोधमाः ॥ दृष्ट्वेदंपरमाश्चर्यंसर्वेमंत्रिपुरोगमाः ॥ २३ ॥ राजानंचाप्यमन्यंतसाक्षाद्विष्णुंसनातनम् ॥ राजापिराज्यंपुत्रायदत्त्वांतेश्रीहरिं
स्मरन् ॥ २४ ॥ जगामपरमंधामयोगिनामपिदुर्लभम् ॥ २५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येराजभक्तिचरितंनामपट्सप्ततितमः
सर्गः ॥ ७६ ॥ छ ॥ ॥ अथापरंराजभक्तेर्माहात्म्यंपरमाद्भुतम् ॥ वक्ष्यामिभक्तिजनकंसर्वपापप्रणाशनम् ॥ १ ॥ आसीद्राजामहा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भक्तःसततंरामनामतत् ॥ जजापहृदयेबाह्येकदाचिदपिनैवसः ॥ २ ॥ कीदृशाभक्तिरित्येतन्नजानातिकथंचन ॥ अंतर्भक्तस्यतस्या
थपत्नीभक्तिमतीसती ॥३॥ चिंतयामाससततंपतिःस्याद्भक्तिमान्कथम् ॥ अंतर्भक्तस्यतस्यैवंराज्ञोभक्तिमजानती ॥ ४ ॥ एवंचिंता
परासाध्वीशयानंस्वपतिंदिवा॥अवेक्ष्यमाणाशय्यायांजाग्रतीचिंतितास्थिता॥५॥अथपत्युर्मुखाद्राज्ञीसीतारामेतिशुश्रुवे॥तदैवोत्थाय
विप्रेभ्योदापयामासभूरिशः॥६॥धनानिवरवस्त्राणिरत्नानिविविधानिच॥वादयामासवाद्यानिमहामांगलिकानिच॥७॥ अथवाद्यादिनिर्घो
षैरुत्थितोनृपतिस्तदा ॥ पत्नींपप्रच्छकिमिदमकांडेतांडवादिकम् ॥८॥ कस्यपुत्रोद्यजातोस्तिभ्रातुस्तेवासुतस्यवा ॥ इतिपत्युर्वचःश्रु
त्वाराज्ञीप्राहातिहर्षिता ॥९॥ नमेभ्रातुर्नपुत्रस्यपुत्रोजातोमहाभुज ॥ शृणुनाथोत्सवस्यास्यकारणंकथयामिते ॥१०॥ त्वन्मुखान्नैवरा
मस्यनामाश्रौषंकदाप्यहम् ॥ तस्मान्नाथातिखिन्नाहंजानामित्वामवैष्णवम् ॥ ११ ॥ उपदेष्टुंनशक्नोमिगुरुरेकःपतिःस्त्रियाः ॥ कथंतेहृ
दिभक्तिःस्यादितिचिंतापरायणा ॥ १२ ॥ साचाद्याहंत्वत्समीपेजाग्रतीशयनेस्थिता ॥ सुप्तस्यतववक्त्रात्तुसीतारामेतिनिर्गतम्॥१३॥
तदाश्रुत्वातुमुदिताजाताहंहृदयेतव ॥ वर्ततेश्रीहरिश्चेतिज्ञात्वासर्वंमयाकृतम् ॥ १४ ॥ दानादिब्राह्मणेभ्यश्चदत्तानिविविधानिच ॥
त्वमप्युत्तिष्ठविप्रेभ्योदेहिवित्तानिभूरिशः ॥ १५ ॥ इतिश्रुत्वाप्रियावाक्यमुवाचसचभूपतिः ॥ यत्कृतंसुकृतंदेवित्वायिनास्त्यत्रसंशयः
॥ १६ ॥ परंतुशृणुमद्वाक्यंश्रुत्वाकुरुयथोचितम् ॥ अद्याहंनैवजीवामिसत्यमेतन्नसंशयः ॥ १७ ॥ सीतयासहितोरामःस्थितोमद्धृद
येकिल ॥ अंतर्भक्त्यातुसंपूज्यकृतार्थोहंस्थितःप्रिये ॥१८॥ गतेतस्मिन्प्रभौसत्यंमरिष्येचनसंशयः ॥ इत्युक्त्वाहूयनृपतिर्मंत्रिणःपुत्र
मुत्तमम् ॥ १९ ॥ उक्त्वासर्वमशेषेणदत्वाराज्यंसुतायवै ॥ ध्यात्वासीतापतिंचित्तेनृपोगात्परमंपदम् ॥ २० ॥ तत्पत्नीतुमहाभागाव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भूवसहगामिनी ॥ दृष्ट्वैतत्परमाश्चर्य्यंसर्वेविस्मयमागताः॥२१॥एवमंतःस्थिताभक्तिःसर्वेषांहितकारिणी ॥ इतिज्ञात्वाजनैःकार्य्याभक्ति
रेवसुखार्थिभिः ॥ २२ ॥ ॥ छ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येंतर्भक्तिराजचरितंनामसप्तसप्ततितमःसर्गः॥७७॥ ॥अथैकोमथुराप्रां
तेवभूववैष्णवोत्तमः ॥ एकाकीगतसंगस्तुभिक्षाशीदृढभक्तिमान् ॥ १ ॥ तस्यैवंवर्त्तमानस्यकुटीद्वारेसमागतः ॥ कृतोपवीतोविप्रस्य
पुत्रोबंधुविवर्जितः ॥ २ ॥ तंदृष्ट्वावैष्णवस्यासीन्महतीहृदयेदया ॥ कोसीत्युवाचतंबालंकथमत्रैवतिष्ठसि ॥ ३ ॥ श्रुत्वैतत्तस्यवचनं
बालःप्राहातिहर्षितः ॥ नाथाहंद्विजपुत्रोस्मिपितृमातृविवर्जितः ॥ ४ ॥ बाल्येएवमृतौतौतुग्रामीणैरस्मिपालितः ॥ दुर्भिक्षसमयेचात्र
त्वामहंशरणंगतः ॥ ५ ॥ इतिश्रुत्वावचस्तस्यबालस्यातिदयान्वितः ॥ आनीयस्वगृहेतंतुपुत्रतुल्यमवैक्षत ॥ ६ ॥ ज्ञात्वात्ममरणं
किंचिदाहूयब्राह्मणंगुरुम् ॥ उवाचाहंमरिष्येऽद्यशिष्योमेत्रनवर्तते ॥ ७ ॥ तावदेतच्छरीरंभोरक्षणीयमिहैवमे ॥ आगतेमम
शिष्येतुवक्तव्यंवचनंमम ॥ ८ ॥ अथापिहरिभक्तिंचेन्ममशिष्यःकरिष्यति ॥ जीविष्यामितदैवाहमितिशिष्यंवदिष्यसि ॥
॥ ९ ॥ इत्युक्त्वातंद्विजंस्वामीममारदैवयोगतः ॥ अथापराह्णेशिष्योपिसमायातोतिभक्तिमान् ॥ १० ॥ दृष्ट्वामृतंगुरुंतत्र
निपपातशुचार्दितः ॥ रुरोदचभृशंतस्मैसविप्रोवाक्यमब्रवीत् ॥ ११ ॥ अहोत्रपश्यतोमेद्यमृतोयंवैगुरुस्तव ॥ यदुक्त्वा
शृणुतत्सर्वंयथावत्कथयामिते ॥ १२ ॥ इतिश्रुत्वावचस्तस्यशिष्यःप्राहकृतांजलिः ॥ वदविप्रगुरोर्वाक्यंकिमुक्त्वामेगुरुर्मृतः ॥ १३ ॥
तदोवाचसविप्रस्तंगुरुणोक्तंशृणुष्वतत् ॥ ममशिष्यायवक्तव्यंहरिभक्तिंकरोतिचेत् ॥ १४ ॥ जीवितःस्यांतदाहंतुतस्माद्भक्तिंकु
रुष्वभो ॥ इतिशिष्योवचःश्रुत्वातत्रैवसंस्मरन्हरिम् ॥ १५ ॥ जजापपरमंमंत्रमेकाग्रहृदयःस्थितः ॥ रामेतिशिष्यस्तत्कालंजीवित्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चोत्थितोगुरुः ॥ १६ ॥ दृष्ट्वाशिष्यंरामनामजपंतंहार्षितोगुरुः ॥ उवाचशिष्यंवत्सेदंत्वंपश्यममजीवनम् ॥ १७ ॥ एतादृशीहरेर्भक्तिर्भ
वतीत्यवधारय ॥ तस्मात्कुरुभवान्भक्तिंकुर्वन्निवससर्वदा ॥ १८ ॥ तवभक्तिप्रसादेनजीवितोहंनसंशयः ॥ परंत्वहंनसंसारेवस्तुमिच्छा
मिपुत्रक ॥ १९ ॥ त्वमत्रैवहरेर्भक्तिंकुर्वन्निवससर्वदा ॥ एतदुक्तुमहंवत्सस्वर्गलोकादिहागतः ॥ २० ॥ उक्त्वैवंशिष्यमात्मीयंसममार
गुरुस्तदा ॥ ततःशिष्योगुरुंतंतुसंचस्कारविधानतः ॥२१॥ संस्कृत्यविधिवत्तस्यकृत्वाचैवोर्द्धदैहिकम् ॥ स्वयंतत्राश्रमेतस्थौविष्णुभ
क्तिपरायणः ॥ २२ ॥ तत्रैकाश्रममध्येत्ववस्थितःसतुचिंतयन् ॥ परमात्मानमाजीवमंतेप्रापपरंपदम् ॥२३॥ ॥इतिश्रीभगवद्भक्तिमाहा
त्म्येगुरुभक्तिचरितंनामअष्टसप्ततितमःसर्गः ॥ ७८ ॥ छ ॥ ॥ अथवक्ष्येमहाश्चर्यंभक्तिमाहात्म्यमुत्तमम् ॥ रामानुजस्याशि
ष्यास्तुदेवाचार्यस्तथापरः ॥ १ ॥ हर्य्यानंदस्तथाभक्तोराघानंदश्चसंज्ञिकः ॥ महामहिमसंज्ञस्तुतुर्य्यःशिष्योबभूवह ॥ २ ॥ राघवा
नंदशिष्यस्तुरामानंदोतिवैष्णवः ॥ शांतोदांतोदयायुक्तःश्रीकृष्णसेवनेरतः ॥ ३ ॥ शापानुग्रहकर्तासौमहाभक्तोबभूवह ॥ तस्याशि
ष्यामहाभक्तावैष्णवालोकविश्रुताः ॥ ४ ॥ भक्तिभावाद्भवांभोधेस्तारयामासवैजनान् ॥ कबीरोनृहरिश्चैवराजापीपाइतिश्रुताः ॥ ५ ॥
रविदासोभवानंदोधनाचसधनादयः ॥ तत्रादौरविदासस्यकथांवक्ष्येमनोरमाम् ॥ ६ ॥ यांश्रुत्वातुद्विजाःसर्वेविष्णुभक्ताभवंतिहि ॥
पूर्वजन्मनिशिष्योहिरामानंदस्यभक्तिमान् ॥ ७ ॥ ब्रह्मचारीस्थितस्तस्यगुरोःसेवापरायणः ॥ रामानंदस्यनियमइतिगेहात्तुभिक्षि
तम् ॥ ८ ॥ अन्नमल्पंसमानीयभोक्तव्यंहरयेर्पितम् ॥ एवमेवसशिष्यायप्राहवैब्रह्मचारिणे ॥ ९ ॥ सोपिशिष्यस्तथाकुर्वन्न्या
चित्वाप्रतिमंदिरम् ॥ आदायान्नंशुचिपक्वाग्गुरवेतंन्यवेदयत् ॥ १० ॥ गृहीत्वातद्गुरुर्भक्त्याश्रीकृष्णायनिवेद्यच ॥ रामानं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दोथवुभुजेसहशिष्येणभक्तिमान् ॥ ११ ॥ एवंगतेषुकालेषुकदाचिद्दैवयोगतः ॥ ब्रह्मचारीगतोभिक्षामागतंचातिवर्षणम् ॥
॥ १२ ॥ नशशाकप्रचलितुंब्रह्मचारीतदंतिके ॥ नास्तिकस्यगृहंदृष्ट्वातद्वारिसमुपागतः. ॥ १३ ॥ ज्ञातस्तेनचशिष्योसौरामानं
दस्यभक्तिमान् ॥ उवाचतस्मैसुगतोनाद्यवृष्टिर्गमिष्यति ॥ १४ ॥ तस्माद्गृहाणमत्तोन्नंगत्वाभोजयवैगुरुम् ॥ इतिश्रुत्वाव
चस्तस्यतस्मैप्राहगुरोर्व्रतम् ॥ १५ ॥ नस्वीचक्रेतस्यभिक्षांवृष्ट्यभावंसमैक्षत ॥ एवंगतेतुमध्याह्नेवृष्ट्याधिक्येतिदुर्दिने ॥ १६ ॥
मुहुरुक्तोनास्तिकेनस्वीचक्रेन्नानितस्यसः ॥ गृहीत्वान्नंसमागत्यतंतुपक्त्वात्वरान्वितः ॥ १७ ॥ अन्नंसमर्पयामासगुरवेविष्णु
हेतवे ॥ गुरुरन्नंगृहीत्वातुसंप्रोक्ष्यविधिवच्छुचिः ॥ १८ ॥ ध्यात्वाकृष्णंसमर्प्यान्नंददर्शहृदिनोहरिम् ॥ पुनःसमाधायमनोदध्यौ
भक्त्याहरिंमुहुः ॥ १९ ॥ यदापूर्ववदेवासीच्छिष्यंप्राहातिविस्मितः ॥ कुतोन्नमिदमानीतंनगृह्णातिहरिःकथम् ॥ २० ॥ इति
श्रुत्वावचस्तस्याशिष्यःप्रोवाचसत्वरम् ॥ अद्यवृष्टिभयादेवनास्तिकस्यगृहेगतः ॥ २१ ॥ बहुकालंस्थितस्तत्रननिवृत्तंतुवर्षणम् ॥
ततोमुहुश्चार्थयित्वानास्तिकोऽन्नंददौमम ॥ २२ ॥ तदेवान्नमिहानीयपक्त्वातुभ्यंसमर्पितम् ॥ रामानंदस्तुतच्छ्रुत्वामहाक्रोध
वशंगतः ॥ २३ ॥ शशापतंप्रियंशिष्यंचर्मकारोभवेतिवै ॥ श्रुत्वाघोरंगुरोर्वाक्यंब्रह्मचार्य्यब्रवीद्वचः ॥ २४ ॥ प्रणम्यतंगुरुंभक्त्या
प्रार्थयन्करुणामयम् ॥ चर्मकारगृहेजन्मभविष्यातिनसंशयः ॥ २५ ॥ तत्रापिभवतोभक्तिर्दृढाभूयान्ममप्रभो ॥ किंचास्मिन्नग
रेचाहंजनिष्यामिनसंशयः ॥ २६ ॥ चर्मकारगृहेजातस्तवशापाद्दयानिधे ॥ नपास्यामिस्तनंमातुस्तवमंत्रंविनाप्रभो ॥ २७ ॥
तस्मात्तत्रसमुत्पन्नेमयिश्रीमत्कृपानिधे ॥ आगत्यमंत्रंदास्यामीत्येवंदेहिवरंमम ॥ २८ ॥ इत्युक्त्वाब्रह्मचारीतुवहिर्गत्वास्थितोऽ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भवत् ॥ रामानंदोतिचिंतातोंजगर्हात्मानमात्मना ॥ २९ ॥ अथसब्रह्मचारीतुमृतोयमपुरंगतः ॥ तत्रास्यपुण्यनिचयंकिंचित्पा
पमितिब्रुवन् ॥ ३० ॥ चित्रगुप्तउवाचैनंकिंभोक्ष्यतिपुराभवान् ॥ तदोवाचसहृष्टस्तुपूर्वंभोक्ष्यामिपातकम् ॥ ३१ ॥ यमरा
जइतिश्रुत्वाप्राहतंब्रह्मचारिणम् ॥ चर्म्मकारकुलेजन्मप्राप्यपुण्यबलात्पुनः ॥ ३२ ॥ हरिभक्तिंसमासाद्यगमिष्यत्युत्तमांगतिम् ॥
चर्मकारकुलेजन्मप्राप्यपुण्यबलात्पुनः ॥ ३३ ॥ महागुरुप्रसादेनतरिष्यसिभवार्णवात् ॥ इत्युक्तस्तंयमंमूर्ध्नानत्वामक्षणमेवसः
॥ ३४ ॥ उदरेचर्मकारिण्याःसमायातोविमोहितः ॥ नवमासंस्थितस्तत्रदशमेसमुपस्थिते ॥ ३५ ॥ संप्राप्यचर्मकारिण्यागृहेजन्म
गुरुंस्मरन् ॥ अथतत्रददौदुग्धंमाताजग्राहनैवतत् ॥ ३६ ॥ परंतुसुदृढोप्यग्र्योराजपुत्रइवाभवत् ॥ सर्वैरेवतदाज्ञातंजीविष्यतिशि
शुर्नहि ॥ ३७ ॥ मातातस्यचदुःखार्तापप्रच्छरुदतीजनान् ॥ एवंगतमहोरात्रंद्वितीयेदिवसेपुनः ॥ ३८ ॥ दृष्टोबालस्तुतादृग्वै
नग्लानिंप्रापकिंचन ॥ एवमाश्चर्यभूतंहिश्रुत्वासर्वेपुरस्थिताः ॥ ३९ ॥ समागत्यचतंदृष्ट्वाजग्मुर्नृपसुतप्रभम् ॥ अथशुश्रावतद्वृ
त्तंरामानन्दोदयान्वितः ॥ ४० ॥ शिष्यमेकंसमादायचर्मकारगृहंययौ ॥ तत्रबालगृहेगत्वासर्वान्निष्कास्यदूरतः ॥ ४१ ॥
तस्यबालस्यकर्णेसरामेतिप्रददौमनुम् ॥ संप्राप्यराममंत्रस्तुप्रजहाससबालकः ॥ ४२ ॥ उवाचगुरुरप्येवंपिबदुग्धंसुखीभव ॥ इत्यु
क्त्वामोहवशगःस्मृत्वातंब्रह्मचारिणम् ॥ ४३ ॥ रामानंदोरुदंस्तस्माद्गेहात्तूर्णंबहिर्ययौ ॥ अथबालस्यमातातुपुनरागत्यबालकम्
॥ ४४ ॥ क्रोडेकृत्वाददौस्तन्यंसपपौक्षुधितोयथा ॥ दृष्ट्वातत्परमाश्चर्यंजहर्षचर्म्मकारिणी ॥ ४५ ॥ अमन्यतगतक्लेशोरामानंद
प्रसादतः ॥ बभूवोपानहौकृत्वाविक्रीयचयथारुचि ॥ ४६ ॥ तन्मूल्यंप्रददौमात्रेरविदासोमहामनाः ॥ प्राप्तेचैवाष्टमेवर्षेपन्नश्रीकर ॥१११॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

णेक्षमः ॥ ४७ ॥ बभूवोपानहौकृत्वाविक्रीयचयथारुचि ॥ तन्मूल्यंप्रददौमात्रेसाधुभ्योपिददौमुदा ॥ ४८ ॥ अथकालेनतन्मातापि
तातभ्रातरश्चतम् ॥ स्वाश्रमात्तंपृथक्चक्रुर्वृथादत्तेह्युपानहौ ॥ ४९ ॥ रविदासोपिबंधुभ्योपृथग्भूयस्थितःक्वचित् ॥ भिक्षामादाय
बुभुजेनिर्मायोपानहौमुदा ॥ ५० ॥ दीनानाथदरिद्रेभ्योदत्त्वाह्लादिहरिंस्मरन् ॥ एकदासतुभिक्षायामटन्ग्रामांतरंगतः ॥ ५१ ॥ शा
लग्रामशिलांमार्गेसंप्रापशुभलक्षणाम् ॥ तामानीयातिमुदितोरामभक्तिपरायणः ॥ ५२ ॥ पूजयामासभवनेसंस्थाप्यातिप्रयत्नतः ॥
अंगणेतुलसीवृक्षंरोपयामासभक्तितः ॥ ५३ ॥ अथतत्याजस्वंकर्म्मबभूवातीववैष्णवः ॥ एकदातस्यभवनेसिद्धःसाधुःसमागतः॥५४॥
रविदासस्यचरितंदृष्ट्वासोभूद्दयापरः ॥ प्रातरुत्थायसंपूज्यशालग्रामशिलांमुदा ॥ ५५ ॥ जगामभिक्षामानेतुंसायंकालःसमागतः ॥
संपूज्यातिथयेदत्त्वास्वयंभुंक्तेस्मनित्यशः ॥ ५६ ॥ एवंदृष्ट्वातितुष्टोभूत्सिद्धोनीत्वारहःस्थले ॥ रविदासमुवाचेदंशृणुमेवचनंहि
तम् ॥ ५७ ॥ एषस्पर्शमणिर्मेस्तिदीयतेत्वंगृहाणभो ॥ वर्षमेकंतुस्वर्णानिकारयानेनभूरिशः ॥ ५८ ॥ आगमिष्याम्यहंपश्चाद्ग्रही
ष्यामिस्वकंमणिम् ॥ इत्युक्तस्तेनसिद्धेनरविदासोब्रवीद्वचः ॥ ५९ ॥ शालग्रामशिलाप्रांतेस्थापयित्वाव्रजप्रभो ॥ इत्युक्तःसगतःसि
द्धोरविदासोपिपूर्ववत् ॥ ६० ॥ भिक्षाशीदृढभक्तिश्चनपस्पर्शमणिंतुतम् ॥ विचार्य्यमनसानूनंधनंलोकेमदप्रदम् ॥ ६१ ॥ तस्माद्रा
मेतियन्नामतत्सर्वंस्वंममाव्ययम् ॥ एवंगतेसमस्तेऽब्देसिद्धस्तत्रगतःपुनः ॥ ६२ ॥ ददर्शतादृशंजीर्णंरविदासस्यमंदिरम् ॥ मनसा
चिंतयामासनास्यभाग्यंकरोमिकिम् ॥ ६३ ॥ तथाप्यस्योपकारंतुस्थित्वाकिंचित्करोम्यहम् ॥ इत्युक्त्वारविदासस्यसमीपेससमा
गतः ॥ ६४ ॥ उवाचकिमिदंसाधोदुःखमस्त्येवपूर्ववत् ॥ श्रुत्वातस्यवचःसाधोःरविदासोब्रवीन्मुदा ॥ ६५ ॥ नमेस्तिदुःखमधुना

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नासीद्वैपूर्वमप्यहो ॥ त्वमस्मिन्खलुसंसारेदयावानसिवैष्णवः ॥ ६६ ॥ अतःसर्वाणिभूतानिदुःखितान्येवपश्यति ॥ आगच्छेमंम
णिस्वीयंगृहाणपूर्ववत्स्थितम् ॥६७॥ इत्युक्तःसतदागत्याशिलाग्रेतंददर्शह ॥ जग्राहोत्थाप्यसमणिंरविदासमुवाचह ॥६८॥ अहोकिय
द्दिनंसाधोस्थास्यामितवमंदिरे ॥ रविदासइतिश्रुत्वाप्राहतंविनयान्वितः ॥६९॥ तवैवेदंगृहंनाथसनाथंकुरुमांविभो ॥ इतिश्रुत्वास्थि
तस्तत्रसोपिसिद्धोतिवैष्णवः ॥७०॥ निर्माय्यकनकंनित्यंरविदासस्यमंदिरे ॥कारयामासपूजार्थंविष्णोर्मंदिरमप्यसौ ॥७१॥ शालग्राम
शिलांतत्रस्थापयामासभक्तितः ॥ रविदासस्तुभिक्षित्वाददौचबुभुजेस्वयम् ॥७२॥ एवंतत्रसमाजोभूद्वैष्णवानांनिरंतरम् ॥७३॥छ॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येरविदासभक्तचरितंनामैकोनाशीतितमःसर्गः ॥ ७९ ॥ ॥ अथतत्रस्थितायेवैब्राह्मणाःक्ष
त्रियाविशः ॥ शूद्राश्चापिचतेसर्वेगत्वाराजानमब्रुवन् ॥ १ ॥ रविदासश्चर्मकारोग्रामेस्मिन्नृपसत्तम ॥ शालग्रामशिलांगेहेसं
स्थाप्यार्चयतिस्वयम् ॥ २ ॥ इतिश्रुत्वावचस्तेषांराजाचुक्रोधवैभृशम् ॥ तत्कालंरविदासंतुसमानीयचतर्जयन् ॥ ३ ॥ किंकरोषिम
हामूर्खशालग्रामशिलार्चनम् ॥ इदानींमेवतांदेहिब्राह्मणायममाज्ञया ॥४॥ इतिश्रुत्वावचस्तस्यरविदासोपिभूपतेः ॥ अतःपरंत्वहंराजं
स्तांनस्पृशामिपाणिना ॥ ५ ॥ गृहाणकुंचिकामेतांदेवागारस्यमेविभो ॥ प्रयातुब्राह्मणस्तत्रगृहीत्वायातुतांशिलाम् ॥ ६ ॥ इतिश्रु
त्वावचस्तस्यरविदासस्यभूपतिः ॥ प्रसन्नोब्राह्मणंप्राहगच्छानयहरेःशिलाम् ॥ ७ ॥ अथादायद्विजश्चैकःकुंचिकामतिसत्वरः ॥ गत्वो
द्घाट्यकपाटंसगृहीत्वातांशिलांशुभाम्॥८॥आगत्यस्वगृहेतांतुपंचगव्यादिनातदा ॥ स्नापयित्वार्चयित्वाचस्थापयामासमंदिरे ॥ ९ ॥
रविदासोपिराजानंनमस्कृत्यययौगृहम् ॥ अथरात्रौशिलासातुविप्रमंदिरतोययौ ॥ १० ॥ रविदासस्यवेश्मेतिदृष्ट्वाप्रातस्तदाजनाः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

गताराजसमीपंतेप्रत्युवाचद्विजःसतु ॥ ११ ॥ राजन्संपूज्यभवनेस्थापितासाशिलामया ॥ नजानेकेनमार्गेणगतातन्मंदिरंपुनः ॥ १२ ॥ तत्रैकःप्राहराजानंरविदासोतिमांत्रिकः ॥ आकर्षयतिवस्तूनिकृष्टातेनततःशिला ॥ १३ ॥ श्रुत्वैतद्वचनंराजात मुवाचपुनर्द्विजम् ॥ द्रुतंगच्छगृहंतस्यसमानयपुनःशिलाम् ॥ १४ ॥ स्थापयस्वगृहेकिंचरविदासोममाज्ञया ॥ तिष्ठत्वत्रव हिर्गेहेसुखंरात्रौयदृच्छया ॥ १५ ॥ तथाचकारविप्रस्तुरविदासोनिशामुखे ॥ समागत्यबहिर्गेहेतस्थौचित्तेहरिंस्मरन् ॥ १६ ॥ अथरात्रौशिलासातुगतातत्रैवमंदिरे ॥ रविदासस्ययत्रासीत्सिंहासनगतापुरा ॥ १७ ॥ स्वप्नेराजाथविप्रोपिददर्शपरमाद्भुतम् ॥ विप्रएकःसमागत्यबभाषेक्रोधमूर्च्छितः ॥ १८ ॥ किमर्थंसाशिलाभूपनीयतेद्विजमंदिरे ॥ भक्तिप्रियोहरिस्तस्यशिलातदनुगा मिनी ॥ १९ ॥ स्वयमेवहरिस्तत्रयातिकेयंशिलामठे ॥ हरेःसर्वसमंभूपननीचंनापिचोत्तमम् ॥ २० ॥ इतिविज्ञायभूपत्वं त्यजोद्योगंशिलांप्रति ॥ एवमेवद्विजाःसर्वेस्वप्नंतंददृशुर्निशि ॥ २१ ॥ अथप्रातःप्रबुद्धस्तुराजाचब्राह्मणाअपि ॥ परस्परं निशास्वप्नंचोक्त्वाराजाथतंद्विजम् ॥ २२ ॥ प्राहचास्तिशिलागेहेराजन्नास्तीतिसोब्रवीत् ॥ ततस्तुरविदासंहिसमाहूयनृपोब्रवी त् ॥ २३ ॥ गच्छस्वभवनंसाधोरामस्तुष्टोस्तितेध्रुवम् ॥ कुरुभक्तिंयथापूर्वंनतेकिंचिद्वदिष्यति ॥ २४ ॥ इत्युक्तोरविदासस्तुययौस्व भवनंमुदा ॥ शालग्रामशिलांदृष्ट्वाहर्षेणाश्रुपरिप्लुतः ॥ २५ ॥ पूजयामासभक्त्यातांपूर्ववद्वैष्णवैर्युतः ॥ एवंभक्तिवशःकृष्णस्तत्रा प्यभिरतोभवत् ॥ २६ ॥ नासाध्यंविद्यतेभक्तेस्त्रिषुलोकेषुकिंचन ॥ अथतस्यैवराज्ञस्तुचित्तोरगढसंभवा ॥ २७ ॥ आसीद्वैपट्टमहि षीविष्णुभक्तिरताशुभा ॥ याभक्त्यारविदासायभोजनाच्छादनादिकम् ॥२८॥ मुहुर्ददौस्वयंतत्रगत्वातंप्रणनामसा ॥ एवंदृष्ट्वाद्विजाः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्वैर्निनिंदुस्तांनृपप्रियाम् ॥ २९ ॥ चर्म्मकारगृहंयातितंनमस्यतिसर्वदा ॥ ददात्यन्नंचवासांसितस्मादस्यागृहेवयम् ॥ ३० ॥ नभो
क्ष्यामःकदाप्येवंमतिंचक्रुःपरस्परम् ॥ एकदातुद्विजांस्तांस्तुभोजनायन्यमंत्रयत् ॥ ३१ ॥ साराज्ञीतांद्विजाःप्राहुर्नवैभोक्ष्यामहेवयम्॥
आमान्नंदेहिनोराज्ञिपक्त्वाभोक्ष्यामहेस्वयम् ॥ ३२ ॥ इत्युक्तागतक्रोधासातथैवादापयद्द्विजान् ॥ ब्राह्मणाअपिचामान्नंगृहीत्वैकत्रसं
स्थिताः ॥ ३३ ॥ पाकंविधायभुंजानादहशुःपंक्तिमध्यगम् ॥ रविदासंचभुंजानंदृष्ट्वासर्वेविमोहिताः ॥ ३४ ॥ अथकोपिबहिश्चक्रेर
विदासंक्रुधान्वितः ॥ पुनरन्यच्चपंक्तिस्थंभुंजानंददृशुश्चतम् ॥ ३५ ॥ तदातेब्राह्मणाःसर्वेज्ञात्वाविष्णुविचेष्टितम् ॥ तस्यभक्तिंदृढां
मत्वानोचुःकिंचिदपिक्वचित् ॥ ३६ ॥ स्वधर्म्मरक्षणंकार्यंनिंद्यमानंपरस्यच ॥ कोवेदभगवान्विष्णुःकथंतुष्यतिसर्वगः ॥ ३७ ॥
नियोजिताःस्वधर्मेतुवयंतंकरवामहे ॥ इत्युक्त्वातेगृहीत्वातुदक्षिणांमुदिताययुः॥३८॥स्वंस्वमालयमाश्चर्यंचिंतयंतोद्विजाहृदि॥३९॥
॥इति श्रीभगवद्भक्तिमाहात्म्येरविदासचरितंनामाशीतितमःसर्गः॥८०॥ ७॥ ॥अथापरंप्रवक्ष्यामिरविदासस्यचेष्टितम् ॥ अमानुषंय
दाजातंप्रसिद्धंपृथिवीतले ॥ १ ॥ एकस्मिन्दिवसेगंगांस्नातुंतद्ग्रामवासिनः ॥ चलितास्तत्रचैकस्तुरविदासमुवाचसः ॥ २ ॥ यास्यो
भागीरथींस्नातुंगमिष्यतिभवान्किमु ॥ श्रुत्वाद्विजवचःप्राहरविदासोतिहर्षितः ॥ ३ ॥ धन्योसियदिदंब्रूषेमामप्यधमसंभवम् ॥ कथं
यामिजराग्रस्तस्तस्मादेकंब्रवीमिते ॥ ४ ॥ करोषियदिभोब्रह्मंस्त्वामहंनौम्यनेकशः ॥ इतिश्रुत्वावचस्तस्यविप्रःप्रोवाचकथ्यताम्
॥ ५ ॥ रविदासस्तथोत्थायपूगीफलयुगंददौ ॥ इदंफलद्वयंब्रह्मन्गंगायैत्वंसमर्पय ॥ ६ ॥ नागंतुंससमर्थोस्तिरविदासोददा
विमे ॥ इत्युक्त्वादेहिगंमायैकृतार्थंकुरुमांप्रभो ॥ ७ ॥ इत्युक्तःसतुविप्रोवैगृहीत्वातत्फलद्वयम् ॥ रविदासस्यभक्तस्यप्रातर्द

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्वात्रजालयम् ॥ ८ ॥ गृहीत्वातत्फलद्वंद्वंयद्दास्यतिसुरापगा ॥ तत्तस्मैरविदासायदातव्यंपुत्रकत्वया ॥ ९ ॥ इतिदृष्ट्वामहाश्चर्यं स्वग्रेसद्विजसत्तमः ॥ उक्त्वाशिष्टजनेभ्यस्तद्गृहीत्वाचफलद्वयम् ॥ १० ॥ प्रातर्भागीरथींगंगांप्राहविप्रःकृतांजलिः ॥ नागंतुंससमर्थो स्तिरविदासोददाविमे ॥ ११ ॥ इतिब्रुवतिविप्रेतुगंगातोयात्करःशुचिः ॥ याचमानोबहिर्यातोरत्नकंकणभूषितः ॥ १२ ॥ त तस्तस्मिन्करेविप्रोददौपूगीफलद्वयम् ॥ अथैकंकंकणंतस्माद्बहिरागत्यवारिणः ॥ १३ ॥ ब्राह्मणाग्रेसमायातंसर्वेषांचैवपश्यताम् ॥ ततःकरोजलेमग्नःकंकणंजगृहेद्विजः ॥ १४ ॥ हर्षाश्रुपरिपूर्णाक्षाबभूवुस्तत्रवैद्विजाः ॥ साधुसाध्वितिजल्पंतोरविदासंद्विजंचतम् ॥ ॥ १५ ॥ अथागत्यद्विजस्तस्मैरविदासायभक्तिमान् ॥ उक्त्वासर्वमशेषेणकंकणंप्रददौकरे ॥ १६ ॥ दृष्ट्वातत्कंकणंभक्तोरविदा सोतिहर्षितः ॥ ननर्तांगणमध्येतुमूर्ध्निकृत्वाचकंकणम् ॥ १७ ॥ आययौद्रष्टुकामासारविदासस्यमंदिरे ॥ दृष्ट्वातिविस्मयंप्रापरा ज्ञीकंकणमुत्तमम् ॥ १८ ॥ विस्मितांतांतुविज्ञायरविदासोनृपांगनाम् ॥ ददौतत्कंकणंतस्यैभक्तासीतिव्यचिंतयत् ॥ १९ ॥ परिधायकरेसातुगतास्वभवनंमुदा ॥ पत्युःसंदर्शयामासकंकणंचातिहर्षिता ॥ २० ॥ दृष्ट्वाराजापिमुमुदेनत्वाकंकणमब्रवीत् ॥ पत्नीं धन्यासिकांतेत्वंयद्धिदेव्याःकरेस्थितम् ॥ २१ ॥ कंकणंप्रददौभक्तोरविदासोदयान्वितः ॥ एवंप्रियोदितंश्रुत्वापरिधायचकंकणम् ॥ २२ ॥ रूपसौभाग्यसंपत्त्याबभौदेवसुतोपमा ॥ एवंगतेषुकालेषुराज्ञीतंपतिमेकदा ॥ २३ ॥ प्रार्थयामासविनयाद्द्वितीयंकंकणंमु दा ॥ श्रुत्वाराजाहसन्प्राहकिमिदंभाषसेप्रिये ॥ २४ ॥ रविदासप्रसादायगंगयातत्समर्पितम् ॥ एतादृशंद्वितीयंकमर्त्यलोकेभविष्य ति ॥ २५ ॥ तस्मादेवंहठंत्यक्त्वायाचस्वान्यंददामिते ॥ इतिभर्तृवचःश्रुत्वानामन्यतनृपात्मजा ॥ २६ ॥ बहुधाप्रार्थ्यमानापि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

राज्ञातिप्रीतिपूर्वकम् ॥ सापुनःप्राहभर्तारंयावदेतादृशंपुनः ॥ २७ ॥ द्वितीयंकंकणंनाथनदास्यतिकरेमम ॥ तावन्मयानभोक्तव्यंशपेत्वच्चरणाब्जयोः ॥ २८ ॥ इतिश्रुत्वावचोराज्ञ्याराजाशोकसमन्वितः ॥ नकिंचित्कुरुतेकर्म्मतुष्णींतस्थौयथातथा ॥ २९ ॥ सचिंतयन्कथंचास्यैद्वितीयंकंकणंभवेत् ॥ एवंचिंतयतस्तस्यदिनद्वयमथागमत् ॥ ३० ॥ तृतीयेदिवसेप्राप्तेस्निग्धमंत्रिणमाह्वयत् ॥ तमुवाचनृपःसर्वंनिजसंतापकारणम् ॥ ३१ ॥ श्रुत्वामंत्रिवरःप्राहराजानंविनयान्वितः ॥ भूपतेतादृशंनास्तिकंकणंधरणीतले ॥ ३२ ॥ अतोहंनैवपश्यामितदुपायंतुमानुषम् ॥ एकमायातिमेचित्तेलाभोपायंशृणुप्रभो ॥ ३३ ॥ तत्रगंतव्यमावाभ्यांरविदासस्यसंनिधौ ॥ तस्मैसर्वंवदस्वाद्यसवैकिंचित्करिष्यति ॥ ३४ ॥ इतिमंत्रिवचःश्रुत्वाराजातत्कालमेवहि ॥ रविदासगृहंगत्वातस्मैप्रोवाचसर्वशः ॥ ॥ ३५ ॥ रविदासमहाभक्तसत्यंशृणुवचोमम ॥ द्वितीयंकंकणंनोचेदद्यतादृग्भवेन्मम ॥ ३६ ॥ तदाराज्ञीम्रियेतैवमरिष्येहंततःपरम् ॥ तस्माद्यथाद्वितीयंतत्कंकणंस्यात्तथाकुरु ॥ ३७ ॥ इतिराजवचःश्रुत्वारविदासोतिचिंतितः ॥ किंकरोमिकथंगंगापुनर्दास्यतिकंकणम् ॥ ३८ ॥ सपत्नीकोनृपोयंतुमरिष्यतिनसंशयः ॥ मृतेराज्ञीममाप्यद्यजीविकानभवेत्खलु ॥ ३९ ॥ इतिसंचिंत्यमनसाकाष्ठपात्रेजलंशुचि ॥ कृत्वातत्रैवगंगांसध्यायन्नाममुहुर्मुहुः ॥ ४० ॥ मनःपूतंयदिभवेज्जलंगंगैवसर्वतः ॥ इत्युक्त्वातत्रहस्तेननिजकंकणमार्प्पयत् ॥ ४१ ॥ सप्रापकंकणंतत्रजलेवैपश्यतांनृणाम् ॥ अथकाष्ठस्थितंवारिभूमियुक्तंतरंगवत् ॥ ४२ ॥ दृष्ट्वासर्वेमहाश्चर्य्यंगताधन्येतिवादिनः ॥ अथतत्कंकणंराज्ञेरविदासोददौमुदा ॥ ४३ ॥ नीत्वाप्रणम्यराजापिसमायातोनिजंगृहम् ॥ कंकणंतद्ददौपत्न्यैसापिजग्राहवैमुदा ॥ ४४ ॥ तदाराजापिराज्ञीचमुदितौभक्तितत्परौ ॥ बभूवतुर्महाभक्तौसाधुसेवनतत्परौ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥४५॥ भुक्त्वाभोगानशेषेणजग्मतुःपरमंपदम् ॥ एवंभक्तेस्तुमाहात्म्यंमहदाश्चर्य्यकारकम्॥४६॥शृण्वन्भक्तिमवाप्नोतिजनःश्रद्धासमन्वितः ॥ ४७ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येरविदासचरितंनामैकाशीतितमःसर्गः॥८१॥ ॥कबीरभक्तिमाहात्म्यंकथयामियथाश्रुतम् ॥ यस्यश्रवणमात्रेणहरिभक्तिर्भवेन्नृणाम् ॥ १ ॥ आसीत्पूर्वभवेविप्रोवेदांताभ्यासतत्परः ॥ सर्वंमिथ्येतिविज्ञायसर्वकर्म्मजहौद्विजः ॥ २ ॥ स्त्रीपुत्रमोहवशगःशिल्पकार्य्येतिपंडितः ॥ एकदातंतुवायस्यजगामभवनेद्विजः ॥ ३ ॥ सूत्राण्यादायवस्त्रार्थंददौतस्मैप्रशिल्पिने ॥ एवमेवंप्रदातव्यमित्युक्त्वागृहमागतः ॥ ४ ॥ तत्रागत्यज्वराविष्टोमृतःसद्विजसत्तमः ॥ परंतुदैवयोगेनतंतुवायंस्मरन्मुहुः ॥ ५ ॥ नास्तिशिल्पीतंतुवायःकथंवासःकरिष्यति ॥ स्थितश्चेत्स्यादहंतत्रसम्यग्वासोभवेदिति ॥ ६ ॥ चिंतयित्वामृतोविप्रोजातोसौतंतुवायकः ॥ तत्रापिबाल्यमारभ्यसाधुसंगतितत्परः ॥७॥ शिक्षितःपितृमातृभ्यांवस्त्रनिर्माणकर्म्मणि ॥ परंतुपूर्वसंस्काराद्ब्रह्मज्ञानोदयोभवत् ॥ ८॥ जानन्नसारंसंसारंसदावयनतत्परः ॥ चिंतयामाससततंकोमेकाश्यांगुरुर्भवेत् ॥९॥ गुरुंविनावृथासर्वंनतरेतभवार्णवात् ॥ कर्णधारंविनापोतःसमुद्रइवनिश्चितम् ॥ १० ॥ इतिसंचिंत्यमनसासाधूनांसन्निधिंगतः॥दूरादुवाचतान्साधूंस्तंतुवायोस्मिवोनमः ॥११॥ इतिश्रुत्वावचस्तस्यवैष्णवाःप्राहुरागताः ॥ कोसिकिंचेप्सितंतेत्रब्रूहीत्युक्तउवाचतान् ॥१२॥ तंतुवायोऽस्मिजात्यावैकाश्यामेववसाम्यहम् ॥ शिष्योभवितुमायातोरामानन्दस्यसद्गुरोः ॥१३॥ इतिश्रुत्वावचस्तस्यहसंतस्तेतमब्रुवन् ॥ अरेयोनेच्छतेम्लेच्छंसकथंतेगुरुर्भवेत् ॥ १४ ॥ तद्गच्छस्थानादस्मात्तुद्रुतंनोचेत्तुवैष्णवाः ॥ ताडयिष्यंतिमूढत्वांयाहित्वंचयथासुखम् ॥ ॥१५॥इतितेषांवचःश्रुत्वाकबीरोगृहमागतः ॥ पुनरन्यद्दिनेगत्वातत्रतानाहपूर्ववत्॥१६॥एवंबहुदिनंयातंकाश्यांसर्वांस्तुवैष्णवान्॥पप्र

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

च्छमुहुरार्तःसप्रतिसाधुसभास्वयम्॥१७॥रामानंदइतिख्यातःसस्वामीस्यात्कथंगुरुः ॥ इतिपृच्छन्सनश्राम्यवाराणस्यामितस्ततः १८॥
एकस्मिन्दिवसेचैकोदयालुस्त्वादुवाचतम् ॥ कबीरश्शृणुवक्ष्यामियथातेसगुरुर्भवेत् ॥ १९ ॥ रामानंदोरात्रिशेषेगंगांस्नातुंप्रयात्यसौ ॥
तद्बहिर्द्वारिगत्वावैकपाटाधःस्थितोभव ॥ २० ॥ जाग्रच्छयानश्चेत्स्वामीसमागच्छन्बहिःस्वयम् ॥ निधास्यतितदापादंतवोपरिदया
न्वितः ॥ २१ ॥ स्मरिष्यतिसयन्नामतत्तेमंत्रोभविष्यति ॥ नान्यथात्वांकदाचित्कःशिष्यंकर्तुमिहार्हति ॥ २२ ॥ इतिश्रुत्वावच
स्तस्यदयालोर्वैष्णवस्यसः ॥ जहर्षपरमप्रीतःकबीरस्तुननामच ॥ २३ ॥ उवाचत्वंगुरोर्लाभेगुरुर्यातोसिसांप्रतम् ॥ अतस्त्वंप्रथ
मंपूज्योगुरुरेवनसंशयः ॥ २४ ॥ इत्युक्तःसगतःक्वापिवैष्णवोपियथौक्वचित् ॥ कबीरस्त्वेकदापर्वज्ञात्वास्वामिगृहांतरे ॥ २५ ॥
स्थित्वारात्रौनिशाभागेसुप्तेलोकेसमागतः ॥ बहिर्द्वारिकपाटस्याशिश्येऽधस्ताद्धरातले ॥ २६ ॥ पादस्पर्शसमाकांक्षन्नन्भूवसनिद्रितः॥
अथोपसिससमुत्थायरामानंदोतिहर्षितः ॥ २७ ॥ प्रातःकृत्यादिकंकृत्वानीत्वादर्भतिलादिकम् ॥ स्नातुंसमाययौचक्रेकपाटोद्घाटनं
स्वयम् ॥ २८ ॥ अथोद्घाटयकपाटंतुददौपादंयदाबहिः ॥ पतितःसकबीरांगेतदास्वाम्यतिचिंतयन् ॥ २९ ॥ उवाचरामरामेतिको
सिरेऽत्रस्वपित्यहो ॥ इतिश्रुत्वावचस्तस्यकृतकृत्यःप्रणम्यतम् ॥ ३० ॥ कबीरःप्रययौतस्मात्स्थानात्तूर्णीगुरुंनमन् ॥ रामानंदोपि
तंनेदाविक्षितःकोप्यसाविति ॥ ३१ ॥ एवंलब्ध्वागुरोर्मंत्रंरामानंदस्यहर्षितः ॥ मालांचतिलकंचापिदधारस्वयमेवसः ॥ ३२ ॥ अन्य
वैष्णववत्सोपिवाराणस्यांस्थितोभवत् ॥ अथज्ञात्वातुतंसर्वेवैष्णवाश्चुक्रुधुर्भृशम् ॥ ३३ ॥ कबीरमूचुःकिंनीचकुरुषेकेनशिक्षितः॥
इतिश्रुत्वावचस्तेषांकबीरोप्यब्रवीद्वचः ॥३४॥ रामानंदस्वामिनामेदत्तोमंत्रोमहोत्तमः ॥ तेनाहंवैष्णवोजातःसत्यमेतद्ब्रवीम्यहम्॥३५॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रुत्वातद्वचनंस्वामीरामानंदोतिकोपितः ॥ आनाय्यतंकबीरंसपप्रच्छतर्जयजन्रुषा ॥ ३६ ॥ ततोगुरुंप्रणम्याहरामानंदंकृतांजलिः ॥
नाथतेमंदिरद्वारिरात्रौसुप्तःस्थितोह्यहम् ॥ ३७ ॥ भवदागमनेस्नातुंपादश्चपतितोमयि ॥ ततोभवन्मुखाद्रामरामेतिविश्रुतंमया ॥ ३८ ॥
तदाकृतार्थःसंयातःक्षम्यतांमेदयानिधे ॥ इतिश्रुत्वाससस्मारसत्यमेतन्नसंशयः ॥ ३९ ॥ ज्ञात्वातस्यतुतांबुद्धिंप्राहभक्तिपरोभव ॥
अन्येपिवैष्णवास्तत्रजहुःक्रोधंहसन्मुखाः ॥ ४० ॥ एवंकबीरोभक्तोभूद्धृदिरामंव्यचिंतयन् ॥ ददावन्नंजनन्यैसतंतुवायेनकर्म्म
णा ॥ ४१ ॥ एकदावस्त्रमेकंतुनिर्माय्यनगरेगतः ॥ हट्टायांतद्विक्रयार्थंमाघेमासिहिमाकुलः ॥ ४२ ॥ कश्चिद्वृद्धोमुहुःप्राहशीते
नातीतिवेपितः ॥ वस्त्रंदेहिप्रियंतंमांवृद्धंशीतेनपीडितम् ॥ ४३ ॥ इतिश्रुत्वावचस्तस्यकबीरोतिदयान्वितः ॥ गत्वातस्यस
मीपंतुवस्त्रार्द्धंदातुमुत्सुकः ॥ ४४ ॥ तदावृद्धःपुनःप्राहसंपूर्णंदेहिमेऽनघ ॥ नार्धेनभवितांकिंचिद्रामस्तेप्रीतिमेष्यति ॥ ४५ ॥
इतिश्रुत्वावचस्तस्यकबीरोतिदयान्वितः ॥ दत्त्वासमस्तंतद्वासोहट्टायांसंस्थितोभवत् ॥ ४६ ॥ अथमाताचपुत्रश्चपत्नीचापिगृ
हेस्थिताः ॥ कबीरागमनंसर्वेप्रतीक्षंतःक्षुधाकुलाः ॥ ४७ ॥ कबीरस्तुस्थितस्तत्रस्वगृहंहृदिचिंतयन् ॥ किंवदिष्यतिमेमा
तांकिंवादास्यामिभोजनम् ॥ ४८ ॥ अथैवंक्षुधितान्सर्वान्दृष्ट्वाश्रीभगवान्हरिः ॥ धनमादायतद्गेहेददौसाधुस्वरूपधृक् ॥ ४९ ॥
कबीरेणददौतुभ्यमित्युक्त्वासगतोहरिः ॥ ततस्तृतीयेदिवसेकबीरोपिजनैर्हठात् ॥ ५० ॥ आनीतोभवनेमात्राकथितं तद्धना
दिकम् ॥ श्रुत्वामेनेहरिःसाक्षाद्ददौमात्रेधनंमम ॥ ५१ ॥ इतिनिश्चित्यतत्सर्वंसाधुभ्यःप्रददौपुनः ॥ मेनेतांजननींधन्यांश्रीकृष्ण
स्यचदर्शनात् ॥ ५२ ॥ तदारभ्यसतत्याजस्वांवृत्तिंतांतुवायिकीम् ॥ विश्वंभरोवृत्तिदातेत्येवंनिश्चित्यमानसे ॥ ५३ ॥ अथैवंशुश्रु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दुःसर्वैकबीरायधनंबहु ॥ कोपिसाधुःसमागत्यददावितितदाजनाः ॥ ५४ ॥ अरेत्वयाधनंप्राप्तंतंतुवायवृथापुनः ॥ विनियुक्तंतुसर्वे
भ्योस्मभ्यंदास्यतिकिंनुतम् ॥ ५५ ॥ आयास्यामोवयंचाद्यत्वंतावद्भवनंव्रज ॥ इत्युक्त्वातेगताःसर्वेकबीरश्चितितोभवत् ॥५६॥ ना
स्तिगेहेकिमप्यद्यतेभ्योवक्ष्यामिकिंपुनः ॥ तस्मान्निलीयवस्तव्यंगेहादन्यत्कचित्कचित् ॥ ५७ ॥ इतिनिश्चित्यमनसाकचिद्गत्वा
स्थितोभवत् ॥ अथतेब्राह्मणाश्चान्येसर्वेचागंतुमुत्सुकाः ॥ ५८ ॥ एतस्मिन्नंतरेतत्रभगवान्भक्तवत्सलः ॥ कृत्वाकबीररूपंतुधनमा
दायभूरिशः ॥५९॥ कबीरगृहमागत्यतस्थावाश्रमवत्स्वयम् ॥ अथागतास्तुतेसर्वेकबीरद्वारिनागराः ॥६०॥ दृष्ट्वातेभ्योमुदायुक्तोददौ
वित्तान्यनेकशः ॥ गतास्तेयाचकाःसर्वेभगवान्विप्ररूपधृक् ॥ ६१ ॥ तिरोभूयस्थितोयत्रकबीरस्तमुवाचह ॥ अरेत्वंकिंकरोष्यत्रकबी
रःस्वगृहेव्रज ॥६२॥ ददात्यभिमतंवित्तंयाचकेभ्योतिभक्तिमान् ॥ इतिश्रुत्वाकबीरोपिसमायातोनिजंगृहम् ॥६३॥ ददर्शमुदितान्सर्वा
न्धनधान्यपुरस्कृतान्॥ मेनेकृष्णस्यचरितंकबीरोहृदितंस्मरन्॥६४॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येकबीरचरितंनामद्व्यशीतितमः
सर्गः ॥ ८२ ॥ छ ॥ ॥ अथश्रुत्वाकबीरस्यदानंतेनागराजनाः ॥ धनंग्रहीतुमायाताअपिग्रामांतरस्थिताः ॥१॥ तदाकबीरोविक्षिप्तइव
भूत्वाकरेणच ॥ वेश्यांधृत्वाननर्ताथदद्दशुस्तेतथाविधम् ॥२॥ संतोदुःखपराजाताविक्षिप्तोयंबभूवह ॥ असंतोजहसुस्तंवैनीचएवनवैष्ण
वः ॥३॥ इत्युक्त्वातेगताःसर्वेकबीरोवारयोषिताम् ॥ गृहीत्वोन्मत्तवच्चैवराजद्वारमुपागतः॥४॥ राजापिताहृशंदृष्ट्वाकबीरंह्द्यमन्यत ॥
विक्षिप्तोयंबभूवेतिकबीरस्तदनंतरम् ॥५॥ तोयंपूर्वमुखोभूत्वाचिक्षेपांजलिनामुहुः ॥ दृष्ट्वाराजाहसन्प्राहकिंकरोषीदमत्रभोः ॥ ६ ॥
श्रुत्वाराजवचःप्राहकबीरोनिर्भयोनृपम् ॥ जगन्नाथपुरेराजाप्रेषयामासवैचरान् ॥७॥चरास्तत्रगतास्तस्मिन्दिनेतुपचतःपदोः॥द्विजस्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पूजकस्याभूत्पतितंतत्प्रमोदनम् ॥ ८ ॥ तदाकबीरआगत्यजलमंजलिनावहत् ॥ शीघ्रंनिर्वापयामासतापंतस्यपदोस्तदा ॥ ९ ॥
इतिवृत्तंचराःपत्रेप्रतिख्याप्यसमागताः ॥ ददुःसभायांभूपायभूपोदृष्ट्वामहाद्भुतम् ॥ १० ॥ कबीरंसिद्धमेवाथराजामत्वाचमानसे ॥
राजासहययौतस्यकबीरस्यनिकेतनम् ॥ ११ ॥ कबीरोनृपतिंदृष्ट्वाह्यवदच्चातिहर्षितः ॥ महाराजकुतश्चेदंभवदागमनंमहत् ॥ १२ ॥
किंकरस्यचमेकिंचिद्यदिकार्यंभवेत्तव ॥ तदानाथप्रवक्तव्यंदासोहंतेनसंशयः ॥ १३ ॥ इतिश्रुत्वावचस्तस्यराजाप्रांजलिरब्रवीत् ॥
अहोदुर्विषहंमेद्यक्षमस्ववैष्णवोत्तम ॥ १४ ॥ अजानतामयापूर्वमुपहासःकृतस्तव ॥ ब्रूहितेकिंप्रदास्यामिजीविकायैधनादिकम् ॥
॥ १५ ॥ इतिश्रुत्वावचस्तस्यकबीरोनृपमब्रवीत् ॥ राजन्काजीविकाकोहंजीवनंमरणंचकिम् ॥ १६ ॥ मूर्खत्वान्नैवजानामिराजन्ने
च्छाम्यतोधनम् ॥ किंचपश्यामिलोकेस्मिन्वैचित्र्यंतद्विचारय ॥ १७ ॥ वृत्तिमंतोम्रियंतेवैक्षुधयाअपिपीडिताः ॥ अवृत्तिकानराःस
र्वेम्रियंतेप्रलयेपिन ॥ १८ ॥ तस्माद्वृत्तिर्नमेयोग्यादेहितस्मैयइच्छति ॥ इतिश्रुत्वावचोराजासमायातोनिजंगृहम् ॥ १९ ॥ ग्रामेसर्वा
नुवाचेदंकबीरोतीवमेप्रियः ॥ यस्तंद्वेष्टिसमेशत्रुःस्वयमेतन्नसंशयः ॥ २० ॥ ततआरभ्यग्रामेपिनकबीरविरोधकः ॥ जनःकोपिबभूवो
ग्रंस्मृत्वावैराजशासनम् ॥ २१ ॥ एकदातीर्थयात्रायांवैष्णवैःपरिवारितः ॥ कबीरोमथुरांगत्वाजगामहस्तिनापुरम् ॥ २२ ॥ सिकंदरे
तिमान्नासीत्तत्रम्लेच्छोधरापतिः ॥ तंप्राहुर्दुर्जनाःसर्वेतंतुवायोयमागतः ॥ २३ ॥ गृहीत्वावैष्णवंवेषंदंभेनपरवंचकः ॥ तच्छ्रुत्वावचनं
तेषांम्लेच्छोभृत्यानथाह्वयत् ॥ २४ ॥ तंतुवायंत्वरायुक्ताआनयध्वंममांतिकम् ॥ इत्थंनायातिचेद्बद्ध्वासमानयतमाचिरम् ॥ २५ ॥
श्रुत्वैतद्वचनंभृत्याःकबीरनिकटेगताः ॥ ऊचुःकबीरराजात्वांद्रष्टुमिच्छतिचैहिभोः ॥ २६ ॥ नोचेद्बद्ध्वावयंतत्रनेष्यामोराजशासना

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त् ॥ इतितेषांवचःश्रुत्वाकबीरःप्राहवैहसन् ॥ २७ ॥ बंधनादीनितत्रैवभविष्यंतिनसंशयः ॥ यूयंकिमर्थंप्रथमंबंधयिष्यथमांवृथा ॥ ॥ २८ ॥ इत्युक्त्वाप्रहसंस्तत्रजगामनृपसन्निधौ ॥ तस्थौस्थाणुसमस्तंतुसर्वैप्राहुर्नमस्कुरु ॥ २९ ॥ तेषांश्रुत्वावचःप्राहकबीरोनिर्भयोहसन् ॥ कोयंकोहंकःप्रणामःकेयूयंनैववेद्म्यहम् ॥ ३० ॥ इतिश्रुत्वावचोराजाक्रुद्धःशृंखलयादृढम् ॥ बद्ध्वाकबीरंचिक्षेपयमुनागाधवारिणि ॥ ३१ ॥ जलेनिपतितोदृष्टःकबीरःसकलैर्जनैः ॥ अदृश्यतपुनस्तीरेप्रव्रजन्मुदितोहसन् ॥ ३२ ॥ दृष्ट्वेदंमहदाश्चर्यंदुर्जनाम्लेच्छमब्रुवन् ॥ राजन्नयंक्षुद्रविद्यांविजानात्यैंद्रजालिकीम् ॥ ३३ ॥ ततोजलाद्विनिर्गत्यव्रजतीतिनचाद्भुतम् ॥ ततोमहानिलेक्षिप्तस्तत्रापिसंस्थितोभवत्॥३४॥प्रातर्निर्वापितेवह्नौदृदृशुर्भस्मनिस्थितम्॥तत्रापिदुर्जनाऊचुरग्निस्तंभंकरोत्यसौ ॥३५॥ततोदिल्लीश्वरःक्रुद्धोहस्तिपादतलेरुषा॥कबीरंदापयामासहस्तीदृष्ट्वापलायितः ॥३६॥ सिंहोयमितिचीत्कृत्यततोहस्तिपकस्तुदन् ॥ अंकुशेनददर्शाग्रेकबीरंसिंहरूपिणम् ॥ ३७ ॥ ततोम्लेच्छादयःसर्वेयेस्थितास्तत्रदुर्जनाः ॥ दृष्ट्वासिंहस्वरूपंतंबभूवुर्भयसंयुताः ॥ ३८ ॥ दिल्लीश्वरस्तदोत्थायनिपत्यतत्पदांबुजे ॥ क्षमापयन्स्वापराधंप्रणनाममुहुर्मुहुः ॥ ३९ ॥ कबीरःप्राहतंराजन्किंत्वयापकृतंमम ॥ यदेवंप्रार्थनाशीलःक्षमापयातिमांवृथा ॥ ४० ॥ इत्युक्तःसगतोराजाम्लेच्छश्चिन्तासमन्वितः ॥ कबीरोपिततःकाशीमाजगामातिहर्षितः ॥ ४१ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येकबीरचरितंनामत्र्यशीतितमःसर्गः ॥ ८३ ॥ छ ॥ ॥ इत्थंकाश्यांवसन्भक्तःसाधुसेवापरायणः ॥ जानन्नसारंसंसारमात्मज्ञानपरोभवत् ॥ १ ॥ एकदादुर्जनास्तत्रकाश्यांतद्वेषकारिणः ॥ साधून्निमंत्रयामासुःकबीरस्यापिचाब्रुवन् ॥ २ ॥ कबीरस्तुगतस्तस्मिन्दिनेकुत्रापिकार्य्यतः ॥ सहस्रशःसमायाताअथतत्रबुभुक्षिताः ॥ ३ ॥ दृष्ट्वाकबीरंशि

अग्नौ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ष्यस्तान्महाचिंतापरोभवत् ॥ अथांतरेसमायातोभगवान्भक्तवत्सलः॥४॥कबीरवेषमादायभोज्यान्यानीतवांस्तदा ॥ शिष्यंप्राहाद्य साधूनांभोजनार्थंगतःक्वचित् ॥ ५ ॥ इत्युक्त्वातांस्तुसर्वान्वैसर्वोपरकरणैर्मुदा ॥ भोजयामासभगवान्कबीरस्यस्वरूपधृक् ॥ ॥ ६ ॥ भोजयित्वाविसृज्याथस्वयमंतर्दधेहरिः ॥ ज्ञात्वायांतंकबीरंतंनिःसृत्यतद्गृहाद्बहिः ॥ ७ ॥ अथागतःकबीरोपितदाश्रमस माकुलः ॥ ददर्शांगणमध्येसमहोत्साहोयथाभवत् ॥ ८ ॥ दृष्ट्वातथाविधंवेश्मशिष्यंपप्रच्छसत्वरम् ॥ किमिदंदृश्यतेवत्समहोत्साह इवाभवत् ॥ ९ ॥ इतिश्रुत्वावचस्तस्यशिष्यःप्राहातिविस्मितः ॥ किमिदंभाषसेनाथभ्रांतिर्मानिवसांप्रतम् ॥१०॥ सहस्रावधिविप्रान्वै भोजयित्वासुभोजनैः ॥ इदानींत्वंबहिर्यातःपुनरागतवानसि ॥११॥ किमिदंभाषसेऽत्यर्थंसंशयोमेमहानभूत् ॥ इतिशिष्यवचःश्रुत्वा बुबुधेहरिचेष्टितम् ॥१२॥ मनसाभाग्यवंतंतंशिष्यंमुहुरमन्यत ॥ ततःप्रोवाचतंशिष्यंसत्यंभ्रांतिरभून्मम ॥१३ ॥ श्रमेणातिबुभुक्षाभू त्तस्माद्भोजयमांद्रुतम् ॥ इतिश्रुत्वासशिष्यस्तुश्रीकृष्णानीतमुत्तमम् ॥ १४ ॥ भोज्यंतंभोजयामाससाधुभुक्तावशेषितम् ॥ भुक्त्वास चिंतयामासहृदयेभक्तवत्सलम्॥१५॥ततस्तेदुर्जनाःसर्वेदृष्ट्वातत्परमाद्भुतम् ॥ कबीरंतुष्टुवुर्हृष्टाःसत्यंत्वंभक्तिमानसि ॥१६॥ कृतोप राधस्तेऽस्माभिस्तवनाम्नानिमंत्रिताः ॥ साधवस्तेसमागत्यसहस्रादधिकाजनाः ॥ १७ ॥ त्वन्मंदिरेसुखंभुक्त्वास्तुवंतस्तेपुनर्ययुः ॥ इतिश्रुत्वावचस्तेषांधन्यायूयंनसंशयः॥१८॥अनिच्छतामयाप्येवंयद्धर्मःकारितोधुना ॥ इतिश्रुत्वातुतेसर्वेस्तुवंतस्तंययुर्गृहम्॥१९॥ कबीरोपिविशश्रामरामस्मरणतत्परः ॥ निजगेहेतदाकाचिद्वेश्यारूपकलान्विता ॥२०॥ समायाताकबीरस्यगृहेप्रांजलिरब्रवीत् ॥ क बीराहंभवद्गेहेवस्तुमिच्छामिसर्वदा ॥ २१ ॥ नृत्यगानोपभोगैस्तुतवतोषकरीसदा ॥ भविष्यामिनसंदेहःसत्यमेतद्ब्रवीमिते॥२२॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दृष्ट्वातांरूपसंपन्नांनृत्यगीतकलावतीम् ॥ उवाचनाहंजानामिभोगंगानंचनर्तनम् ॥ २३ ॥ क्लीबंमामवगच्छत्वंनचाहंस्त्रीपुमानिति ॥
तथापित्वद्धितार्थायवक्ष्येकिंचिन्निशम्यताम् ॥ २४ ॥ अयंयोममगेहेस्तिभगवाञ्छ्रीहरिःप्रभुः ॥ सोतिरागीतथाभोगीतदग्रेनर्तनं
कुरु ॥ २५ ॥ भोगेतवयदीच्छास्यात्तदारात्रौहरिःस्वयम् ॥ त्वांभोक्ष्यतिनसंदेहःकृतार्थात्वंभविष्यसि ॥ २६ ॥ इतिश्रुत्वावचस्त
स्यसानारीचातिहर्षिता ॥ उवासतस्यनिलयेदेवाग्रेनृत्यतत्परा ॥ २७ ॥ जगामैकदिनेनारीवनमध्येयथेच्छया ॥ वनेसांतर्दधेबालान
दृष्टाकेनचित्क्वचित् ॥ २८ ॥ अप्सरासेतिसर्वेषांतदाभून्निश्चयोमहान् ॥ एकदासकबीरस्तुकाश्यांशिष्यान्गृहेगृहे ॥ २९ ॥ प्रेष
यामाससर्वेभ्योवक्तव्यंमदुदीरितम् ॥ अद्याहंनिजलोकंतुगमिष्यामिनसंशयः ॥ ३० ॥ इतिश्रुत्वावचस्तस्यगुरोःशिष्याद्रुतंययुः ॥
सर्वानुक्त्वागताःसर्वेमणिकर्ण्यांत्वरान्विताः ॥ ३१ ॥ कबीरोपिगतस्तत्रद्रष्टुंसर्वेसमागताः ॥ कथंयातिनिजंलोकमितिविस्मितचेत
सः ॥ ३२ ॥ कबीरस्तानुवाचाथपरंब्रह्मव्रजाम्यहम् ॥ तत्रगत्वामरिष्यामियदिभक्तिर्हितारिणी ॥ ३३ ॥ मगधेपितदामोक्षोमेभ
विष्यत्यसंशयः ॥ ददामिप्रत्ययंयुष्मान्सर्वसंदेहनाशनम् ॥ ३४ ॥ अहंजात्याभवंम्लेच्छःकर्मणावैष्णवोभवत् ॥ ततोममास्यदेहस्य
कःसंस्कर्ताभविष्यति ॥ ३५ ॥ इतिविज्ञायदेहस्यभूततत्वगुणानहम् ॥ प्रविलाप्यगमिष्यामिदेहोमिथ्येतिबोधयन् ॥ ३६ ॥ इतिश्रु
त्वावचस्तस्यसर्वेपारंगताजनाः ॥ अग्रेकृत्वाकबीरंतुद्रष्टुमाश्चर्यमुत्तमम् ॥ ३७ ॥ परंपारंकबीरस्तुगत्वाभूमौनिराकुलः ॥ सुष्वापो
परिवस्त्रंस्वंशिष्यैःप्राच्छादयत्ततः ॥३८॥ अतीतेघटिकायुग्मेवस्त्रंनीत्वातुमामकम् ॥ गम्यतांनिजगेहेवैस्थीयतांभक्तितत्परैः॥३९॥
इत्युक्त्वाशयितोभूमौजातंतुघटिकाद्वयम् ॥ शिष्यावस्त्रंसमाहर्तुमुद्युक्तास्तत्रचागताः ॥ ४० ॥ द्रष्टुंकबीरदेहंचसर्वेतत्रसमागताः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अथशिष्यास्तुतद्वस्त्रंजगृहुःपश्यतांनृणाम् ॥ ४१ ॥ ददृशुस्तत्रतद्भूमौनाकिमप्यद्भुतंमहत् ॥ विलाप्यतत्त्वभूतानिकबीरोगात्परं पदम् ॥ ४२ ॥ एवंभक्तेस्तुमाहात्म्यंकोवावर्णयितुंक्षमः ॥ ककुविंदःकबीरोसौकृताहृग्गमनंदिवि ॥ ४३ ॥ तस्माद्भक्तिवशीभूतो भगवान्भक्तवत्सलः ॥ नाकर्तव्यंहिकुरुतेभक्तार्थंकरुणामयः ॥ ४४ ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येकबीरभक्तिचरितं नामचतुरशीतितमःसर्गः ॥ ८४ ॥ ॥ पीपाभक्तस्यमाहात्म्यंकथयामियथाश्रुतम् ॥ महाश्चर्यप्रदंनृणांहरिभक्तिप्रदायक म् ॥ १ ॥ नागरेनगरेवात्सीदुत्तरेहास्तिनापुरे ॥ तत्रपीपेतिनाम्नाभूद्राजाधर्मरतःशुचिः ॥ २ ॥ देवीपूजांप्रकुर्वाणोदेवीनाम जपन्सदा ॥ राज्यंशशासमुदितःपुत्रपौत्रसमन्वितः ॥ ३ ॥ निष्कामःसंस्तुवन्देवींपूजयामासभक्तितः ॥ ततोज्ञानंददौतस्मैदेवीसं सारतारिणी ॥ ४ ॥ प्रतिज्ञैषाहितस्यास्तुयोनिष्कामोभजेत्तुमाम् ॥ तारयिष्यामितंदत्त्वाज्ञानंयद्योगिदुर्लभम् ॥ ५ ॥ ततःसा प्रददौतस्मैवैराग्यंमुक्तिदायकम् ॥ तदापीपानृपश्चित्तेसर्वंमिथ्येत्यमन्यत ॥ ६ ॥ कदामेदर्शनंविष्णोःस्यादित्येववरंहृदा ॥ प्रा र्थयामासतांदेवींनान्यत्किंचिन्नृपोत्तमः ॥ ७ ॥ ततःप्रसन्नादुर्गासातन्मातूरूपधारिणी ॥ स्वप्नेप्रोवाचपीपत्वंशृणुमद्वचनंशुभम् ॥ ८ ॥ देवतानांतुतद्रूपदर्शनंदुर्लभंभुवि ॥ तथापिकृष्णंद्रष्टासितन्मायाकल्पितोपरः ॥ ९ ॥ तवदृग्पथगोभावीसतेभीष्टंक रिष्यति ॥ इतिदृष्ट्वातुसस्वप्नंप्रातरुत्थायहर्षितः ॥ १० ॥ देवींसंपूज्यभवनादागतोरंगमंडपे ॥ अथांतरेसमायातारामानंदस्यवै ष्णवाः ॥ ११ ॥ तान्दृष्ट्वापरमप्रीतःभोजयित्वाथभूपतिः ॥ प्राहाहमपिभोभक्तारामानंदस्यसद्गुरोः ॥ १२ ॥ शिष्योभवितुमिच्छा मिकथंशिष्यंकरिष्यति ॥ इतितस्यवचःश्रुत्वाभक्ताःप्रोचुर्नृपंतदा ॥ १३ ॥ तत्रगच्छमहाराजत्वांशिष्यंसकरिष्यति ॥ तवभा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ग्यवशात्तस्ययदिताहङ्मनोभवेत् ॥ १४ ॥ इतिश्रुत्वावचस्तेषांपीपातान्प्राहवैष्णवान् ॥ प्रातर्यास्याम्यहंतूर्णंप्रयागंगुरुसान्निधिम् ॥ १५ ॥ इत्युक्त्वाससमायातोरामानन्दस्यसन्निधौ ॥ पीपाचापिसमुत्थायप्रातराहूयमंत्रिणः ॥ १६ ॥ उवाचयाम्यहंकाशीमद्यसैन्यंनियोजय ॥ प्रेतेनद्वंद्वयुद्धेहंनिशिस्वप्नेपराजितः ॥ १७ ॥ ततोभीतःप्रयास्यामिकाशींभोमंत्रिणोद्रुतम् ॥ इत्युक्त्वा सैन्यसहितःप्रतस्थेकाशिकांपुरीम् ॥ १८ ॥ आगत्यकाश्यांप्रययौरामानंदगृहांतिके ॥ ततोद्वारिसमागत्यास्थितःशिष्यैश्चवारितः ॥ ॥ १९ ॥ रामानंदस्तुतच्छ्रुत्वापीपाइतिममांतिके ॥ नृपंतंशिष्यवक्रेणरामानंदोब्रवीद्वचः ॥ २० ॥ राजचिह्नानिसर्वाणिदत्त्वायातुममांतिकम् ॥ श्रुत्वाचैवंददौसर्वंचामरव्यजनादिकम् ॥२१॥ पुनराहनृपंशिष्यैःकूपेनिपतनिर्भयः ॥ श्रुत्वैवंपतितुंतत्रकूपस्यनिकटेगतः ॥२२॥ निवारितस्तदाशिष्यैरामानंदेनशिक्षितैः ॥ आनीतस्तुतदापीपारामानंदांतिकंतुतैः ॥२३॥ ततस्तुशिष्यमकरोद्रामानंदोदयान्वितः ॥ श्रीकृष्णंभजसाधूनांसेवनंभाक्तितःकुरु ॥२४॥ इत्युक्तोनृपतिःपीपाप्रणम्यगुरुमब्रवीत् ॥ एकदाममदासस्यगेहंगत्वापुनीहिनः ॥२५॥ इतितद्वचनंश्रुत्वास्वीचक्रेसगुरुस्तदा ॥ पीपानृपःसमायातःसेनयासहितोगृहम् ॥२६॥ तत्रागत्यहरेर्भक्तिंचक्रेसनृपसत्तमः ॥ राज्यंपुत्रायदत्त्वासमंत्रिणेविनियुक्तवान् ॥२७॥ स्वयंतुवैष्णवैःसार्द्धंहरिभक्तिरतोभवत् ॥ विक्षिप्तोयंबभूवेतिप्रजाःसर्वाअमन्यत ॥२८॥ अथसंवत्सरेयातेगुरुंपत्रमलीलिखत् ॥ भवदागमनंचेत्स्यात्स्यामहंपुण्यवान्नरः ॥ २९ ॥ इतितत्पत्रमाकर्ण्यरामानंदोदयान्वितः ॥ कबीररविदासाद्यैःसहितस्तत्रचागतः ॥३०॥ आगच्छंतंगुरुंज्ञात्वायोजनोपरिभूपतिः ॥ आदायशिबिकांसैन्यैरग्रेगत्वाननामतम् ॥ ३१ ॥ गुरुंचबहुशिष्यांस्तुनमस्कृत्यमुदान्वितः ॥ आरोप्यशिबिकायांतानानिनायाथमंदिरम् ॥ ३२ ॥ संपूज्यभोजयामासभ

रैदास

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्तिपूर्वंनृपोत्तमः ॥ अथद्वित्रदिनान्यौष्यगुरुरागंतुमुत्सुकः ॥ ३३ ॥ ततःपीपाधनंभूरिदत्त्वाथगुरवेमुदा ॥ रविदासादिशिष्येभ्यो ददौधनमनेकधा ॥ ३४ ॥ प्रस्थितंतंगुरुंपीपाप्राहभक्तिसमन्वितः ॥ त्वयासार्द्धमहंयामित्यक्त्वाराज्यमिदंमया ॥ ३५ ॥ दृष्ट्वातन्निश्च यंप्राहगुरुरागच्छभूपते ॥ श्रुत्वागुरुवचःपीपातत्कालंनिर्य्ययौगृहात् ॥ ३६ ॥ अथपत्न्यःस्थितास्तस्यचलिताद्वादशापिताः ॥ अथतावारयामासराजपत्नीःप्रयत्नतः ॥ ३७ ॥ ययुःसर्वागृहंतासांमध्येसीतातुनोययौ ॥ त्यक्त्वालज्जांस्थितवतीपत्युरग्रेऽतिभक्तितः ॥ ॥ ३८ ॥ ततःपीपागुरुंप्राहनाथनेयामिहार्हति ॥ प्रापयैनांगृहंचेतिगुरुंश्रुत्वाद्विजायवै ॥ ३९ ॥ प्राहैनांप्रापयगेहमितिश्रुत्वाथसा पुनः ॥ गुरुंप्राहमरिष्येहंयदिमांननयेदयम् ॥ ४० ॥ ततोगुरुर्नृपंप्राहनयेमांसाधुकारिणीम् ॥ पुत्रीववैष्णवानांनःसमाजेस्थास्यति ध्रुवम् ॥४१॥ ततःसर्वेप्रचलिताद्वारकांद्रष्टुमुत्सुकाः ॥ तत्रगत्वाथतेसर्वेयात्रांकृत्वाविधानतः ॥ ४२ ॥ दत्वादानान्यनेकानि चलिता निजमंदिरम् ॥ रामानंदेनसहितावाराणस्यांत्वरान्विताः॥४३॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येपीपाचरितंनामपंचाशीतितमःसर्गः ॥ ॥ ८५ ॥ छ ॥ ॥ अथत्यक्त्वासमायाताद्वारकांतेथवैष्णवाः ॥ पीपातत्रैवसंतस्थौसीतयासहसुव्रतः ॥१॥ एकास्मिन्दिवसेनौकामा रुह्योदधिमध्यगः ॥ निपपातोदधौद्वारवतींद्रष्टुमनामुदा ॥ २ ॥ अथश्रीभगवान्कृष्णोभक्तरक्षणतत्परः ॥ विधायतादृशंरूपंपीपा ग्रेसमुपस्थितः ॥ ३ ॥ दर्शयामासनगरींद्वारकांभक्तवत्सलः ॥ दर्शयित्वाहरिंप्राहपीपाभक्तंदयान्वितम् ॥ ४ ॥ गच्छास्मांकंवहिर्भ क्तगृहीत्वेमास्तुमुद्रिकाः ॥ शंखचक्रगदापद्मलांछिताःपुण्यदानृणाम् ॥ ५ ॥ इतिश्रुत्वावचस्तस्यनगच्छामीत्युवाचतम् ॥ नृपंतम ब्रवीत्कृष्णोनकार्य्योयंहठस्त्वया ॥ ६ ॥ कथयिष्यंतिलोकावैभक्तोमग्नोमृतोंभसि ॥ द्वारावत्यामितिमहान्कलंकःस्यात्ततोव्रज ॥

सीतानाम्नी
पीपापत्नी॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ ७ ॥ ततोनिमीलिताक्षश्चश्रीकृष्णवचनान्नृपः ॥ समुद्रतीरेशुष्कांगआययौपश्यतांनृणाम् ॥ ८ ॥ तंवीक्ष्यभीतारुदतीस्नेहात्पादे
पपातह ॥ चक्रेमहोत्सवंसाध्वीलब्ध्वामृतमिवागतम् ॥ ९ ॥ ततःकियद्दिनंस्थित्वाचालितःस्वगृहंप्रति ॥ मार्गेम्लेच्छेनतत्पत्नीसीता
सापहृताभवत् ॥ १० ॥ ततस्तुभगवंतंसासस्मारातिशुचाकुला ॥ तस्मिन्नेवक्षणेकृष्णोहयमारुह्यसत्वरम् ॥ ११ ॥ धृत्वाखड्ग
मश्ववाहरूपंकृत्वासमागतः ॥ उवाचदूरादायातावयंकिंप्रकरोषिरे ॥ १२ ॥ इतिश्रुत्वावचस्तस्यम्लेच्छस्तुप्रपलायितः ॥ अश्व
वाहस्तुतांनीत्वापीपांतिकमुपागतः ॥ १३ ॥ अश्ववाहंनृपःप्राहभवान्धन्योनसंशयः ॥ यदेनांविपिनेदीनांचौरात्संत्रातवानसि
॥ १४ ॥ इत्युक्त्वाप्राहसीतांसगच्छाद्यापिगृहंशुभे ॥ किंमयासहदुःखानिभोक्तुमिच्छसिकानने ॥ १५ ॥ इतिश्रुत्वावचः
पत्युःसीताप्राहातिदुःखिता ॥ किंमुहुर्भाषसेनाथनत्वांत्यक्ष्यामिकर्हिचित् ॥ १६ ॥ भगवान्किनमांरक्षेत्पश्याद्यैवयथाभवत् ॥ इत्यु
क्तस्तुतयापत्न्याततोपिचलितोवने ॥ १७ ॥ कियद्दूरेसमागत्यव्याघ्रमेकंददर्शसः ॥ मार्गमारुह्यातिष्ठंतंव्यात्तास्यंभीषणाननम् ॥ १८ ॥
दृष्ट्वासीतातिसंत्रस्तातामाश्वास्यनृपोऽब्रवीत् ॥ गत्वासमीपंव्याघ्रस्यनिर्भयेनांतरात्मना ॥ १९ ॥ अहोव्याघ्रकरोषित्वंकिमिदंकर्म्मग
र्हितम् ॥ नत्वंव्याघ्रःस्थितःपूर्वंकर्मणेमांदशांगतः ॥ २० ॥ कतिधात्वमभूद्राजाकतिधापशुरप्यभूः ॥ इदानींकर्मणानेनव्याघ्रो
भूत्वाचमेस्थितः ॥ २१ ॥ अतस्त्वंत्यजकर्मेदंशिष्योभवममाधुना ॥ शवमांसेनवृत्तिंस्वांयावज्जीवंकुरुष्वभो ॥ २२ ॥ पश्येमां
तुलसीमालांकंठेबध्नाम्यहंतव ॥ अद्यारभ्यप्राणिहिंसांत्यज्यतेशपथोहरेः ॥ २३ ॥ इतिश्रुत्वाततोव्याघ्रोभूत्वासौम्योथतत्पदोः ॥
निपत्यचलितोरण्येकृत्वातस्यप्रदक्षिणम् ॥ २४ ॥ अद्यापितद्वनेव्याघ्राःसंतिनैवभयानकाः ॥ मृतमांसंसमश्नंतिघ्नंतिनैवचजीवितम् ॥ २५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततस्तस्मात्प्रचलितःपीपावहिरुपागतः ॥ वनाद्ददर्शमार्गेतुमध्याह्नेजीर्णमंदिरम् ॥ २६ ॥ तत्रगत्वाददर्शैकंभक्तंचौधरसंज्ञिकम् ॥ चौधरस्तस्यपत्नीचदृष्ट्वातौमुदितस्तराम् ॥ २७ ॥ उत्थितोजलमादायप्रक्षाल्यतत्पदांबुजम् ॥ गृहीत्वाहस्तमानीयगेहेतावुपवेश्यच ॥ २८ ॥ एकांतेपाकशालायांपत्नीमाहकरोमिकिम् ॥ अद्यभिक्षापिनायाताकिमाभ्यांभक्ष्यतेधुना ॥ २९ ॥ इतिचौधरवाक्यंसाश्रुत्वाप्राहार्थवित्तदा ॥ अन्यत्किंचिन्नगेहेस्तिपरिधानीयकंविना ॥ ३० ॥ तद्ददामिगृहाणत्वंविक्रीयान्नंस्वमानय ॥ भोजयैतौत्वहंतावत्स्थास्यामिकोष्ठमध्यगा ॥ ३१ ॥ इत्युक्त्वाप्रददौवस्त्रंतदासोप्यग्रहीच्चतत् ॥ गत्वावस्त्रंतुविक्रीयत्वरितोन्नानिचानयत् ॥ ३२ ॥ सीतामाहप्रसादायकुरुपाकंयथारुचि ॥ आवाभ्यामर्पितंत्रैवभोक्तव्यंनात्रसंशयः ॥ ३३ ॥ इतिश्रुत्वाततःसीताशीघ्रंपाकमथाकरोत् ॥ जातेपाकेततःपीपाश्चौधरश्चेत्युभौपुनः ॥ ३४ ॥ अर्पयामासतुर्भक्त्याप्रसादंहरयेमुदा ॥ अर्पयित्वाप्रसन्नात्मापीपाःप्राहाथचौधरम् ॥ ३५॥ त्वमप्यागच्छतेपत्नीक्वगतायातुसापिभोः ॥ चतुर्भिरपिभोक्तव्यंयुगपच्चेतिमेमतिः ॥३६॥ श्रुत्वापीपावचःप्राहचौधरोविनयान्वितः ॥ भोक्तव्यंप्रथमंसाधोयुवाभ्यांनात्रसंशयः ॥ ३७॥ भवद्भुक्तावशिष्टंतदावांभोक्ष्यावहेमुदा ॥ इतिश्रुत्वाततःसीतापाकस्थानाद्बहिर्गता ॥ ३८ ॥ विचिन्वतीचौधरस्यपत्नींकोष्ठेददर्शह ॥ नग्नांनिलीयातिष्ठंतींप्राहसीताकिमित्यहो ॥ ३९ ॥ ततश्चौधरपत्नीतामाहेदंकतिधाह्यभूत् ॥ भक्तभोजनसिद्ध्यर्थंनासीदंगेंशुकंमम ॥ ४० ॥ ततःसीतास्ववस्त्रार्द्धंदत्त्वातस्यैमुदान्विता ॥ बहिर्निष्क्रम्यजहसुःसर्वेतेमुदिताभृशम् ॥ ४१ ॥ अथसीतास्वमनसिचिंतयंतीमुहुर्मुहुः ॥ धन्योयंचौधरोधन्यातस्येयंवल्लभासती ॥ ४२ ॥ यदेवंदुर्दशांप्राप्तासाधून्भोजयतीमुदा ॥ कामेभक्तिर्यदस्यावैभक्तिलेशोस्तिमेनहि ॥ ४३ ॥ इति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चिंतयमानासापतिंगत्वातमब्रवीत् ॥ श्रुत्वापीपाअपितथाचिंतयामासभूरिशः ॥ ४४ ॥ प्राहपत्नींकथंचास्यकुर्यामुपकृतिंपुनः ॥ सी
ताप्राहपतिंनाथयद्वक्ष्यसिकरोमितत् ॥ ४५ ॥ सीतांप्राहततःपीपाहट्टांगत्वायथारुचि ॥ अन्यायेनापिसंप्राप्यधनमस्मैसमर्प
य ॥ ४६ ॥ अहंतत्रैवगच्छामिभूत्वाकर्म्मकरःपुनः ॥ वेतनादिकमादायदास्याम्यस्मैनसंशयः ॥ ४७ ॥ इत्युक्त्वासगतःक्वापिसी
ताहट्टामुपागमत् ॥ भाग्यवद्वणिजद्वारितस्थावन्नादिसन्निधौ ॥ ४८ ॥ तांदृष्ट्वासवणिक्प्राहकात्वंकमललोचने ॥ राजपुत्रीवमेभा
सिस्वैरिणिवाकिमागता ॥ ४९ ॥ दृश्यतेन्योनतेकश्चित्त्वंनवेश्येतिमेमतिः ॥ किंजिघृक्षासितद्ब्रूहिगृहाणान्नादिकंपुनः ॥ ५० ॥
इत्युक्त्वाप्रददौवैश्योवस्त्रमन्नादिकंबहु ॥ विससर्जप्रशाम्याथसीतानोवाचकिंचन ॥ ५१ ॥ गृहीत्वासर्वमन्नादिचौधरस्यगृहेगता ॥
ददौतस्मैसपीपास्तुनलभेवेतनंतदा ॥ ५२ ॥ भिक्षामादायचान्नादिवस्त्रंचापिमनोरमम् ॥ चौधरस्यगृहेदत्त्वातस्थौतत्राकियद्दिन
म् ॥ ५३ ॥ एकस्मिन्दिवसेपीपाःस्नातुंगच्छन्नचिंतयत् ॥ कथमस्यधनंभूरिदत्त्वायास्यामिकुत्रचित् ॥ ५४ ॥ अथापश्यद्घटं
ताम्रंमुद्रितास्यंनवंदृढम् ॥ गत्वोद्घाटचददर्शासौस्वर्णमुद्राप्रपूरितम् ॥ ५५ ॥ तथैवस्थापयामासपरवित्तमितिस्मरन् ॥ स्ना
त्वागत्यविसस्मारदिनेरात्रौतुतंस्मरन् ॥ ५६ ॥ उवाचसीतांस्नानार्थंगतोहंसरसोंतिके ॥ घटमेकमपश्यंवैस्वर्णमुद्राप्रपूरितम् ॥
॥ ५७ ॥ दृष्ट्वातथैवसंस्थाप्यपरस्वादानभीतितः ॥ आगतोहंदिवेदानींस्मृतिर्मेसमुपागता ॥ ५८ ॥ इतिसर्वंगृहाद्वाह्येस्थितः
शुश्रावतत्परः ॥ गत्वातत्राद्भुतंतस्यमुखमुद्घाटचदृष्टवान् ॥ ५९ ॥ महासर्पंततःशीघ्रंमुद्रयित्वातियत्नतः ॥ क्रोधाच्चौधरभक्त
स्यपीपाशयनमंदिरे ॥ ६० ॥ छिद्रंकृत्वोपरिष्टात्तुपातयामासतंघटम् ॥ घटेनिपतितेपीपाःप्राहदृष्टोघटस्तुसः ॥ ६१ ॥ द्रव्य

अन्यः कश्चित्पुरुषः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पूर्णोनसंदेहश्चौधरंकथयाधुना ॥ ततःसीतासपत्नीकंचौधरंप्रातरानयत् ॥ ६२ ॥ तंवटंप्रददौपीपाश्चौधरायवदन्मुदा ॥ भवदर्थं घटमिमंदत्तवान्भगवान्हरिः ॥ ६३ ॥ गृहाणभुंक्ष्वसाधुभ्योदेहिसाधोव्रजाम्यहम् ॥ इत्युक्त्वाचलितःपीपावारितोपिनसंशयः॥६४॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येपीपाभक्तिचरितंनामषडशीतितमःसर्गः ॥८६॥ ॥छ॥ अथपीपाःसमागच्छन्मार्गेराजातिभक्तिमान् ॥ शूरसेनइतिख्यातस्तस्थौतन्नगरेमुदा ॥ १ ॥ गतेदिनत्रयेराजाशुश्रावतंसमागतम् ॥ अनपत्योद्रष्टुकामःपीपासन्निधिमागतः॥२॥ दृष्ट्वातंप्रणिपत्याहनाथशिष्योभवाम्यहम् ॥ इतिश्रुत्वावचस्तस्यपीपास्तंप्राहभूपतिम् ॥ ३ ॥ ममाज्ञांकुरुषेत्वंचेत्तदाशिष्यंकरोम्यहम् ॥ इत्युक्तःस्वीचकारासौकुर्वाज्ञांकरवाण्यहम् ॥ ४ ॥ ततःपीपानृपंप्राहधनमर्पयमेखिलम् ॥ तुभ्यंसमर्पितंसर्वमित्युवाचनृपस्तदा ॥ ५ ॥ पत्नीमानयचात्रेतिश्रुत्वानिन्येतदासतीम् ॥ पीपाभक्तायचददौततःपीपाउवाचतम् ॥ ६ ॥ इयंमदीयापुत्रीचजातातिष्ठतुचात्रभोः॥ निर्लज्जासाधुसदसिस्त्रीचकारतदप्यसौ ॥ ७ ॥ ततोराजजनाःसर्वेक्रोधसंरक्तलोचनाः ॥ निनिंदुर्नृपतिंचातोविक्षिप्तोयंनसंशयः ॥ ८ ॥ ततोमंत्रंददौराज्ञेसंसारार्णवतारकम् ॥ उपदेशानथोवाचयत्किंचित्प्रकरोषिभोः ॥ ९ ॥ सर्वंकृष्णार्पितंकृत्वासुखीभवनिरामयः ॥ पुत्रवत्पालयजनान्नीतिंनोल्लंघयेत्क्वचित् ॥ १० ॥ हरौभक्तिंसतांसंगंसेवनंसर्वदाकुरु ॥ गृहाणेमांधर्म्मपत्नींकुरुराज्यमकंटकम् ॥ ११ ॥ एवंविसृष्टोगुरुणाराजाधनमथार्पयत् ॥ गुरवेसनजग्राहपीपानिस्पृहतारतः ॥ १२ ॥ अथराजागुरुंनत्वाजगामनिजमंदिरम् ॥ पीपास्तत्रैवकतिंचिद्दिनानिस्थितवान्मुदा ॥ १३ ॥ एकदावृषभानुर्वैतुंवणिगेकःसमागतः॥ तंप्राहुर्विहसंतस्तेग्रामीणादुर्ज्जनावचः ॥ १४ ॥ पीपनामास्तिभक्तोत्रवृषभाःसंतितस्यवै ॥ सदास्यातिततस्तत्रगच्छत्वंनात्रसंश

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

य: ॥ १५ ॥ इतिश्रुत्वावचस्तेषांधूर्तानांसवणिक्तदा ॥ पीपासमीपमागत्यप्रोवाचविनयान्वितः ॥ १६ ॥ साधोहंवृषभाकांक्षी
वणिगत्रसमागतः ॥ ग्राम्यैरुक्तंभवन्नामतस्मात्त्वंदेहिमेवृषान् ॥ १७ ॥ मूलंतेषांगृहाणत्वंयथोचितमिदंप्रभो ॥ पीपाःश्रुत्वावचस्त
स्यवैश्यस्योवाचसस्मितम् ॥ १८ ॥ अहोमेवृषभाःसंतिसत्यंनास्त्यत्रसंशयः ॥ सायंतेऽत्रागमिष्यंतिग्रहीष्यतिततोभवान् ॥ १९ ॥
इत्युक्तःसवणिक्तस्थौक्वचित्पीपागृहेगतः ॥ सस्मारभगवंतंसमहाचिंतापरोभवत् ॥ २० ॥ सायंकालेसमायातोवृषभानतिदुर्दमा
न् ॥ नीत्वैकोवैष्णवःपीपागृहद्वारिसमागतः ॥ २१ ॥ दृष्ट्वातान्वृषभान्पीपावैश्यंहर्षात्समाह्वयत् ॥ आगतायविशेतस्मैवांछिता
न्वृषभान्ददौ ॥ २२ ॥ मूलंजग्राहतेषांतुवृषचारंतुवैष्णवम् ॥ संपूज्यपीपाभक्त्यातंविससर्जातिहर्षितः ॥ २३ ॥ तत्कालंसतु
पीपावैग्रामीणान्समुपाह्वयत् ॥ संपूज्यसाधून्सर्वान्वैददौतद्द्रव्यमुत्तमम् ॥ २४ ॥ अहोमेवृषभानीतावणिजैकेनसांप्रतम् ॥ दत्तंमू
ल्यमिदंतद्वैयुष्मभ्यंप्रददाम्यहम् ॥ २५ ॥ इत्युक्त्वाप्रददौतेभ्योधनंतेप्यतिविस्मिताः ॥ तुष्टुवुस्तंमहाभक्तमाश्चर्यंपरमंगताः॥२६॥
एकदासतुपीपावैस्नातुंद्वारेक्वचिद्गतः ॥ राजदत्ताश्वमारुह्यतत्रबद्ध्वाक्वचिद्धयम् ॥ २७ ॥ स्वयंस्नातुंगतोनद्यांधूर्तास्तद्ग्रामवासिनः ॥
चोरयित्वासमानीयबबंधुर्निजवेश्मनि ॥ २८ ॥ स्नात्वागंतुमनाःपीपाअश्वंतत्रददर्शह ॥ तादृशंतुततोवद्धंतमारुह्यागतोगृहम्॥ २९॥
अथतेदुर्जनादृष्ट्वातमारुह्यपथेतिकिम् ॥ गत्वागृहेतमश्वंतुवद्धंसंददृशुस्तथा ॥३०॥ मुहुरेवंसुनिश्चित्यनीत्वातंघोटकंजनाः॥पीपासमी
पमागत्यप्रार्थयंतोब्रुवन्वचः ॥३१॥ अहोस्माभिश्चोरयित्वानीतोयंघोटकस्तव ॥ गृहाणेमंमहासाधोक्षम्यतांदुर्नयोमम ॥३२॥ ततस्तू
भौहयौपीपाराज्ञेशीघ्रंसमर्पयत् ॥ एकदासतुकुत्रापिगतउक्त्वाप्रियांप्रति॥३३॥ सायमेष्यामिसतीतेत्वंमध्याह्नेसमुपागतान् ॥ भोजयि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ष्यसिसर्वान्वैकृत्वाकर्म्मापिनिंदितम् ॥३४॥ इत्युक्त्वासगतःपीपामध्याह्नेसमुपागते॥आगताःसाधवःपीपागृहेक्षुत्तृट्प्रपीडिताः॥३५॥ सीताहृष्ट्वातुतान्सर्वान्मुदादत्त्वाजलादिकम् ॥स्वयंजगामहट्टायांकस्यचिद्वणिजोगृहे ॥३६॥ उवाचवणिजंसाध्वीपतिवाक्यंस्मरंत्यसौ॥ साधवोमेसमायातास्तिष्ठंतिचबुभुक्षिताः ॥ ३७ ॥ देहितद्भोजनायत्वंतंडुलादिकमुत्तमम् ॥ इतिश्रुत्वावचस्तस्याहृष्ट्वातामति सुन्दरीम् ॥ ३८ ॥ उवाचगृह्यतांसर्वमागमिष्यसिचेन्निशि ॥ इत्युक्त्वासाप्युवाचाथदेहिचान्नंतवांतिकम् ॥ ३९ ॥ आगमिष्यामि रात्रौतुसत्यमेतद्ब्रवीम्यहम् ॥ इत्युक्तःसतुसीतायैददावन्नमनुत्तमम् ॥ ४० ॥ सीतागृहीत्वातत्सर्वंसमायातानिजंगृहम् ॥ पक्त्वा तान्भोजयामासबुभुजेऽन्नंस्वयंतुतत् ॥ ४१ ॥ तादृशंतुपणंकृत्वातयानीतंवणिग्गृहात् ॥ अथभुक्त्वागताःसर्वेसायंपीपाःसमागतः ॥ ४२ ॥ फलमूलादिकंतस्मैभोजयामासभक्तितः ॥ स्वयंभुक्त्वाततःसीतापतिंप्राहयथाकरोत् ॥ ४३ ॥ श्रुत्वातद्वचनंपीपाःप्राह गच्छद्रुतंशुभे ॥ स्वीकृत्याहंसमेष्यामिनचास्यसिपुनर्यदि ॥ ४४ ॥ तदामहानधर्मःस्यात्तस्माद्गच्छतदंतिकम् ॥ इतिपत्यु र्वचःश्रुत्वागमनायोपचक्रमे ॥ ४५ ॥ तदावृष्टिःसमायातासीताप्राहकरोमिकिम् ॥ तदापीपाःप्रियांवस्त्रैराच्छाद्यस्वयमेवहि॥ ४६ ॥ प्रापयामासवणिजोगेहेसीतांमहासतीम् ॥ स्वयंतुवणिजोद्वारिस्थितस्तांप्रापयन्गृहम् ॥ ४७ ॥ दृष्ट्वातांतुवणिक्प्राहकथंवृष्टौसमा गता ॥ अनार्द्रवस्त्रदेहात्वमितिश्रुत्वाब्रवीच्चतम् ॥ ४८ ॥ पतिर्मांवाससाच्छाद्यप्रापयित्वास्तितेबहिः ॥ इतिश्रुत्वावचस्तस्यावहि रागत्यदृष्टवान् ॥ ४९ ॥ पीपांस्वतातरूपंचसंदेहानोगतोगृहे ॥ ततःसीतांस्वजननींददर्शसवणिक्तथा ॥ ५० ॥ महासंदेहपा थोधौनिमग्नोमनसावदन् ॥ अहोमेपितरौकालेमृतौकेयंचकश्वसः ॥५१॥ एवंमुहुर्बहिर्गत्वासमागत्यगृहंपुनः ॥ नानिश्चेतुंशशाका

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अस्याःस्वीकाराद्धेतोरनन्यत्वमिष्टभोगेनेतेदोषोनास्ति

सौतदाभूत्वाभयातुरः ॥ ५२ ॥ सीतायामातृरूपिण्याःपपातचरणाब्जयोः ॥ उवाचगच्छमातस्त्वंक्षंतुमर्हसिमत्कृतम् ॥ ५३ ॥
तत्रपीपाःसमागत्यवणिजंप्राहहृष्टवत् ॥ वैश्यान्नंतवनीत्वेयंगतास्वीकृत्यत्वद्वचः ॥ ५४ ॥ तत्रतेनैवपाप्मेतिश्रुत्वावैश्योऽब्रवीद्वचः ॥
त्वंपितेयंतुजननीसत्यंपश्यामिताहृशौ ॥ ५५ ॥ क्षमस्वतातबालस्यतवैवान्नादिकंत्विदम् ॥ गच्छस्वभवनंसाधोकृपांकुरुममोपरि
॥ ५६ ॥ इतिवैश्यवचःश्रुत्वापीपाःपत्न्यासमागतः ॥ निजगेहंतदाप्रातःसवणिक्समुपागतः ॥ ५७ ॥ पीपागृहेमुहुर्नत्वाजगामस्व
गृहेपुनः ॥ एवंसेवापरंतंतुवणिजंभक्तिसंयुतम् ॥ ५८ ॥ कालेनचाकरोच्छिष्यंपीपाःसोप्यतिवैष्णवः ॥ बभूवभक्तमाहात्म्यात्साधु
सेवनतत्परः ॥ ५९ ॥ पीपास्तुस्वगृहंगत्वापत्न्यासाकंस्थितोभवत् ॥ ६० ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येपीपाभक्तिचरितं
नामसप्ताशीतितमःसर्गः ॥ ८७ ॥ छ ॥ श्रुत्वेदंसकलंराजासीतावृत्तंमहाद्भुतम् ॥ शूरसेनश्चुकोपाथपौरानाज्ञापयत्तदा ॥ १ ॥
पीपागुरुर्मेसीतातुममयातानसंशयः ॥ तांचाभक्त्यावीक्ष्यमाणःप्रावद्यःसदंडभाक् ॥ २ ॥ इत्याज्ञांप्रददौसर्वान्पीपाःश्रुत्वानृपांतिके ॥
गत्वाप्रोवाचराजानंपत्नीतेयार्तैवपुत्रिणी ॥ ३ ॥ तामानयममाग्रेचेत्युक्तःसनृपतिःस्वयम् ॥ जगामपत्नींप्रोवाचगुरुर्मेत्रागतोस्ति
वै ॥ ४ ॥ त्वांद्रष्टुकामःशीघ्रंत्वंतत्रागच्छमयासह ॥ इत्युक्त्वासतयासार्द्धंगुरोरंतिकमागमत् ॥ ५ ॥ तावत्पीपाव्याघ्ररूपोबभूवाति
भयंकरः ॥ दृष्ट्वाव्याघ्रंमहाघोरंसर्वेतत्रपलायिताः ॥ ६ ॥ राजातुकंपमानःसन्तस्थौराज्ञीतुनिर्भया ॥ व्याघ्रस्यापिपुरस्तस्थौव्याघ्रो
प्यंतर्दधेक्षणात् ॥ ७ ॥ राज्ञःक्रोडेबभूवैकःसद्योजातोथबालकः ॥ पीपाःस्वयंस्वरूपेणप्रादुर्भूयाब्रवीन्नृपम् ॥ ८ ॥ राजंस्तवैवपत्नीयं
सुभगातिपतिव्रता ॥ अपुत्रिणीतिज्ञात्वामेमहाशोकोबभूवह ॥ ९ ॥ ततस्तुभगवांस्तुभ्यंपुत्रमेकंददौस्वयम् ॥ तंगृहाणसुतंराजंस्त

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ववंशकरंशुभम् ॥ १० ॥ इतिश्रुत्वाननंदाथराजाराज्ञीचतौमुदा ॥ प्रणिपत्यगुरोःपादौचक्रतुस्तौमहोत्सवम् ॥ ११ ॥ पीपाःस्वगृ
हमागत्यतस्थौसीतासहायवान् ॥ श्रीकृष्णंमनसाध्यायन्पूजयन्वैष्णवान्मुदा ॥ १२ ॥ एवंकर्मभिरत्युग्रैःप्रसिद्धोभूच्चतत्रसः ॥ पीपा
भक्तःप्राणिमात्रेतदातत्रत्यवैष्णवाः ॥ १३ ॥ पीपापरीक्षांकर्तुंवैसमायाताश्वधूर्तवत् ॥ तेचैकत्रगृहंनीत्वातत्रोषुःकपटान्विताः ॥१४॥
एकस्मिन्दिवसेसायंतेषामेकःसमागतः ॥ पीपांप्राहातिथिस्तेहमस्यांरात्रौप्रियामिमाम् ॥ १५ ॥ मह्यंदेहिपुनःप्रातस्तवैवाहंददा
मिते ॥ इतिश्रुत्वावचस्तस्यपीपास्त्वतीवहर्षितः ॥ १६ ॥ स्वीकृत्यपत्नींप्राहाशुसीतेतेनसहव्रज ॥ अस्यांरात्रौपतिस्तेयंयद्वदिष्य
तितत्कुरु ॥ १७ ॥ इतिश्रुत्वापतिवचःसीतातत्कालमुत्थिता ॥ तंभक्तमनुवव्राजनिर्गत्यस्वगृहाद्बहिः ॥ १८ ॥ गतःसधूर्तोभक्त
स्तुविसस्मारगृहंस्वकम् ॥ गृहमार्गंचसर्वत्रददर्शजनसंकुलम् ॥ १९ ॥ एवंबभ्रामनगरेसमस्तांरजनींजडः ॥ उषःकालेपरिश्रांतः
पीपाद्वारेसमागतः ॥ २० ॥ ततःप्रातरभूत्सीताप्राहतंकपटान्वितम् ॥ रात्रिरेषागतासाधोद्वितीयमिदमस्त्यहः ॥ २१ ॥ नातःपत्नी
तवाहंभोक्ष्यतांयाम्यहंगृहम् ॥ इतिश्रुत्वासभक्तस्तुलज्जमानःपुरःस्थितः ॥ २२ ॥ सीताजगामभवनंपत्यैप्राहातिहर्षिता ॥ बहिः
सोपिसमागत्यतंभक्तंप्राहसांत्वयन् ॥ २३ ॥ किमुदासीनवत्त्वंहिदृश्यसेभक्तवत्सल ॥ तवोक्तमनयाकिंनुनकृतंतद्वदस्वमे ॥ २४ ॥
इतिपीपावचःश्रुत्वाभक्तोतीवसुलज्जितः ॥ साष्टांगंप्रणिपत्याहक्षम्यतांमेमहागुरो ॥ २५ ॥ ततःसलज्जितोभूत्वागतोयत्रचतेस्थिताः ॥
वैष्णवांस्तान्समाचष्टनिशिस्वभ्रमणादिकम् ॥ २६ ॥ नामन्यंततततस्तेतुसर्वेपीपागृहंययुः ॥ सायंकालेब्रुवन्सर्वेपरीक्षांकर्तुमागताः ॥
॥ २७ ॥ अहोतेगृहिणींसीतांदृष्ट्वाचातीवसुंदरीम् ॥ व्यथतेनोमनोतस्तांभोक्तुमिच्छामहेवयम् ॥ २८ ॥ इतिश्रुत्वावचस्तेषांपीपाः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्राहातिहर्षितः ॥ सीतेत्वयारंतुकामाआगताःसाधवस्त्विमे ॥ २९ ॥ तस्मादेतैरमस्वास्यांरात्रौममवचोबलात् ॥ कुरुष्वसर्व
शृंगारंयथैषांस्याद्रतिःपरा ॥ ३० ॥ इतिश्रुत्वावचःपत्युःकृत्वाशृंगारसाधनम् ॥ गेहेगत्वास्थितापश्चात्तेपिगंतुंसमुत्सुकाः ॥३१॥
गतातद्गृहदेहल्यांददृशुस्तांमहासतीम् ॥ व्याघ्रींव्यात्ताननांघोरांदृष्ट्वातेप्रपलायिताः ॥ ३२ ॥ ततःपीपास्तानुवाचभवंतोविद्रु
ताःकथम् ॥ सासीतैवनसंदेहोयूयंगच्छतवैगृहम् ॥३३॥ इतिसर्वेपुनस्तेतुतद्गृहद्वारमागताः ॥ अथसीतासमुत्थायतदग्रेगंतुमुत्सुका ॥
॥ ३४ ॥ ततस्तेपिचतांसीतांप्राहुर्मातःक्षमस्वनः॥अज्ञानात्तुपरीक्षार्थमागतावयमत्रवाम् ॥३५॥ तत्क्षंतव्यंयुवाभ्यांनोवयंशिष्यानसं
शयः ॥ इतिश्रुत्वावचस्तेषांपीपाःप्राहातिभक्तिमान् ॥ ३६ ॥ कोहंकेयंसतांदासौययोर्भक्तेःपरीक्षणम् ॥ कर्तुमागतवंतस्तुभवंतो
भगवत्प्रियाः ॥३७॥ आवांधन्यौपरीक्षार्थमागतानांसतांहिनः ॥ दुर्लभंदर्शनंजातमावयोर्नात्रसंशयः ॥३८॥ इतिपीपावचःश्रुत्वासर्वेते
वैष्णवाजनाः ॥स्तुवंतःस्वालयंजग्मुर्निंदंतःस्वकृतंमुहुः ॥ ३९ ॥ एवंपीपानृपोजातोभगवद्भजनात्कलौ ॥ महासिद्धोवैष्णवानांमुख्यो
भक्तिप्रसादतः ॥४०॥ तस्माद्भक्तिसमंकिंचिन्नास्तिसंसारतारकम् ॥ इतिज्ञात्वासदाधीमान्भगवद्भक्तिमाचरेत् ॥ ४१ ॥ ॥इति
श्रीभगवद्भक्तिमाहात्म्येपीपाचरितंनामाष्टाशीतितमःसर्गः ॥८८॥ ॥छ॥ ॥ अथापरंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥
महाश्चर्यप्रदंनॄणांसद्योभक्तिप्रदायकम् ॥ १ ॥ आसीद्वैमथुराप्रांतेआभीरकुलसंभवः ॥ धनानाम्नातिसरलोगोप्रचारणतत्परः ॥२॥
पितृमातृयुतःपुत्रभार्य्याभ्यामपिसंयुतः ॥ प्रातरुत्थायगाःनीत्वाचारयित्वादिवावने ॥३॥ सायंस्वगृहमानीयनिशिसुष्वापनित्यशः ॥
एवंतस्यतुगोपस्यगतमर्द्धवयोमुदा ॥ ४ ॥ एकदातस्यद्वारेतुद्विजएकःसमागतः ॥ स्नानपूजादिकंकर्तुंविचिन्वन्स्थलमुत्तमम् ॥५॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दृष्ट्वागोष्ठंधनाद्वारितस्थौतत्रद्विजोत्तमः ॥ उपलिप्यस्थलंतत्रचक्रेविष्णोःप्रपूजनम् ॥ ६ ॥ धनागोपस्तुतदृष्ट्वाशालग्रामशिलार्चनम् ॥ संकलपयामासचित्तेयक्ष्येऽहमपिताद्दृशम् ॥ ७ ॥ भुक्त्वाप्रस्थातुमुद्युक्तेविप्रेगोपोऽब्रवीद्धनाः ॥ कृतांजलिपुटोभक्त्याप्रणम्यविनयान्वितः ॥ ८ ॥ ब्रह्मन्नेकंतुमेदेहिभगवंतंकृपांकुरु ॥ पूजयिष्याम्यहमपिलग्नंचातीवमेमनः ॥ ९ ॥ एवंपुनःपुनःप्राहभूत्वाविप्रोपितद्वशः ॥ आर्यवत्प्रस्तरंत्वेकंस्थितंतंप्रददौहसन् ॥ १० ॥ गृहीत्वाप्रस्तरंगोपःप्रणिपत्यमुहुर्मुहुः ॥ हृदिसंयोज्यनेत्रेचवस्त्रखंडेबबंधतत् ॥११॥ विप्रवत्स्वगलेबद्धास्वागाश्चारयितुंगतः ॥ गृहीत्वारोटिकादीनिभोक्ष्येतत्रेतिचिंतयन् ॥ १२ ॥ गत्वावनेनदीतीरेस्नात्वापुष्पाणिचानयत्॥ पत्रेतत्प्रस्तरंधृत्वापूजयित्वाजलादिना ॥१३॥ रोटिकाःखंडशःकृत्वाशाकंदत्त्वाचभक्तितः॥ प्रस्तराग्रेनिवेद्याथवस्त्रेणाच्छाद्यचाब्रवीत् ॥१४॥अहोभुंक्ष्वेदमन्नंमेभगवंस्त्वांनमाम्यहम् ॥इत्युक्त्वावस्त्रमुद्घाट्यददर्शभुक्तमेवतत् ॥१५॥ तदामन्यतदुग्धादिनास्तितस्माद्भुनक्तिन ॥ ततोऽब्रवीत्प्रभोदुग्धंदधिप्रातर्भविष्यति ॥ १६ ॥ अद्यनासीद्गृहेसत्यंकथयामिनसंशयः ॥ तस्माद्भुंक्ष्वमहाराजन्क्षुत्तृड्भ्यांपीडितोस्यलम् ॥ १७ ॥ इत्युक्त्वाचपुनर्ज्ञात्वाभुक्तंनैवचकिंचन ॥ तदामेनेनमेस्नानंप्रायःसम्यग्बभूवह ॥ १८ ॥ इतिसंचिंत्यसुस्नातोपुनरन्नंसमाहरत् ॥ ततआगत्यवस्त्रेणसंछाद्यान्नमुवाचतम् ॥ १९ ॥ अहोभुंक्ष्वहरेनाथशपथस्तेममाधुना ॥ इत्येकाग्रमनाभूत्वाप्रार्थयामासभक्तितः ॥ २० ॥ ततःश्रीभगवान्कृष्णोभक्तानुग्रहतत्परः ॥ प्रस्तराद्बुभुजेऽन्नंतदाविर्भूयकृपामयः ॥ २१ ॥ विप्रद्गोपालबालस्यरूपंचातिमनोहरम् ॥ कृष्णभुक्तावशिष्टंतुतदन्नंबुभुजेधनाः ॥ २२ ॥ एवंकतिपयैर्जातैर्दिनैःसब्राह्मणोत्तमः ॥ कार्यंकृत्वाधनाद्वारेसायमागतवान्पुनः ॥ २३ ॥ धनादृष्ट्वातुतंविप्रंसाष्टांगंप्रणनामह ॥ उवाचविप्रधन्यो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सिसम्यक्कृदत्तोहिमेप्रभुः ॥ २४ ॥ वनेभुंक्तेमयासाकंममगाश्चारयत्यलम् ॥ तस्मात्त्वंब्राह्मणश्रेष्ठयदिच्छसिकरोमितत् ॥ २५ ॥
इतिश्रुत्वामहाश्चर्यंवचःप्राहद्विजोत्तमः ॥ शपथंकुरुमेगोपकरिष्यसिमदीरितम् ॥ २६ ॥ तदाहंकथयिष्यामिस्वाभीष्टंतेनसंशयः ॥
इतिश्रुत्वाधनाःप्राहशपथस्तेगुरोर्मम ॥ २७ ॥ करिष्यामिवचस्तेहंनसंदेहंकुरुप्रभो ॥ इतिश्रुत्वावचतस्तस्यविप्रःस्वाभीष्टमाहतम्
॥ २८ ॥ यदायातिहरिर्भोक्तुंत्वयासाकंवनेतदा ॥ तंमांदर्शयगोपालबालवेषंममप्रियम् ॥ २९ ॥ इतिश्रुत्वाधनाःप्राहप्रातस्तत्कथया
म्यहम् ॥ ततस्त्वांदर्शयिष्यामितंप्रभुंनात्रसंशयः ॥ ३० ॥ इत्युक्त्वासगतःप्रातर्वनेगाश्चारयन्धनाः ॥ समर्प्यान्नंभोजयित्वागोपाल
मिदमब्रवीत् ॥ ३१ ॥ नाथागतोगुरुर्मेद्यत्वांद्रष्टुंसोभिवांछति ॥ धनावचनमाकर्ण्यभगवान्गोपवेषधृक् ॥ ३२ ॥ उवाचनैवंवक्तव्यंवि
हरस्वयथारुचि ॥ शालग्रामस्वरूपेणसमांपश्यतिनित्यशः ॥ ३३ ॥ इतिगोपालवचनंश्रुत्वाप्राहधनाःपुनः ॥ अहोमयाकृतस्तस्य
शपथोनात्रसंशयः ॥ ३४ ॥ भवतोदर्शनंतस्ययदिनस्यात्तदामम ॥ गुरुद्रोहसमंपापंसंप्राप्यजीवितेनाकिम् ॥ ३५ ॥ तस्मात्त्वंदर्शनं
देहितस्मैश्रीगुरवेमम ॥ नोचेदद्यमरिष्यामितवाग्रेनात्रसंशयः ॥ ३६ ॥ इतिभक्तवचःश्रुत्वागोपालःपुनरब्रवीत् ॥ त्वंमाशोचस्वत
स्यापिदर्शनंमेभविष्यति ॥ ३७ ॥ त्वदर्चासमयेदूरंसमागत्यसवैद्विजः ॥ संमुखेसंस्थितोभूत्वामांपश्यतुनसंशयः ॥ ३८ ॥ इतिश्रु
त्वावचस्तस्यमुदितोभूद्धनाभृशम् ॥ आगत्यभवनेरात्रौगुरुंप्राहतदीरितम् ॥ ३९ ॥ अथप्रातर्धनागत्वारण्येगाश्चारयन्मुदा ॥ मध्या
ह्नेपूजयामासगोपालंभक्तिसंयुतः ॥ ४० ॥ ततःसभगवान्बालोगोपालस्यस्वरूपतः ॥ प्रादुर्बभूवतस्याग्रेश्यामःकमललोचनः ॥
॥ ४१ ॥ दृष्ट्वातंश्रीहरिंविप्रोमोहितस्तस्यमायया ॥ तत्कालंवेदकोप्यस्यबालोगेहात्समागतः ॥ ४२ ॥ परंतुतस्यरूपेणमोहि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तःप्रेमतत्परः ॥ निर्निमेषदृशाविप्रोददर्शमुदितश्चिरम् ॥ ४३ ॥ अथश्रीभगवान्भुक्त्वाजगामस्वेच्छयाहरिः ॥ ब्राह्मणस्तुतदामेने
यातिवेश्मास्यकोप्यसौ ॥ ४४ ॥ ततोगतेहरौविप्रंद्रष्टुकामोधनागुरुम् ॥ विचिन्वन्नविदूरेतुदृष्ट्वातत्संनिधिंगतः ॥ ४५ ॥ गुरुंप्रा
हागतोदेवोदृष्टवानसितंप्रभुम् ॥ इतिश्रुत्वावचस्तस्यगुरुराहातिविस्मितः ॥४६॥ अहोसएवभगवान्श्यामःकमललोचनः॥बालरूपीम
यादृष्टोयस्तेंऽतिकमुपागतः ॥ ४७ ॥ इतिश्रुत्वावचस्तस्यधनाःप्राहगुरुंपुनः ॥ सएवभगवान्विप्रयस्त्वयामेऽर्पितःपुरा ॥ ४८ ॥
पाषाणस्तुततोदेवःप्रादुर्भूयान्वहंतथा ॥ भुंक्तेमयार्पितंचान्नंमदर्थंचापियच्छति ॥ ४९ ॥ तन्मयाभुज्यतेनित्यंयथाद्यदृष्टवानसि ॥
श्रुत्वेदंवचनंविप्रोमहाविस्मयमागतः ॥ ५० ॥ उवाचवंचितोहंभोहरिणानात्रसंशयः ॥ एतस्मिन्समयेचाभूत्तादृशोमतिविभ्रमः ॥
॥ ५१ ॥ इत्युक्त्वासद्विजस्तंतुप्राहधन्योसिपुत्रक ॥ यत्तवोपरिदेवेशएवंभूतोदयापरः ॥ ५२ ॥ भाग्यवानसिवत्सत्वंप्रसन्नोहंत्र
जाम्यतः ॥ स्वगृहंच्छसाधूनामेवंसेवार्चनंकुरु ॥ ५३ ॥ इत्युक्त्वासगतोविप्रोधनाःस्वगृहमागतः ॥ तदारभ्यातिथीनांसमहासेवाप
रोभवत् ॥ ५४ ॥ यदाकदाचिद्भिक्षार्थीसमायातस्तुकुत्रचित् ॥ धनास्तस्मिन्क्षणेतत्रतोषयामासतंमुदा ॥ ५५ ॥ एकदामह
दाश्चर्यंजातंतस्यब्रवीमितत् ॥ पित्रासंप्रेषितःक्षेत्रेगोधूमवपनायसः ॥ ५६ ॥ धनागृहीत्वागोधूमंगच्छन्मार्गेथसज्जनान् ॥ क्षुधाकु
लान्ददर्शार्थयाचमानांश्चभोजनम् ॥ ५७ ॥ तदाधनाःप्रसन्नात्माप्राहतान्वैष्णवान्मुदा ॥ तिष्ठंतुक्षणमात्रंतुभवंतोत्रनिराकुलाः॥५८॥
आनयित्वाददाम्येवंचर्व्वणंनात्रसंशयः ॥ इत्युक्त्वात्वरितंभ्राष्ट्रेगोधूमांश्चातिभर्ज्यसः ॥ ५९ ॥ कृत्वापिष्टंतुतत्रैवनीत्वासर्वमुपाग
तः ॥ तेषामेवतुपात्राणिगृहीत्वाजलमानयत् ॥ ६० ॥ भोजयामासतान्सर्वान्वैष्णवान्परयामुदा ॥ तेवैष्णवाःसुसंतुष्टाःप्रशंसंतोध

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नांययुः ॥ ६१ ॥ धनाअपिपितुर्भीत्यानीत्वामूषकमृत्तिकाः ॥ क्षेत्रेसंवापयामासपश्यतांतत्रवैनृणाम् ॥६२॥ वापयित्वातथागेहंसमा
यातोधनामुदा ॥ अथतत्रतुयैर्दृष्टाउप्तामूषकमृत्तिकाः ॥ ६३ ॥ तेसर्वेपिसमागत्यधनापितरमब्रुवन् ॥ अनेनतवपुत्रेणउप्तामूषक
मृत्तिकाः ॥ ६४ ॥ गोधूमान्भोजयामासवैष्णवान्नात्रसंशयः ॥ इत्युक्तस्तत्पिताप्राहकिंकृतंरेधनास्त्वया ॥ ६५ ॥ किंभविष्यतिमेक्षे
त्रेमृतिकावपनेकृते ॥ इतिश्रुत्वापितुर्वाक्यंधनाःप्राहवचोमुदा ॥ ६६ ॥ अहोतातात्किमेतेषांशृणोषिवचनंमृषा ॥ कोपिकुत्रापिवपति
क्षेत्रेमूषकमृत्तिकाम् ॥ ६७ ॥ इतिश्रुत्वाधनावाक्यंपितातूष्णींस्थितोभवत् ॥ अनुयातेकतिपयेदिनेक्षेत्रंधनापिता ॥ ६८ ॥
द्रष्टुंगतोददर्शासौगोधूमांकुरसंचयम् ॥ दृष्ट्वाजहर्षसतत्रविस्मयंपरमंगतः ॥ ६९ ॥ अथतत्क्षेत्रनिकटेयेषांक्षेत्राणियानिवै ॥ ते
भ्योधिकाधनाक्षेत्रेगोधूमादशधाभवन् ॥७०॥ इतिदृष्ट्वामहाश्चर्यंसर्वेविस्मयमागताः॥ धनापितातिमुदितोमन्यतश्रीहरेःकृपाम्॥७१॥
एवंभक्तेस्तुमाहात्म्यंकोवावर्णयितुंक्षमः ॥ नासाध्यंविद्यतेलोकेहरेर्भक्त्यानुकंपिनः॥७२॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येधनाभक्तिच
रितंनामैकोननवतितमःसर्गः ॥ ८९ ॥ ॥ छ ॥ अथान्यत्संप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ परमाश्चर्यजनकंहरिभक्तिप्रव
र्धनम् ॥ १ ॥ आसीद्बुंदेलखंडेवैनृपोरामइतिश्रुतः ॥ अत्रापिबांधवगढोनिवासस्तस्यविश्रुतः ॥ २ ॥ धर्मात्मादानशीलश्चदेवताति
थिपूजकः ॥ एकनारीव्रतरतःसंग्रामविजयीसदा ॥ ३ ॥ तस्यैकोनापितोनित्यंतैलाभ्यंगादिकर्मकृत् ॥ नाम्नासेनेतिविख्यातःप्री
तिपात्रंनृपस्यवै ॥ ४ ॥ सतुबाल्यंसमारभ्यसाधुसेवापरायणः ॥ सेनोलब्ध्वाधनंसर्वंदीनेभ्यश्चददौसदा ॥ ५ ॥ राजसेवांविधाया
सौयत्रयत्रहरेःकथा ॥ तत्रतत्रस्थितःशृण्वन्महानंदेममज्जह ॥ ६ ॥ दीनानांकेशवपनंश्रांतानांपादमर्दनम् ॥ अंगोद्वर्तनकर्मादिचक्रे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सवेतनंविना ॥ ७ ॥ एवंभक्तिपरःसेनानापितोराजसेवकः ॥ एकदाप्रातरुत्थायगच्छन्सराजसन्निधिम् ॥ ८ ॥ अभ्यंगादिविधाना यमार्गेऽपश्यत्सवैष्णवान् ॥ बुभुक्षितान्याचमानानन्नंसेनाप्रणम्यतान् ॥ ९ ॥ आनीयस्वगृहेतेषांपरिचर्यापरोभवत् ॥ विसस्मार सराजानमात्मनश्चापिदासताम् ॥ १० ॥ भगवद्भक्तसेवायामेकचित्तोबभूवह ॥ तेषांसेवावशात्तस्यमध्याह्नःस्वगृहेभवत् ॥ ११ ॥ राजारामस्तुभवनेप्रातरुत्थायचाह्निकम् ॥ चिकीर्षुर्बहिरागत्यदंतधावनमाचरत् ॥ १२ ॥ अथाभ्यंगस्यसमयोजातस्तस्यमहीभुजः॥ तदासेनास्वरूपेणभगवान्भक्तवत्सलः ॥ १३ ॥ प्रेषयामासपुरुषंकिंचिन्मायाविनिर्मितम् ॥ सेनाभक्तेस्यनृपतेःकोपोमाभूदिति स्मरन् ॥१४ ॥ अथासौकृत्रिमःसेनानीत्वातैलादिभाजनम् ॥अभ्यंजयामासनृपंकुशलीबहुसौख्यदम्॥१५॥ राजाथाभ्यंगजंसौख्यंता दृशंनापकर्हिचित् ॥ मुमुदेमनसात्यर्थंज्ञात्वातस्यातिकौशलम् ॥ १६ ॥ अभ्यंज्यभूपतिंमायासेनाकोष्ठाद्बहिर्गतः ॥ नगराद्बहिराग त्यतत्रैवांतर्बभूवह ॥ १७ ॥ अथसेनातुतान्भक्तान्भोजयित्वातिभक्तितः ॥ विसृज्यनृपतिरामंसस्माराातिभयाकुलः ॥ १८ ॥ तत स्तुत्वरितंरामद्वारेगत्वातिशंकितः ॥ तस्थौनराजसविधेभयाद्गंतुंशशाकसः ॥ १९ ॥ अथान्योभृत्यवर्गस्तुसेनांप्राहकुतोभवान् ॥ तिष्ठत्यत्रैवनृपतेःसंनिधिंनैवगच्छसि ॥ २० ॥ इतिश्रुत्वाततःसेनास्तंप्राहातिभयाकुलः ॥ अद्याहंसापराधोस्मिसेवांकर्तुंनचागतः ॥२१॥किंकरिष्यतिमांदृष्ट्वाराजेत्येवंभयाकुलः॥तिष्ठाम्यत्रततोभ्रातस्त्वंगच्छनृपसन्निधिम्॥२२ ॥ मदर्थंसतुविज्ञाप्यस्त्वयाभूमिपतिः प्रभुः ॥ यथाक्षमेतमेभ्रातरपराधंतथाकुरु ॥ २३ ॥ इत्युक्तःसतुभृत्योवैगत्वानृपतिसन्निधिम् ॥ प्रांजलिःप्रार्थयामासप्रभोसेनाःसनापि तः ॥ २४ ॥ सेवार्थमद्यनायातस्ततोद्वारिभयातुरः ॥ अनुग्रहंप्रार्थयतितत्राज्ञायादृशीभवेत् ॥ २५ ॥ इतिश्रुत्वावचस्तस्यराजा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्राहातिविस्मितः ॥ अरेप्रातःसमागत्यकृत्वाभ्यंगादिकंमम ॥ २६ ॥ सेनागतःपुनश्चैवंभाषतेभ्रांतवत्कथम् ॥ आनयस्वममाग्रेतं
दत्तंतदभयंमया ॥२७॥ इतिश्रुत्वाततोभृत्यःसेनामुक्त्वानिनायसः ॥ समागत्यततःसेनानत्वाभूपंकृतांजलिः ॥२८॥ तस्थौभूपस्त
तःप्राहसेनास्तेकिमभूदिदम् ॥ प्रातरभ्यंगकर्मादिकृत्वात्वंगतवानसि ॥ २९ ॥ पुनरेवंवचोब्रूषेकारणंनात्रवेद्म्यहम् ॥ इतिराजव
चःश्रुत्वासेनाप्राहकृतांजलिः ॥ ३० ॥ राजन्नद्यभवत्सेवांकर्तुमागतवान्पथि ॥ अपश्यंभगवद्भक्तान्नीत्वातांश्चपुनर्गृहम् ॥ ३१ ॥
गत्वातत्सेवनासक्तोनागतोहंतवांतिके ॥ अतोपराधाद्भवतांभीत्याद्वारिस्थितोभवम् ॥ ३२ ॥ इतिश्रुत्वावचस्तस्यराजाचातीव
विस्मितः ॥ उवाचान्यानपिजनान्युष्माभिरयमीक्षितः ॥ ३३ ॥ ममाभ्यंगस्यसमयेसेनाःसेवापरायणः ॥ तैरुक्तंभोमहाराजदृष्टो
स्माभिरयंकिल ॥ ३४ ॥ ततोराजातथान्येचभगवत्कृपयास्यवै ॥ कृत्वारूपंसमागत्यतन्मायाकल्पितःपुमान् ॥ ३५ ॥ अका
र्षीत्सेवनंमेद्यनात्रकार्याविचारणा ॥ इतिनिश्चित्यराजातुसेनांभक्तममन्यत ॥ ३६ ॥ सेनांप्राहातिभक्त्यावैभूपतिर्नम्रयागिरा ॥ अ
होद्यारभ्यसेनास्त्वंत्यजसेवांनृणामिह ॥३७॥ ममापिसेवनंत्यक्त्वाकुरुसाधुसमर्चनम् ॥ ददामिजीविकांतुभ्यंग्राममेकंप्रसन्नधीः॥३८॥
तदुत्पन्नैर्धनैःसाधूंस्तोषयन्ममसान्निधौ ॥ गुरुवत्तिष्ठनगरेत्यजवृत्तिंनिजांपुनः ॥ ३९ ॥ इतिश्रुत्वाततःसेनाःप्रणम्यनृपतिंमुदा ॥ स
मायातोनिजंवेश्मस्थितोभक्तिपरायणः ॥ ४० ॥ राजाचान्येपितेसर्वेयैर्यैर्दृष्टंमहाद्भुतम् ॥ तेसर्वेपिमहाभक्ताजाताःसाधुसमागमात्
॥४१॥ एवंभक्तिप्रसादेनगताःसर्वेपरंपदम् ॥ तस्माद्भक्तिसमंकिंचिन्नास्तिलोकहितंनृणाम् ॥४२॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसे
नाभक्तिचरितंनामनवतितमःसर्गः॥९०॥ ॥अथापरंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम्॥यस्यश्रवणमात्रेणहरिभक्तिर्भवेन्नृणाम्॥१॥रामा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सवेतनंविना ॥ ७ ॥ एवंभक्तिपरःसेनानापितोराजसेवकः ॥ एकदाप्रातरुत्थायगच्छन्सराजसन्निधिम् ॥ ८ ॥ अभ्यंगादिविधाना
यमार्गेऽपश्यत्सवैष्णवान् ॥ बुभुक्षितान्याचमानानन्नंसेनाप्रणम्यतान् ॥ ९ ॥ आनीयस्वगृहेतेषांपरिचर्यापरोभवत् ॥ विसस्मार
सराजानमात्मनश्चापिदासताम् ॥ १० ॥ भगवद्भक्तसेवायामेकाचित्तोबभूवह ॥ तेषांसेवावशात्तस्यमध्याह्नःस्वगृहेभवत् ॥ ११ ॥
राजारामस्तुभवनेप्रातरुत्थायचाह्निकम् ॥ चिकीर्षुर्बहिरागत्यदंतधावनमाचरत् ॥ १२ ॥ अथाभ्यंगस्यसमयोजातस्तस्यमहीभुजः॥
तदासेनास्वरूपेणभगवान्भक्तवत्सलः ॥ १३ ॥ प्रेषयामासपुरुषंकिंचिन्मायाविनिर्मितम् ॥ सेनाभक्तस्यनृपतेःकोपोमाभूदिति
स्मरन् ॥ १४ ॥ अथासौकृत्रिमःसेनानीत्वातैलादिभाजनम् ॥ अभ्यंजयामासनृपंकुशलोबहुसौख्यदम्॥ १५॥ राजाथाभ्यंगजंसौख्यंता
दृशंनापकर्हिचित् ॥ सुमुदेमनसात्यर्थंज्ञात्वातस्यातिकौशलम् ॥ १६ ॥ अभ्यंज्यभूपतिंमायासेनाकोष्ठाद्बहिर्गतः ॥ नगराद्बहिराग
त्यतत्रैवांतर्बभूवह ॥ १७ ॥ अथसेनातुतान्भक्तान्भोजयित्वातिभक्तितः ॥ विसृज्यनृपतिरामंसस्माराातिभयाकुलः ॥ १८ ॥ तत
स्तुत्वरितंराजद्वारेगत्वातिशंकितः ॥ तस्थौनराजसविधेभयाद्गंतुंशशाकसः ॥ १९ ॥ अथान्योभृत्यवर्गस्तुसेनांप्राहकुतोभवान् ॥
तिष्ठत्यत्रैवनृपतेःसंनिधिंनैवगच्छसि ॥ २० ॥ इतिश्रुत्वाततःसेनास्तंप्राहातिभयाकुलः ॥ अद्याहंसापराधोस्मिसेवांकर्तुंनचागतः
॥२१॥किंकरिष्यतिमांदृष्ट्वाराजेत्येवंभयाकुलः॥तिष्ठाम्यत्रततोभ्रातस्त्वंगच्छनृपसन्निधिम्॥२२ ॥ मदर्थंसतुविज्ञाप्यस्त्वयाभूमिपतिः
प्रभुः ॥ यथाक्षमेतमेभ्रातरपराधंतथाकुरु ॥ २३ ॥ इत्युक्तःसतुभृत्योवैगत्वानृपतिसन्निधिम् ॥ प्रांजलिःप्रार्थयामासप्रभोसेनाःसनापि
तः ॥ २४ ॥ सेवार्थमद्यनायातस्ततोद्वारिभयातुरः ॥ अनुग्रहंप्रार्थयतितत्राज्ञायादृशीभवेत् ॥ २५ ॥ इतिश्रुत्वावचस्तस्यराजा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नंदस्यशिष्योथःसुखानंदइतिस्मृतः ॥ महाभक्तोवसत्सर्वगानविद्याविशारदः ॥ २ ॥ साधुसेवनसंसक्तोनिस्पृहोविषयेसदा ॥ तीर्थाटनरतःशांतःश्रीकृष्णध्यानतत्परः॥३॥ यदावीणांसमादायश्रीकृष्णचरितंमुदा ॥ गायतिस्मवनेत्तत्रहरिणाश्चित्रवत्स्थिताः॥४॥ अन्येपिपशवोरण्येगायंतंश्रीहरेर्गुणम् ॥ सुखानन्दंसमावव्रुर्लिहंतःसाश्रुलोचनाः ॥ ५ ॥ एकदामथुरायांतुराधामंदिरसन्निधौ ॥ वैष्णवानांसमूहोभूत्सुखानंदःसमागतः ॥ ६ ॥ वीणांनिनादयन्गायन्श्रीकृष्णचरितंमुदा ॥ दृष्ट्वातेवैष्णवास्सर्वेनेमुरुत्थायसादरम् ॥७॥सुखानंदोपितान्नत्वाक्वचित्तत्रोपविष्टवान्॥अथसर्वैर्विष्णुभक्तैःसुखानंदःसप्रार्थितः ॥८॥ कृष्णेगतेद्वारकायामत्रगोप्यःसमुत्सुकाः ॥ विरहिण्योजगुःकीदृक्तथागानंकुरुप्रभो ॥ ९ ॥ इतिश्रुत्वासुखानंदोराधाकृष्णौविचिंतयन् ॥ विप्रयोगंतयोर्भक्त्यासगायतिमनोहरम् ॥१०॥तस्मिन्गायतिवैतत्रबभूवुश्चित्रवन्नराः॥केचिद्रुरुदुःसंतस्थुःकेचिन्मूर्च्छांप्रपेदिरे ११॥तदारभ्यगृहंकेचित्त्यक्त्वाहंसवदास्थिताः॥ निःस्पंदतनवोजाताःसुखानंदेप्रगायति ॥ १२ ॥ राधायामंदिरेयासीत्प्रतिमातिमनोहरा ॥ चकंपेसापिरुदतीमुंचत्याश्रुदृशोर्बहु ॥ १३ ॥ इत्येवंपरमाश्चर्यंजातंतस्मिन्प्रगायति ॥ निष्कंपास्तरवोजाताजीवमात्रंचनिश्चलम् ॥ १४ ॥ अथज्ञात्वातुतान्सर्वान्सुखानंदोतिमोहितान् ॥ गानान्निववृतेतत्रस्वयमुत्थाययत्नतः ॥१५॥ उत्थाप्यमोहितान्सर्वान्नानालौकिकभाषया ॥ तेसर्वेपिसमुत्थायासंस्मेरुर्लब्धचेतनाः ॥१६॥ गीतश्रवणतोजातमानंदंपरमाद्भुतम् ॥ सुखानंदंप्रणेमुस्तेवैष्णवाभक्तिसंयुताः ॥१७॥ धन्योसिभगवद्भक्तिःपृथिव्यांनास्तित्वत्समा ॥ एवंतैःसंस्तुतोभक्तःसुखानंदोयदृच्छया॥१८॥गायन्श्रीकृष्णचरितंप्रतिकुंजेचचारह॥एवंसंस्मृत्यसंस्मृत्यगायन्कृष्णविचेष्टितम् ॥ १९ ॥ कृत्वातीर्थान्यनेकानिमथुरायांसमागतः ॥ पूर्णायुर्यमुनातीरमासाद्यैकदिनेस्वयम् ॥२०॥ गायन्श्रीकृ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ष्णचरितंययौतत्पदमुत्तमम् ॥ दुष्प्राप्यमपिदेवानांयोगिनामपिदुर्लभम् ॥२१॥ तत्प्रापससुखानंदोभगवद्गुणनामतः ॥ २२ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसुखानंदचरितंनामैकनवतितमःसर्गः ॥ ९१ ॥ छ ॥ ॥ रामानंदस्यशिष्योयःसुरसरानंदविश्रुतः॥महावैराग्यसंयुक्तःश्रीकृष्णध्यानतत्परः ॥१॥ कृत्वासर्वाणितीर्थानिजगन्नाथंगतोमुदा ॥ शिष्यैःसार्द्धंमहाभक्त्यातत्रोवासकियद्दिनम् ॥२॥ ततोनत्वाजगन्नाथंप्रस्थितःकाशिकांप्रति ॥ शिष्यैःपरिवृतोमार्गेपुरीतोबाहिरागतः ॥ ३ ॥ दृष्ट्वायांवटकान्शुभ्रान्ददर्शैकेनरक्षितान् ॥ तत्रस्थित्वास्वयंप्राहतंवैवटकरक्षकम् ॥ ४ ॥ किमिदंभोमहाभागमहोज्ज्वलतरंपुनः ॥ स्थाप्यतेतन्ममाचक्ष्वज्ञातुमिच्छतिमेमनः ॥ ५ ॥ इतिश्रुत्वावचस्तस्याब्रवीद्वटकरक्षकः ॥ महामूर्खइतिज्ञात्वाउपहासपरायणः ॥ ६ ॥ जगन्नाथप्रसादोयंकिंभोक्ष्यसिगृहाण भोः ॥ इत्युक्त्वावटकंत्वेकंददौवटकरक्षकः ॥ ७ ॥ मुदासुरसरानंदोगृहीत्वाबुभुजेस्वयम् ॥ ततस्तस्यैकशिष्योपिबुभुजेवटकंततः ॥ ८ ॥ दृष्ट्वासुरसरानंदःशिष्यंप्राहातिकोपतः ॥ अरेत्वयाकथंभुक्तमन्नंनीचेनपाचितम् ॥ ९ ॥ अतस्त्वंतुबहिस्तिष्ठपंक्तितो नात्रसंशयः ॥ ततस्तत्रास्थितायेवैतेसर्वेभक्तमब्रुवन् ॥ १० ॥ भवद्भुक्तंविलोक्यायंबुभुजेतत्रकिंभवान् ॥ कुरुतेपंक्तितोबाह्यं तवशिष्यंनिरागसम् ॥ ११ ॥ इतिश्रुत्वावचस्तेषांजनानांसोब्रवीद्विचः ॥ अहोमहाप्रसादोयमितिनिश्चितबुद्धिना ॥ १२ ॥ भुक्तंमयानसाबुद्धिरस्येदानींहिवर्तते ॥ इत्थंसुरसुरानंदवचःश्रुत्वातुनागराः ॥ १३ ॥ आहुःकथंविजानीमोभवतस्तादृशीमतिः ॥ तस्यनैवेतिवचनंश्रुत्वाभक्तोब्रवीद्वचः ॥ १४ ॥ दर्शयाम्यावयोर्बुद्धिविशेषंनागराअहो ॥ इत्युक्त्वातमुवाचासौशिष्यंत्वंवमनंकुरु ॥ १५ ॥ अहंचापिकरोम्येववमनंवःप्रपश्यताम् ॥ इत्युक्त्वागुरुशिष्यौतौवमतुश्चपृथक्पृथक् ॥ १६ ॥ शिष्यस्तुवटकंयत्नादु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ज्जगारातियत्नतः ॥ गुरुःसुतुलसीपत्रमुद्रीयांदर्शयच्चतान् ॥ १७ ॥ उवाचचततस्तांस्तुनिश्चयस्य फलंत्विदम् ॥ मयाप्रसाद
बुध्द्यैवभुक्तमेतेनवैपुनः ॥ १८ ॥ मयाभुक्तमितिज्ञात्वापक्वान्नस्यधियापुनः ॥ तस्मादयंपंक्तिग्राह्योयावत्काशींगमिष्यति ॥ १९ ॥
प्रायश्चित्तंद्विजप्रोक्तंकृत्वाशुद्धोभविष्यति ॥ ततोवयंतुभोक्ष्यामःसहानेननसंशयः ॥ २० ॥ इत्थंसुरसरानंदचरितंपरमाद्भुतम् ॥ दृष्ट्वा
सर्वैर्महाश्चर्य्यप्रीत्यानेमुश्चतंमुदा ॥ २१ ॥ ततःसुरसरानंदःसमागत्यचकाशिकाम् ॥ प्रायश्चित्तंददौतस्मैशुद्धंकृत्वाविधानतः॥२२॥
बुभुजेन्नंततस्तेनसाकंशिष्यसमन्वितः ॥ एवंसुरसरानंदोमहाभक्तोबभूवह ॥ २३ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसुरसरानंदभ
क्तचरितंनामद्विनवतितमःसर्गः ॥९२॥ ॥ रामानंदस्यापरोभूच्छिष्यःसुरसुरिःशुभः ॥ तस्यभक्तेस्तुचरितंप्रवक्ष्यामियथाश्रुतम् ॥ १ ॥
सुरसुरिर्महाभक्तोविरक्तोविषयेष्वभूत् ॥ स्त्रीपुत्रधनमित्रादौनस्नेहोममतानच ॥ २ ॥ ग्रामेविविक्तदेशस्थाभावाद्वनमुपागतः ॥ पत्नी
तस्यातिसुभगासतीधर्मपरायणा ॥ ३ ॥ पत्यासहवनंयातापतिसेवाचिकीर्षया ॥ अरण्येपिचभक्तःसफलमूलादिनामुदा ॥ ४ ॥
सज्जनान्भोजयामासमहासेवापरायणः ॥ एवंगतेषुकालेषुदुष्टएकःसमागतः ॥ ५ ॥ सुरसुरेर्गृहेसायंहर्तुंसुरसुरेःस्त्रियम् ॥ सुरसुरि
स्तुतंभक्त्यामुदापरिचचारह ॥ ६ ॥ अथार्द्धरात्रसमयेसमुत्थायसदुर्ज्जनः ॥ सुरसुरिंनिहत्येमांग्रहीष्यामिपतिव्रताम् ॥ ७ ॥ इति
निश्चित्यस्वगृहाद्बहिर्यातोयदातदा ॥ सुरसुरिस्तुसस्मारश्रीकृष्णंविजनेवने ॥ ८ ॥ तत्क्षणात्तत्रसुमहान्व्याघ्रोतीवभयंकरः ॥ स
मागत्यगृहीत्वातंदुष्टंकपटरूपिणम् ॥ ९ ॥ गत्वावनेचखादाशुततःसुरसुरिःस्वयम् ॥ बहिरागत्यतंदुष्टमाजुहावातिभीतवत् ॥१०॥
कुतोगतोयंपापात्माकुरुतेकिंमहानिशि ॥ इतिचिंतापरोभूत्वापुनःशयनमाविशत् ॥ ११ ॥ ततःप्रभातेसंजातेतंदुष्टमुटजांतिके ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

व्याघ्रेणनिहतंतंदृष्ट्वाचिंतयामासवैभृशम् ॥ १२ ॥ कस्मादेषसमायातोममवेश्मन्यसौपुनः ॥ व्याघ्रेणनिहतःस्वेनकर्मणानात्रसंशयः
॥ १३ ॥ अहोकर्मगतिश्चित्रादुर्निवार्यामरैरपि ॥ यद्वशोलभतेमर्त्यःसुखदुःखेअपारिते ॥ १४ ॥ इत्थंसुरसुरिर्भक्तश्चिंतयंस्तंचदुर्जन
म् ॥ आगत्यस्वगृहेतस्थौश्रीकृष्णध्यानतत्परः ॥ १५ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसुरसुरिभक्तिचरितंनामात्रिनवतितमःसर्गः
॥९३॥ अथापरोबभूवैकोनाम्नानरहरिःशुभः ॥ परानंदस्यशिष्योसौतद्भक्तिंकथयाम्यहम् ॥१॥ नरहरिर्महाभक्तोविरक्तोविषयेभवत् ॥
ग्रामाद्बहिःकुटिंबद्धातस्थौचित्तेहरिंभजन् ॥ २ ॥ परंतुस्वगृहेसायंसमायाताञ्जनान्मुदा ॥ अकर्तव्यमपिप्रेम्णाकृत्वासंतर्पयन्स्थि
तः ॥ ३ ॥ एकदातस्यभवनेसमायाताश्चवैष्णवाः ॥ तेषांभोजनसिद्ध्यर्थंनासीत्तस्येंधनंक्वचित् ॥ ४ ॥ यावच्चस्वगृहेकाष्ठंदग्धुंयो
ग्यंस्थितंतुतत् ॥ सर्वमिंधनमेवासौचकारपरयामुदा ॥ ५ ॥ तस्मिन्दिनेनरहरिर्नलब्ध्वावेश्मनींधनम् ॥ विचिंत्यसगतोग्रामाद्बाह्येन
प्रापकिंचन ॥ ६ ॥ तत्रासीद्ग्राम्यदेव्येकादुर्गाजाग्रत्स्वरूपिणी ॥ तस्यागृहंददर्शासौजीर्णकाष्ठचयान्वितम् ॥ ७ ॥ तत्रगत्वानम
स्कृत्यसंप्रार्थ्यग्रामदेवताम् ॥ इंधनानिसमाहृत्यतद्गृहात्स्वगृहंययौ ॥ ८ ॥ तेनेंधनेनतेषांवैसंपाद्यान्नंप्रहृष्टवत् ॥ भोजयामासता
न्सर्वान्स्वार्थंपाकमाचरत् ॥ ९ ॥ ततोभगवतीतुष्टानिशितंस्वप्नमादिशत् ॥ अरेनरहरेतेहंतुष्टास्मिशृणुमेवचः ॥ १० ॥
अद्यारभ्यतवाकस्मादिंधनंवैभविष्यति ॥ नमेमंदिरकाष्ठानिग्राह्याणीहत्वयापुनः ॥ ११ ॥ इत्थंनरहरिर्दृष्ट्वास्वप्नंप्रातःसमुत्थितः ॥
ददर्शचांगणेवद्धंशुष्ककाष्ठचयंस्थितम् ॥ १२ ॥ अमन्यततदास्वप्नंसत्यंदेव्याप्रभाषितम् ॥ एवंद्वित्रिदिनेजातेज्ञातंतत्केनचित्पु ॥१२९॥
नः ॥ १३ ॥ सामाजिकेनतेनापिरात्रौदुर्गागृहेस्थितम् ॥ काष्ठंनीतंचपाकार्थममाप्येवंभविष्यति ॥ १४ ॥ एवंसंचिंत्यतत्काल

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मारभ्यास्याशिरोव्यथा ॥ महतीसंबभूवाथसमुमूर्षुरभूत्क्षणात् ॥ १५ ॥ अथतस्मैनिाशिस्वप्नंददौदेव्यतिकोपिनी ॥ अस्त्वंमेस्वभव
नात्काष्ठमानीतवानसि ॥ १६ ॥ इंधनार्थंततस्त्वांतुसकुलंनाशयाम्यहम् ॥ यदिचत्वंममवचो नकरिष्यस्यतःपरम् ॥ १७ ॥ आ
स्तेनरहरिर्भक्तोयोसौग्रामेममप्रियः ॥ तस्मैशुष्केंधनंबद्धाप्रत्यहंदेहिवेश्मनि ॥ १८ ॥ नकरिष्यसिचेद्वाक्यंमदुक्तंमोहतोयदा ॥
तदात्वांसकुलंचाहंहनिष्यामिनसंशयः ॥ १९ ॥ इतिसस्वप्नमालोक्यप्रातरुत्थाययत्नतः ॥ शुष्ककाष्ठचयंबद्धाधृत्वाशिरसिभक्ति
तः ॥ २० ॥ ददौनरहरेर्गेहेदुर्गादेवींस्मरन्मुदा ॥ तत्कालादेवतस्यापिशिरःपीडान्यवर्तत ॥ २१ ॥ प्रत्यहंसतदारभ्यगत्वानर
हरेर्गृहम् ॥ प्रददाविंधनंभक्त्यादेव्यावाक्यंस्मरन्भयात् ॥ २२ ॥ तदारभ्यचभक्तस्यसाधोर्नरहरेर्गृहे ॥ नाभूदिंधनवैकल्यंबभूवा
त्यंतमद्भुतम् ॥ २३ ॥ एवंभक्तेर्विलसितंमहाश्चर्यकरंपरम् ॥ असाध्यमपिसिध्येतलोकेभक्तिमतांनृणाम् ॥ २४ ॥ ॥ इति
श्रीभगवद्भक्तिमाहात्म्येनरहरिभक्तिचरितंनामचतुर्नवतितमःसर्गः ॥ ९४ ॥ ॥ कबीरस्यचशिष्योभून्नाम्नापद्मइतिस्मृतः ॥ सतुनामैव
जग्राहरामेत्यक्षरयुग्मकम् ॥ १ ॥ अजामिलादिपापिष्ठसमुद्धरणकारणम् ॥ श्रुत्वाकबीरवदनान्नामैवपरमंमनुम् ॥ २ ॥ सतुकाश्यां
वसन्भक्तोरामनामपरायणः ॥ साधुसेवासमासक्तोगुरुशुश्रूषणेरतः ॥ ३ ॥ एकदाचाविमुक्तेतुवणिगेकोमहाधनः ॥ कुष्ठरोगातुरोमर्तुं
गंगातीरमुपागतः ॥ ४ ॥ महाभारंगलेबद्धाप्रस्तरंजाह्नवीजले ॥ निमज्याहंमरिष्यामीत्येवंनिश्चित्यचेतसा ॥ ५ ॥ अथतत्रसमाया
तःपद्मनामातिभक्तिमान् ॥ पप्रच्छवणिजंत्वंभोकिमर्थंमर्तुमिच्छसि ॥ ६ ॥ वणिगाहस्ववृत्तांतंश्रुत्वापद्मोब्रवीत्पुनः ॥ अहोमयोच्य
तेयत्तेतत्कुरुष्वाद्यमेवचः ॥ ७ ॥ अद्यैवनिरुजंदेहंगच्छकिंमर्तुमिच्छसि ॥ इतिश्रुत्वावचस्तस्यपद्मस्यचवणिक्पुनः ॥ ८ ॥ प्रण

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्यपद्मंप्रोवाचनाथतद्ब्रूहिमेवचः ॥ इतिवैश्यवचःश्रुत्वापद्मोवचनमब्रवीत् ॥ ९ ॥ इदानींजाह्नवीतोयेमणिकर्ण्यांप्रविश्यच ॥ स्ना
त्वारामेतिनामैवत्रिधोच्चारयभक्तितः ॥ १० ॥ तदापूतःकुष्ठरोगान्मुक्तोभवितुमर्हसि ॥ इतिश्रुत्वावचस्तस्यवणिक्तत्कालमेवहि ॥
॥ ११ ॥ भृत्यैर्धृतकरोगंगातोयेभक्त्याविवेशह ॥ ततस्त्रिर्मज्जनंकृत्वानिमील्यनयनेसतु ॥ १२ ॥ त्रिधारामेतिनामैवप्रोवाचाप्य
तिहृष्टवत् ॥ तदैवनिरुजौहस्तौपादौतस्यबभूवतुः ॥ १३ ॥ निर्व्यथंचसमस्तांगमंगुलीनांप्ररोहणम् ॥ दृष्ट्वावणिक्प्रमुदितोनत्वानरह
रिंमुहुः ॥ १४ ॥ जगामभवनंपद्म्यांपश्यतांसर्वदेहिनाम् ॥ अन्येयेसंस्थितास्तत्रतेप्याश्चर्यपरंययुः ॥ १५ ॥ एवंनरहरिर्भक्तोनाम
निष्ठोबभूवह ॥ तस्यनाम्नैवसंजातंदिव्यज्ञानमनुत्तमम् ॥१६॥ ननामसदृशंकिंचिदिहामुत्रफलप्रदम् ॥१७॥ ॥ इति श्रीभगवद्भक्तिमा
हात्म्येनरहरिभक्तिचरितंनामपंचनवतितमःसर्गः ॥ ९५॥ छ ॥ दक्षिणस्यांमुभौजातौतत्वाजीवेतिनामतः ॥ भ्रातरौसाधुपूजायांनियु
क्तौक्षत्रवंशजौ ॥ १ ॥ कर्ममात्रमजानंतौवैष्णवाराधनेरतौ ॥ कांक्षंतौसद्गुरुंचितेशिष्यौस्यावचकस्यवै ॥ २ ॥ एवंविचारवंतौतौ
साधुरेकःसमागतः ॥ तेनोक्तौतौभवद्द्वारिशुष्कोयंवर्ततेतरुः ॥ ३ ॥ यस्यपादोदकेनास्यतरोःशाखाप्ररोहणम् ॥ सएवसद्गुरुःशिष्यौ
तस्यवैभवतंयुवाम् ॥ ४ ॥ एवंश्रुत्वावचस्तस्यताभ्यामपिसुनिश्चितम् ॥ योयःसमागतःसाधुस्तस्यपादोदकंस्वयम् ॥ ५ ॥ गृही
त्वाशुष्कवृक्षंतंभक्त्यासिषिचतुर्मुदा ॥ एवंगतेषुकालेषुनाभूच्छाखाप्ररोहणम् ॥ ६ ॥ तदातौचिंतयाविष्टौगुरुर्नैकोभविष्यति ॥
एवंचिंतयतोस्तत्रसाधुसेवांप्रकुर्वतोः ॥ ७ ॥ कबीरःपर्यटन्देशेतयोर्द्वारमुपागतः ॥ सायंकालेयतौदृष्ट्वाकबीरंश्रुतनामकम् ॥ ८ ॥
आतिथ्यंपरयाभक्त्यास्नात्वापादोदकंतदा॥ददौशुष्कतरोर्मूर्ध्निशाखारोहाभिकांक्षया ॥ ९॥ ततःकबीरंसंभोज्यरात्रौसुषुपतुर्गृहे॥प्रात

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रुत्थायतौवृक्षंरूढशाखंनिरीक्ष्यवै ॥ १० ॥ मुदितौतस्यनिकटेकवीरस्यसमागतौ॥ऊचतुस्तंकबीरंचगमनायोद्यतंमुदा॥ ११ ॥अद्येह तिष्ठभक्तस्त्वंकुरुनौवांछितंप्रभो ॥ यथेष्टंप्रातरेवातोगमिष्यसिनसंशयः ॥ १२ ॥ इतिश्रुत्वातयोर्वाक्यंकबीरस्तावुवाचह ॥ ब्रूतंयु वांवांछितंयन्ममाग्रेतत्करोम्यहम् ॥१३॥ इतितद्वचनंश्रुत्वाप्रोचतुस्तौनिजेप्सितम् ॥ कबीरोपिततःप्राहनाहंयोग्योगुरुर्हिवाम्॥ १४॥ ज्ञात्वाम्लेच्छोस्मियुवयोःकथंस्यांक्षत्रजन्मनोः ॥ इतिश्रुत्वाकबीरस्यवचस्तौपुनरूचतुः ॥ १५ ॥ नावांज्ञातिवशौभक्तत्यक्त्वासर्व मशेषतः ॥ गृहीतौवैभवत्पादौसर्वंसत्यंनसंशयः ॥ १६ ॥ कबीरंनकथंचित्तौयदातत्यजतुस्तदा ॥ सोपिरामेतिनामैवतावप्युपादि देशह ॥ १७ ॥ प्राहतौयुवयोःकष्टंयदाज्ञातिकृतंभवेत् ॥ तदामत्सन्निधौकाश्यामागंतव्यंनसंशयः ॥ १८ ॥ तदोपायंकरिष्यामि भवतोःकष्टवारणे ॥ इत्युक्त्वातुगतःकाशींकबीरोज्ञानिनांवरः ॥ १९ ॥ तावपिस्वगृहेरामनामस्मरणतत्परौ ॥ निवसंतौततःका लेज्ञातौज्ञातिजनैरपि ॥ २० ॥ तत्राजीवेत्युभौशिष्यौकबीरस्यबभूवतुः ॥ तदातिरस्कृतौसर्वैर्ज्ञातिभिश्चप्रकोपितैः ॥ २१ ॥ भवंतौम्लेच्छशिष्यौयज्जातौक्षत्रियवंशजौ ॥ ततोज्ञातेर्बहिर्भूतौतिष्ठतांनीचजातिवत् ॥ २२ ॥ इत्युक्त्वातौपरित्यज्यसर्वेतद्ग्रामवा सिनः ॥ निंदंतस्तौतिरश्चक्रुस्तत्वाजीवेत्युभावपि ॥ २३ ॥ ततस्तौपरमक्लिष्टौग्रामेसर्वैस्तिरस्कृतौ ॥ कन्यापुत्रविवाहेनौकथंस्या दितिदुःखितौ ॥ २४ ॥ एकस्यैकासुतान्यस्यपुत्रएकस्तयोःकथम् ॥ भविष्यतिविवाहोत्रग्रामेत्वितिविचिंत्यतौ ॥ २५ ॥स्मृत्वागु रुवचःकाशींगतौपरमदुःखितौ ॥ कबीरंप्राहतुर्भक्त्याकष्टंज्ञातिजनैःकृतम् ॥२६॥ कन्यापुत्रविवाहोनैकथंस्यादित्यवोचताम्॥ श्रुत्वा तयोर्वचःकष्टंकबीरःप्राहतौमुदा ॥ २७ ॥ कन्यैकायुवयोर्मध्येपुत्रश्चैकश्चवर्तते ॥ तयोरेवविवाहस्ययोगःकार्योऽविचारतः ॥ २८॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततस्तेज्ञातयःसर्वैरामचंद्रकृपाबलात् ॥ स्वयंनिवर्तयिष्यंतिग्रहीष्यंतिस्वयंतुतौ ॥ २९ ॥ इतिश्रुत्वाकबीरस्यवचनंतौमुदान्वितौ ॥
आगत्यस्वगृहेकन्यापुत्रयोरुभयोस्तयोः ॥ ३० ॥ विवाहस्यचचक्रातेसमुद्योगंप्रहर्षितौ ॥ ततोज्ञातिजनैर्ज्ञातोविवाहस्तूभयोस्त
योः ॥ ३१ ॥ आगत्यप्रत्यषिध्यंतकुरुथःकिंजुगुप्सितम् ॥ तदातौप्राहतुर्ज्ञातीन्किंकुर्वोयत्पृथक्कृतौ ॥ ३२ ॥ भवद्भिश्चततोम्लेच्छ
धर्ममेवाश्रयावहे ॥ इतिश्रुत्वाततस्तेतुप्राहुर्ज्ञातिजनास्तुतौ ॥ ३३ ॥ गत्वास्वभवनेसर्वैर्विचार्य्यप्रातरेवहि ॥ वदिष्यामोवयंयद्वां
युवांतद्वैकरिष्यथः ॥ ३४ ॥ इत्युक्त्वातेगताःसर्वेज्ञातयोनिजमंदिरे ॥ नविचारेसमायातंतयोःसंग्रहणंतदा ॥ ३५ ॥ रात्रौस्व
प्नेथहनुमांस्ताञ्ज्ञातीनिदमब्रवीत् ॥ तत्वाजीवेत्युभौभक्तौश्रीरामस्यनसंशयः ॥ ३६ ॥ मंत्रंजगृहतुर्म्लैंच्छात्तेनत्यागमहोगतौ ॥
प्रातस्तुतद्गृहेयोवैनभोक्ष्यतिममाज्ञया ॥ ३७ ॥ तमहंनाशयिष्यामिभक्तनिंदापरायणम् ॥ एवंदृष्ट्वातुतेस्वप्नंप्रातरुत्थायसं
स्थिताः ॥ ३८ ॥ एकत्रमंत्रयामासुर्गंतव्यंनात्रसंशयः ॥ इतिनिश्चित्यमनसासर्वेतेज्ञातयस्तदा ॥ ३९ ॥ तत्वाजीवागृहेभ्येत्यप्रो
चुश्चविनयान्विताः ॥ अहोयुवाभ्यांनैवेदंकर्तव्यंकर्म्मनिंदितम् ॥ ४० ॥ आयातावयमत्राद्यसंग्रहीतुंनसंशयः ॥ युवयोर्नैवदोषो
स्तिपापमस्माकमेवहि ॥ ४१ ॥ युवांविनापराधेनयज्ज्ञातिभ्योबहिष्कृतौ ॥ भोजयास्मानिदानींत्वंक्षम्यतांदुष्कृतंहिनः ॥४२॥
इतितेषांवचःश्रुत्वाज्ञातीनांप्रेमवर्द्धनम् ॥ तत्वाजीवौप्रमुदितौप्रोचतुस्तान्विनीतवत् ॥ ४३ ॥ तिरस्कृतौभवद्भिश्चपुनरेवानुकं
पितौ ॥ आवामाज्ञाकरौनित्यंयुष्माकंनात्रसंशयः ॥ ४४ ॥ इत्युक्त्वास्वगृहेपाकंकारयित्वाथतान्पुनः ॥ भोजयामासतुर्ज्ञातीं
स्ततस्तौतेब्रुवन्वचः ॥ ४५ ॥ अतःपरंवांश्रुतयोर्विवाहोस्माभिरुच्यते ॥ यत्रतत्रैवकर्तव्यःकुरुतंनान्यगर्हितम् ॥ ४६ ॥ इति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रुत्वावचस्तेषांतत्वाजीवौप्रहर्षितौ ॥ युष्माकंतनयावेतौयथेच्छथतथाऽस्तुभोः॥४७॥इत्युक्त्वाज्ञातिवचनात्कन्यायाश्चसुतस्यच ॥ विवाहोभून्महोत्साहाद्यथायोग्यकुलेनतु ॥ ४८॥ एवंतौरामभक्तौतुतत्वाजीवेतिनामकौ ॥ यावज्जीवंसाधुसेवानिरतौवैष्णवोत्तमौ ॥४९॥ अंतेसंप्रापतुःस्वर्गंरामनामप्रसादतः ॥ निवसंतावपिगृहेभक्तिरेवहिकारणम् ॥ ५० ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येतत्वाजीवाचरितंनामषण्णवतितमःसर्गः ॥ ९६ ॥ छ ॥ ॥ अथमाधवदासस्यकथांवक्ष्येमनोरमाम् ॥ यस्यस्मरणमात्रेणकृष्णभक्तिमवाप्नुयात् ॥ १ ॥ बभूवचोत्कलेदेशेविप्रोमाधवसंज्ञकः ॥ स्त्रीपुत्रधनमित्रादौमहासक्तःसमाकुलः ॥ २ ॥ निनायबहुवर्षाणिवयसासजरांगतः ॥ एकदासगतःक्वापिकार्यार्थंनगरांतरे ॥ ३ ॥ कृत्वाकार्य्यमथैकाकीसमागच्छन्पथिस्थितः ॥ तरुच्छायामुपाश्रित्यश्रमापनयनायसः ॥४॥ अथदैववशात्तस्यसमुत्पन्नामहाव्यथा ॥ उदरेतुक्षणेनैवमूर्च्छांप्रापसवैद्विजः ॥५॥ निश्चेष्टोनिपतन्भूमौमुहूर्तादुत्थितःपुनः ॥ अहोकिंजातमितिसंचिंतयामासचेतसि ॥ ६ ॥ अद्यास्मिन्निर्जनेस्थानेक्वमेपुत्राःसुहृत्स्त्रियः ॥ दुःखितस्यचसाहाय्यंकर्तुमत्रसमागताः ॥ ७ ॥ प्राग्जन्मकर्म्मणैवाहंजीवितोनात्रसंशयः ॥ अथवापश्यतांतेषांमयियद्भावितद्भवेत् ॥ ८ ॥ नत्वस्यवारणंकोपिकर्तुमर्हतिभूतले ॥ मयिपश्यतिमेपुत्राःकातिधादुःखमाप्नुवन् ॥ ९ ॥ किंचावश्यंहिमर्तव्यमेकस्मिन्दिवसेमया ॥ तदाक्वमेसुताःक्वाहंक्वायंस्नेहोगमिष्यति ॥ १० ॥ अपिचाद्यावधिकृतंसुखंवैषयिकंतथा ॥ जरयाशक्यतेनैवकर्तुंतदपिवैमया ॥ ११ ॥ तस्माद्वृथैवमोहोयंकदर्थयतिमामिह ॥ इतोपिस्थावरावस्थायदायास्यातिमेपुनः ॥ १२ ॥ तदामंदादरोभूत्वाशोचिष्येनात्रसंशयः ॥ दृश्यंतेहिमहावृद्धाःसर्वत्रशिथिलादराः ॥ १३ ॥ तस्माद्द्यैवभवनाद्बहिर्गत्वाक्वचित्स्थितः ॥ परलोकहितार्थायकरिष्येस्मरणंहरेः ॥ १४ ॥ इति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

निश्चित्यविप्रोसौमाधवःस्वगृहंगतः ॥ स्नात्वाभुक्त्वासुतान्पत्नींसुहृदःप्राहहृष्टवत् ॥ १५ ॥ अहोशृणुतमेवाक्यंभवंतोतीवमेप्रियाः॥
तस्मान्मदुक्तमेवात्रस्वीकर्तव्यंमदाज्ञया॥१६॥अद्यावधिगृहेस्थित्वायुष्मदर्थंमयाकृतम्॥शुभाशुभफलंकर्मंमोहग्रस्तेनचेतसा॥१७॥
अतःपरंतुस्वहितंकरिष्यामिनसंशयः ॥ जगन्नाथंस्मरिष्यामिस्थित्वाहंकुत्रचिद्वने ॥१८॥ मृतेमयिनयूयंमेनयुष्माकमहंपुनः ॥ जीवं
तोप्युपकुर्वीतिकिंचिन्नैवपरस्यच ॥ १९ ॥ तस्माद्द्यैवगच्छामियूयंतिष्ठतस्वेगृहे ॥ इत्युक्त्वामाधवोविप्रःप्रतस्थेनिजमंदिरात्
॥ २० ॥ अथतेबांधवाःसर्वेवारयन्तस्तमन्वयुः ॥ नामन्यतसकस्यापिगतएवयदृच्छया ॥ २१ ॥ तेपिसर्वेपरावृत्यसमायातानिकेत
नम् ॥ माधवोपिप्रहृष्टात्मानीलाचलमुपागतः ॥ २२ ॥ तत्रगत्वाद्रिपार्श्वस्थगुहायामास्थितोभवत् ॥ निराहारोदकोदेवंजगन्नाथं
विचिंतयन् ॥ २३ ॥ जातेदिनत्रयेतस्यनिराहारोदकस्यच ॥ तदातुष्टोजगन्नाथःप्रसन्नोभूद्द्विजस्यसः ॥ २४ ॥ चतुर्थेदिवसेप्राप्ते
निशायांशयनक्षणे ॥ लड्डुकानिसुवर्णस्यस्थाल्यांकृत्वाहिपूजकाः ॥ २५ ॥ जगन्नाथायदत्त्वातेमुद्रयित्वाकपाटकम् ॥ सुषु
पुःस्वगृहेसर्वेयथान्यदिवसेतथा ॥ २६ ॥अथश्रीभगवाँल्लक्ष्मीमुवाचकरुणामयः ॥ इदंलड्डुकनैवेद्यंनीत्वानीलाचलेत्वहम् ॥२७॥
दातुंमाधवभक्तायगत्वायास्यामिसांप्रतम् ॥ सतुसर्वंपरित्यज्यस्त्रीपुत्रधनबांधवम् ॥ २८ ॥ दिनत्रयंनिराहारःस्मरतेमामनन्यभाक् ॥
तस्मात्तस्यैवदातव्यमिदमस्मिन्क्षणेमया ॥ २९ ॥ इतिश्रुत्वावचस्तस्यलक्ष्मीःप्राहकृतांजलिः ॥ नाथाहमेवगच्छामिदत्त्वायास्या
मिवैद्रुतम् ॥ ३० ॥ इत्युक्त्वास्वर्णपात्रंतत्सलड्डूकंकरेणसा ॥ गृहीत्वास्त्रीस्वरूपंचकृत्वातत्रययौरमा ॥ ३१ ॥ गत्वामाधवदास
स्यसमीपेप्राहसादरम् ॥ गृहाणेदंसलड्डूकंपत्याहंप्रेषिताद्रुतम् ॥ ३२ ॥ तवभोजनदानायेत्युक्त्वातद्भाजनंरमा ॥ लड्डूकपूर्णंतस्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ग्रेप्रणिधायससमागता ॥ ३३ ॥ तदामाधवदासोपिमत्वाह्यदिहरेःकृपाम् ॥ बुभुजेतानिसर्वाणिपात्रंतत्रैवस्थापितम् ॥ ३४ ॥ अथप्रातः
समुत्थायजगन्नाथस्यपूजकाः ॥ पूजांकर्तुंमठेजग्मुर्ददृशुर्नैवभाजनम् ॥३५॥ सलड्डूकंतदोद्विग्नाःकश्चौरोत्रसमागतः ॥ कपाटस्ताद्दृशो
लग्नोस्माभिरुद्घाटितस्तथा ॥ ३६ ॥ कथंचौरःसमायातोमहाश्चर्यमभूदिदम् ॥ सर्वमेतत्तथाराज्ञेदुःखिताअब्रुवञ्जनाः ॥ ३७ ॥ राजा
पिचारान्सर्वत्रप्रेषयामासचिंतितः ॥ पूजकाअपिसर्वत्रचौरंज्ञातुंसमंततः ॥३८॥ गताअन्वेषमाणास्तेवनेग्रामेचपर्वते ॥ नीलाचलगताः
केचिच्चौरदर्शनकांक्षिणः ॥३९॥ ददृशुःपर्वतेतत्रमाधवंमीलितेक्षणम् ॥ तदग्रेस्वर्णपात्रंतद्दृष्ट्वासर्वेतिहर्षिताः॥४०॥ अहोनेनैवतुहृतंपात्रं
देवस्यनान्यथा ॥ इत्युक्त्वाजगृहुःपात्रंबबंधुर्माधवंरुषा ॥ ४१ ॥ नीत्वायाताःस्वनगरेताडयामासकोपितम् ॥ माधवस्तुततस्तूष्णीं
स्थितःप्राक्कर्मजंस्मरन् ॥४२॥ पृष्ठेभग्नास्त्वचस्तस्यशोथःसंताडनादभूत् ॥ दयालुरेकस्तन्मध्येवारयामासताडनम्॥४३॥ अथसायं
जगन्नाथंतर्पयंतोजनास्तदा ॥ पृष्ठेमूर्तेस्त्वचोभग्नाःशोथंवैददृशुर्हरेः॥४४॥ दृष्ट्वासर्वेमहाश्चर्यंचिंत्यमानाभयान्विताः॥किंजातमितिशो
केनत्यक्ताशनजलानिशि॥४५॥ सुषुपुःखिन्नमनसस्ततःश्रीपुरुषोत्तमः ॥ स्वप्नेतान्प्राहभोविप्रामाधवोतीवमेप्रियः ॥४६ ॥ नीलाचले
स्थितस्तस्मैसलड्डूकंतुभाजनम् ॥मयैवप्रेषितंतस्मान्नायंचौरोहिमाधवः॥४७॥ तस्ययत्ताडनंपृष्ठेकृतंयुष्माभिरत्रभोः ॥ तेनमेपृष्ठदे
शेऽद्यशोथोभेदस्त्वचामभूत् ॥ ४८ ॥ नान्यःकोपिचमेजातोदोषःपृष्ठेक्षतप्रदः ॥ एवंदृष्ट्वानिशिस्वप्नंपूजकास्तत्क्षणंशुभम् ॥ ४९ ॥
उत्थायतंमहाभक्तंमुमुचुर्बंधनादद्भुतम् ॥ मुक्त्वाप्रणेमुस्तेसर्वेस्नापयित्वाशुभांभसा ॥ ५० ॥ भोजयित्वातिभक्त्यातंददुरास्तर
णंशुभम् ॥ उपचारान्प्रचक्रुस्तेशोथक्षतनिवृत्तये ॥ ५१ ॥ एवंमाधवदासस्तुभक्तस्तत्रबभूवसः ॥ उवासश्रीजगन्नाथक्षेत्रेचकतिचि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हिनम् ॥५२॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येमाधवचरितंनामसप्तनवतितमःसर्गः ॥ ९७ ॥ ॥ छ ॥ ॥ एकदानिशिपूजायांज गन्नाथस्यसन्निधौ ॥ गतोमाधवदासस्तुदध्यौस्थित्वाक्वचिन्मठे ॥ १ ॥ अथतेपूजकाःसर्वेतमदृष्ट्वातुमाधवम् ॥ द्वाराद्बहिःसमागत्य कपाटंप्रददुर्मठे ॥ २ ॥ अथमाधवदासस्तुध्यानशेषेसमुत्थितः ॥ बहिर्गंतुंमनश्चक्रेतत्रद्वारंचमुद्रितम् ॥ ३ ॥ निवृत्यतन्मठएवभू मौसुष्वापदृष्टवत् ॥ अथतस्यमहाशीतमभूत्कंपोनभूवह ॥ ४ ॥ दृष्ट्वातंवेपमानंचजगन्नाथःकृपामयः ॥ वैष्णवस्यस्वरूपेणस्वव स्त्रंतूलगर्भितम् ॥ ५ ॥ तस्योपरिददौप्रीत्यामाधवस्यत्वरान्वितः ॥ ततोमाधवदासस्तुसुखंसुष्वापवैनिशि ॥ ६ ॥ प्रातःसमाग ताःसर्वेपूजकाददृशुश्चतम् ॥ कोसिरेभगवद्वस्त्रंसमासाद्यस्वपिष्यहो ॥ ७ ॥ इत्युक्तःप्रोत्थितःसोपिदृष्ट्वापूजकमब्रवीत् ॥ निजपू जाक्षणेहंतुमठेस्वस्थितोभवम् ॥ ८ ॥ मुद्रयित्वामठद्वारंभवंतस्तुगताद्रुतम् ॥ ततोत्रैवमयासुप्तंशीतंलग्नंमहन्मम ॥ ९ ॥ ततए कोतिपुण्यात्मावैष्णवस्तूलिकामिमाम् ॥ तूष्णींप्रच्छाद्यमेंगानिनिर्जगामयदृच्छया ॥ १० ॥ शीतवारणतोहंतुनजानेनिद्रयान्वितः ॥ भवद्भिरेवेदानींतुसहसोत्थापितोस्मिभोः ॥ ११ ॥ इतिश्रुत्वावचस्तस्यज्ञात्वातंमाधवंतथा ॥ प्रणम्योचुर्नतेऽसाध्यंकिंचिन्नःक्षम्यतां प्रभो ॥ १२ ॥ इत्युक्त्वातेर्चनंचक्रुर्माधवोपिमठाद्बहिः ॥ जगामविचरंस्तत्रस्वेच्छयामठसन्निधौ ॥ १३ ॥ एवमेकदिनेजातमपरं शृणुतस्यवै ॥ भक्तिमाहात्म्यमखिलंशृण्वतांभक्तिवर्धनम् ॥ १४ ॥ एकदासययौदैवान्माधवोहीतरस्थले ॥ शूलरोगःसमुत्पन्नस्त स्यातीवसुदारुणः ॥ १५ ॥ आमशूलेनतेनासौव्यथितोभून्मुहुर्मुहुः ॥ बभूवरेचनंतस्यदौर्बल्यात्पतितोभुवि ॥ १६ ॥ भूमौ निपतितस्तस्यदिनंसर्वंसमभ्यगात् ॥ निशायामथसस्मारजगन्नाथंकृपामयम् ॥ १७ ॥ म्रियेहमितिबुद्ध्यासजगन्नाथस्तदास्वयम् ॥ सत्व

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रंजलमादायसमायातस्तदंतिके ॥१८॥ प्रक्षाल्यांगंजलेनास्यभोजयित्वान्नमुत्तमम् ॥ नेतुंमठसमीपेतुयत्नवानभवद्धरिः ॥१९॥ अथ माधवदासस्तुप्राहज्ञात्वातिभक्तितः ॥ अहोकिमेवंकुरुषेममांगपरिशोधनम् ॥२०॥ इतिश्रुत्वावचस्तस्यप्राहभक्तस्वरूपिणम् ॥ अहो त्वंतुममैवात्माशरीरंतेपरंमम॥२१॥स्वदेहशोधनंसर्वैःक्रियतेतत्रकाघृणा ॥ इतिश्रुत्वापुनःप्राहमाधवोभक्तरूपिणम्॥२२॥यद्येवंमन्यसे नाथकथंदुःखंददासिमे ॥ यतस्त्वयाप्यकर्तव्यंक्रियतेकर्ममत्कृते ॥ २३ ॥ तदाश्रुत्वावचःप्राहभक्तरूपधरोहरिः ॥ अद्यावधिस्थि तंदुःखंप्रारब्धंतेपुराकृतम् ॥ २४ ॥ तस्यभोगोयमभवन्नतेदुःखमतःपरम् ॥ भविष्यतिनसंदेहःसमागच्छमयासह ॥ २५ ॥ त तोमाधवदासस्तुबलवानभवत्क्षणात् ॥ तेनैवसाकमागत्यसमायातोमठांतिके ॥ २६ ॥ तत्रैवनिवसन्देवंचिंतयानोदिवानिशम् ॥ निनायबहुवर्षाणिपलवन्मुदितात्मना ॥ २७ ॥ एकदामाधवोभक्तोनिवसन्नत्रैवपुरे ॥ भिक्षामादायभोक्तव्यमितिकृत्वान्नतंतुसः॥२८॥ पर्य्यटन्नगरेनित्यंभिक्षामादायसर्वतः ॥ भुक्त्वोवाससुखीतत्रचैकस्मिन्दिवसेसतु ॥ २९ ॥ स्थितैकातत्रनगरेमहाचंडातिकर्कशा॥ महाधनवतीदुष्टादानभोगविवर्जिता ॥ ३०॥ तस्यागृहंगतोभक्तोमाधवोन्नंचभिक्षितुम् ॥ भिक्षांचमांप्रदेहीतिप्रोच्चचाराविदूरतः॥३१॥ श्रुत्वापिनचशुश्रावलिपंतीचांगणंनिजम् ॥ पुनःप्रोवाचदेहीतिश्रुत्वासाथप्रदुद्रुवे ॥ ३२ ॥ उत्थाप्यदक्षिणंहस्तंलेपिन्यासहितंरुषा ॥ ततोदृष्ट्वातुतांचंडींहंतुकामांभयंकरीम् ॥ ३३ ॥ पलायित्वागृहद्वाराद्बहिरागत्यसंस्थितः ॥ तत्रापिसासमायाताहंतुंतंसोपिचद्रुत म् ॥ ३४ ॥ पलायनंचकाराथसातुतामेवलेपिनीम् ॥ तमुद्दिश्यप्रचिक्षेपसागताथतदंतिकम् ॥ ३५ ॥ माधवस्तुतःशीघ्रंपरा वृत्यसलेपिनीम् ॥ गृहीत्वादुद्रुवेभक्तःकर्कशापिन्यवर्तत ॥ ३६ ॥ गालिदानंप्रकुर्वतीक्रोधेनस्फुरिताधरा ॥ अथमाधवदासस्तु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

साधुभावात्सतांस्त्रियम् ॥ ३७ ॥ उपकर्तुंमनश्चक्रेगत्वोदधितटेस्वयम् ॥ प्रक्षालनैश्चबहुभिःशुक्लीकृत्यचलेपिनीम् ॥ ३८ ॥ शो
षयित्वातपेवर्तीर्विधायबहुशस्ततः ॥ विक्रीयकतिचित्तस्यक्रीत्वाज्यमार्तिकांस्ततः ॥ ३९ ॥ दीपान्निर्माय संध्यायांश्रीजगन्नाथमं
दिरे ॥ प्रज्वाल्यप्रददौप्रेम्णासंकल्पंमनसाकरोत् ॥ ४० ॥ तस्यास्त्वंभोजगन्नाथसुप्रसन्नोभवप्रभो ॥ अज्ञानतिमिरांधायाज्ञानंभव
तुनिर्भयम् ॥ ४१ ॥ दानेतस्यामतिर्भूयादिहजन्मनिसर्वदा ॥ उपभोगोधनस्यास्यदीपदानप्रसादतः ॥ ४२ ॥ एवंसंकल्प्यप्रद
दौदीपांस्तत्रमठेद्विजः ॥ तत्क्षणादेवतस्यास्तुपश्चात्तापोमहानभूत् ॥ ४३ ॥ उत्पन्नंहृदिविज्ञानंवृथैवेदंधनंमम ॥ नददामिहि
शिष्टेभ्योनभुंजामिस्वयंपुनः ॥ ४४ ॥ अथैकःसाधुरायातस्तस्मैगालिमदामहम् ॥ अतोमत्सदृशीलोकेनान्यादुर्भाग्यशालिनी ॥ ४५ ॥
धिङ्मांमूर्खांयदेतावद्धनंप्राप्यापिपुष्कलम् ॥ नदीयतेभुज्यतेवातस्माज्जन्मैवमेवृथा ॥ ४६ ॥ इतिचिंतापरारात्रौलेभेनिद्रांनकर्कशा ॥
प्रातरुत्थायसंमार्ज्यगृहद्वारंतथांगणम् ॥ ४७ ॥ अन्नादिवस्त्रद्रव्याणिनिष्कास्यस्वगृहात्तुसा ॥ दीनानाथदरिद्रेभ्यःसाधुभ्यो
ददतीमुदा ॥ ४८ ॥ चिंतयामासमनसाकदापश्यामितादृशम् ॥ यस्मैगालिर्मयादत्तायाचमानायसाधवे ॥ ४९ ॥
मिलिष्यतियदादैवात्तोषयिष्यामिसर्वथा ॥ एवंचित्तेचिंतयंतीद्वारदेशेसमागतः ॥ ५० ॥ अथमाधवदासस्तुज्ञातुंतच्चेष्टितंपुनः ॥
आयातस्तेनमार्गेणकर्कशापिददर्शतम् ॥ ५१ ॥ दूरादागत्यन्यपतत्पादयोरतिभक्तितः ॥ क्षमस्वाद्यापराधान्मेमूर्खायास्त्वंदयानि
धे ॥ ५२ ॥ यत्पूर्वंदुर्मयादत्ताग।लयस्तेनिरागसे ॥ अद्यागच्छगृहेनाथदयांकुरुममोपरि ॥ ५३ ॥ इत्युक्त्वातंकरेधृत्वाानिनायनिजमं
दिरे ॥ सोपिमत्वादीपदानमाहात्म्यंतद्गृहेगतः ॥ ५४ ॥ तद्दिनेसर्वमन्नादिस्वीकृत्यप्रददौस्वयम् ॥ उवाचतस्यैमातस्त्वंसाधुसेवा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

परायणा ॥ ९५ ॥ हरिभक्तिरताभूत्वासमुद्धरकुलंनिजम् ॥ इत्युक्त्वानिर्ययौतस्यगेहात्समाधवोद्विजः ॥९६॥ ब्राह्मणीसापिसत्कर्म्म
निरताभक्तिमत्यभूत् ॥ भुक्त्वाभोगानशेषांश्चमृताहरिपुरंययौ ॥९७॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येमाधवचरितंनामाष्टनवतितमः
सर्गः ॥ ॥ ९८ ॥ छ ॥ ॥ अपरंभक्तिमाहात्म्यंवक्ष्यामिपरमाद्भुतम् ॥ श्रीमन्माधवदासस्यशृण्वतांप्रीतिवर्द्धनम् ॥ १ ॥ एकदामा
धवोयात्रांकुर्वन्काशीमुपागतः ॥ तत्रकृत्वाऽखिलांयात्रामुवासकतिवत्सरान् ॥ २ ॥ एकदातत्रचायातःशास्त्रीकोप्यतिहर्षितः ॥ म
यापराजिताःसर्वेकाशींजेतुमितोगतः ॥३॥ इत्येवंभाषमाणस्सपंडितानांसदोगतः ॥ तत्राप्युवाचसर्वांस्तान्पंडितानतिगर्वितः ॥ ४ ॥
अहंजेतुंसमायातोयुष्मान्नैवात्रसंशयः ॥ विवदध्वंमयासार्द्धंनोचेत्पत्रंप्रयच्छथ ॥ ५ ॥ इतिश्रुत्वावचस्तस्यमहाहंकारसंयुतम् ॥ उपहा
सपराःसर्वेपंडितास्तमथाब्रुवन् ॥ ६ ॥ अहोनैवत्वयासार्धंसर्वेविवदितुंक्षमाः ॥ अस्त्येकःपंडितःकाश्यांविदुमाधवसान्निधौ ॥७॥ नाम्ना
माधवदासस्तुसिद्धःसर्वज्ञएवसः ॥ तत्रतेनविवादेतुयदितस्यपराजयः ॥ ८ ॥ तदावयंजिताएवभवतानात्रसंशयः ॥ तस्मात्तन्निकटेग
च्छमाधवस्यद्विजोत्तम ॥ ९ ॥ इतिश्रुत्वावचस्तेषांपंडितानांसवैद्विजः ॥ ययौमाधवदासस्यसन्निधिंतत्रचाब्रवीत् ॥ १० ॥अहंजित्वा
खिलांपृथ्वींकाशींजेतुमिहागतः ॥ अत्रत्याःपंडितास्सर्वेत्वामाहुःशास्त्रवित्तमम् ॥११॥त्वज्जयेजयिनःसर्वेविजितास्त्वत्पराजये ॥ अत
स्त्वंविवदस्वाद्ययथाशक्तिमयासह ॥१२॥ नोचेत्पराजितोनेनपंडितेनेतिपत्रकम् ॥ लिखित्वादेहिमेयामिदर्शयित्वाचतान्गृहम्॥१३॥
श्रुत्वामाधवदासस्तुतदुक्तमतिहर्षितः ॥ लिखित्वाजयपत्रंवैतस्मैपंडितमानिने ॥१४॥ अयच्छत्सोथनीत्वातद्दर्शयामासताञ्जनान् ॥
सर्वेतत्रतुविद्वांसोददृशुःपत्रमुत्तमम् ॥ १५ ॥ जितोमयापंडितोयमित्यक्षरपरिस्फुटम् ॥ ततस्तेजहसुःसर्वेतंद्विजंप्राहुरादरात् ॥१६॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अहोत्रलिखितंचान्यद्भवान्ब्रूतेतदन्यथा ॥ इतिश्रुत्वावचस्तेषांनीत्वापत्रंद्विजःसतु ॥ १७ ॥ परावृत्यगतस्तत्रयत्रासीन्माधवःसतु ॥
दृष्ट्वामाधवदासंतुभर्त्सयन्निदमब्रवीत्॥१८॥अहोधैर्यंसमालंब्यकिमिदंवंचितस्त्वया ॥विपरीतप्रलेखोयंलिखितोयस्त्वयापुनः ॥१९॥
तस्यदंडंप्रदास्यामिभवतोनात्रसंशयः ॥ विवादःक्रियतामद्यपणस्तत्रनिशम्यताम् ॥२०॥ यश्चावयोर्विवादेतुन्यायतःस्यात्पराजितः॥
गर्दभारोहणंतस्यपणश्चातःपरंध्रुवम् ॥२१॥ श्रुत्वामाधवदासस्तुद्विजंप्राहविनीतवत् ॥ भवदुक्तंकरिष्यामिसर्वंनास्त्यत्रसंशयः॥२२॥
परंतुस्नात्वागंगायामागमिष्याम्यहंद्रुतम् ॥ इत्युक्त्वामाधवोभक्तोजगन्नाथंस्मरन्हृदि ॥२३॥ जगामजाह्नवीतोयेस्नातुंचिंतासमाकुलः ॥
अथमाधवदासस्यशिष्यरूपधरोद्विजः ॥ २४ ॥ हरिरेवागतस्तत्रविवादायद्विजेनवै ॥ खरारोहपणंकृत्वाविवादमकरोद्द्विजः ॥ २५ ॥
अथतत्रसमायाताःकतिचित्पंडिताजनाः ॥ मध्यस्थास्तेतयोर्वादंदृष्ट्वापरमविस्मिताः ॥ २६ ॥ साधुसाध्वितितेप्रोचुर्ज्ञात्वोभौशा
स्त्रवित्तमौ ॥ अथमाधवदासस्यशिष्यरूपधरेणच ॥ २७ ॥ पराजितोद्विजःशास्त्रीयःकाशींजेतुमागतः ॥ स्वयंचापिसमेनेचजितोहं
नात्रसंशयः ॥ २८ ॥ खरमारोढुमुद्युक्तोद्विजस्तत्कालमेवहि ॥ श्रीमन्माधवदासस्तुस्नात्वायातोददर्शतम् ॥ २९ ॥ द्विजंनिवारया
मासगर्दभारोहणात्स्वयम् ॥ भर्त्सयामासशिष्यंचकिंविप्रमवमन्यसे ॥ ३० ॥ इत्युक्तःसोथशिष्यस्तुतूष्णींस्थित्वाबहिर्गतः ॥
अंतर्दधेसभगवांस्तस्याशिष्यस्तुयःस्थितः ॥ ३१ ॥ सोपितत्रसमायातःश्रुत्वाद्रष्टुंमहाद्भुतम् ॥ अथसर्वेसमायाताःश्रुत्वैतदद्भु
तंमहत् ॥ ३२ ॥ द्रष्टुंमाधवदासस्यशिष्यंशास्त्रविदंजनाः ॥ ददृशुस्तंमहामूर्खंशिष्यंप्राहुर्जनास्तुतम् ॥ ३३ ॥ कथंत्वया
जितःशास्त्रीकुत्रवादोबभूवते ॥ इतिपृष्टस्तुतैःसर्वैःप्राहशिष्योहसन्निव ॥ ३४ ॥ किंब्रुवंतिभवंतोवैभ्रांताइवविचेतसः ॥ योहमा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जन्मतोनैवजानेक्षरमपिध्रुवम् ॥ ३५ ॥ सोहमेतस्यशास्त्रस्यविषयःस्यांकथंपुनः ॥ इतिश्रुत्वावचःसर्वैसत्यंमत्वातिविस्मिताः ॥ ३६ ॥ मत्वामाधवभक्तेस्तुमाहात्म्यंस्वगृहंययुः ॥ सोपिविप्रस्तुतत्कालंज्ञात्वैतत्परमाद्भुतम् ॥ ३७ ॥ स्तुत्वामाधवदासंतुजगामनिजमंदिरम् ॥ एवंमाधवदासस्यभक्त्याश्रीपुरुषोत्तमः ॥ ३८ ॥ वशीभूत्वास्थितोनित्यंसदैवसप्तहायनः ॥ श्यामःकमलपत्राक्षोभक्तानांदृष्टिगोचरः ॥ ३९ ॥ परंतुमाधवोनैवतंददर्शहरिंदृशा ॥ एकदामथुरायांससमागच्छन्पथिस्थितः ॥ ४० ॥ विश्रामायतरोर्मूलेतस्थौसोतिपिपासितः ॥ तत्रैकांसमहावृद्धांददर्शातिदयान्विताम् ॥ ४१ ॥ वैष्णवींपथिकेभ्यस्तुददतीमन्नमंबुच ॥ सादृष्ट्वातंमहाभक्तंपरिश्रांतंक्षुधार्दितम् ॥ ४२ ॥ तंचापिश्यामलंबालंपद्माक्षंचपिपासितम् ॥ शीघ्रंजलंसमादायददौतस्मैसुचर्व्वणम् ॥ ४३ ॥ अथतंबालकंदृष्ट्वाशुशोचातीवदुःखिता ॥ कस्यास्त्वंमंदभाग्यायाईदृक्पुत्रोवियोजितः ॥ ४४ ॥ कथंजीवतिसावत्सयस्यास्त्वंचसुहृत्सुतः ॥ इत्येवंशोचमानांतांमाधवोवाक्यमब्रवीत् ॥ ४५ ॥ किंशोचसिमहावृद्धेकथयस्वममाग्रतः ॥ इतिश्रुत्वाब्रवीद्वृद्धायस्याएषसुतःशुभः ॥ ४६ ॥ त्वयावियोजितोभक्तताशोचाम्यतिदुर्भगाम् ॥ इतितस्यावचःश्रुत्वामिथ्यामत्वासमानसे ॥ ४७ ॥ विवेदैषाजरादोषादसंम्यग्भाषतेवचः ॥ इतिनिश्चित्यभक्तःसमाधवोनिजसंमुखे ॥ ४८ ॥ दत्त्वासनंजगन्नाथमुपवेश्यजलंददौ ॥ पादप्रक्षालनंचक्रेमनसातुसमाधवः ॥ ४९ ॥ भोजनार्थंसपात्रंचतदग्रेसंन्यवेशयत् ॥ ततोवृद्धार्पितंतत्रचर्वणंहरयेमुदा ॥ ५० ॥ अर्पयामासमनसासबालोबुभुजेमुदा ॥ सावृद्धातुपुनर्दृष्ट्वाबालंसकरुणंद्विजम् ॥ ५१ ॥ प्रोवाचमाधवंभक्तराजंस्तुतिपुरःसरम् ॥ तत्साधुनात्रसंदेहोयत्पूर्वंशिशुवेऽधुना ॥ ५२ ॥ सर्वसमर्प्यतत्पश्चात्स्वयमन्नादिभुज्यते ॥ एवंसाश्री

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हरेर्मायामोहिताजरतीह्यदि ॥ ९३ ॥ अमन्यततुवृद्धायादत्तमन्नंसवैष्णवः ॥ भुक्त्वाशुहरिणासार्द्धंययौतत्स्थलतोग्रतः ॥ ९४ ॥
॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येमाधवदासचरितंनामनवनवतितमःसर्गः ॥ ९९ ॥ ॥ छ ॥ ॥ अथतस्माद्व्रजन्स्थानान्माधवोदि
वसांतरे ॥ मध्याह्नेकुत्रचिद्ग्रामेसमायातोजलांतिके ॥ १ ॥ उपवेश्यहरिंतत्रसंपूज्यान्नंसमार्पयत् ॥ चलितोवैश्यएकस्तुवैष्णवस्त
मुवाचह ॥ २ ॥ साधोममगृहेकिंचिद्भुक्त्वागंतुंततोर्हसि ॥ इत्युक्त्वात्वरितंगंतुंसवैश्योनिर्ययौततः ॥ ३ ॥ दैवान्मार्गेराजभृ
त्यैर्नीतोसौराजमंदिरे ॥ सवैमाधवदासस्तुसमायातोवणिग्गृहे ॥ ४ ॥ तत्रवैश्यसतीदृष्ट्वामाधवंवैष्णवोत्तमम् ॥ हस्तंगृहीत्वानि
न्येसागृहमध्येतिभक्तितः ॥ ५ ॥ तत्रैकश्चस्थितोभक्तोवणिजारक्षितोगृहे ॥ तमाहवैश्यपत्नीसासाधुरेकःसमागतः ॥ ६ ॥ इतिश्रु
त्वावचस्तस्याःसाधुराहसतांस्त्रियम् ॥ नात्रस्थलंद्वितीयस्ययोग्यमस्तीतिसापुनः ॥ ७ ॥ श्रुत्वाचुकोपमनसामाधवंप्राहभक्तितः ॥
अत्रैवभगवंस्तिष्ठहरयेभोगमर्पय ॥ ८ ॥ इतिश्रुत्वावचस्तस्यामाधवस्तामुवाचह ॥ नमेभोक्तुंमनोभद्रेपयःकिंचित्समर्पय ॥ ९ ॥
इत्युक्तासाययौदत्त्वाकृतांजलिपुटास्थिता ॥ माधवोपिपयःपीत्वाकथयित्वास्वनामच ॥ १० ॥ जगाममथुरामार्गेदत्त्वातस्यैसद
शिषम् ॥ त्वंसाध्विपुत्रिणीभूयाःसुभगाधर्म्मतत्परा ॥ ११ ॥ अथवैश्योपिसंप्राप्तःश्रुत्वापत्नीमुखाद्द्रुतम् ॥ गृहास्थितेनभक्तेनसहग
त्वाप्रसादयन् ॥ १२ ॥ निवर्तयितुमारेभेननिवृत्तोबभूवसः ॥ पुत्रेतवसमुत्पन्नेसमेष्यामिनसंशयः ॥ १३ ॥ कृत्वाहंमथुरायात्रांदृष्ट्वा
श्रीकृष्णमद्भुतम्॥आगमिष्यामितेवैश्यसत्वंयाहिनिजंगृहम्॥ १४॥इत्युक्त्वासगतोभक्तोमाधवस्तुयदृच्छया॥वैश्योपिगृहमागत्यसाधु
सेवापरोभवत्॥ १५ ॥ संप्राप्यचाशिषंतस्यजन्मवंध्यापिवैश्यजा॥सुषुवेवैष्णवंपुत्रंवैश्यवंशेयशस्विनम् ॥ १६॥अथमाधवदासस्तुमथु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रायांगतःसुखी॥दृष्ट्वातामथुरांरम्यांमहानंदोममज्जह ॥१७॥ स्नात्वातद्भगवन्मूर्तेःससमीपेस्थितोभवत् ॥ अथतत्रागतःकश्चिद्वैष्णवोतीवभक्तिमान् ॥१८॥ भर्ज्जितंचणकान्नंससर्वेभ्यःप्रददन्मुदा ॥ ददौमाधवदासायसोपिजग्राहभक्तितः॥१९॥ नीत्वातद्यमुनातीरेगत्वापादौविशोध्यच ॥ सोपानोपरिसंविश्यश्रीकृष्णायार्पयच्चतत् ॥ २० ॥ अथतस्मिन्क्षणेभक्तःपूजकस्तुहरेर्मठे ॥ निवेद्यचमहाभोगंबहिरागत्यसंस्थितः ॥२१॥ तावन्माधवदासेनचणकान्नंनिवेदितम्॥स्थाल्यांप्राप्तंचतत्तत्रबुभुजेभक्तवत्सलः ॥२२॥ किंचित्स्थाल्यांस्थितंभुक्तशेषंचणकसंयुतम् ॥ अथतेपूजकाःसर्वेसमागत्यमठेपुनः ॥२३॥ ददृशुश्चणकंस्थाल्यांभर्ज्जितंपरमाद्भुतम् ॥ दृष्ट्वासंशयमापन्नाःकस्मादेतदिहागतम् ॥ २४ ॥ इतिचिंताकुलस्तेषांप्रधानःपूजकोद्विजः ॥ त्यक्त्वातंचणकंचैवसुष्वापनिशिचिंतितः॥ २५ ॥ अथस्वप्नेतुश्रीकृष्णस्तमुवाचहसन्निव ॥ विप्रमाकुरुचिंतांत्वंशृणुतच्चणकागतम् ॥२६॥ नीलाचलादिहायातोममप्राणप्रियोद्विजः॥नाम्नामाधवदासस्तुतेनतत्समयेक्वचित् ॥२७॥ संप्राप्तंचणकंमह्यंसमर्पितमहंतुतम् ॥ भुक्त्वासर्वंततःकिंचित्स्थाल्यांरक्षितवानहम् ॥२८॥ जानीहिसत्यमेतत्त्वंनतेदोषोस्तिकश्चन ॥ इतिस्वप्नंनिरीक्ष्यासौपूजकःप्रातरुत्थितः ॥ २९ ॥ उक्त्वास्वप्नंपूजकेभ्योगतोमाधवसन्निधौ ॥ तमानीयस्वगेहंसपूजकःप्रत्यपूजयत् ॥ ३० ॥ महाप्रसादतःसर्ववस्तुमाधवशर्म्मणे ॥ दत्त्वास्वयंतुबुभुजेपरिवारसमन्वितः॥ ३१ ॥ तदामाधवदासंतेऽमन्यंतातिप्रियंहरेः ॥ भक्तिंचक्रुःसुमहतींमाथुरावैष्णवाजनाः ॥ ३२ ॥ अथैकस्मिन्दिनेभक्तोमाधवःपर्यटन्वने ॥ भांडीरवृक्षनिकटेसमागत्यस्थितोभवत् ॥ ३३ ॥ तत्रासीत्खेमनामैकोभक्तःसिद्धइवापरः॥ तदंतिकेसमागत्यतस्थौतेनचसत्कृतः ॥ ३४ ॥ अथतत्रददर्शासावन्नमाच्छादितंदृढम् ॥ उवाचमाधवःखेमंकिमितिदृढमुद्रितम् ॥ ३५ ॥ इत्युक्तःखेमनामापि

२५

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्राहतंमाधवंद्विजम् ॥ भगवन्नन्नमेतन्मेभोक्तुंदत्तंचसाधुभिः ॥ ३६ ॥ मुद्रयित्वादिवातन्मेस्थाप्यतेनिशिभुज्यते ॥ इतिश्रुत्वा
पुनःप्राहमाधवोवाक्यमद्भुतम् ॥ ३७ ॥ अहोएवंनकर्तव्यंदिवैवभोजनंकुरु ॥ उद्धृत्यतस्मात्साधुभ्योदत्त्वातदवशेषितम् ॥ ३८ ॥
स्वयंभुंक्ष्वनचेदेतदन्नंतुकृमयोध्रुवम् ॥ नमन्यसेचेत्पश्याद्यसमुद्घाट्यपिधानकम् ॥ ३९ ॥ इतिश्रुत्वावचस्तस्यखेमोपिस्वसमुत्थि
तः ॥ उद्घाट्यान्नंददर्शाथकृमीनातिविगर्हितान् ॥ ४० ॥ तदासमेनेखेमोपिस्वकर्म्मैतत्वतिनिंदितम् ॥ तत्याजताहशींवृत्तिंदिवान्नंप्राप्य
भिक्षवे ॥ ४१ ॥ दत्त्वाभक्त्याथबुभुजेतदारभ्यातिभक्तिमान् ॥ खेमोमाधवदासस्यभक्तिंचकृतवान्पराम् ॥ ४२ ॥ एवंमाधवदा
सस्तुमथुरायांकियद्दिनम् ॥ उषित्वावनयात्रायांहरिमन्नगरादिषु ॥ ४३ ॥ शृण्वञ्छ्रीकृष्णचरितमुवासकतिचिद्दिनम् ॥ ततः
कृत्वाखिलांयात्रांनीलाचलमथागमत् ॥ ४४ ॥ मार्गेतस्यतुवैश्यस्यसमागत्यगृहेस्वयम् ॥ कृतार्थीकृत्यतंवैश्यंपुरुषोत्तममु
रंययौ ॥ ४५ ॥ तत्रनीत्वाखिलंजन्मनृतोगान्मंदिरंहरेः ॥ हरिभक्तिप्रसादेनयत्सुरैरपिदुर्लभम् ॥ ४६ ॥ ॥ इति श्रीभगवद्भक्ति
माहात्म्येमाधवदासचरितंनामशततमःसर्गः ॥ १०० ॥ छ ॥ ॥ अथापरंप्रवक्ष्यामिभक्तिमाहात्म्यमुत्तमम् ॥ यस्यस्मरणमात्रेणह
रिभक्तिर्भवेद्दृढा ॥ १ ॥ राजासीदुत्कलेदेशेधर्म्मिष्ठोवैष्णवोत्तमः ॥ तस्यासीत्तनयश्चैकोरघुनाथइतिश्रुतः ॥ २ ॥ बाल्यादेवसभक्त्या
न्वैपूजयामासभक्तितः ॥ अथकालेनकियतारघुनाथोयुवाऽभवत् ॥ ३ ॥ युवराजंविधातुंसराजास्वमनसाकरोत् ॥ रघुनाथस्तुतच्छु
त्वापितरंप्रत्यबोधयत् ॥ ४ ॥ किंमेराज्येनभोतातदेह्यन्यस्मैसुव्रायतत् ॥ इत्युक्त्वासपरित्यज्यसर्वंराज्यंपितुर्धनम् ॥ ५ ॥ श्रीजग
न्नाथनिकटेसिंहद्वारिस्थितोभवत् ॥ अयाचितंसमालंब्यास्थितोह्यादिहरिंभजन् ॥ ६ ॥ तस्थौश्रीमज्जगन्नाथमंदिरेसिंहसन्निधौ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

एकदामाघवेमासेरघुनाथोमहानिशि ॥ ७ ॥ सुप्तेलोकेथशीतार्तोवेपमानोपतद्भुवि ॥ तदाश्रीमज्जगन्नाथोमहावैष्णवरूपधृक् ॥ ८ ॥ समागत्यस्वकंवस्त्रंशीतत्राणंददौस्वयम् ॥ प्रातरुत्थायतत्रत्यादहशुस्तन्महाद्भुतम् ॥ ९ ॥ ऊचुस्तंभोकुतश्चैतद्वस्त्रंप्राप्तंवदस्वतत् ॥ श्रुत्वाप्रोवाचतान्सर्वान्रघुनाथोहसन्निव ॥ १० ॥ अहोरात्रौतुशीतार्तंज्ञात्वामांकोप्यदादिदम् ॥ श्रुत्वातद्वचनंसर्वैजगन्नाथस्यचेष्टितम् ॥ ११ ॥ मत्वाप्रणेमुस्तंसर्वैरघुनाथंचवैष्णवाः ॥ सएकदासमायातोमथुरायांजनैःसह ॥ १२ ॥ राधाकुंडेस्थितोनित्यमयाचित्वव्रतंवहन् ॥ श्रीकृष्णंमनसाध्यायन्कुर्वन्मानसपूजनम् ॥ १३ ॥ तस्थौबहुदिनंतत्रराधाकुंडेतिभक्तिमान् ॥ एकदामानसार्चायांदुग्धंचातिघनंचतत् ॥ १४ ॥ बहुलंहरयेदत्त्वामनसातत्पुनःस्वयम् ॥ बुभुजेसर्वमेवैतन्महाभक्तिपुरःसरम् ॥ १५ ॥ अथतस्मिन्दिनेतस्यरघुनाथस्यचोदरे ॥ उत्पन्नामहतीपीडाततोवैद्यमथानयत् ॥ १६ ॥ वैद्यस्तुनाडिकांधृत्वाजीर्णरोगमुवाचतम् ॥ तत्रापिपयसोनूनंफेनीभूतशृतस्यच ॥ १७ ॥ श्रुत्वाताद्भिषजोवाक्यंरघुनाथोब्रवीद्वचः ॥ निश्युपोषितएवाहंनाद्यकिंचिदखादिषम् ॥ १८ ॥ कथमेतदजीर्णंमांमहाश्चर्यंवदस्वहो ॥ इतिश्रुत्वाततोवैद्योरघुनाथमुवाचसः ॥ १९ ॥ भुंक्ष्वेदमौषधंसद्योऽजीर्णंदुग्धंतवोदरात् ॥ निपतिष्यतिचात्रैववमनेनतवोदरात् ॥ २० ॥ इत्युक्त्वाप्रददौचूर्णंरघुनाथश्चखादतत् ॥ अथक्षणेनतत्रैवफेनीभूतंपयःशृतम् ॥ २१ ॥ निपपातोदरात्तस्यतदौषधबलात्ततः ॥ दृष्ट्वैतत्परमाश्चर्यंसर्वैविस्मयमागताः ॥ २२ ॥ किमिदंमहदाश्चर्यमित्यूचुस्तंमुदाजनाः ॥ अथतस्मिन्क्षणेकश्चिदायातोवृद्धवैष्णवः ॥ २३ ॥ श्रुत्वातदद्भुतंप्राहरघुनाथंहसन्निव ॥ अर्पयित्वातुहरयेपयःफेनीकृतंबहु ॥ २४ ॥ अदत्त्वावैष्णवेभ्यस्तत्स्वयंभुक्तंपयोयतः ॥ ततोजीर्णेनखिन्नोभूःसत्यंवदतितेभिषक् ॥ २५ ॥ श्रुत्वै

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तत्साधुवाक्यंसरघुनाथउवाचतम् ॥ सत्यमेतन्नसंदेहोऽजीर्णंतुपयसस्तथा॥२६॥ मानसेनोपचारेणपूजायांयादृशंपयः ॥ समर्प्यंभुक्तंस
र्वतदत्तैवतुलोभतः ॥ २७ ॥ सत्यमेतन्नसंदेहोनान्यत्किंचिन्मुखेऽर्पितम्॥श्रुत्वैतद्वचनंतस्यरघुनाथस्यवैजनाः ॥ २८॥ वृद्धसाधोरपि
तदाविस्मयंपरमंययुः ॥एवमादीनिकर्म्माणिराधाकुंडेनुभूयसः ॥ २९ ॥ जगामहरिसान्निध्यमंतेयोगिसुदुर्लभम्॥३०॥इतिश्रीभगवद्भ
क्तिमाहात्म्येरघुनाथचरितंनामैकोत्तरशततमःसर्गः॥१०१॥ ॥अथापरोबभूवैकोगौडदेशेद्विजोत्तमः॥नित्यानंदेननाम्नासनित्यानंदमयः
सदा ॥ १ ॥ भूत्वाब्रह्मकुलेधीत्यवेदशास्त्राणिचद्विजः ॥ अध्यापयामासमुदाशिष्यान्पुत्रानिवौरसान्॥ २ ॥ दृष्ट्वाभागवतंशास्त्रंविप्र
स्त्वेकदिनेक्वचित् ॥ पूर्वपुण्यप्रभावेनलब्धंचातीवतत्प्रियम् ॥ ३ ॥ तदारभ्यद्विजोसोपिनित्यानंदोतिपंडितः ॥ पठन्भागवतंनित्यं
चिंतयामासवैहरिम् ॥ ४ ॥ एवंचिंतयतस्तस्यपश्यतःपुस्तकंरहः ॥ दिव्यज्ञानंसमुत्पन्नंश्रीनित्यानंदशर्म्मणः ॥ ५ ॥ सर्वंकृष्ण
मयंविश्वमनन्यतद्धादिस्वयम् ॥ आत्मानमपिश्रीकृष्णंमत्वानंदमयोभवत् ॥ ६ ॥ इष्टानिष्टभिदाशून्योबभूवातीवतन्मयः ॥ मृते
जातेथवापुत्रेमित्रेशत्रौसमःसदा ॥ ७ ॥ शीतोष्णानलतोयेषुनाभूद्भेदमतिःक्वचित् ॥ क्षुत्पिपासाविनिर्मुक्तोबभूवातिसुखीतदा॥८॥
सर्वंकृष्णमयंजानन्वारुणीमदमत्तवत् ॥ भाषतेनातिहसातिवदतिस्मयथातथा ॥ ९ ॥ एकदासबहिर्ग्रामेशुष्केतृणचयेस्थितः ॥ अ
कस्मात्तत्रदावाग्निर्लग्नोवायुसमीरितः ॥ १० ॥ तस्यासनतलेप्राप्तोलग्नःशुष्कतृणेऽनलः ॥ समुत्तस्थौमहाज्वालानित्यानंदंचसावृ
णोत् ॥ ११ ॥ तयासमावृतोभक्तोनचचालततःक्वचित् ॥ दृष्ट्वातत्परमाश्चर्य्यंसर्वेयेतत्रसंस्थिताः ॥ १२ ॥ धावित्वांतिकमा
यातास्तावदग्निःशमंययौ ॥ नित्यानंदस्तुतत्रैवस्थितोतीवमुदान्वितः ॥ १३ ॥ अथोपविशतस्तस्याधस्ताच्छुष्कंतृणंतुयत् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नतुदग्धंतथैवासीत्तदंगस्पर्शतोध्रुवम् ॥ १४ ॥ एवंभरतयोगीवबभूवाद्विजसत्तमः ॥ भुक्त्वाप्रारब्धमखिलंययौश्रीकृष्णमेवसः॥ १५॥
॥इति श्रीभगवद्भक्तिमाहात्म्येनित्यानंदचरितंनामद्व्युत्तरशततमःसर्गः॥१०२॥ ॥छ॥ अथापरोवंगदेशेयोवैभक्तिमतांवरः॥ कृष्णचैत
न्यनाम्नाभूद्गौडदेशेद्विजोत्तमः ॥ १ ॥ येनसंस्थापिताभक्तिर्हरेर्गौडेपिशाश्वती ॥ गृहस्थएवविप्रोसौविद्याद्यभ्यस्यचाखिलाः॥२॥
कृतदारोहरिंभक्त्यापूजयन्संस्थितोगृहे ॥ श्रीकृष्णोहमितिध्यायंस्तद्रूपोभूद्द्विजोत्तमः ॥ ३ ॥ परिणिन्येसदारान्वैबहुशोतिप्रतिष्ठि
तः ॥ तैर्दारैःसहश्रीकृष्णलीलामनुचकारसः ॥ ४ ॥ कृत्वाकुंजंनदीतीरेस्त्रीभिर्वंशीनिनादयन् ॥ एवंभावयतस्तस्यकृष्णोहमिति
निश्चयात् ॥५॥ प्रययुःकतिवर्षाणिनिरुद्योगस्यवृत्तये ॥ तदैकोदुर्जनस्तत्रचिंतयामासचेतसि ॥ ६ ॥ अहोनायात्ययंक्वापिनचयाति
चकुत्रचित् ॥ कुर्वन्बहुव्ययंनित्यंविहरत्येषनिर्भयः ॥७॥ कस्मादस्येदृशीसंपदागच्छतिनिरंतरम् ॥ इतिज्ञातुंयतिष्येद्ययदिदंदंभितो
स्तिचेत् ॥८॥ तदादंडंज्ञापयिष्येकथयित्वानृपायतत् ॥ इतिसंचिंत्यमनसागत्वाराजसमीपतः॥ ९ ॥ प्राहतंनृपतिंधूर्तोराजंतवपुरेम
हान् ॥ अनर्थोजायतेतंत्वंनिवारयितुमर्हसि ॥ १० ॥ दंडंप्रयच्छधूर्तानांप्रजांपालयधर्मतः ॥ एषश्रीकृष्णचैतन्यनामायोत्रास्ति
वैष्णवः ॥ ११ ॥ सोतिधूर्तोदुराचारोवंचयित्वाखिलंजनम् ॥ आत्मानंपूजयत्येषमिथ्याचारेणपापकृत् ॥ १२ ॥ शिष्यांश्चकार
सर्वान्सनगरेधनलोभतः ॥ स्वयंप्रतिनिशंस्त्रीभिःक्रीडत्येषमहाकुलः ॥ १३ ॥ नजानातितदाकिंचिज्जनानांतत्तदागमम् ॥ तस्मा
च्छाधिमहाराजधूर्तंदंभरतंशठम् ॥१४॥ नोचेत्सर्वामहामोहेनिपतिष्यंतितेप्रजाः ॥ श्रुत्वेदंतद्वचोराजाप्रोवाचातिप्रयत्नवान् ॥ १५ ॥
अहोश्रुतंमयाप्येतद्वैष्णवोतीवभक्तिमान् ॥ नाम्नाश्रीकृष्णचैतन्योमत्पुरेवर्ततेऽधुना ॥ १६ ॥ परंतुनैवंजानामिदुराचारंकरोतिसः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तस्माद्द्यनिशाभागेत्वयासहतदालयम्॥ १७॥अहंप्रच्छन्नरूपःसन्गमिष्यामिनसंशयः॥ तदातच्चरितंसर्वंसाक्षात्पश्याम्यहंदृशा॥ १८॥
तथातथाकरिष्यामिनिग्रहंवाप्यनुग्रहम्॥ इतिनिश्चित्यधूर्तेनसाकंराजासमुत्थितः ॥ १९ ॥ धूर्तोपिस्वगृहंगत्वारात्रौराजगृहंययौ ॥
अथराजापितंधूर्तंनीत्वारात्रौमहानिशि ॥ २० ॥ वीरमेकंपदातिंचकृत्वानुचरमाययौ ॥ कृष्णचैतन्यभवनेदूरात्तंददृशुश्चते ॥२१॥
परमाश्चर्यरूपंतंहरिभक्तिप्रसादतः ॥ धूर्तस्तुतंचतुर्बाहुंशंखचक्रगदाधरम् ॥ २२ ॥ भ्रुकुटीकुटिलाक्षंचदृष्ट्वातीवविमोहितः ॥ उ
क्त्वानृपंमहाराजपश्येदंपरमाद्भुतम् ॥ २३ ॥ चतुर्भुजोद्यदृष्टोयंयश्चासीत्षष्टिहायनः ॥ द्विभुजःप्राकृतोविप्रःसोयंजातोमहाप्रभुः
॥ २४ ॥ एवंकथयतस्तस्यधूर्तस्यनृपसन्निधौ ॥ ब्रह्मांडंस्फुटितंतत्रतत्क्षणात्सममारह ॥ २५ ॥ ततोराजातिसंदिग्धोददर्शाद्वि
जमद्भुतम् ॥ द्विभुजंपुंडरीकाक्षंश्यामंवंशीनिनादिनम् ॥२६॥ प्रसन्नंवनिताभिश्चसाक्षाद्देवीभिरावृतम् ॥ पदातिरपितंतत्रददर्शद्विभुजं
नरम् ॥ २७ ॥ वृद्धंश्रीकृष्णचैतन्यंस्त्रीसहायंचपूर्ववत् ॥ ततोराजातिभक्त्यातंप्रणिपत्याद्भुतंततः ॥ २८ ॥ मृतंधूर्तंसमुत्थाप्य
स्वमंदिरमुपागतः ॥ तत्राप्याश्चर्यतोराजानसुष्वापचतांनिशाम् ॥ २९ ॥ उवाचपत्न्यैतत्सर्वंकृष्णचैतन्यचेष्टितम् ॥ अथप्रभाते
चोत्थायराजासर्वानथाह्वयत् ॥ ३० ॥ ग्रामवृद्धान्मंत्रिणश्चपंडितांश्चपुरोहितान् ॥ तद्धूर्तगमनंरात्रौस्वकीयगमनंपुनः ॥ ३१ ॥
कृष्णचैतन्यभक्तस्यददर्शपरमाद्भुतम् ॥ धूर्तब्राह्मणवाक्यंचतस्यब्रह्मांडभेदनम् ॥ ३२ ॥ मरणंचापितत्रैवपदातेर्दर्शनंतथा॥
दृष्ट्वास्वयंयथार्थंचसर्वंसर्वानुवाचसः ॥ ३३ ॥ श्रुत्वासर्वैराजवाक्यंमेनिरेपरमाद्भुतम् ॥ तमसन्यंतश्रीकृष्णचैतन्यस्यमहाप्र
भोः ॥ ३४ ॥ शिष्योभवामिचाद्यैवभवद्भिश्चानुमोद्यताम् ॥ इतिश्रुत्वावचस्तस्यराज्ञस्तेपिविचारतः ॥ ३५ ॥ अन्व

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मन्यंतसर्वेतंप्रशंसंतोथवैष्णवम् ॥ अथराजाचतेसर्वेतस्मिन्नेवदिनेतदा ॥ ३६ ॥ कृष्णचैतन्यभवनमाजग्मुश्चातिभक्तितः ॥ राजा प्रणम्यश्रीकृष्णचैतन्यंपरमादरात् ॥ ३७ ॥ उक्तासर्वमशेषेणयद्यज्जातंमहानिशि ॥ ततःप्रोवाचनृपतिःकृतांजलिःपुनःपुनः ॥ ३८ ॥ गुरोक्षमस्वमूर्खस्यशाधिमांशरणागतम् ॥ इदंराज्यमिमेदाराइमेपुत्रावलंत्विदम् ॥ ३९ ॥ तुभ्यमर्पितवानस्मीत्युक्तापादौपपा तसः ॥ तथैवमंत्रिणःसर्वेपुरोधाश्चबभाषिरे ॥ ४० ॥ श्रुत्वासर्वैरितंकृष्णचैतन्योवाक्यमब्रवीत् ॥ वस्तुतोगुरुशिष्येतिव्यवहारोभ्रमो नृणाम् ॥ ४१ ॥ तथापितवबुद्धिश्चेत्करिष्येत्वांनिजंनृप ॥ इत्युक्ताप्रददौमंत्रंराज्ञेसिद्धिमवापसः ॥ ४२ ॥ उवाचस्वीयधर्म्मेणकु रुराज्यमकंटकम् ॥ श्रीकृष्णंमनसाध्यायन्नभिमानविवर्जितः ॥ ४३ ॥ जीवमात्रेदयांकुर्वन्देहिदानंनिरंतरम् ॥ त्वद्दत्तमखिलंनीत्वापु नस्तुभ्यंसमर्पितम् ॥ ४४ ॥ इत्युक्ताविररामासौगुरुर्वैष्णवसत्तमः ॥ राजापिसचिवैःसार्द्धंकृतार्थोगात्स्वमंदिरम् ॥ ४५ ॥ अथश्री कृष्णचैतन्योराज्ञार्पितधनंबहु ॥ ब्राह्मणेभ्यश्चसाधुभ्यःसर्वंप्रादाच्चतत्क्षणात् ॥ ४६ ॥ ततःस्वयंचिदानंदेमग्नस्तस्थौचपूर्ववत् ॥ एवं श्रीकृष्णचैतन्योमहाभक्तोबभूवसः ॥ ४७ ॥ वंगेपिस्थापितायेनवैष्णवीभक्तिरुत्तमा ॥ अद्यापितस्ययेशिष्याह्यद्यास्तिष्ठंतिवैष्णवाः ॥ ४८ ॥ प्रतिष्ठितागौडदेशेविष्णुभक्तिप्रवर्तकाः ॥४९॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येश्रीकृष्णचैतन्यप्रभुचरितंनामत्र्युत्तरशततमः सर्गः ॥ १०३ ॥ छ ॥ ॥ अथवक्ष्येकथांरम्यांशूरदासस्यविश्रुताम् ॥ परमाश्चर्य्यजननींहरिभक्तिप्रदायिनीम् ॥ १ ॥ श्रीकृष्णस्यस खाकश्चिच्छूरसेनकुलोद्भवः ॥ कृष्णेनैवसमंसोपिद्वारकायांययौपुरीम् ॥ २ ॥ परंतुतस्यहृदयंवृंदावननिवासजम् ॥ स्मृत्वानंदंदुनो तिस्ममुहुःकृष्णमुवाचह ॥ ३ ॥ कदागमिष्यसित्वंभोमथुरायांमयासह ॥ कदाद्रक्ष्यामिभांडीरंकालिंदींतंचपर्वतम् ॥ ४ ॥ इत्यह

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

निशमेवासौमहोत्कंठचसमन्वितः ॥ नलेभेद्वारकायांसयावज्जीवंतथासुखम् ॥ ५ ॥ अथकालेनश्रीकृष्णोद्वारवत्यांयदून्स्वयम् ॥ नी
त्वाजगामवैकुंठंतत्रापिसतुयादवः ॥ ६ ॥ वृंदावनंदिदृक्षुःसन्महोत्कंठ्यसमन्वितः ॥ कदाकृष्णगमिष्यामित्वयासहमधोःपुरे ॥ ७ ॥
इतिश्रुत्वाथतद्वाक्यंश्रीकृष्णःप्रहसन्वचः ॥ प्रोवाचतंमहोत्कंठंमथुरागमनायसः ॥ ८ ॥ अहोनाहंगमिष्यामिपूर्ववन्मथुरापुरीम् ॥
किंतुतत्रैवतिष्ठामिपरिवारसमन्वितः ॥ ९ ॥ राधयासहितोनित्यंप्रतिकुंजंनसंशयः ॥ मथुरानगरीसत्यंवैकुंठादपिमेप्रिया ॥ १० ॥
नतांत्यक्त्वासुखंक्वापिसखेप्राप्स्याम्यहंतथा ॥ शंकरस्यविमुक्ताख्यापुरीवाराणसीयथा ॥ ११ ॥ तथाममापिमथुराब्रह्मांडेनात्रसं
शयः ॥ स्मराम्यद्यापियत्राहंबाल्येभूत्वास्थितःपुरा ॥ १२ ॥ मृत्तिकाभक्षणादीनिकृतवान्बाललीलया ॥ पूतनामर
णंचैवशकटस्यचभंजनम् ॥ १३ ॥ यमलार्जुनभंगंचबकासुरवधस्तथा ॥ अघासुरस्यनिधनंकालियस्यमदक्षयः ॥
॥ १४ ॥ ब्रह्मसंमोहनंतद्वद्वृंदावननिवेशनम् ॥ प्रलंबधेनुकारिष्टहननंगिरिपूजनम् ॥ १५ ॥ गोवर्द्धनाचलोद्धारोरा
सक्रीडनमेवच ॥ केशिनोमरणंतद्वच्चाणूरस्यचमर्दनम् ॥ १६ ॥ कंसस्यमारणंचापिवसुदेवस्यमोचनम् ॥ एवमादीनिकर्म्माणि
स्मृत्वाखिद्येहमप्यहो ॥ १७ ॥ कदातथाविधामीतित्वेवमुत्कंठितोस्म्यहम् ॥ यस्तुतत्रममप्रेम्णाममलीलांकरोतिवै ॥ १८ ॥
अहमेवसमंतव्योनात्रकार्य्याविचारणा ॥ ममजन्मोत्सवंतत्रास्थित्वायाकुरुतेसती ॥ १९ ॥ तांयशोदासमांमत्वामांयात्यत्रनसं
शयः ॥ पुरुषोयस्तुमज्जन्मदिनेव्रतपरायणः ॥ २० ॥ बालरूपंयजेन्मांसमामेवाप्नोतिनिश्चितम् ॥ यथाकथंचिच्चेत्तत्रयोवाकोवापि
मानवः ॥ २१ ॥ मथुरायांगतोनामगृह्णातिसतुमेप्रियः ॥ त्वंचेज्जिगमिषुस्तत्रशृणुमेवचनंहितम् ॥ २२ ॥ यथातत्रगतस्त्वंवै

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तथैवानुभविष्यति ॥ कलेःसंध्यांतसमयेमथुरायाःसमीपतः ॥ २३ ॥ भूत्वाविप्रकुलेत्वंभोगत्वातांमथुरांपुरीम् ॥ गायन्ममैवलीलांत्वं
तादृक्सुखमवाप्स्यसि ॥ २४ ॥ मल्लीलांप्राकृतैःपद्यैर्गास्यसित्वंस्फुटंतदा ॥ श्रुत्वाऽन्येपिमयिप्रेमकरिष्यंतिजनाःकलौ ॥ २५ ॥
तेपिभक्ताभविष्यंतिचोद्धरिष्यामितानहम् ॥ परंतुजातमात्रस्त्वंनेत्रहीनोभविष्यसि ॥ २६ ॥ अंधत्वाज्जननीमातापोषयिष्यतिके
वलम् ॥ अन्येत्वौदास्यमापन्नानतेकुत्रापिसौहृदम् ॥ २७ ॥ एवमुक्त्वाततःकृष्णोविररामाथयादवः ॥ प्रणम्यप्रार्थयंश्चितेसमयं
तंतथावसत् ॥ २८ ॥ अथागतेतुसमयेतस्मिन्सयादवस्तदा ॥ बभूवविप्रभवनेमथुरायाःसमीपतः ॥ २९ ॥ जातमात्रोत्रभूवांधो
बालोमात्रानिरीक्षितः ॥ नातिहर्षवतीजातादृष्ट्वांधंतंशिशुंतदा ॥ ३० ॥ अन्येपिदृष्ट्वातंचांधमुदासीनाःसुहृज्जनाः ॥ नतथासमभा
षंतजनन्यापोषितःपरम् ॥ ३१ ॥ अथाष्टमेब्देपित्रासावुपनीतोयथाविधि ॥ सूरदासइतिख्यातोनगरेसौबभूवह ॥ ३२ ॥ सएकदा
जनैःसार्द्धमथुरामाजगामह ॥ पितृभ्यांसहितोबालःसूरदासोतिभक्तितः ॥ ३३ ॥ तत्रागत्याखिलांयात्रांकृत्वाततपितरौगृहम् ॥
चलितौसूरदासंतंबालंप्राहतुरेहिभोः ॥ ३४ ॥ श्रुत्वातद्वचनंपित्रोःसूरदासउवाचतौ ॥ युवाभ्यांतत्रगंतव्यंनाहंगच्छाम्यतोगृहम्
॥ ३५ ॥ गृहकर्मासमर्थोहंनोपकुर्वेकिमप्यथ ॥ गत्वातत्रकरिष्यामियुवयोःकिंसमीहितम् ॥ ३६ ॥ अथेयंमथुरासाक्षाद्यत्रकृष्णोऽ
स्तिसर्वदा ॥ भक्तानुग्रहकर्तासौपालयिष्यत्यसंशयम् ॥ ३७ ॥ तस्मान्नाहंगमिष्यामिपितरौभवतोर्गृहम् ॥ इतिश्रुत्वावचस्त
स्यसूरदासस्यतौपुनः ॥ ३८ ॥ पुत्रस्नेहंसमासक्तौरुदंताविदमूचतुः ॥ अरेत्वमंधोबालोनौत्वांविनावांकथंपुनः ॥ ३९ ॥
व्रजावोमंदिरंवत्सेत्येतस्मिन्नंतरेतदा ॥ साधुरेकःसमायातोवृद्धोतीवदयान्वितः ॥ ४० ॥ सप्रोवाचातिमुदितोवचनंतौप्रहर्ष

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यन् ॥ गच्छतंभोयुवांविप्रौनिःसंदेहौसुतंप्रति ॥ ४१ ॥ एषमद्वनेबालःस्थास्यत्यतिसुखेनवै ॥ अहमेनंगृहीत्वातुयास्या
मिनिजमंदिरम् ॥ ४२ ॥ अथतस्यससाधोवैगृहेतुनिवसन्मुदा ॥ श्रीकृष्णचरितंगीतंसूरःशुश्रावसर्वदा ॥ ४३ ॥
स्वयंतैर्वैष्णवैःसाकंनृत्यन्गीतंजगौमुदा ॥ कृष्णलीलांसूरदासःशुश्रावसकलांमुदा ॥४४॥ पूर्वानुभूतंतत्सर्वंचरितंश्रीहरेस्तथा ॥ अ
न्वभून्मथुरायांसक्षुत्पिपासादिवर्जितः ॥ ४५ ॥ अथस्वयंसूरदासःकृत्वापद्यान्यनेकशः ॥ कुंजेकुंजेजगौप्रेम्णासर्वलोकमनोहरम्
॥४६॥एवंसमथुरायांतुनिवसन्भक्तसत्तमः ॥ सूरदासःप्रसिद्धोभूत्सर्वदेशेषुचोत्तमः ॥४७॥ पद्यानितस्यगायंतिनिर्मितानिहरेर्जनाः ॥
गायंतोभक्तिसंयुक्ताजातास्तेतीववैष्णवाः ॥ ४८ ॥ यत्रयत्रजगामासौगायन्गीतंहरेर्यशः ॥ तत्रतत्रस्वयंकृष्णःप्रेम्णातुचलतिस्मतम्
॥ ४९ ॥ साक्षात्पश्यन्हरिंचित्तेगोवत्सानांतुवारकम् ॥ महानंदनिमग्नोभून्नसस्मारात्मनोगतिम् ॥५०॥ अथमार्गेव्रजन्कूपेपतन्निवयदा
भवत् ॥ तदासभगवान्कृष्णोगोपवेषधरोहरिः ॥ ५१ ॥ सूरदासंकरेधृत्वान्यवारयतकूपतः ॥ अथतंसूरदासोपिदधारदृढमुष्टिना
॥ ५२ ॥ ततोहरिर्हसन्मुष्टिंमोचयित्वाबहिर्गतः ॥ ततःसूरोब्रवीत्तंतुश्रीकृष्णंभक्तवत्सलम् ॥ ५३ ॥ तत्करस्पर्शजानंदवारिसुंचन्दृगं
बुजात् ॥ मोचयित्वाकरंयन्मेदुर्बलस्यगतोह्यसि ॥ ५४ ॥ हृदयाच्चेद्बहिर्यासितदात्वांपुरुषंब्रुवे ॥ इत्याकर्ण्यहरिस्तुप्रोददौनेत्रेसुनि
र्मले ॥ ५५ ॥ सूरदासस्तमद्राक्षीत्कृष्णंकमललोचनम् ॥ गाश्चारयंतंगोपालंबालवेषंसुयंत्रितम् ॥ ५६ ॥ साष्टांगंप्रणिपत्याहसूरदा
सोतिहर्षितः ॥ श्रीकृष्णमाययामुग्धोमत्वातंगोपबालकम् ॥ ५७ ॥ अहोत्वयाहंकिंकूपात्पतन्निहनिवारितः ॥ अतस्त्वांनौमिगोपा
लंप्रेम्णामेरक्षितस्त्वया ॥ ५८ ॥ अतस्त्वंकोसिकुत्रासिकिन्नामासिवदस्वमे ॥ इतितेनतदापृष्टःसूरदासेनमुह्यता ॥ ५९ ॥ उवाचप्र

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हसन्वाक्यंश्रीकृष्णोगोपवेषधृक् ॥ गोपालोस्म्यहमत्रैवमथुरायांवसाम्यहम् ॥ ६० ॥ गाश्चारयन्निहायातोदृष्ट्वात्वामंधचक्षुषम् ॥ कूपे निपतितंभक्तंतदाहंत्वांन्यवारयत् ॥ ६१ ॥ इतोयथेष्टंगच्छत्वंयाम्यहंयांतिधेनवः ॥ इत्युक्त्वासतुगोपालस्ततोदुद्रावगोदिशि ॥ ६२ ॥ कियद्दूरंगतेतस्मिन्पादपांतरितेप्रभौ ॥ दृष्ट्वाततःपुनःसूरोनददर्शाथकिंचन ॥ ६३ ॥ ततोतिखिन्नःपप्रच्छजनान्पथिसमागतान् ॥ दृष्टस्त्वयैकोगोपालश्चारयन्गावनेरहः ॥ ६४ ॥ वनमालापरिक्षिप्तोवेत्रपाणिःस्मिताननः ॥ श्रुत्वासूरस्यवचनंपथिकःप्राहतंपुनः ॥ ६५ ॥ अहोभ्रांतोसिकिंब्रूषेनास्तिगोपोत्रकानने ॥ वर्ततेक्वापिनोगावस्तस्माद्व्रजगृहंस्वकम् ॥ ६६ ॥ पथिकस्यवचःश्रुत्वासूरदासोतिविस्मितः ॥ विचिन्वन्विपिनंसर्वंनप्रापतंक्वचिद्वने ॥ ६७ ॥ श्रांतोबभूवचात्यर्थंतस्थौतरुतलेक्वचित् ॥६८॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसूरदासचरितंनामचतुरुत्तरशततमःसर्गः ॥ १०४ ॥ ॥ छ ॥ ॥ अथतत्रोपविष्टस्यसूरदासस्यखिद्यतः ॥ रात्रिःसमागतातत्रसूरदासोपिसंस्थितः ॥ १ ॥ वनेपिपर्य्यटन्क्लेशात्तद्रूपात्माभवत्तदा ॥ ग्रामेगंतुंमनोनैवचक्रेतद्गतमानसः ॥ ॥ २ ॥ अथरात्रौददर्शासौस्वप्नेकृष्णंतुतादृशम् ॥ दृष्ट्वासोयमितिज्ञात्वाप्रणनामसमुहुर्मुहुः ॥ ३ ॥ अथसूरंसमाचष्टश्रीकृष्णःप्रहसन्निव ॥ अहोहमेवदिवसेकूपाद्राक्षितवानिति ॥ ४ ॥ नेत्रेमयैवतेदत्तेमद्रूपदर्शनायवै ॥ नात्रगावोनवागोपस्त्वमद्राक्षीर्विनेतुयत् ॥ ५ ॥ मन्मायाकल्पितंसर्वंतवदर्शनहेतवे ॥ तस्मादुत्थायमथुराग्रामेगच्छयथासुखम् ॥ ६ ॥ पूर्ववद्विचरन्लोकेमद्यशोगानमाचर ॥ इतिश्रुत्वावचस्तस्यसूरदासोब्रवीत्तदा ॥ ७ ॥ अहोधन्योस्मिलोकेस्मिन्यस्त्वंदृष्टोमयाप्रभुः ॥ अतःपरंनमेकिंचिद्वांछितंवर्ततेभुवि ॥ ८ ॥ परंतुत्वत्स्मृतिस्तादृग्वर्ततांममसर्वदा ॥ मायानबाधतांनाथत्वदीयामांजनार्दन ॥ ९ ॥ किंचयाभ्यांभवान्दृ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दृष्टोनेत्राभ्यांपद्मलोचन ॥ नताभ्यांजगदेतद्वैद्रष्टुमिच्छाम्यहंपुनः ॥ १० ॥ तस्मादंधत्वमेवस्यात्पूर्ववन्ममकेशव ॥ इतिस्वप्नगतोवा
क्यमुक्त्वातूष्णींबभूवसः ॥ ११ ॥ ततःसभगवान्स्वप्नेप्राहैवंसर्वमस्तुते ॥ इतिस्वप्नेवरंलब्ध्वाजगामांतर्हितःप्रभुः ॥ १२ ॥ स्मृत्वा
स्वप्नंतथांध्यंचज्ञात्वाहर्षसमन्वितः ॥ जगौकल्पितपद्येनकृष्णस्यचरितानिसः ॥ १३ ॥ अथप्रभातेसंजातेसूरदासस्तुतद्वनात् ॥
आगत्ययमुनातीरेतस्थौगायन्हरेर्गुणान् ॥ १४ ॥ तत्रत्यैःपूर्ववत्तत्रभोजनाच्छादनादिभिः ॥ संमानितोमुदावात्सीद्यावज्जीवं
हरिंभजन् ॥ १५ ॥ एकदाम्लेच्छभूपेनदिल्लीशेनातिभक्तितः ॥ समाहूतःसूरदासोययौगायन्हरेर्यशः ॥ १६ ॥ तत्राग
तंसूरदासंदृष्ट्वादिल्लीश्वरोनृपः ॥ उत्थायप्रणनामासौमहाभक्तिपुरस्सरम् ॥ १७ ॥ उपवेश्यशुचौदेशेप्रांजलिर्वाक्यमब्रवीत् ॥ भग
वंस्त्वंहरेर्भक्तस्तत्सखायादवोह्यसि ॥ १८॥ इतिसर्वैर्वदंत्यत्रजानेहमपितादृशम् ॥ तस्मादेकंवदत्वत्रभवान्प्रश्नोत्तरंमम ॥ १९ ॥
ममसंतिस्त्रियोबह्व्यस्तासांकापिचयादवी ॥ वैतांकथयमह्यंभोदयांकृत्वाममोपरि ॥ २० ॥ इतिश्रुत्वावचस्तस्यसूरदासोब्रवीद्वचः ॥
अहोयाःसंतितेपत्न्योगृहेतास्त्वयिपश्यति ॥ २१ ॥ अत्रागत्यचमांदृष्ट्वाप्रत्येकंताव्रजंत्वतः ॥ तन्मध्येयापरिचिताममस्यात्सा
तुमामिह ॥ २२ ॥ त्यक्तलज्जातिविनयासहसासंवदिष्यति ॥ परंतुसातदैवोक्त्वात्यक्त्वादेहंगमिष्यति ॥ २३ ॥ इत्युक्त्वाम्ले
च्छनृपतिःस्त्रियःसर्वाअजिज्ञपत् ॥ प्रत्येकंसूरदासंतुप्रणम्येतोव्रजंत्विति ॥ २४ ॥ अथताम्लेच्छनृपतेःपत्न्यःप्रत्येकमागताः ॥ प्रण
म्यसूरदासंतुगताःसर्वाःस्वमंदिरम् ॥ २५ ॥ पश्चादेकासमायाताप्रेयसीम्लेच्छभूपतेः ॥ दूराद्दृष्ट्वातुसासूरंहर्षादुत्फुल्ललोचना ॥२६॥
अहोकुतःसमायातोभवाञ्जानातिमांकिमु ॥ इत्युक्तःसोब्रवीत्तांतुजानेहंत्वांनसंशयः ॥ २७॥ अथसांतिकमागत्यधृत्वापादौनना

॥१४२॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मतम् ॥ तदैवतस्याब्रह्मांडंपुस्फोटाथममारसा ॥ २८ ॥ अथतांनृपतेर्दास्यःसमुत्थापयितुंगताः ॥ दृष्ट्वातदासंरुरुदुर्भूपोपिविम
नाअभूत् ॥ २९ ॥ तथापिधैर्य्यमालंब्यभूपःपप्रच्छतंपुनः ॥ कासीदियंपरिचितातवभक्तवदाशुमे ॥ ३० ॥ इतिश्रुत्वाव
चस्तस्यसूरदासउवाचतम् ॥ शृणुष्वास्यामहाराजपूर्वजन्मसमुद्भवम् ॥ ३१ ॥ मथुरायामियंपूर्वमासीद्वेश्यानराधिप ॥
सुलोचनेतिनाम्नावैनृत्यगीतविशारदा ॥ ३२ ॥ दृष्टामयापिबहुशोनृत्यंतीराजसंसदि ॥ नासीदस्यासमाकाचिद्गीतनृत्यकलाप
कृत् ॥ ३३ ॥ एकदातुतदाकोपिवैश्योधनसमृद्धिमान् ॥ अत्रायातोगृहीत्वेमांपुत्रपाणिग्रहोत्सवे ॥ ३४ ॥ इयमत्रसमागत्य
नृत्यगीतैर्मनोहरैः ॥ मोहयामाससकलान्पुरवासिजनान्नृप ॥ ३५ ॥ एकदातत्रनृपतिःश्रुत्वेमांसोनयन्मुदा ॥ प्रनर्तयामासनृत्यैस्तुष्टो
धनमदाद्बहु ॥ ३६ ॥ इयंतुनृत्यसमयेददर्शनृपमंदिरे ॥ राज्ञींमहार्हरत्नाढ्यांदासीगणनिषेविताम् ॥ ३७ ॥ तदेयंमनसाचक्रेमनोरथ
सकलमघा ॥ अहोकथमहंत्वेवंमहासुखसमागमम् ॥ ३८ ॥ प्राप्स्यामिकेनतपसादानेनाथकरोमितत् ॥ इतिनिश्चित्यमनसिजगर्हा
त्मानमात्मना ॥ ३९ ॥ अथैषापट्टमहिषीदिव्यस्त्रीचात्रभक्तितः ॥ दीनानाथदरिद्रेभ्योद्विजेभ्योदाद्धनंमुदा ॥ ४० ॥ यथेयंसुखमश्ना
तितथास्यांध्रुवमप्यहम् ॥ एवंसंकल्पयामासमनसैतत्तदात्वियम् ॥ ४१ ॥ दैवाद्बभूवदुःखार्तज्वररोगेनतद्दिने ॥ ततःपंचत्वमाप
न्नानीतेयंयमकिंकरैः ॥ ४२ ॥ तत्रभुक्त्वाबहुदिनंदुःखंसेयंदिवंगता ॥ तत्रस्थित्वाप्सरोलोकेगीतनृत्यसमुद्भवे ॥ ४३ ॥ महानंदेनि
मग्नाभूदियंमन्मथुरापुरि ॥ पूर्वंननर्तदेवाग्रेपश्चादन्यत्रवृत्तये ॥ ४४ ॥ तत्कर्म्मसुकृतेनेयंजातास्वर्गेसुरगृहे ॥ तत्रस्थित्वाबहुदिनंत
न्मनोरथसिद्धये ॥ ४५ ॥ क्षीणेपुण्येमहाराजमर्त्यलोकेभवद्गृहे ॥ आगत्यबुभुजेपूर्वसंकल्पितसुखंसती ॥ ४६ ॥ त्वयासहमहीपालसे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दानीमायुषःक्षये ॥ त्यक्त्वादेहंगतादेवीवैकुंठभुवनेमुदा ॥ किंचयादववंशस्ययाःस्त्रियःपुरुषाश्चये ॥ ४७ ॥ नतेमनुष्याज्ञातव्या
देवांशाःसमुपागताः ॥ कृष्णेनसहतल्लोकंगतानास्त्यत्रसंशयः ॥ ४८ ॥ इत्युक्त्वासूरदासोपिभूपमाभाष्यचोत्थितः ॥ चलितुंम
थुरायांवैततोराजाददौधनम् ॥ ४९ ॥ सूरदासोनजग्राहप्राहमेकिंधनेनभोः ॥ दिल्लीशोपिसमुत्थायतंप्रणम्यन्यवर्त्तत ॥ ५० ॥ एवं
ससूरदासोभूद्भक्तिमान्पृथिवीतले ॥ अंतेत्यक्त्वातनुंतत्रमथुरायांहरिंस्मरन् ॥ ५१ ॥ जगामकृष्णभवनंमुमोदसचपूर्ववत् ॥ ॥
इति श्रीभगवद्भक्तिमाहात्म्येसूरदासचरितंनामपञ्चोत्तरशततमःसर्गः ॥ १०५ ॥ ॥ छ ॥ ॥ अथैषांमथुरायांवैवभूवुर्भ
क्तसत्तमाः ॥ तेषांनामानिचरितंवक्ष्यामीहयथाश्रुतम् ॥ १ ॥ अथात्रापिचयेभक्तानामतःकर्म्मतश्चये ॥ कथयिष्यामिसर्वा
न्वैयथामतियथाश्रुतम् ॥ २ ॥ परमानंदनामासीद्भक्तःसारंगरागवित् ॥ तेनैवतोषयामासराधाकृष्णौनिरंतरम् ॥ ३ ॥
तथाकाश्मीरदेशेतुकेशवःपंडितोभवत् ॥ भट्टोपनामाविदुषोजित्वातन्मार्गमागतान् ॥ ४ ॥ श्रीभट्टोपितथाजातोभक्तिमान्यदु
नंदने ॥ तथादिवाकरोजातोदिवाकरइवापरः ॥ ५ ॥ हरिव्यासोवभूवैकोब्राह्मणोभक्तसत्तमः ॥ सपर्यटन्धरातीर्थयात्रायामे
कदाद्विजः ॥ ६ ॥ चटयावलिनाम्नासीद्ग्रामस्तत्रबुभुक्षितः ॥ जगामशिष्यसहितआरामंसंददर्शतम् ॥ ७ ॥ वनच्छाया
द्रुमाकीर्णविमलोदजलाशयम् ॥ नानाकुसुमगंधाढ्यंमुमुदेभक्तसत्तमः ॥ ८ ॥ शिष्यमाहात्रयक्ष्येहंदेवंत्वंपाकमाचर ॥ ए
वंवामेददर्शाग्रेमठेदेवींशिलामयीम् ॥ ९ ॥ तत्रच्छागांश्चमेषांश्चवलिंवितरतोजनान् ॥ दृष्ट्वादयार्द्रचित्तःसतानुवाचविनीतवत् ॥
॥ १० ॥ पायसादिवलिंत्यक्त्वाकिंजीवान्हथिकामतः ॥ हतेजीवेपिजातोपियुष्मत्कामोतिनश्वरः ॥ ११ ॥ तस्माद्यतुदेव्यर्थंपायसा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दिप्रयच्छतः ॥ इतिश्रुत्वातुतेसर्वेजहसुस्तंमदान्विताः ॥ १२ ॥ तदग्रेएवखड्गेनघातयामासुराजकम् ॥ दृष्ट्वाचुकोपचात्यर्थंह
रिव्यसोतिभक्तिमान् ॥ १३ ॥ शिष्यंनिवारयामासक्रुद्धःपाकादिकर्म्मतः ॥ अद्यदेवींतोषयित्वाजीवहिंसांनिवार्य्यच ॥ १४ ॥
स्वयंदेवींहिसंस्तुत्यहरिव्यासउदैरयत् ॥ जीवहिंसावतोकेनदुःखितेनांतरात्मना ॥ १५ ॥ भद्रकालिमहामायेत्वमद्यारभ्यसर्व
दा ॥ गृहाणपायसादीनिवलिंजीववलिंत्यज ॥ १६ ॥ नोचेत्प्रातरहंतुभ्यंस्वकीयंमस्तकंशिवे ॥ छित्त्वाखड्गेनदास्यामिसत्यमे
तन्नसंशयः ॥ १७ ॥ इत्युक्त्वासमवस्थाग्रेस्थितश्चित्तेहरिंभजन् ॥ शिष्योपितद्वचःश्रुत्वाहरिंसस्मारचिंतितः ॥ १८ ॥ अथरा
त्रिःसमायाताहरिव्यासोतिनिर्भयः ॥ सुष्वापमंदिरस्याग्रेशिष्यःसुप्तस्तदाज्ञया ॥ १९ ॥ अथरात्रेश्चतुर्थांशेतृतीयांशेगतेतदा ॥
मन्दिरादेत्यजल्पंतीददर्शनिजभ्रातुरम् ॥ २० ॥ अरेभुंक्ष्वनचाद्यापिपशुघातोभविष्यति ॥ यास्यामिनगरेसर्वान्निवारयितुमप्य
हम् ॥ २१ ॥ एवंरात्रौतदाग्रामेदद्दशुःस्वप्नमद्भुतम् ॥ गृहादागत्यवदतीकाचिद्दिव्यांबरावला ॥ २२ ॥ अद्यापिपायसान्नेनबलि
दानंममाज्ञया ॥ देव्यैदेयंपरित्यज्यपशुघातंममांतिके ॥ २३ ॥ तेनैवसर्वकामानांसिद्धिर्वःसंभविष्यति ॥ येमोहात्तुकरिष्यंतितां
नेवघातयाम्यहम् ॥ २४ ॥ एषमेपरमोभक्तोहरिव्यासोतिवैष्णवः ॥ एषतस्मैवरोदत्तोनहिंसात्रभविष्यति ॥ २५ ॥ एवंदृष्ट्वानिशि
स्वप्नंतेसर्वेप्रातरुत्थिताः ॥ एकत्रीभूयतांवार्तांऊचुःपरमविस्मिताः ॥ २६ ॥ ततःसर्वेसमाज्ञाप्यहरिव्याससमीपतः ॥ प्रार्थयित्वा
हुरखिलंनहिंसात्रभविष्याति ॥२७॥ त्वत्कृतेयंव्यवस्थात्राचिरंस्थास्यतिवैष्णव ॥ हरिव्यासोपिश्रुत्वैवंसमुत्थायातिहर्षितः ॥ २८ ॥
स्वकीयमपिसस्मारस्वप्नंदेवीप्रसादजम् ॥ स्नात्वासंपूज्यभुक्त्वाचययौस्वैरगतिर्द्विजः ॥ २९ ॥ तदारभ्यचतत्रापिसर्वेशाक्ताश्च

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वैष्णवाः॥ शाक्ताचारविरोधेनभेजिरेजगदंबिकाम् ॥ ३० ॥ वस्तुतस्तुनभेदोस्तिगंतव्यस्यचवस्तुनः ॥ गंतृभेदेनपंथावैदृश्यतेनेकधा
बुधैः ॥ ३१ ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येहरिव्यासचरितंनामषडधिकशततमःसर्गः ॥ १०६॥ ॥ यः पूर्ववल्लभाचार्यः
संप्रदायप्रवर्त्तकः॥ प्रोक्तस्तस्यसुतोनाम्नाविट्ठलेतिबभूवह ॥१॥ महाभक्तोजितक्रोधोविजितेंद्रियसंचयः॥ मथुरायांकलौयेनद्वापरःप्र
कटीकृतः ॥ २ ॥ सोपिकृष्णाज्ञयादारपरिग्रहमथाकरोत् ॥ तस्यपुत्राश्चसप्तासन्नामान्येषांब्रवीम्यहम् ॥ ३ ॥ रघुनाथोघनश्यामो
यदुनाथस्तथैवच ॥ श्रीमद्गोकुलनाथश्चबालकृष्णस्तथैवच ॥ ४ ॥ श्रीगोविंदोगिरिधरःसर्वेतेवैष्णवोत्तमाः ॥ पित्राज्ञयोषुःसर्वेते
स्थानंकृत्वानिजंनिजम् ॥ ५ ॥ वज्रनामकृतामूर्तीःसप्तसप्ताप्यपूजयन् ॥ तासांनामानिवक्ष्यामिसर्वपापहराणिवै ॥ ६ ॥ गोविंददे
वःश्रीनाथस्तथागिरिधरःस्मृतः ॥ चतुर्भुजेतिविख्यातोहरिदेवस्तथैवच ॥ ७ ॥ श्रीमत्केशवदेवश्चतथावंशीधरोपरः ॥ एतन्नाम्ना
पूजयंतोनिजाचारप्रवर्तकाः ॥ ८ ॥ सर्वेबभूवुर्विख्याताअद्यापिपृथिवीतले ॥ अथविट्ठलशिष्यस्यकायस्थस्यकथांब्रुवे ॥ ९ ॥ नाथ
द्वारेतिविख्यातापश्चिमेवैष्णवीपुरी ॥ तत्रश्रीनाथदेवोस्तिभुक्तिमुक्तिप्रदायकः ॥ १० ॥ श्रीमत्रिपुरदासोऽभूत्तत्रैकोराजकार्य्य
कृत् ॥ कायस्थःसमहाभक्तःपूजयामासवैष्णवान् ॥ ११ ॥ श्रीनाथस्वामिनेसोऽथप्रतिवर्षंनवंनवम् ॥ तत्तत्कालोचितंवस्त्रंमहार्घंप्रददौ
सदा ॥ १२ ॥ अथकालेनकियतात्रिपुरोनिर्द्धनोभवत् ॥ शोचयित्वासदुःखेनव्रतसंरक्षणायच ॥ १३ ॥ यथाकथंचिदानीययेनके
नाप्युपायतः ॥ ददन्श्रीनाथभक्तायवासःस्थूलतरंददौ ॥ १४ ॥ पूजकेनतदादृष्टंवस्त्रंतत्स्थापितंक्वचित् ॥ नयोग्यमितिमत्वान्यत्प्र
ददौवस्त्रमुत्तमम् ॥ १५ ॥ अथरात्रौमहाशीतेतुषारैराकुलेजने ॥ ददर्शपूजकःस्वप्नेश्रीनाथंतादृशंगृहे ॥ १६ ॥ अहोशीतातुरोस्म्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्यनैतैर्वस्त्रैःसुखंमम ॥ त्रिपुरेणतुयद्दत्तंतदर्पयममोपरि ॥ १७ ॥ तदासुखीस्यान्नोचेद्दैशीतंमांबाधतेभृशम् ॥ दृष्ट्वापिस्वप्नंनोत्तस्थौ महाशीतभयेनसः ॥ १८ ॥ पुनःसुप्तस्तथैवासीद्ददर्शपूजकोनिशि ॥ ततउत्थायसहसात्रिपुरार्पितमंशुकम् ॥ १९ ॥ ददौश्रीरंगनाथस्यशरीरेसतुपूजकः ॥ मत्वाश्चर्यंसभक्तस्तुप्रातरुत्थायभक्तितः ॥ २० ॥ श्रीमत्रिपुरदासस्यसत्कारंकृतवान्स्वयम् ॥ एवंभक्तिवशोदेवोभक्तदत्तमभीप्सति ॥२१॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येत्रिपुरदासचरितंनामसप्तोत्तरशततमःसर्गः ॥ १०७ ॥ छ ॥ अथैवंमथुरावासीकृष्णदासोतिभक्तिमान् ॥ कथामस्यप्रवक्ष्यामिमहाश्चर्यप्रदायिनीम् ॥ १ ॥ कृष्णदासोमहाप्रेम्णाश्रीकृष्णस्यससेवकः ॥ यद्यत्प्रियंभोज्यवस्तुतत्कृष्णायददौमुदा ॥ २ ॥ एकस्मिन्दिवसेदिल्ल्यांगच्छन्वृंदावनंपथि ॥ हट्टायांसंददर्शासौशुभ्रकुंडलिकाःशुभाः ॥ ३ ॥ तत्रक्रीत्वाततःप्रेम्णाताःकृष्णायददौपुनः ॥ तस्मैकुंडलिकामूल्यंददौयत्तेनभाषितम् ॥ ४ ॥ अथास्मिन्समयेकृष्णंमथुरायांतुपूजकः ॥ पूजयित्वार्पयामासनैवेद्यंबहुमोदकम् ॥ ५ ॥ निवेद्यमन्दिराद्बाह्येसमागत्यस्थितोऽभवत् ॥ दत्त्वाकपाटंस्थित्वातुकंचित्कालंविचिंतयन् ॥ ६ ॥ निवेदितंमयायद्यत्तद्भुंक्तेभगवानिति ॥ पुनःकपाटमुद्धाट्यमंदिरांतर्गतोमुदा ॥ ७ ॥ ददर्शतत्रपात्रेषुशुभ्राःकुंडलिकाःसतु ॥ भुक्तावशिष्टाःकाश्चित्तुखंडिताःकतिचित्तथा ॥ ८ ॥ दृष्ट्वैतत्परमाश्चर्यंभक्तश्चिंतापरोभवत् ॥ कस्मादिमाःकुंडलिकाआयातानार्पितामया ॥ ९ ॥ इतिसंचिंत्यनैवेद्यंनीत्वास्वभवनंययौ ॥ सर्वांस्तद्दर्शयामासपरमाश्चर्यकारकम् ॥ १० ॥ अथसर्वेपिचिंतार्तालेभिरेनैवतेसुखम् ॥ तदारात्रौहरिःस्वप्नेसर्वानाहसुचिंतितम् ॥ ११ ॥ यूयंचिंतांत्यजध्वंभोवक्ष्येकुंडलिकागमम् ॥ कृष्णदासेनमेदिल्ल्यांदत्ताःकुंडलिकाःशुभाः ॥ १२ ॥ भुक्तामयातितोषेणेशिष्टाःपात्रे

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्थिताःकति ॥ संदेहोनात्रकर्तव्यःसचातीवममप्रियः ॥ १३ ॥ एवंदृष्टंतुतैःस्वप्नमुत्थायतुपरस्परम् ॥ ऊचुःस्वप्नकथांसर्वेआ
श्चर्य्योत्फुल्ललोचनाः ॥ १४ ॥ अथमध्याह्नसमयेकृष्णदासोपिचागतः ॥ पप्रच्छुस्तंमहाभक्त्यापूर्वंद्युःक्वस्थितंत्वया ॥ १५ ॥
किमर्पितंभगवतेसत्यंतद्ब्रूहिनःप्रभो ॥ इतिश्रुत्वासतूवाचदिल्ल्यांहट्टस्थितेनच ॥ १६ ॥ मयाकुंडलिकादृष्टासैवप्रेम्णासमर्पिता ॥
श्रुत्वैतद्वचनंतस्यसर्वेतंतुष्टुवुर्मुदा ॥ १७ ॥ उक्त्वाकुंडलिकावार्तांनैवेद्येषुयदागता ॥ रात्रिस्वप्नंचसर्वेषांश्रुत्वासोपिजहर्षच ॥१८॥
एवंप्रभावोभक्तेस्तुकृष्णदासस्यविश्रुतः ॥ अपरंभक्तिमाहात्म्यंतस्यैवकथयाम्यहम् ॥ १९ ॥ एवमेकादिनेदिल्ल्यांसमागच्छत्कु
तोपिसः ॥ नृत्यंतींसुंदरींवेश्यांददर्शातिमनोहराम् ॥ २० ॥ इयंचेन्ममतस्याग्रेश्रीमत्कुंजविहारिणः ॥ नृत्यंकुर्य्याद्यतिष्येहंकिंमेलो
कःकरिष्यति ॥ २१ ॥ इतिनिश्चित्यमनसातदग्रेसमुपागतः ॥ तामुवाचातिविनयान्मयासहगमिष्यसि ॥ २२ ॥ यत्रगच्छाम्य
हंतत्रप्रभुर्मेरसिकोमहान् ॥ प्रार्थयिष्यसियच्चत्वंतत्तत्प्राप्स्यस्यसंशयः ॥ २३ ॥ इतिश्रुत्वातुसावेश्यास्वीकृत्यचलितातत: ॥ कृष्ण
दासस्तयासार्द्धंनृत्यगीतपरायणः ॥ २४ ॥ शृण्वन्नपिपरीवादंमथुरामाजगामह ॥ तत्रतांतर्पयित्वासभूषयित्वाप्रयत्नतः ॥ २५ ॥
श्रीकृष्णमूर्तिमालीनागोपीवतत्रतत्क्षणात् ॥ इत्याश्चर्यंपरिदृष्ट्वातुष्टुवुस्तांतुमाथुराः ॥ २६ ॥ कृष्णदासस्तुमुदितःतस्थौतत्रहरिंभज
न् ॥२७॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येकृष्णदासचरितंनामाष्टोत्तरशततमःसर्गः ॥ १०८ ॥ ॥ एवमन्यौमहाभक्तौवल्लभाचार्य्य
शिक्षितौ ॥ गंगलेवर्द्धमानश्चेत्युभौवैष्णवसत्तमौ ॥ १ ॥ नित्यंभागवताभ्यासनिर्मलीकृतमानसौ ॥ दीनानाथदरिद्रेषुदयावंतौ
बभूवतुः ॥ २ ॥ दृष्ट्वादुष्टजनानांचनिर्म्मलंचक्रतुर्मनः ॥ तौगायमानौभक्तेस्तुश्रेष्ठ्यमित्थमुदीरितम् ॥ ३ ॥ एवंखेमेतिविख्यातोरा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सभक्तोतिवैष्णवः ॥ रामनामजपासक्तोहनुमत्कृपयायुतः ॥४॥ अथापरोबभूवैकोमाथुरोविठ्ठलोद्विजः ॥ कथामस्यप्रवक्ष्यामिशृण्वतां प्रीतिवर्द्धिनीम् ॥५॥ तत्पितातत्पितृव्यश्चेत्युभौराजपुरोहितौ॥परस्परंयुध्यमानौमृतौकालवशंगतौ ॥६॥ आसीदेकस्यपुत्रस्तुनाम्ना विठ्ठलमाथुरः ॥ सोतिभक्तोहरेरग्रेननर्तातिमनोहरम् ॥७॥जगौगीतानिरम्याणिवाद्यवादनतत्परः ॥ नृत्यतस्तस्यविप्रस्यनात्मान्यविषयोभवत् ॥ ८ ॥ अथैकदानृपोराजातंसस्मारपुरोहितम् ॥ तदाविठ्ठलमाहूयपूजयामासभक्तितः ॥ ९ ॥ एवंकतिपयेजातेदिनेचैकादशीव्रतम् ॥ कुर्वन्नेवहरेरग्रेनृत्यगानपरायणः ॥ १० ॥ ततोविद्वेषिणःप्राहुराजानंविठ्ठलस्यतु ॥ नृत्यगानादिसौंदर्यंराजा श्रुत्वातमब्रवीत् ॥ ११ ॥ अद्यजागरणंरात्रौकुरुनृत्यंहरेपुरः ॥ सोपिस्वीकृतवान्राज्ञोवचनंविठ्ठलोद्विजः ॥ १२ ॥ अथदुष्टैस्तु प्रासादस्योपरिष्टात्स्थलंकृतम् ॥ नृत्यस्यतत्रश्रीकृष्णमूर्तिसम्यक्सतिष्ठयेत् ॥ १३ ॥ तत्ररात्रौसमायातोएनाभूयोब्रवीन्मुदा ॥ विठ्ठलोपिसमायातःसाधुभिःपरिवारितः ॥ १४ ॥ तमाहराजाश्रीकृष्णप्रतिमाग्रेतुनर्तने ॥ नदोषंपश्यनृत्यामीत्युक्तःसोप्युत्थितो द्रुतम् ॥ १५ ॥ गायन्ननर्तदेवाग्रेदृष्ट्वाराजाविमोहितः ॥ अथायंविठ्ठलोनृत्यन्विसस्मारात्मनोगतिम् ॥ १६ ॥ पपातोर्व्यांततोराजाहाहाकृत्वासमुत्थितः ॥ तत्राजगामतंदृष्ट्वागतप्राणमिवद्विजम् ॥ १७ ॥ गालीर्ददौनृपस्तेभ्यःखलेभ्यश्चातिकोपतः ॥ अथतं साधवःसर्वेनीत्वातद्गृहमागताः ॥ १८ ॥ राजापिभृत्यान्संप्रेष्यदत्त्वाबहुधनंतथा ॥ सेवयामासतंविप्रंतृतीयेदिवसेतथा ॥ १९ ॥ संज्ञामवापतंमातापतनादीन्यथाब्रवीत् ॥ श्रुत्वातूष्णींस्थितस्तस्यांमथुरायांनिजाश्रमे ॥ २० ॥ एकस्मिन्दिवसेरात्रौसमुत्थायाश्रमाद्बहिः ॥ स्थित्वासर्वंमुदेत्येवंविचार्य्यचलितोगृहात् ॥ २१ ॥ छटीकरइतिख्यातोग्रामोवैष्णवसंकुलः ॥ आसीद्गरुडगोविं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दनाम्नामूर्तिर्हरेःशुभा ॥ २२ ॥ तत्रागत्यस्थितोराधाकृष्णोहृदिविचिंतयन् ॥ मातरंवनितांत्यक्त्वाएकाकीसुखमावसत् ॥२३॥
अथमाताचपत्नीचविठ्ठलस्यातिदुःखिते ॥ अन्वेषयंत्यौशोकेनभृशंरुरुदतुस्तथा ॥ २४ ॥ एनंनृपोन्वेषयितुंबहून्भृत्यान्नियुक्तवान् ॥
तेषांनमिलितःक्वापिततस्तज्जननीस्वयम् ॥ २५ ॥ स्नुषयासहतत्रागाच्छ्रुत्वावार्तांसुतस्यसा ॥ समागत्याब्रवीत्पुत्रंचलवेश्मेतिपा
पकृत् ॥ २६ ॥ नामन्यतततःसापिमातास्वस्नुषयासह ॥ तत्रैवोवासमोहेनत्यक्त्वासर्वंगृहादिकम् ॥ २७ ॥ विठ्ठलोभक्तिसंप
न्नःसुखदुःखसमःस्वयम् ॥ मातुःपत्न्यामहादुःखमन्नादीनामभावतः ॥ २८ ॥ ततःस्वप्नेतुगोविंदोविठ्ठलायेदमब्रवीत् ॥ गच्छस्व
गृहमेताभ्यांगृहिधर्मेणमांयज ॥ २९ ॥ एवंवारत्रयंदृष्ट्वाविठ्ठलोतिमुदान्वितः ॥ आजगामनिजंगेहंजगृहेन्योगृहीगृहम् ॥ ३० ॥
जातिभिश्चपरित्यक्तस्ततःस्वग्रामसन्निधौ ॥ तक्षैकोभक्तिमानासीत्पूर्वमित्रमितिस्मरन् ॥३१॥ जगामतद्गृहंमात्रापत्न्यासहसविठ्ठलः ॥
सोतिसत्कारपूर्वंतंस्थापयामासमंदिरे ॥ ३२ ॥ अथैकदाविठ्ठलस्यपत्नीगर्भवतीसती ॥ अधोमुखीनखाग्रेणखनतीभूमिमादरात्
॥ ३३ ॥ निधानकलशस्याग्रंदृष्ट्वात्यर्थंचखानसा ॥ उत्पाट्यकलशंकृष्णमूर्तिमप्यतिशोभनाम् ॥ ३४ ॥ अथस्वामिनसा
हूयश्वश्रूंचवरवर्णिनी ॥ दर्शयामासदृष्ट्वासातत्क्षणंविठ्ठलोद्भुतम् ॥ ३५ ॥ आहूयदर्शयामासगृहाणेदंधनंनिजम् ॥
ततस्तंसाब्रवीत्सर्वंतवैवेदंनसंशयः ॥ ३६ ॥ अहंमदीयायेसंतिसर्वेदासानसंशयः ॥ इतिश्रुत्वावचस्तस्याविठ्ठलोतीवहर्षितः ॥ ३७ ॥
कृष्णमूर्तिंप्रतिष्ठाप्यतदाराधनतत्परः ॥ अक्षय्यभांडाद्वसुभिःदानभोगंसमाचरन् ॥ ३८ ॥ महादाताप्रसिद्धोभूज्ज्ञातिभिश्चापिस
त्कृतः ॥ लेभेपुत्रंमहाभक्तंरंगीलालेतिनामकम् ॥ ३९ ॥ सोपिनृत्यादिकुशलोभक्तिमानातिवैष्णवः ॥ एवंतत्रवसंतस्तेवभूवुर्भक्तस

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्तमाः ॥ ४० ॥ गतेषुवहुकालेषुनटिकैकात्समागता ॥ कृष्णमूर्तिपुरस्तात्तुनर्तयामासविठ्ठलः ॥ ४१ ॥ नृत्यंदृष्ट्वातिसंतुष्टोददौ
रत्नान्यनेकशः ॥ तथापिनैवदित्सातंमुमोचविठ्ठलंद्विजम् ॥ ४२ ॥ ततोविचार्यसर्वेभ्योयात्प्रियंतद्ददाम्यहम् ॥ इत्युक्त्वारंगिलालंतंवे
श्यायैप्रददौमुदा ॥ ४३ ॥ सागृहीत्वातुतद्दत्तंदृष्ट्वाप्रोज्वलितागृहम् ॥ अथराज्ञीरंगिलालमितिश्रुत्वाब्रवीच्चसा ॥ ४४ ॥ राज्ञितुष्टेनके
नापिदत्तोर्थंमेडियंधनम् ॥ तथाहमपिदृष्टैवदास्याम्येतन्नसंशयः ॥ ४५ ॥ नान्यथावहुभिश्चापिधनैरपिददाम्यहम् ॥ तस्मादेकदिने
राज्ञीश्रीकृष्णप्रतिमाग्रतः ॥ ४६ ॥ नर्तयित्वातितुष्टाहंदास्याम्येनंनसंशयः ॥ इतिश्रुत्वातुसाराज्ञीनर्तयामासतांनटीम् ॥ ४७ ॥
आनीयदोलिकायांवैस्त्रीवेषमतिसुंदरम् ॥ नर्तयामाससावेश्यापश्यंतीचातिहृष्टवत् ॥४८॥ ततःसानर्तकीतुष्टागृहीत्वांकेतिभाक्तितः॥
अर्पयामासकृष्णायराज्ञींप्राहार्पितोमया ॥ ४९ ॥ श्रीकृष्णायातिसंतुष्टायुक्ताराज्ञीतयापुनः ॥ समुत्तस्थौगुरुंतत्रतंग्रहीतुंमुदान्विता ॥
॥ ५० ॥ रंगिलालस्ततोराज्ञीमाहमांनस्पृशाधुना ॥ जातोहमद्यकृष्णस्यपश्ययामितदंतिकम् ॥ ५१ ॥ इत्युक्त्वारंगिलालस्तुनृ
त्यञ्छ्रीकृष्णसन्निधौ ॥ प्राप्यतन्मयतांकायंतत्याजपश्यतांनृणाम् ॥ ५२ ॥ एवंविठ्ठलनाम्नाभून्माथुरोभक्तसत्तमः ॥ तत्संसर्गात्तु
सावेश्यासातुराज्ञीपतिव्रता ॥ ५३ ॥ निर्वेदंपरमंप्राप्यजग्मतुःकृष्णसन्निधौ ॥ एवमन्येपितद्देशेवभूवुर्वहवोजनाः ॥ ५४ ॥ ॥ इति
श्रीभगवद्भक्तिमाहात्म्येमाथुरविठ्ठलचरितंनामनवोत्तरशततमःसर्गः॥१०९॥ छ॥ ॥ एवमेकोहरीरामोहठीलेत्युपनामकः ॥ महाभक्तो
वभूवाथसख्यमेनानृपेणच ॥ १ ॥ एकस्मिन्दिवसेसाधोर्भूमिर्वृत्तिकरीस्थिता ॥ साकेनापिचदुष्टेनमिथ्यासंन्यासिनानृपम्॥२॥ नास्यभू
मिरितिप्रोच्यरोधिताचापिवैष्णवः ॥ आगत्योवाचराजानंसतंदूरीचकारह ॥ ३ ॥ दुष्टसंन्यासिवाक्येनततःसवैष्णवोरुदन् ॥ आजगा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

महरीरामंवृत्तंसर्वमुवाचह ॥ ४ ॥ श्रुत्वासआहतंभक्तंयाम्यहंराजसन्निधिम् ॥ त्वमप्यागच्छपश्चाद्वोयथायोग्यंभविष्यति ॥५॥ ततस्त
स्मिन्गतेभक्तेजगामराजसन्निधिम्॥विनयात्प्राहराजानंराजाश्रुत्वाचुकोपह॥६॥हरिरामस्ततोभूपंप्राहसाधोर्जिघृक्षसि॥ श्रुत्वाराजाततो
वाचनास्यभूमिर्हिवर्तते॥७॥इतिमांप्राहसंन्यासीततोनीतामयाधरा ॥ श्रुत्वेदंराजवचनंततोरामोब्रवीद्वचः ॥८॥ राजन्सत्यमिदंब्रूषेपरंतु
शृणुमेवचः ॥ अत्रागत्यससंन्यासीब्रूयादेतन्ममाग्रतः ॥ ९ ॥ यदिसत्यंतदातस्यमुखाद्वाणीभविष्यति ॥ असत्यंचेत्ततोमूकोभ
विष्यतिनसंशयः ॥ १० ॥ पश्येदमद्भुतंराजन्राधाकृष्णविचेष्टितम् ॥ शीघ्रमानयतंदुष्टंयःसाधोर्वृत्तिमाहरत् ॥ ११ ॥ प्रह्लादर
क्षणार्थायस्तंभात्समवातरत् ॥ सकिंदयालुर्भगवान्नेतावन्नकरिष्यति ॥ १२ ॥ हरिरामस्तुसस्मारश्रीकृष्णंकरुणामयम् ॥ प्रा
र्थयामासमनसासाधुकार्यंकुरुप्रभो ॥ १३ ॥ ससंन्यासीतदातूष्णींतस्थौराजसमीपगः ॥ मुहुःप्रोवाचतंराजासंन्यासिनमतिक्रुधा
॥ १४ ॥ वचनाभिनयेनासौबोधयामासभूपतिम् ॥ शक्नोमिनाहंकथितुंवाग्भिःशक्तिर्नचास्तिमे ॥ १५ ॥ ज्ञात्वैतद्वचनंराजा
परमाश्चर्यमागतः ॥ हरिरामंनमस्कृत्यददौभूमिंससाधवे ॥ १६ ॥ गृहीत्वानिजभूमिंसभक्तोगान्निजमंदिरम् ॥ हरिरामःस्ववे
श्माथसंन्यासीचाप्यभाषत ॥ १७ ॥ राजातमाहसत्यंमेयदभूदस्तिवानवा ॥ तदोवाचससंन्यासीद्वेषादेवंकृतंमया ॥ १८ ॥
इतिश्रुत्वासराजानंजगर्हाथातिभक्तिमान् ॥ हरिपूजापरोभूत्वाजीवन्मुक्तोबभूवह ॥ १९ ॥ कमलाकरभट्टोपिएवमासीन्महायशाः ॥
माध्वसिद्धांतसंचारीतत्त्वज्ञानपरायणः ॥ २० ॥ शास्त्रज्ञानेनसंपन्नोज्ञानविज्ञानपारगः ॥ श्रीमद्भागवताभ्यासान्मुक्तिमायातिदुर्ल
भाम् ॥ २१ ॥ नारायणेतिनाम्नाभूदेकोभट्टोपनामकः ॥ मथुरायांवसंस्तत्रस्थानानिकथितानिसः ॥ २२ ॥ प्रकाशयामाससुदा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुराणोक्तानिसर्वशः ॥ संदेहस्तेनयत्रासीत्तत्स्वप्नेहरिरब्रवीत् ॥ २३ ॥ एकस्मिन्दिवसेमाघेप्रयागंगंतुमुत्सुकाः ॥ जनास्तमाहु
र्यास्यामस्त्वंगमिष्यसिवानवा ॥ २४ ॥ श्रुत्वासआहतान्सर्वान्प्रयागोप्यत्रवर्तते ॥ आगच्छतमयासार्द्धंत्रिवेणींदर्शयामिवः ॥ २५ ॥
इत्युक्त्वाससमुत्थायकियद्दूरंगतस्ततः ॥ उच्चग्रामंसमागत्यतत्रोच्चस्थानमारुहत् ॥ २६ ॥ तत्रस्थोदर्शयामासत्रिवेणींपरमोज्वलाम् ॥
दृष्ट्वासर्वेतिमुदिताःसाधुसाध्वितितुष्टुवुः ॥ २७ ॥ व्रजवल्लभनामाभूद्भक्तोस्यैवकुलेमहान् ॥ योरासलीलांसततंकुर्वन्मुक्तोबभूवह
॥२८॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येहरिरामचरितंनामदशोत्तरशततमःसर्गः ॥११०॥ ॥ रूपःसनातनश्चोभौभ्रातरौगौडसंभवौ ॥
तयोःकथांप्रवक्ष्यामिपरमाश्चर्यदायिनीम् ॥ १ ॥ उभौस्वदेशादागत्यवृंदावनमुपागतौ ॥ गोपेश्वरस्यनिकटेह्यूषतुःपरमादरात् ॥
॥२ ॥ अयाचितव्रतंनीत्वायथालाभेनजीविकाम् ॥ कुर्वंतौनिर्ममेरूपःकृष्णलीलामृतंशुभम् ॥ ३ ॥ नंदग्रामेसमागत्यतस्थौगायन्हरे
र्यशः ॥ महाप्रसिद्धस्तत्रासौबभूवायाचितव्रती ॥ ४ ॥ एकदातंसमायातोद्रष्टुंभ्रातासनातनः ॥ दृष्ट्वातंभ्रातरंरूपोमनसाचिंतयत्त
दा ॥ ५ ॥ अथदुग्धंयदिभवेत्तदाहंपायसंशुभम् ॥ समर्प्यहरयेभ्रात्रेदत्तंस्याद्भोजनंमया ॥ ६ ॥ एवंचिंतयतस्तस्यगोपीकाचित्स
मागता ॥ साक्षाल्लक्ष्मीस्वरूपेणनीत्वादुग्धंकरेणसा ॥ ७ ॥ सुगंधितंडुलान्सम्यग्धृत्वाचशर्करामपि ॥ प्राहरूपमहाभक्तगृहाणेदं
मयार्पितम् ॥ ८ ॥ मयाप्रतिश्रुतंपूर्वंयदागौःसोष्यतेसुखम् ॥ तदाऽस्यास्तुपयःपूर्वंदास्यामिभवतेइति ॥ ९ ॥ तेनपायससिद्ध्य
र्थंतंडुलादिकमर्पये ॥ श्रुत्वेदंसोतिहर्षेणसर्वंजग्राहतत्करात् ॥ १० ॥ परंतुदृष्ट्वातद्रूपमलौकिकमुवाचताम् ॥ सनातनोतिभक्त्या
वैमाताकातेपिताकस्सः ॥ ११ ॥ इतिश्रुत्वातदोवाचवृषभानुसुतास्म्यहम् ॥ भुंजानंपायसंरूपःसनातनमथाब्रवीत् ॥ १२ ॥ त्व

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

य्यागतेमनोमेभूद्भवेत्पायसमद्यचेत् ॥ तदाकस्मात्समागत्यगोपीसर्वंददाविदम् ॥ १३ ॥ श्रुत्वेदंवचनंभ्रातुःसनातनउवाचतम् ॥
अहोलोभोनकर्तव्यःसर्वथातीर्थवासिभिः ॥ १४ ॥ लोभात्तपश्श्रुतिस्तस्मादभक्तिस्तेनतंत्यजेत् ॥ किंचेयंनैवगोप्यासीद्ययादत्त
मिदंतव ॥ १५ ॥ साक्षाद्राधामहाराज्ञीमातास्नेहाद्ददाविदम् ॥ एवंवदंतौतौभुक्त्वासमुत्थायातिभक्तितः ॥१६॥ ॥ नंदग्रामेगतौ
तौतुदिदृक्षूतांतुगोपिकाम् ॥ वृषभानुगृहंतौतुपप्रच्छतुरितस्ततः ॥ १७ ॥ सर्वैरुक्तौनचात्रास्तितन्नाम्नाकापिनिश्चितम् ॥ ततआ
गत्यतौगेहेरूपमाहसनातनः ॥ १८ ॥ तवलोभेनजननीराधाप्राप्नोतिवैश्रमम् ॥ तस्मादेवंकदाप्यंगनकर्तव्योमनोरथः ॥ १९ ॥
इत्युक्त्वातुगतःस्थानंस्वकीयंससनातनः ॥ अथैकस्मिन्दिनेरूपोरासनृत्यंविलोकयन् ॥ २० ॥ मठभित्तिसमालंब्यलीनोमृतइवा
भवत् ॥ तत्रासौकर्णपूराख्यःश्रीकृष्णस्यसपूजकः ॥ २१ ॥ आगत्यतमचेष्टंतुज्ञात्वातत्सान्निधिंगतः ॥ मृतोवाजीवतीत्येतज्ज्ञातुंह
स्तंददौनासि ॥ २२ ॥ अग्निज्वालेवसंलग्नःश्यामस्तस्यकरस्ततदा ॥ क्षिप्त्वाकरंविवेदासौजीवतीत्यद्भुतंमहत् ॥ २३ ॥ एकदातस्य
सुप्तस्यस्वप्नेऽभूत्परमाद्भुतम् ॥ गोविंददेवआगत्यचास्माद्ग्रामाद्बहिस्त्विह ॥ २४ ॥ तिष्ठंतियत्रवैगावस्तत्रभूमिगतोस्म्यहम् ॥ गौ
रेकातत्रचागत्यदुग्धंत्यजतिनित्यशः ॥ २५ ॥ ज्ञात्वातत्रखनित्वामांबहिःकृत्वाप्रपूजय ॥ तदाप्रातःसमुत्थायरूपोगत्वाथसज्ज
नान् ॥ २६ ॥ उक्त्वास्वप्नंददर्शाथगांक्षरतींपयःस्वयम् ॥ खानयामासतत्स्थानंकियद्दूरेधरातले ॥ २७ ॥ गोविंददेवोमिलितः
सर्वैर्मुमुदिरेजनाः ॥ रूपस्तंसंप्रतिष्ठाप्यपूजयामासभक्तितः ॥ २८ ॥ अद्यापिपूज्यतेसावैमूर्तिर्जयपुरांतगा ॥ राज्ञानीतातिभ
त्त्यावैम्लेच्छोपद्रवभीतितः ॥ २९ ॥ जयसिंहेनतत्कालमारभ्यपूज्यतेचसा ॥ एवमेकदिनेनंदग्रामंगच्छन्सनातनः ॥ ३० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जटायुग्मष्टिमान्कृष्णंचिंतयानोवनंगतः ॥ तत्रकंटकवृक्षाणांगृहीताःकंटकैर्जटाः ॥ ३१ ॥ तस्थौतत्रैवतूष्णींसप्रभोराज्ञैवमेवमे ॥
इतिसंचिंतितस्यासीद्दिनद्वयमथस्वयम् ॥ ३२ ॥ तृतीयेदिवसेदुग्धंनीत्वागोपालबालकः ॥ मनोहरशरीरःसन्पाययामासतंपयः
॥ ३३ ॥ कंटकेभ्योजटास्तस्यपृथक्चक्रेस्वपाणिना ॥ दृष्ट्वातद्रूपममलंतंपप्रच्छसनातनः ॥ ३४ ॥ कोसित्वंकुत्रतेसंतिभ्रात
रःकतितद्वद ॥ इतितस्यवचःश्रुत्वागोपवेषउवाचतम् ॥ ३५ ॥ गोपोहंभ्रातरःसंतिचत्वारोत्रवसाम्यहम् ॥ नंदग्रामेतिवि
ख्यातेइत्युक्त्वासययौक्वचित् ॥ ३६ ॥ सनातनोपितत्रैत्यनंदग्रामेतिविस्मितः ॥ अन्वेषयामासमुहुर्नलब्धःसतुकुत्रचि
त् ॥ ३७ ॥ तदाज्ञातस्तुतेनापिभगवानेवसंस्थितः ॥ पश्चात्तापंचकारोच्चैरुरोदससनातनः ॥ ३८ ॥ अथागत्यचरूपस्यवंधोर्गृहमु
वाससः ॥ एकदाराधिकावेणांमनसासर्प्पिणीमिव ॥ ३९ ॥ मत्वावर्णयितुंचक्रेमनोरूपश्चतत्क्षणात् ॥ सनातनस्तुतज्ज्ञात्वाकुरुका
व्यंमनोहरम् ॥ ४० ॥ ततोरूपश्चिकीर्षुस्तत्सरस्तीरमुपागमत् ॥ कदंबवृक्षशाखायांदृष्ट्वातच्चरणद्वयम् ॥ ४१ ॥ किमिदंत्वितिविभ्रां
तचित्तोभ्येत्यस्थितोगृहे ॥ सनातनस्तुतंज्ञात्वाताद्दशंभ्रांतमानसम् ॥ ४२ ॥ किंभ्रांतोसिवृथातस्याश्चरणावेवचिंतय ॥ इतिश्रुत्वातं
दारूपःपरमाश्चर्यमाप्तवान् ॥ ४३ ॥ तदादिश्चरणध्यानंचक्रेस्हृदिनिरंतरम् ॥ एवंतौगौडदेशीयौविप्रौरूपसनातनौ ॥ ४४ ॥ बभूवतु
र्महाभक्तावलौकिककथास्पदौ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येरूपसनातनचरितंनामैकादशाधिकशततमःसर्गः ॥ १११ ॥ छ ॥
हरिवंशेतिनाम्नैवंगोस्वामीभक्तिमानभूत् ॥ राधाकृष्णजपासक्तोमनसातत्प्रपूजकः ॥ १ ॥ चेतसातुतयोर्नित्यंसर्वदासान्निधौस्थितः ॥
भोजितोबुभुजेऽन्नंसपायितश्चेत्पपौजलम् ॥ २ ॥ बहिःशरीरबुद्धिस्तुनासीत्तस्यातियोगिनः ॥ च्युतोविधिनिषेधाभ्यांराधाकृष्णौस्मर

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

न्मुदा ॥३॥ एकदातत्रनगरेकंचिद्विप्रंनिशात्यये ॥ कृष्णःस्वप्नेब्रवीद्वाक्यंवारंवारंतथैवच ॥ ४ ॥ हरिवंशायभक्तायसुतांदेहिममाज्ञया॥
श्रुत्वाविप्रोतिसंदिग्धःपत्नींप्राहातिविस्मितः ॥ ५ ॥ तयोक्तंदेहितस्मैतांहरेराज्ञागरीयसी ॥ तद्वंशेतुमहाभक्ताःसिद्धाएवाभवन्जनाः
॥ ६ ॥ आसाधिरेतिनाम्नासीद्विप्रोगुर्जरसंभवः ॥ तस्यपुत्रोतिविख्यातोहरिदासइतिश्रुतः ॥ ७॥ महाभक्तोतिरसिकोराजभिः
परिसेवितः ॥ यद्यदाप्नोतिभोज्यंसमर्कटेभ्योददौस्वयम् ॥ ८ ॥ सर्वंकृष्णमयंज्ञात्वापशुपक्षिमृगादिकम् ॥ समर्प्यविष्णवेपूर्वंततः
सर्वानभोजयत् ॥ ९ ॥ एकस्मिन्दिवसेभक्तोयमुनातीरमास्थितः ॥ तत्रैकोनृपसंबंधीतंद्रष्टुंसमुपागतः ॥ १० ॥ आदायाथसुगंधं
चतैलंचातिमनोहरम् ॥ प्रददौहरिदासायनत्वातस्थौतदग्रतः ॥ ११ ॥ हरिदासस्तुतन्नीत्वातैलंगंधवदुत्तमम् ॥ राधाकृष्णौस्म
रन्चित्तेचिक्षेपतीरसन्निधिम् ॥ १२ ॥ दृष्ट्वातद्राजसंबंधीउद्विग्नोमनसाभवत् ॥ बहुमूल्यमिदंतैलंवृथाभूमौसमर्पितम् ॥ १३ ॥
इतितस्याभवच्चित्तेहरिदासोपिवेदतत् ॥ शिष्यमाज्ञापयामासनयेमंदेवसन्निधौ ॥ १४ ॥ इत्युक्तस्तंनृपजनंनीत्वाशिष्योजगामह ॥
आगत्यचप्रणम्यासीज्जिघ्रेतत्रमनोहरम् ॥ १५ ॥ तमेवगंधंकृष्णांगेलग्नंचापिददर्शह ॥ मत्वाश्चर्यंततोहृष्टोहरिदासांतिकंगतः ॥१६॥
तंप्रणम्यातिभक्त्यासगृहीत्वाज्ञांगृहंययौ ॥ उवाचसर्ववृत्तांतंयद्दृष्टंपरमाद्भुतम् ॥ १७ ॥ एवमेकदिनेतत्रकालिंद्याःपुलिनेस्थि
तः ॥ एकःसमागतःकोपिकृत्वातीर्थान्यनेकशः ॥ १८ ॥ नीत्वास्पर्शमणिंतस्मैहरिदासायदत्तवान् ॥ हरिदासोगृहीत्वातं
चिक्षेपयमुनांभसि ॥ १९ ॥ ततःसोतीवचिंतार्तस्तूष्णींतस्थौतदंतिके ॥ ततःसहरिदासोपिज्ञात्वातन्मनसोव्यथाम् ॥ २० ॥ ॥१४९॥
उत्थाययमुनायांसगत्वातत्रत्यशर्कराः ॥ हस्ताभ्यांबहुशोनीत्वादर्शयित्वाब्रवीद्वचः ॥ २१ ॥ मणिःसएषहस्तेनगृह्यता

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मविशंकितम् ॥ दृष्ट्वातत्परमाश्चर्यंसभक्तोतीवविस्मितः ॥ २२ ॥ प्रणम्यहरिदासस्यशिष्योभूदतिभक्तितः ॥ सेवमानस्तम
त्यर्थंकृष्णतुल्यममन्यत ॥ २३ ॥ एवमुञ्छाग्रामवासीनाम्नाव्यासोद्विजःस्थितः ॥ गृहीविरक्तःसस्त्रीकोवृंदावनमुपागतः ॥ २४ ॥
अथतत्रत्यराज्ञापिप्रार्थितोभजनायसः ॥ नजगाममहाभक्तोराधाकृष्णैकचिंतनः ॥ २५ ॥ एकदारासमयेराधायाःपादकिंकि
णी ॥ भग्नैकातत्क्षणेव्यासोजग्रंथयज्ञसूत्रतः ॥ २६ ॥ उवाचैतद्यज्ञसूत्रंधृतंबहुदिनान्मया ॥ अद्यकार्यायसंजातमित्युवा
चातिहृष्टवत् ॥ २७ ॥ ततस्तत्रनवंयज्ञसूत्रंतत्क्षणमेवहि ॥ व्यासस्कंधेसमायातंसर्वेषांपश्यतांनृणाम् ॥ २८ ॥ एवमेकदिनेकृष्णमू
र्तिंपरिचरन्स्थितः ॥ शिरसोवेष्टनंस्वर्णसूत्रंपीतमनुत्तमम् ॥ २९ ॥ श्रीकृष्णमूर्तेःशिरसिबद्धुंतदुपचक्रमे ॥ शिरोतिचिक्कणंवस्त्रंतस्थौ
नैवकथंचन ॥ ३० ॥ मुहुर्मुहुःसमुत्तिष्ठन्नबंधनास्थिरंह्यभूत् ॥ ततोतिदुःखितःकिंचित्प्रेमकोपसमन्वितः ॥ ३१ ॥ अग्रेसंस्थाप्यचो
वाचबध्नीहिस्वयमेवहि ॥ याम्यहंबहिरित्युक्त्वाबहिरागत्यतस्थिवान् ॥ ३२ ॥ तावत्स्वयंहरिर्वस्त्रंबबंधातिमनोहरम् ॥ सतूष्णींघटि
कामात्रंस्वकोपंपरिगर्हयन् ॥ ३३ ॥ केनाप्यन्येनभक्तेनसाकंतद्भवनंगतः ॥ ददर्शमूर्तिंमूर्द्धस्थंशिरोवेष्टनमद्भुतम् ॥ ३४ ॥ हर्षा
श्रुगद्गदःप्राहकथंमत्कृतमीदृशम् ॥ भवेदित्येवविज्ञायमद्धस्तान्नस्थिरीकृतम् ॥ ३५ ॥ इत्येवंपरमाश्चर्यंदृष्ट्वासोतीवविस्मितः ॥
भक्तोननामतंभक्त्यासाधुसाध्वितितुष्टुवे॥३६॥एवमेकदिनेभुंजन्स्थितःसाधुजनैःसह ॥ ददतीतस्यपत्न्येवसर्वेभ्योन्नादिकंमुदा ॥३७॥
सर्वेभ्यःप्रददौदुग्धंतत्सारंव्यासभोजने ॥ अनिच्छयागतंदृष्ट्वाव्यासःपत्न्यैचुकोपह ॥३८॥ किमिदंचार्पितंमूढदुग्धंसारतरंमम ॥ विहाय
सकलान्साधून्पतिस्नेहांधयात्वया ॥३९॥ अनेनाहंयुवाकिंस्यांशृण्वेतस्यतुयत्फलम्॥ महानर्थकृतंपापेऋषिभिःपरिकीर्तितम् ॥४०॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

एकपंक्त्यांयएकस्मैमिष्टमन्नंप्रयच्छति ॥ भुंक्तेवाताबुभौघोरेपच्यतेनरकेचिरम् ॥४१॥ तस्मात्त्वंनासिसाधूनांसेवायोग्यातिपापिनी ॥ बहिर्गच्छेत्युवाचाथसाश्रुत्वान्यगृहेगता॥४२॥ निराकृतांनिजांज्ञात्वानागृह्णात्सलिलंसती ॥ एवंदिनद्वयेजातेतृतीयेदिवसेनिशि॥४३॥ व्यासःस्वप्नेददर्शैकंसाधुंकमललोचनम् ॥ अहोत्वयाऽपराधेनविनापत्नीतिरस्कृता ॥ ४४ ॥ अकस्मात्तवपात्रेतुसारभूतमुपागतम् ॥ तांत्वंसत्कुरुनोचेत्तेगृहेभोक्ष्याम्यहंनहि ॥४५॥ परंदृष्ट्वातुसस्वप्नंपत्न्याःसन्निधिमागतः ॥ प्रेम्णोवाचनतेदोषःसत्यंज्ञातंमयाप्रिभोः॥ ४६ ॥ अकस्मादपियज्जातंतेनशंकाममाभवत् ॥ अतःपरमलंकारंसर्वंदत्त्वातिहर्षिता ॥ ४७ ॥ साधुभ्यःपाकशालायांसमेत्यकुरुपूर्ववत् ॥ अनिच्छतोपिचेत्पापंजातंविधिवशाद्यदि ॥ ४८ ॥ प्रायश्चित्तंतुतत्रापिकर्तव्यमितिवैस्मृतिः ॥ सापिश्रुत्वामुदायुक्ताचक्रेसर्वंयथोदितम् ॥ ४९ ॥ पूर्ववत्तत्प्रियाभूत्वासेवयामाससवैष्णवान् ॥ अथैकस्मिन्दिनेतत्रसमायातास्तुसाधवः ॥ ५० ॥ अपराह्णेबुभुक्षूंस्तान्दृष्ट्वाव्यासोतिहर्षितः ॥ तस्मिन्नेवदिनेरात्रौकन्यापरिणयःस्थितः ॥५१॥ तदर्थंबंधुभिःकृत्वामिष्टान्नंस्थापितंगृहे॥ तत्सर्वंभोजयामाससाधूनतिमुदान्वितः ॥ ५२ ॥ भुक्त्वातेपिस्थितारात्रौविवाहार्थंवरोभ्यगात् ॥ बहुभिःस्वजनैःसार्द्धंततस्तेतिथिसाधवः ॥ ५३ ॥ चिंतयामासुरत्यर्थंमिष्टान्नंस्यात्कथंपुनः ॥ ततोव्यासस्तुतानाहयावदस्तिगृहेममः ॥ ५४ ॥ नीत्वेमान्भोजयध्वंनोहरिःपूर्णंकरिष्यति ॥ तथैवजातंसर्वैस्तुभुक्तंगेहेस्थितंपुनः ॥ ५५ ॥ पूर्वतोप्यधिकंदृष्ट्वासर्वेविस्मयमागताः ॥ एकस्मिन्दिवसेतस्यगेहेसाधुःसमागतः ॥५६॥ लोकवार्तानभिज्ञःसभक्तिमान्गरुडध्वजे ॥ स्थित्वादिनद्वयंतस्माच्चलितोव्यासआहतम् ॥५७॥ प्रातर्यास्यसिसाधोत्वमित्युक्तःसोपिचावसत् ॥ अथरात्रौस्वयंतस्यशालग्रामशिलांनिजे ॥ ५८ ॥ शालग्रामशिलास्थानेनिधायैकंचप

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्षिणम् ॥ तत्संपुटेनिधायाथरात्रौसुप्तश्चपूर्ववत् ॥५९॥ प्रातरुत्थायचलितःपुनःसाधुस्तमब्रवीत् ॥ साधोत्रयोजनादग्रेजलमस्त्यातिसुं
दरम् ॥ ६० ॥ तत्रैवस्नानंकर्तव्यंपाथेयंगृह्यतामिदम् ॥ गृहीत्वापथिकःशीघ्रंचलितस्तत्रचागतः ॥ ६१ ॥ स्नात्वापूजयितुंदेवंसमुद्युक्तो
थसंपुटम् ॥ उद्घाटयामासतदापक्षीचोड्डीयनिर्गतः ॥६२॥ अथसाधुस्तुसंदिग्धःशून्यंदृष्ट्वातुसंपुटम् ॥ तथैवप्रायोगतवान्ठाकुरोनात्रसं
शयः ॥६३॥ इतिनिश्चित्यतत्कालंसमायातोविशंकितः ॥ व्यासायसर्वंप्रोवाचश्रुत्वासोप्यतिहृष्टवत् ॥ ६४ ॥ गत्वापश्यागतश्चेत्स्यात्
मिलिष्यतिनसंशयः ॥ इत्युक्तःसगतस्तत्रशालग्रामंददर्शतम् ॥ ६५ ॥ व्यासंहर्षादुवाचासावागतोत्रैवमेप्रभुः ॥ ततोव्यासोपितंप्राह
निवसात्रकियद्दिनम् ॥ ६६ ॥ तथैवास्तितवस्वामिन्श्रीकृष्णस्यमनोगतम् ॥ ततउड्डीयमार्गात्तुसमायातोत्रसप्रभुः ॥ ६७ ॥ इ
तिश्रुत्वासोपिसाधुरुवाचव्याससन्निधौ ॥ व्यासभक्तिपरीक्षार्थमेकदाकोपिवैष्णवः ॥६८ ॥ मध्याह्नेसमुपागत्यश्रावयामासचाब्रवीत् ॥
बुभुक्षितोहमत्यर्थंकदान्नंमेप्रदास्यसि॥६९॥ आहकश्चित्तुतंदेवंदत्त्वातुभ्यंप्रदास्यति॥व्यासःश्रुत्वावचःसर्वंशीघ्रमुत्थाययत्नतः ॥७०॥
आनीयान्नंसर्वरसंपुरस्तस्यददौस्वयम् ॥ सतुभुक्त्वाकतिपयान्ग्रासान्शीघ्रंसमुत्थितः ॥ ७१ ॥ उदरव्यथयाभोक्तुंशक्यतेनेतिचा
ब्रवीत् ॥ ततोव्यासोमहाभक्त्यासदुच्छिष्टंतुपत्रकम् ॥ ७२ ॥ स्वयमुत्थापयामासअहोभाग्यमितिब्रुवन् ॥ ततःससाधुर्व्यासस्यपति
त्वापादयोर्मुदा ॥ ७३ ॥ क्षमापयामासनिजंकृतंकपटमब्रवीत् ॥ एवंतंपूर्णपुरुषंज्ञात्वामृत्युंततःसुतान् ॥ ७४ ॥ आहूयप्रददौसर्वं
कृत्वाभागत्रयंस्वयम् ॥ धनमेकत्रचैकत्रकृष्णमूर्तिस्तथैवच ॥ ७५ ॥ मुद्रातिलकमेकत्रपुत्रानाहप्रगृह्यताम् ॥ तदैकेनतुसर्वस्वंपरेण
प्रतिमाहरेः ॥ ७६ ॥ तृतीयेनतुमुद्रादिगृहीतंभक्तिपूर्वकम् एवंव्यासोमहाभक्तोबभूवातिदयान्वितः ॥ ७७ ॥ सनाढ्यब्राह्मणःख्यातः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्वभक्ताशिरोमणिः ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येव्यासचरितंनामद्वादशाधिकशततमःसर्गः॥११२॥ ॥छ॥ ॥ एवंरूपस्यशिष्यो
भून्नाम्नाजीवेतिविश्रुतः॥ गोस्वामीतिचविख्यातोराधाकृष्णौजजापसः ॥१॥ करामलकवत्सर्वंयस्यशास्त्रमभूत्किल॥सर्वसंदेहसंछेत्तात
त्वज्ञानीमहाशयः ॥ २ ॥ एकदाकेनचित्तस्मैदत्तंभोज्यमनुत्तमम् ॥ चिक्षेपयमुनायांससर्वंतत्स्वयमेवाहि ॥ ३ ॥ तदैकःप्राहतंशि
ष्यःस्वामिन्नेतत्तुरक्षताम् ॥ एतेनसाधुसेवांवैकरिष्येभवदाज्ञया ॥ ४ ॥ इतिशिष्यवचःश्रुत्वाजीवःप्राहातिभक्तिमान् ॥ नयोग्यंसा
धुसेवायांवर्ततेकोपितेंतिके ॥ ५ ॥ त्वंचिकीर्षसिचेत्सर्वंगृहीत्वाकुरुसेवनम् ॥ इतिश्रुत्वातदाशिष्यःसाधुसेवापरोभवत् ॥ ६ ॥ सतु
शिक्षांददौतस्मैशिष्यायातिप्रयत्नतः ॥ नगर्वःसाधुसेवायांकर्तव्यःसर्वदात्वया ॥ ७ ॥ एवंगोपालभक्तोभूद्राधाकृष्णप्रपूजकः ॥
सर्वभूतसुहृद्दोषत्यागीवक्तागुणस्यच ॥ ८ ॥ भगवानपिनाम्नाभूद्भक्तचाल्युपनामकः ॥ सीतारामस्वरूपंतुगृहीतंगुरुभक्तितः ॥ ९॥
एकदामथुरायांससमायातोदिदृक्षया ॥ राधाकृष्णौतत्रदृष्ट्वातद्रूपंचेतसाधृतम् ॥ १० ॥ तथैवरासनृत्यादिलीलाःकुर्वन्नहर्निशम् ॥
तस्यौगुरुरथायातोभगवंतंददर्शह ॥११॥ अन्यैवरीतिरस्याभूदितिशंकामवापसः ॥ भगवानपितज्ज्ञात्वागुरोरंतर्गतांमतिम् ॥१२ ॥
वृंदावनेतदैकांतेगुरुंनत्वाब्रवीत्स्वयम् ॥ भवत्प्रसादादेषावैबुद्धिःप्रादुर्बभूवमे ॥ १३ ॥ गुरुस्तमाहकिंतेनराधाकृष्णौतुथाविह ॥
तावेवसीतारामौत्वंज्ञात्वामामेवपूजय ॥१४॥ इत्युक्त्वाप्रययौसोपिगुर्वाज्ञातोगुरुंययौ॥ एवमेकोमहाभक्तोद्विजोविपुलविह्वलः ॥१५॥
गुरुंश्रीकृष्णमेवासौमन्यमानोर्चयन्स्थितः ॥ एकदासगुरुस्तस्यमृतोदैवाद्धरिंस्मरन् ॥ १६ ॥ तदारभ्यसशोकेनतूष्णींगेहेस्थितो
भवत् ॥ अथशोकापनोदायतंरासस्समयेजनाः ॥ १७ ॥ वैष्णवानिन्युरेकस्मिन्दिनेसोपिसमागतः ॥ दृष्ट्वानृत्यंहरेरग्रेतनुंतत्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जलीलया ॥ १८ ॥ कृष्णचैतन्यशिष्योभूल्लोकनाथेतिविश्रुतः ॥ कृष्णलीलाजगौनित्यंतत्वज्ञानपरायणः ॥ १९ ॥ माथुरोगोस्वा मिनाथोभक्तोतीवविलक्षणः ॥ एकदासतुशुश्रावमथुरायांनिरंतरम् ॥ २० ॥ कृष्णस्तिष्ठतिचेत्येवमागतोमथुरांपुरीम् ॥ प्रतिकुंजंप्र तिवनंप्रतिह्रदंप्रतिक्षणम् ॥२१॥ विचिन्वन्सतुवभ्रामपरित्यक्तासनोदकः॥एवंदिनद्वयेजातेतृतीयेदिवसेतदा ॥ २२॥ दुर्बलोयमुनाती रंगच्छन्वंशीवटंप्रति ॥ दृष्ट्वातंगोपवेषंतुश्यामंकमललोचनम् ॥ २३ ॥ द्रुतमागत्यतंप्रेम्णादधारांकेतिहृष्टवत् ॥ ततस्तंभगवानाह मोहयन्निजमायया ॥ २४ ॥ कोसिगृह्णासिमामेवकिमर्थंभ्रांतिमानिव ॥ तदोवाचमधुस्वामीकृष्णबुद्ध्याधृतोसिभोः ॥ २५ ॥ प रंतुत्वामिदानींतुगोपंजानामिसुंदरम् ॥ इत्युक्त्वातंसतत्याजपुनर्यातोयदृच्छया ॥ २६ ॥ अथरात्रौहरिःस्वप्नेप्रोवाचैनंहसन्निव ॥ ध्यायंस्तद्रूपममलंममसन्निधिमेष्यसि ॥ २७ ॥ ततःसोतिकृतार्थोभून्माथुरोगोस्वामिनामकः ॥ मरणांतंतुतत्रैवास्थित्वाविष्णुंजगा मसः ॥ २८ ॥ कृष्णदासब्रह्मचारीशिष्योरूपस्यसत्तमः ॥ गुर्वाज्ञयार्चयन्राधाकृष्णौमुक्तोबभूवह ॥ २९ ॥ यःस्वशिष्योमहानासी द्भट्टोनारायणाभिधः ॥ एवंद्वितीयःशास्त्रज्ञःकृष्णदासोतिभक्तिमान् ॥ ३० ॥ भूगर्भेतिचविख्यातोगोस्वामीचातिभक्तिमान् ॥ मृतो जगामश्रीकृष्णसन्निधिंयोगिदुर्लभम्॥३१॥ इतिश्रीभगवद्भक्तिमाहात्म्येभक्तरूपकचरित्रकथनंनामत्रयोदशाधिकशततमःसर्गः॥११३॥ मुरारिनाम्नाभक्तोभूद्रसिकेत्युपनामकः ॥ कथामस्यप्रवक्ष्यामिपरमाश्चर्यकारिणीम् ॥ १ ॥ निधायकुंडेसर्वेषांभक्तानांचरणोद कम् ॥ तस्यैवपूजांतत्पानंचक्रेतेनैवमार्ज्जनम् ॥ २ ॥ एवंतस्यव्रतंनित्यमासीद्भक्तस्यदुर्लभम् ॥ एकदासचभक्तस्तुगुरोःक्षयदिनेबहू न् ॥ ३ ॥ भक्तान्निमंत्रयामाससमायातास्तुवैष्णवाः ॥ तत्रैकस्तत्परीक्षार्थंगलत्कुष्ठमवैष्णवम् ॥ ४ ॥ मालातिलकमुद्राभि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

योजयित्वासमानयत्॥मुरारिस्तंप्रणम्याहशिष्यंसाधुपदांबुजम् ॥५॥ सर्वस्मादुदकंनीत्वाचामयस्वातिसत्वरम्॥इतिश्रुत्वाततःशिष्य
स्त्वरितंसाधुसंसदि॥६॥गत्वाप्रक्षाल्यचरणौजलंनीत्वामुरारये॥ददौमुरारिस्तत्किंचिद्गृह्णञ्छिरसिभक्तितः ॥७॥ आगत्यभक्तवृन्देतुदृ
ष्ट्वाकुष्ठिनमब्रवीत्॥आगतोसिकुतोभक्तसकुष्ठीतमथाब्रवीत् ॥८॥ मालांमुद्रांवहन्सत्यंब्रवीम्यहमुपागतः॥ततःस्वयंसमुत्थायकुंडस्यां
तिकमागतः ॥९॥ स्वयंप्रक्षाल्यचरणौतत्पादोदकमादरात् ॥ साधुपादोदकंमत्वापपौतद्भक्तिपूर्वकम् ॥ १० ॥ ततस्तस्यैवकुष्ठस्यत
त्करस्पर्शमात्रतः॥ शरीरमभवत्सम्यक्कुष्ठरोगविवर्जितम्॥११॥दृष्ट्वासर्वेतदाश्चर्यंमुरारिंतुष्टुवुर्जनाः ॥ द्वादशाहमसौसाधून्भोजयामा
सयत्नतः॥१२॥आरामेवसतस्तांस्तुसत्कर्तुंस्वयमागतः॥अथतेषांतुसाधूनामेकोधूमंपिबन्स्थितः ॥१३॥ दृष्ट्वामुरारिंतद्यंत्रंनारिकेलं
तिरोदधे॥ स्वयंदृष्ट्वामुरारिस्तुतदंतिकमुपागतः ॥१४॥ संभाष्यसर्वान्संतुष्टोमिथ्यारोगीवचोब्रवीत् ॥ अहोममोदरेपीडासमुत्पन्नाततः
क्वचित्॥१५॥वर्ततेधूमपानायनारिकेलंतदर्पय ॥ इतिश्रुत्वातुसंहृष्टःसमुत्थायददौस्वकम् ॥१६॥ उद्घाटयनारिकेरंसगृहीत्वायोजय
न्मुखे॥ मिथ्यारोगंविधायाथसमुत्तस्थौगृहंप्रति ॥१७॥ नोद्वेगःस्याच्चसाधूनामित्येवकृतवान्स्वयम् ॥ एकदासाधवस्तत्रसमायाताबुभु
क्षिताः ॥ १८ ॥ तान्भोजयन्सशिष्यस्तुकेनचित्साधुनार्थितः ॥ योमदीयोस्तिदंडोयंतदर्थंयंत्रमर्पय ॥ १९ ॥ सर्वोपकरणं
तस्मैप्रददेसोब्रवीन्मुहुः ॥ ततःशिष्योनचोवाचसर्वेभ्योऽन्नंददौस्थितः ॥ २० ॥ ततस्तुदंडवान्साधुश्चुकोपस्फुरिताधरः ॥ स्वो
च्छिष्टपात्रमादायमुरारेःसन्निधौगतः ॥ २१ ॥ गत्वातन्मस्तकेक्रोधाच्चिक्षेपातिरुषाशिवे ॥ मुरारिस्तुततोहृष्टोममभाग्यमिति
ब्रुवन् ॥ २२ ॥ पत्रावलींगृहीत्वातांनत्वानेत्रेनिधायच ॥ शिष्यंनिर्भर्त्सयामासतस्मैशिक्षांददौपुनः ॥ २३ ॥ अरेदंडाय

सएन यस हुक्का अते हितः

पंत्रं आसनं दंडस्थापनार्थम् पीठं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भवताकुतोनैवार्प्पितंवद ॥ गत्वास्वयंतंनिकटेदत्त्वादंडायभूरिशः ॥ २४ ॥ प्रार्थयामासतंसाधुंक्षमस्वेतिवदन्मुहुः ॥ दृष्ट्वै तत्परमाश्चर्य्यंसर्वेतेसाधवस्तदा ॥ २५ ॥ मुरारिंतुष्टुवुर्दृष्ट्वादंडवानातिलज्जितः ॥ अथैकस्मिन्दिनेतस्यश्यामानंदोगुरुःस्थितः॥ ॥ २६ ॥ तस्यैकोजीविकाग्रामोहृतोम्लेच्छेनभूभुजा ॥ ततोमुरारयेपत्रंलिलेखसगुरुस्तदा ॥ २७ ॥ पत्रंदृष्ट्वास्थितोयादृक् तथैवैहिमग्रतः ॥ भुक्त्वाशोधयितुंपाणिंचलितस्तद्ददर्शह ॥ २८ ॥ गुरोःपत्रंतथैवासौचलितोगुरुसन्निधिम् ॥ तत्रागत्यगु रुंनत्वाश्रुत्वासर्वंगुरोर्मुखात् ॥ २९ ॥ तदैवम्लेच्छनृपतेर्ग्रामसन्निधिमागतः ॥ नृपतेःसचिवास्तस्यश्रुत्वासर्वेतमागतम् ॥ ३० ॥ आजग्मुर्भक्तिपूर्वंतेतमूचुरतिविस्मिताः ॥ महाम्लेच्छोयमस्तीहनेमंद्रष्टुंत्वमर्हसि ॥ ३१ ॥ अस्माभिरेवभवतःकार्य्यंसंपाद्यतेसुखम् ॥ इतिश्रुत्वापिनासौतदमन्यतवचस्ततः॥३२॥सचिवाआगताराजसन्निधौनृपतिस्तुतान्॥पप्रच्छाद्यकुतश्चासीद्विलंबोभवतामिह॥३३॥ इतिराजवचःश्रुत्वासचिवाआहुरादरात् ॥ राजन्नोगुरुरायातस्तद्गुरोर्जीविकाहृता ॥ ३४ ॥ भवदीयेनतेनासौभवंतंवक्तुमागतः ॥ इ तिश्रुत्वाब्रवीद्राजातमानयंतुमांप्रति ॥३५॥ कीदृशीवर्ततेशक्तिस्तांमेदर्शयितुंस्वयम् ॥ इत्युक्तास्तेपिसचिवागुरुमाजुहुवुस्तदा॥३६॥ राजद्वारिमहामत्तंस्थापयामासतंगजम् ॥ स्वयंतदुपरिष्टात्तुप्रासादेसंस्थितोभवत् ॥ ३७ ॥ मुरारिरपिचायातोदोलायांगजसन्निधौ ॥ दृष्ट्वादोलांततोहस्तीमत्तश्चीत्कृत्यदुद्रुवे ॥ ३८ ॥ दृष्ट्वातद्दोलिकावाहापलायित्वादिशोदश ॥ जग्मूरुदंतोदोलातोमुरारिर्वहिराग तः ॥ ३९ ॥ हरेकृष्णहरेकृष्णराधाकृष्णेतिसंजपन् ॥ इतिश्रुत्वाततोहस्तीमुरारिचरणांबुजे ॥ ४० ॥ संयोज्यमस्तकंतस्थौमुरारि रपितत्क्षणात् ॥ राधाकृष्णेतिमंत्रंसतत्कर्णेप्राहनिर्भयः ॥४१॥ गलेथतुलसीमालांगजायदत्तवान्स्वयम् ॥ गोपालदासइत्येतन्नामचक्रेऽ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तिहर्षितः ॥४२॥ श्रुत्वेमंसर्ववृत्तांतंप्रासादस्थोमहीपतिः ॥ तंग्रामंदत्तवान्सद्योग्रामानन्यान्समर्पयत् ॥ ४३॥ रत्नवस्त्रादिकंचान्यद्दत्त्वा
तुष्टंव्यसर्ज्जयत् ॥ अथगोपालदासस्तुगजराजोबभूवयः ॥४४॥ससाधून्पृष्ठआरोप्यचचाराथतदीच्छया ॥ राजकार्य्येमहामत्तोनागतो
नांकुशादपि ॥ ४५ ॥ एवंवणिग्गृहेगत्वागोधूमादिप्रपूरितम् ॥ नीत्वादरिद्रसाधुभ्योददौनित्यंस्वयंगतः ॥४६॥ ततस्तेवणिजःसर्वेंमुरारे
र्निकटेगताः॥आहुर्हस्तिकृतंसर्वंश्रुत्वासोप्याजगामह॥४७॥तंगजंप्राहकिमिदंकुरुष्वेतिजुगुप्सितम्॥एतांस्तुदुःखितंकृत्वापरस्मैयत्प्रय
च्छसि॥४८॥न्यवर्ततततोहस्तीवणिजांवस्तुलुंठनात्॥ स्वपृष्ठोद्वहनेनैवसाधुसेवांचकारसः ॥ ४९ ॥ इत्येवंपरमाश्चर्यंश्रुत्वादिल्लीश्वरोनृ
पः॥ वैष्णवंप्रेषयित्वातमानिनायाथहस्तिनम् ॥ ५० ॥ दृष्ट्वासपरमाश्चर्य्यंप्राप्यतस्मैजजापवै ॥ ददौमिष्टान्नपानादिनजग्राहसकिंचन
॥ ५१ ॥ एवंदिनत्रयेजातेदिल्लीशश्चातिचिंतितः ॥ प्राप्यमद्भवनंनैवभुंक्तेतस्मादिमंगजम् ॥ ५२ ॥ गंगायांस्नापयंत्वाद्यततोभो
क्ष्यतिचेदयम् ॥ अथतेवैष्णवास्तस्यपृष्ठाद्भुविसमास्थिताः ॥ ५३ ॥ हस्तीगंगांप्रविश्याशौसम्यक्स्नात्वातिभक्तितः ॥ तीरेस्थित्वा
ततःप्राणान्मुमुचेपश्यतांनृणाम् ॥५४॥ इत्येतत्परमाश्चर्य्यंश्रुत्वादिल्लीश्वरादयः ॥ तुष्टुवुर्भक्तिमाहात्म्यंसाधुसाध्वितिवादिनः॥५५॥
एवमन्येमहाभक्ताबभूवुर्मथुरापुरि ॥ साकाशीवतथाचैवत्रिलोचनइतिश्रुतः ॥ ५६॥ आशाधरोदेवराजइत्याद्यावैष्णवोत्तमाः ॥ नाम्ना
चकीर्तिताश्चैतेहरिभक्तिप्रदायकाः ॥५७॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येहरिदासचरितंनामचतुर्दशाधिकशततमःसर्गः ॥ ११४ ॥
सदनेतिमहाम्लेच्छवंशजोभक्तिमानभूत् ॥ कथामस्यप्रवक्ष्यामिपरमाश्चर्य्यकारिणीम् ॥ १ ॥ पूर्वजन्मनिविप्रोसौधनवृत्त्युपजीवकः ॥
दानधर्म्मादिरहितोनिजकर्म्मच्युतःसदा॥२॥परंत्वेकंव्रतंतस्यनकदाचिच्च्युतंभवेत् ॥ शालग्रामशिलापूजामकृत्वानैवभोजनम् ॥३॥

कसाई

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

एकदावृत्तिलोभेनददौम्लेच्छायवैधनम् ॥ मांसविक्रयिणेविप्रोजातेकियतिवत्सरे ॥ ४ ॥ नप्रापतद्धनंतस्मादथकालेम
मारसः ॥ स्मरन्तमधमर्णंयत्प्राणांस्तत्याजसद्विजः ॥ ५ ॥ ततस्तस्यैवम्लेच्छस्यपुत्रोभूत्कर्मबंधनात् ॥ तत्रतेनातिधनिनाह्येक
पुत्रेणपालितः ॥ ६ ॥ सदनेत्यकरोन्नामसमहाधनसमृद्धिमान् ॥ सदनोपिचकालेनजातोद्वादशवार्षिकः ॥ ७ ॥ शालग्रामशि
लापूजानियमोयःस्थितःपुरः ॥ तेनतस्यैकदाकस्मादरण्येमिलितःस्वयम् ॥ ८ ॥ शालिग्रामोतिविपुलःसेटकेनमितःशुभः ॥ तंगृ
हीत्वातिहृष्टःसन्समागत्यस्वमंदिरम् ॥ ९ ॥ तेनैवसेटकेनासौमांसंविक्रीतवान्सदा ॥ परंतुहिंसारहितोदयावान्जीवमात्रके ॥ १० ॥
अथतस्यपितामाताभ्रातरश्चापियेस्थिताः ॥ मृताःसर्वेतदातेचधनस्वामीबभूवसः ॥ ११ ॥ एकदातेनमार्गेणजगन्नाथदिदृक्षया ॥ आ
गतावैष्णवास्तत्रतन्मध्येकोपिचागतः ॥ १२ ॥ सदनस्यगृहद्वारिशालग्रामंददर्शसः ॥ मत्वाश्चर्यंसदुःखार्तःसदनंप्राहनम्रतः ॥ १३ ॥
अहोममास्तिदेवोयंदीयतांमेकृपांकुरु ॥ नैवकिंचित्फलंचास्यतवसत्यंब्रवीम्यहम् ॥ १४ ॥ इत्युक्तःसदनःप्रादाच्छालग्रामंतुसाधवे ॥
गृहीत्वासोतिहर्षेणययौवैष्णवसंसदि ॥ १५ ॥ पंचगव्येनसंस्नाप्यततोगंगोदकेनच ॥ पूजयित्वासमर्प्यान्नंस्वयंभुक्त्वासुखीस्थितः ॥ १६ ॥
अर्धरात्रेतदाविष्णुःस्वप्नेवैष्णवरूपधृक् ॥ तंसाधुमब्रवीद्वाक्यंकोपतश्चातिनिष्ठुरम् ॥ १७ ॥ अहोमांनयतत्रैवम्लेच्छस्यनिकटेद्रु
तम् ॥ नोचेत्तेसर्वनाशंवैकरिष्यामिनसंशयः ॥ १८ ॥ एवंदृष्ट्वासुभाभ्यांतुस्वप्नंनिशिभयप्रदम् ॥ उत्थायभ्रमएवायमितिमत्वास्व
प्न्पुनः ॥ १९ ॥ पुनर्ददर्शचोत्तस्थौपुनःसुप्त्वाददर्शतत् ॥ अथप्रातःसमुत्थायगुरुःशिष्यमुपाह्वयत् ॥ २० ॥ शालग्रामोयतोनी
तस्तस्मैदेहिद्रुतंतुतम् ॥ श्रुत्वाशिष्योपितत्कालंसदनायददौशिलाम् ॥ २१ ॥ उवाचाहोतवैवायंपूजांवांछतिनोमम ॥ गृहाण

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तांनिजामेतांशालग्रामशिलांशुभाम् ॥ २२ ॥ ततस्तुसदनोहृष्टोगृहीत्वातांशिलांस्वयम् ॥ धनंसर्वंतुसाधुभ्योदत्त्वाप्रचलितःस्व
यम् ॥ २३ ॥ ॥ एवंजातेकचित्कालेभिक्षार्थंकिस्याचिद्गृहे ॥ तत्रैकांयुवतींदृष्ट्वायथाचेतांतुभोजनम् ॥ २४ ॥ दृष्ट्वासासदनंगेहे
युवानंसुंदरंतदा ॥ अहोत्वंनिवसात्रैवकृत्वालग्नंमनोमम ॥ २५ ॥ इदंगृहमिदंवित्तमहंचैवतवैवहि ॥ नमांत्यजरमस्वात्रमया
तिप्रिययाप्रिय ॥ २६ ॥ श्रुत्वैतद्वचनंतस्याःसदनःप्रत्युवाचताम् ॥ मातःकथमिदंब्रूषेवचनंचातिगर्हितम् ॥ २७ ॥ नमेवित्तेन
गेहेनास्त्रियावास्तिप्रयोजनम् ॥ तवापिपतिरस्त्येवतेनसाकंरमस्वभोः ॥ २८ ॥ इत्युक्तासातिपापिष्ठाभर्तपतेर्भयतःस्वयम् ॥ एवंवद
तिचेत्येवंचिंतयित्वागृहेगता ॥ २९ ॥ छित्त्वापत्युःशिरःप्राहसदनंपुनरागता ॥ मयाहतःपतिःपश्यत्वयिप्रेमयतोमम ॥ ३० ॥
अतःपरंनगंतव्यंनिःशंकोनिवसात्रवै ॥ इत्युक्तःसदनःशीघ्रंनिर्ययौभयविह्वलः ॥३१॥ अथसापृष्ठतस्तस्यबहिरागत्यतत्क्षणात् ॥ महा
स्वरेणरुदतीसामाजिकमथाह्वयत् ॥ ३२ ॥ अहोसर्वेसमायांतुद्रुतंपश्यंतुमेदशाम् ॥ ततोसर्वेसमागत्यधृत्वातंसदनंक्रुधा ॥ ३३ ॥
ताडयंतोनृपस्थानेनिन्युर्बद्ध्वातिकोपनाः ॥ राजापिदृष्ट्वातंसाधुरूपिणंप्राहकोपतः ॥ ३४ ॥ छित्त्वाहस्तौबहिष्कार्यःपुराद्दुष्टोति
पामरः ॥ ततआगत्यचांडालश्छित्त्वाहस्तौतमत्यजत् ॥ ३५ ॥ ततःससदनोमत्वापूर्वकर्म्मफलंनिजम् ॥ निर्भर्त्सितोपितैःसर्वैः
साकमेवंययौपुनः ॥ ३६ ॥ भिक्षावृत्तिश्छिन्नहस्तःपुरीसन्निधिमागतः ॥ अथरात्रौजगन्नाथःस्वप्नेप्रोवाचपूजकम् ॥ ३७ ॥ यश्छिन्नह
स्तआयातिवैष्णवैःसहतेंतिके ॥ शिविकायांसमारोप्यप्रातःशीघ्रंसमानय॥३८॥अथप्रातःसमुत्थायपूजकोभ्येत्यतत्रतु॥ सर्वेषांपश्यतां
तंतुसदनंप्राहपूजकः॥३९॥जगन्नाथाज्ञयासाधोआरुह्यशिविकामिमाम्॥तत्रगच्छेतिश्रुत्वासप्राहनार्हामिदोलिकाम् ॥४०॥पूजकेनपुनः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रोक्तस्ततस्तंप्रणनामसः ॥ तस्यप्रणामसमयेहस्तौजातौतुपूर्ववत् ॥ ४१ ॥ अथशोभनहस्तःससमारुह्यतुशीविकाम् ॥ जगन्नाथसमीपेऽगात्तत्रतस्थौसमाःकति ॥ ४२ ॥ नीलाचलाद्व्रजंगत्वाकृष्णभक्त्यादिवंगतः ॥ एवंसोभूद्दयारामोरामदासादयस्तथा ॥ ४३ ॥ नामदासस्तथैवाभूद्विमलानंदनामकः ॥ पतीरामस्तथाश्यामोदल्हपद्ममनोरथाः ॥४४॥ विष्णुभक्तिरताःसर्वेमृताजग्मुर्हरेःपदम् ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येसदनभक्तिचरितंनामपंचदशाधिकशततमःसर्गः ॥ ११५ ॥ ॥ षोजीनामबभूवैकोभक्तोतीवसुसत्तमः ॥ स्वगुरुंकृष्णवत्पश्यन्पूजयामासभक्तितः ॥ १ ॥ एकदातंगुरुःप्राहबद्धावंटांक्कचित्स्वयम् ॥ ममप्रस्थानसमयःसमायातोंतिकेऽधुना ॥ २ ॥ मृतोहंयदिकृष्णस्यदूतैर्नीतोतदंतिके ॥ तदाकस्मात्स्वयंघंटानादःसत्यंभविष्यति ॥ ३ ॥ अन्यथान्यत्रगमनंममैतन्निश्चितंमनः ॥ इतिश्रुत्वावचःसर्वेजातास्तज्ज्ञातुमुत्सुकाः ॥ ४ ॥ अथैकस्मिन्दिनेषोजीप्रेषितोगुरुणाक्कचित् ॥ तस्मिन्नेवदिनेतस्यगुरुरत्यंतदुःखितः ॥ ५ ॥ स्वांगणेस्थापितःशिष्यैस्ततोनशयनेस्थितः ॥ मृतंव्यलोकयन्नूर्ध्वघंटायानाभवद्ध्वनिः ॥ ६ ॥ नीत्वातस्यशरीरंतुशिष्याःसंचस्करुस्तदा ॥ द्वितीयेदिवसेषोजीसमायातोनिजंगृहम् ॥७॥ श्रुत्वागुरुंमृतंभक्त्यारुरोदोच्चैःस्वरेणसः ॥ प्रबोधितोन्यशिष्यैस्तुषोजीपप्रच्छतान्पुनः ॥ ८ ॥ तेप्यूचुराम्रवृक्षस्यतलेऊर्ध्वमुखोमृतः ॥ ततःषोजीसमुत्थायतथासुप्त्वाविलोकयन् ॥ ९ ॥ उपरिष्टाददर्शैकंपक्कमाम्रफलंशुभम् ॥ उत्थायतद्गृहीत्वासचिच्छेदचशनैःशनैः ॥ १० ॥ तन्मध्यान्निर्गतःकीटोघंटाध्वनिरभूत्तदा ॥ ततःसर्वेसमागत्यकिमिदंत्वितिचाब्रुवन् ॥ ११॥ प्राहषोजीततःसर्वाञ्छृणुध्वंचात्रकारणम् ॥ गुरोर्मेमृत्युसमयेमनश्चास्मिन्फलेगतम् ॥१२॥ उत्तानशायिनोदृष्टाततःकीटोबभूवसः॥गत्वाग्रंबुभुजेपश्चात्तस्मान्निष्कासितोमया ॥ १३ ॥ जगामहरिसांनिध्यंघंटाध्वनिरभूत्तदा ॥ यामातिः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सागतिश्चांतेएवंसंबोधयन्स्वयम् ॥ १४ ॥ मनोनिवेश्यचाग्रेस्मिन्कीटोभूत्वाव्यबोधयत् ॥ इतिसर्वेसमाकर्ण्यसाधुसाध्वितिचाब्रुवन्
॥ १५ ॥ मनोजेतव्यमित्येवसर्वशास्त्रविनिश्चयः ॥ वर्ततेतत्रकर्तव्योयत्नोनित्यंमुमुक्षुभिः ॥ १६ ॥ एवंपरस्परालापंकृत्वासर्वे
जहुःशुचम् ॥ पुंडरीकपुरेरंकानाम्नाशूद्रोबभूवह ॥ १७ ॥ बंकानाम्नीचतत्पत्नीरंकातोपिदृढव्रता ॥ अकस्मादुभयोर्भक्तिर्व
भूवातीववैष्णवी ॥ १८ ॥ यथालाभेनसंतुष्टौधनतृष्णापराङ्मुखौ ॥ अरण्येशुष्ककाष्ठानिगृहीत्वानगरेपुनः ॥ १९ ॥ विक्री
यान्नादिकंतस्यक्रीत्वातौजीवतोसुखम् ॥ विठ्ठलेत्येवजल्पंतौस्मरंतौहृदिविठ्ठलम् ॥ २० ॥ तन्मनस्कौतदात्मानौमहाभक्तौ
बभूवतुः ॥ रंकानुगामिनीसाचबंकायत्रसगच्छति ॥ २१ ॥ तत्रतत्रतुसाचापिगच्छत्येवनिरंतरम् ॥ एवंगतेषुकालेषुनामदेवोऽ
ब्रवीद्धरिम् ॥२२॥ विठ्ठलंदययास्वामिन्देहित्वमेतयोर्द्धनम् ॥ विठ्ठलस्तुततःस्वप्नेनामदेवमुवाचह ॥२३॥ प्रातर्वनेसमागच्छद्रक्ष्यसियदा
स्याम्यहंधनम् ॥ भक्तेनकेनचिच्चैवसाकंतिष्ठवनेप्यहो ॥ २४ ॥ अथप्रातःसमुत्थायरंकाबंकेतिदंपती ॥ चलितौस्वगृहात्तत्राहर्तु
मिंधनसंचयम् ॥ २५ ॥ नामदेवःपुरातत्रगत्वाभक्तंददर्शह ॥ ताभ्यांदातुंधनंतस्मैनामदेवायचाब्रवीत् ॥ २६ ॥ पश्यदास्यामिवि
त्तानिमार्गेचावांनिलीयवै ॥ तिष्ठावोत्रागतावेतौसंतौकिंवाकरिष्यतः ॥ २७ ॥ इत्युक्त्वासधनंसर्वंमार्गेसंस्थाप्यसन्निधौ ॥ तिरोभूय
स्थितःसाकंनामदेवेनयत्नतः ॥ २८ ॥ अथरंकासमायातोदृष्ट्वाबहुधनंपथि ॥ मत्वातृणसमंकिंचिच्चलितःप्रत्यगात्पुनः ॥ २९ ॥
धूलिभिःपूरयामासपश्यन्पत्नीमुपागताम् ॥ साप्यागत्यचपप्रच्छकिमत्रकृतवान्भवान् ॥ ३० ॥ रंकाआहततःपत्नींधनमत्रास्थितं
बहु ॥ तद्दृष्ट्वातेनलोभःस्यादितिप्रच्छादितंमया ॥ ३१ ॥ श्रुत्वैतत्पतिवाक्यंसाअहोकिंतद्धनंजनैः ॥ उच्यतेतस्यकिंकार्यंदर्शयित्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वदस्वतत् ॥ ३२ ॥ ततोरंकास्तुनिःसार्य्यधूलीस्तामब्रवीत्प्रिये ॥ पश्येदमेवतुधनंग्रहणेस्यफलंशृणु ॥ ३३ ॥ महामोहोमहाशोको
महाक्रोधश्चजायते ॥ एतदर्थंनिहंत्याशुभ्रांतरंपितरंगुरुम् ॥३४॥ पत्नींपतिःपतिंहंतियल्लाभोलोभतोभुवि ॥ तद्धनंनैवगृह्णीयाद्धाक्रिमा
र्गस्यकंटकम् ॥ ३५ ॥ इतिश्रुत्वातदावंकागृहीत्वापाणिनापतिम् ॥ पलायित्वाद्भुतंतस्मान्निर्ययौव्याघ्रभीतिवत् ॥ ३६ ॥ दृष्ट्वेदंच
रितंनामदेवःसवैष्णवस्तथा ॥ गत्वाग्रेशुष्ककाष्ठानिस्थापयामासतुर्वने ॥ ३७ ॥ अपरिश्रमतःकाष्ठमेतयोःस्यादितीच्छया ॥ तौ
तुतत्संचितंत्यक्तातोविचिक्यतुरन्यतः ॥ ३८ ॥ नामदेवस्ततस्तेनभक्तेनगृहमागतः ॥ रंकावंकेअपितथाभवनंसमुपागतौ ॥ ३९ ॥
पुनःसनामदेवस्तुतेनभक्तेनसंयुतः ॥ रंकागृहेसमायातोदातुंवासोधनानिच ॥ ४० ॥ आगत्याग्रेप्रददतंदृष्ट्वावंकातिकोपिनी ॥
किमर्थमेतद्दुष्टंमेगृहेसंस्थापितंधनम् ॥ ४१ ॥ नीत्वागच्छगृहात्स्वामिन्नोचेद्गच्छाम्यहंत्वितः ॥ इत्युक्त्वासापतिंनीत्वाचलितातंगृ
हाद्द्रुतम् ॥ ४२ ॥ अथतांनामदेवस्तुवारयामासयत्नतः ॥ वस्त्रमेकंप्रयत्नेनरंकाजग्राहतत्करात् ॥ ४३ ॥ एवंतच्चरितंदृष्ट्वावि
ष्णुर्वैष्णवरूपधृक् ॥ नामदेवेनसहितोमुमुदेभक्तवत्सलः ॥ ४४ ॥ यावज्जीवमुभावेवंनिस्पृहौविठ्ठलेतिवै ॥ जपंतौश्रीहरेर्धामजग्म
तुर्वपुषोःक्षये ॥ ४५ ॥ एवंलक्ष्मणदासोभून्महाभक्तोतिविश्रुतः ॥ लडूभक्तोबभूवैकोकथयिष्यामितत्कथाम् ॥ ४६ ॥ तीर्थे
यात्रांभ्रमन्सोथबहुदूरंगतःक्वचित् ॥ तत्रैकाराजपूज्यासीद्देवीमूर्तिर्विलक्षणा ॥४७॥ राजाज्ञयामनुष्यैकोबलिस्तस्यैस्थितोन्वहम्॥अयं
यस्यगृहेयातस्तस्यदेवीबलिःस्थितः॥४८॥लडूभक्तंगृहस्थस्सनीत्वाराज्ञेसमर्प्पयत्॥तंगृहीत्वाततोराजाआहूयबलिदायकम् ॥ ४९ ॥
देवीमंदिरमागत्यबलिंदापयितुंस्थितः॥ स्नापयित्वाप्यलंकृत्यमूर्तेरग्रेनिधायतम् ॥५०॥ लडूभक्तशिरश्छेत्तुंबलिदातासमुत्थितः ॥ म

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्द्यादेकमेवात्रचिरंजीवतुकश्चन ॥५१॥ इतिसंतोषितस्तूष्णींतस्थौनोवाचकिंचन ॥ देवीमूर्तिस्ततस्तंतुबलिदातारमच्छिनत्॥५२॥
पलायितस्ततोराजादृष्ट्वातत्कदनंमहत् ॥ लड्डूभक्तस्तुतुष्टावभद्रकालीमनन्यधीः ॥ ५३ ॥ वरंब्रूहीतिसातुष्टादेवीप्राहाथसोब्रवीत् ॥
जगदंबनरंत्यक्त्वागृहाणपायसंबलिम् ॥ ५४ ॥ तेनैवराज्येनृपतौप्रजायांवरदाभव ॥ पुनराहवरंब्रूहीत्युक्तःप्राहकृतांजलिः ॥ ५५ ॥
हरिभक्तिर्दृढामेस्तुत्वत्प्रसादान्महेश्वरि ॥ वरद्वयंददौश्रुत्वादेवीचांतर्दधेतदा ॥ ५६ ॥ रात्रौस्वप्नेमहामायातंराजानंचतत्प्रजाम् ॥
आहाद्यादिनरंत्यक्त्वापायसादिकमर्पय ॥ ५७ ॥ इतिदृष्ट्वातदास्वप्नंप्रातरुत्थायभूपतिः ॥ लड्डूभक्तस्यशिष्योभूत्पायसादिभिरे
वताम् ॥ ५८ ॥ पूजयामासकासारंपरंविस्मयमागतः ॥ एवंतस्यप्रसन्नाभूज्जगदंबापिभक्तितः ॥५९॥ ॥ इति श्रीभगवद्भक्तिमाहा
त्म्येलड्डूभक्तिचरितंनामषोडशाधिकशततमःसर्गः ॥ ११६ ॥ छ ॥ ॥ संतनामाबभूवैकःकुटुंबीवैष्णवोत्तमः ॥ भिक्षयान्नंगृहीत्वासभो
जयामासवैष्णवान् ॥ १ ॥ नकश्चिद्विमुखोगच्छेन्मद्गृहादितिमेव्रतम् ॥ एकदासतुभिक्षार्थंगतेग्रामांतरेक्वचित् ॥२॥ अथतद्भवनेसाधु
रेकस्मिन्दिवसेगतः ॥ पत्नींपप्रच्छकुत्रास्तिसंतभक्तोवदाशुभे ॥ ३ ॥ श्रुत्वासाचातिकोपेनसाधुंप्राहातिनिष्ठुरम् ॥ चुल्यांगतोसौश्रु
त्वातद्वाक्यंसाधुस्तुतत्क्षणात् ॥ ४ ॥ उत्थायचलितस्तस्मात्स्थानादुद्विग्नमानसः ॥ अथमार्गेसंतभक्तोदृष्ट्वातंचबुभुक्षितम् ॥ ५ ॥
प्रणम्योवाचसाधोत्वमागच्छागच्छमेगृहम् ॥ भुक्त्वायथेष्टंगच्छत्वंततःसाधुरुवाचतम् ॥ ६ ॥ तवगेहेगतःपूर्वंसकुत्रास्तीतिमेवचः ॥
श्रुत्वाचुल्यांगतःसेतित्वत्पत्नीप्राहमेरुषा ॥ ७ ॥ अतोनगंतुमिच्छामितवगेहेस्तिकर्कशा ॥ इतितद्वचनंश्रुत्वासंतभक्तोब्रवीच्चत
म् ॥ ८ ॥ नमेस्तिकर्कशास्वामिन्सत्यमुक्तंवचस्तथा ॥ चुल्लीसिध्यर्थमेवाहमागतोत्रास्तिनिर्धनः ॥ ९ ॥ तस्मादागच्छभोस्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मिन्कृपांकृत्वाममोपरि ॥ आनीयस्वगृहंतंतुभोजयित्वाऽव्यसर्जयत् ॥ १० ॥ तदादितस्यगेहेतुअक्षयान्नादिकंह्यभूत् ॥ भगवत्कृपयानासीद्धानिःकस्यापिवस्तुनः ॥ ११ ॥ एवंत्रिलोकनामाभूत्स्वर्णकारोतिभक्तिमान् ॥ अलंकारादियत्तस्यवेतनाद्यद्भवेद्धनम् ॥ १२ ॥ तत्सर्वंप्रददौसद्भयोवंधुभ्योऽनिच्छयाक्वचित् ॥ एकदानृपतेःकन्याविवाहःसमुपागतः ॥ १३ ॥ तदाराजात्रिलोकंतुसमाहूयददौस्वयम् ॥ सुवर्णमस्यशीघ्रंत्वंकुर्वलंकरणंशुभम् ॥ १४ ॥ सगृहीत्वासुवर्णंतुरुष्टःस्वंगृहमागतः ॥ संस्थाप्यतत्सुवर्णंससाधुसेवनतत्परः ॥ १५ ॥ विसस्मारत्वलंकारानिर्माणमथभूपतिः ॥ दिनद्वयेवशिष्टेतुविवाहस्यतदानृपः ॥ १६ ॥ पदातिनात्रिलोकंतंधृत्वासन्निधिमानयत् ॥ अरेलंकरणंजातमित्युक्तःसोऽब्रवीन्नृपम् ॥ १७ ॥ किंचिदस्तितुकर्तव्यंकृत्वाद्यैवददाम्यहम् ॥ इत्युक्त्वागृहमागत्यराजभीत्यापलायितः ॥ १८ ॥ वनंगत्वानिलीयासौचिंतयज्जगदीश्वरम् ॥ अस्यश्रीभगवान्कृष्णोभक्तानुग्रहकारकः ॥ १९ ॥ स्वयंत्रिलोकरूपेणकृत्वालंकरणंशुभम् ॥ क्षणादेवसराजाग्रेनीत्वालंकरणंददौ ॥ २० ॥ राजालंकरणंदृष्ट्वामहासुंदरमद्भुतम् ॥ त्रिलोकरूपिणेतस्मैददौबहुधनंमुदा ॥ २१ ॥ पारितोषिकमादायनत्वाभूपंत्रिलोकवत् ॥ गृहमागत्यचोत्साहंचक्रेनृपधनैरपि ॥ २२ ॥ ज्ञातीन्संभोजयामाससाधुभ्योन्नंददौमुदा ॥ अथत्रिलोकभवनेमहोत्साहंकरोतिसः ॥ २३ ॥ गृहीत्वान्नंत्रिलोकंतुवनंगत्वाब्रवीद्वचः ॥ गृहाणकिंचदेतस्मान्मिष्टान्नंगच्छतत्रवै ॥ २४ ॥ इतिश्रुत्वात्रिलोकस्तुभुक्त्वामिष्टंतुतत्करात् ॥ शनैःशनैर्गृहेगत्वादृष्ट्वातत्रमहोत्सवम् ॥ २५ ॥ पत्नींपप्रच्छकिमिदंकुरुषेयन्महोत्सवम् ॥ श्रुत्वापत्नीतुतंप्राहचिंतितापतिवाक्यतः ॥ २६ ॥ किमेतद्भाषसेनाथभ्रांतिमानिवमांप्रति ॥ पूर्वेद्युर्नृपतेर्गेहान्नीत्वाभूरियनंत्वया ॥ २७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पारितोषिकमादायतस्योत्सवइतिप्रभो ॥ इतिपत्नीवचःश्रुत्वात्रिलोकश्चातिविस्मितः ॥ २८ ॥ श्रीहरेःकृपयाचेदंसर्वंजातममन्यत ॥
ज्ञात्वैवंनिजभक्तस्यरक्षणंकुरुतेहरिः ॥ २९ ॥ ततोतिदृढभक्तोभूद्ययावंतेहरेःपदम् ॥ एवमन्येबभूवुर्येभक्तास्तानत्रनामतः ॥ ३० ॥
कीर्तयिष्यामितेसर्वेकीर्तिताभक्तिदायकाः ॥ सोमदासोभीमदासास्त्रिविक्रमरघूतथा ॥ ३१ ॥ मुकुंदश्चापिगोपालभक्तश्चैवगणेश्वरः ॥
वाल्मीकिनामाचतथावृद्धव्यासस्तथैवच ॥ ३२ ॥ जगतोविठ्ठलाचार्य्योडंडंभोलातथैवच ॥ हरिदासस्तथालाषश्छीतरश्चोद्धवस्त
था ॥ ३३ ॥ कपूरीभक्तइत्येकोदेवानंदस्तथैवच ॥ नरहर्य्यानंदइतिमुकुंदाख्योमहामतिः ॥ ३४ ॥ संतरामस्तथाखेमःश्रीरंगो
नंदइत्यपि ॥ विष्णुश्रीनमइत्येपद्धारकादासमाधवौ ॥ ३५ ॥ रूपदामोदरश्चैवमंडनोनृहरिस्तथा ॥ लोहांगःकेशवश्चैवभगवान्पाल
कंधरः ॥३६॥ प्रयागदासोगोपालोवद्रीनाथस्तथैवच ॥ केशवोहरिनाथश्चभीमखेमातथैवच ॥ ३७ ॥ गोविंदोब्रह्मचारीतिबालकृष्णा
भिधस्तथा ॥ जडपूर्वश्चभरतोगोपीनाथश्चयाचकः ॥ ३८ ॥ गजपतिर्मुकुंदश्चेत्येतेऽभूवंश्चसाधवः ॥ एवंप्रतापरुद्रोभूद्राजानीलाचल
स्थसः ॥ ३९ ॥ शिष्योभूत्कृष्णचैतन्यप्रभोरेकादिनेसतु ॥ कृष्णचैतन्यनिकटेसमागत्यास्थितस्तदा ॥ ४० ॥ राजानंकृष्णचैतन्यो
महाक्रोधेनसंयुतः ॥ प्रतिज्ञामकरोत्तंतुनद्रक्ष्यामिपुनर्नृपम् ॥ ४१ ॥ प्रज्ञायरुद्रआयातोभूयोभूयोपिभक्तितः ॥ नतंददर्शश्रीकृष्णचै
तन्यस्तंमहाप्रभुः॥४२॥तदाचोत्कंठितोराजाकथंद्रक्ष्यतिमांगुरुः॥एवंचिंतापरोराज्यंपुत्रायप्रददौस्वयम् ॥४३॥विष्णुभक्तस्यरूपेणज
गन्नाथमुपागतः॥रथयात्रादिनेतत्ररथाग्रेनृत्यमाचरन् ॥४४॥ अथश्रीकृष्णचैतन्यप्रभुस्तत्रसमागतः॥प्रतापरुद्रंदृष्ट्वासतुतोषतत्क्षणात्प्र
भुः॥४५॥आलिंग्यतमुवाचासौगतस्तेराज्यतोमदः॥अतःपरंमेशिष्योभूर्हरिभक्तिदृढास्तुते ॥४६॥ इत्याकर्ण्यगुरोर्वाक्यंराजानत्वापुनः

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुनः ॥ ननर्तातीवहर्षेणजीवन्मुक्तइवाभवत् ॥४७॥ एवमन्येबभूवुर्येभक्तास्तान्कीर्तयाम्यहम् ॥ बहोरनोब्रह्मदासोविहारीचतुरादिकः ॥४८॥ गंगारामश्चगोविंदोलालदासस्तथैवच ॥ प्रियादासस्तथातक्षामहाभक्तोबभूवह ॥ ४९ ॥ रसिकश्चग्रंथकर्तामहारसिकसत्तमः॥ भक्तकेशवदासेतिबभूवातिमहायशाः ॥५०॥ इतिश्रीभगवद्भक्तिमाहात्म्येत्रिलोकादिचरितंनामसप्तदशाधिकशततमःसर्गः ॥ ११७॥ गोविंदस्वामिनामाभूद्भक्तस्तत्पूजकात्मजः ॥ कथामस्यप्रवक्ष्यामिपरमाश्चर्यकारिणीम् ॥ १ ॥ मथुरायांस्थितोविप्रोगोविंदस्यच पूजकः ॥ तस्यपुत्रोबभूवैकोनाम्नागोविंदइत्यसौ ॥ २ ॥ बाल्येगोविंदपूजांसपश्यंस्तद्भक्तिमानभूत् ॥ दृष्ट्वागोविंदमूर्तिंसबालोयामि त्यमन्यत ॥ ३ ॥ यथाबालोन्यबालेनक्रीडत्येववनौकसः ॥ गोविंदमूर्त्याचिक्रीडबालभावान्निरंतरम् ॥ ४ ॥ अथश्रीभगवांस्तत्र चिक्रीडेबालरूपधृक् ॥ तंसपश्यतिगोपालोनान्यःकोपिचमानुषः ॥ ५ ॥ एकस्मिन्दिवसेबालोमठाद्बहिरुपाह्वयत् ॥ अथगोविं ददेवस्तुशिशुवेषमुपागतः ॥ ६ ॥ चिक्रीडतुर्दंडखंडदंडाभ्यांतौपरस्परम् ॥ भूमिंखनित्वासंस्थाप्यदंडखंडंततःपरम् ॥ ७ ॥ किं चिन्निहत्यदंडेनपुनःशीघ्रंनिहंतियः ॥ सजयीचापरस्तेनजितोरिंगातितत्पुनः ॥ ८ ॥ एवंपरस्परंक्रीडन्गोविंदोजितवान्हरिम् ॥ अजितोपिहिभक्तेनजितोभक्त्यावशीकृतः ॥९॥ तदासभगवान्बालोदंडखंडंतुसत्वरम् ॥ गृहीत्वास्वमठेशीघ्रंप्रययौतद्भयादिव ॥१०॥ अथपूजकपुत्रोपिगृहीतुंतमनुद्रुतः ॥ मठद्वारिगतस्तत्रपूजकैर्विनिवारितः ॥ ११ ॥ अथागत्यमठद्वारात्संमुखेभुविसंस्थितः ॥ रुद न्गालिंददौतस्मैगोविंदायमुहुर्मुहुः ॥ १२ ॥ बहिरेष्यसिचेदद्यत्वांतुद्रक्ष्याम्यहंपुनः ॥ एवंब्रुवन्रुदन्भूयोददर्शालिंस्थितोबहिः ॥ १३ ॥ अथसायमभूत्तस्यमातानिन्येगृहंतुतम् ॥ तत्रापिनासौबुभुजेतमेवहृदिसंस्मरन् ॥ १४ ॥ अथगोविंददेवस्तुस्वप्नेपूजकमब्रवीत् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

गोविंदोबालकोयोसौममातीवप्रियोस्तिभोः ॥ १५ ॥ नभुंक्तेतेनमद्गोपान्मयाप्यद्यनभक्षितम् ॥ अतःप्रातस्तमानीयभोजयित्वासमर्प्पे
य ॥ १६ ॥ मह्यंप्रसादमित्येवंदृष्ट्वास्वप्रातसमुत्थितः ॥ गोविंदशिशुमानीयभोजयामासयत्नतः ॥ १७ ॥ भगवानपितद्रूपोवहि
रेत्यपुनःस्वयम् ॥ क्रीडयित्वाद्भुतंतेनबालेनसहितोद्भुतम् ॥ १८ ॥ एवमेकदिनेबालोरुदन्नेकांतभूमिगः ॥ अर्कवृक्षफलेनाथगोविंदे
नप्रताडितः ॥ १९ ॥ सोप्युत्थाप्यफलंनीत्वादुद्रावातित्वरान्वितः ॥ अटंस्त्वतिचिरेणासौधृतोनीतोगृहेचयः ॥ २० ॥ दत्तंतु
भोजनंभोक्तुंसयदासमुपास्थितः ॥ तदासस्मारशौचंतुनकृतंतदुपद्रवात् ॥ २१ ॥ जनन्यैप्राहगोविंदोमामर्कस्यफलेनसः ॥ सं
ताड्योद्वेजयामासनशौचंकृतमित्यहो ॥ २२ ॥ ततस्तज्जननीचित्रंमत्वातद्भाषितेनच ॥ हसंतीजलमादायददौतंशौचमाचरत् ॥२३॥
एवमेकदिनेश्रीमद्गोविंदस्यचपूजने ॥ नीत्वासर्वरसंचान्नंपूजकश्चलितोमठे ॥ २४ ॥ गोविंदशिशुरभ्येत्यरुद्ध्वामार्गेस्थितोब्रवीत् ॥
अहोमह्यंपुरादेहिततोस्मैत्वंसमर्प्पय ॥ २५ ॥ भुक्त्वायंप्रथमंयातिततःकष्टान्मिलिष्यति ॥ भुज्यतेचेन्मयापूर्वंतदायास्याम्यहंस
ह ॥ २६ ॥ इत्युक्तःपूजकःक्रुद्धोगत्वाततिपतुरंतिके ॥ उवाचपूजकंस्वामिन्गृह्यतांनकरोम्यहम् ॥ २७ ॥ अयंतेतनयोनाम्नायोवैगोविंद
उच्यते ॥ करोत्यनर्थंमार्गेचरुद्ध्वावदतिनिर्भयम् ॥ २८ ॥ देहिमेप्रथमंभोक्तुंततश्चास्मैप्रयच्छभोः ॥ इतिश्रुत्वापितातस्यतत्राग
त्याब्रवीत्सुतम् ॥ २९ ॥ किमिदंकुरुषेनर्थंश्रुत्वासोतीवनिर्भयः ॥ प्रोवाचापितरंसोपिपिताप्रोवाचतंपुनः ॥ ३० ॥ नगमिष्यामि
चाद्यत्वंबहिर्भुंक्ष्वमठेतुसः ॥ भुक्त्वागमिष्यतिबहिस्त्वयासहनसंशयः ॥ ३१ ॥ तथास्वीकृत्यबाह्येसबुभुजेपूजकोददौ ॥ मठेन्नंवि
प्णवेसोथभुक्त्वाबहिरुपागतः ॥ ३२ ॥ तंदृष्ट्वाशिशुगोविंदस्त्यक्त्वान्नंससमुत्थितः ॥ अहोयंप्रथमंयातिवनंत्यक्त्वातुमामिह ॥ ३३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अतोमयानभोक्तव्यंसहानेनव्रजाम्यहम् ॥ इत्युक्त्वाप्रययौशीघ्रंसर्वेदृष्ट्वातिविस्मिताः ॥ ३४ ॥ किंवदत्येवबालोयमुन्मत्तइतिदृश्य
ते ॥ इतिसंचिंतयंतस्तेययुःकार्यार्थमातुराः ॥ ३५ ॥ अतोस्मैप्रथमंदेहिततोमह्यंसमर्प्पय ॥ तदादितस्मैशिशवेपूजकोऽन्नंददौमु
दा ॥ ३६ ॥ एवंगोविंदबालःसबाल्यादेवातिभक्तिमान् ॥ गृहीधर्मेणश्रीकृष्णंपूजयामासभक्तितः ॥ ३७ ॥ लोकेभुक्त्वाखिला
न्कामाञ्छ्रीकृष्णस्यप्रसादतः ॥ आयुर्षांतेजगामासौवैकुंठंयोगिदुर्लभम् ॥३८॥ एवंश्रीरघुनाथाख्योगोपीनाथस्तथैवच ॥ रामभद्रेति
विख्यातःसर्ववैष्णवसत्तमाः ॥३९॥ इति श्रीभगवद्भक्तिमाहात्म्येगोविंदस्वामिचरितंनामाष्टादशाधिकशततमःसर्गः ॥ ११८ ॥ छ ॥
गुंजामालीवभूवैकःपश्चिमेविष्णुभक्तिमान् ॥ लाडाहरइतिख्यातेग्रामेधनसमृद्धिमान् ॥ १ ॥ तस्यैकतनयोकस्माद्युवामृत्युमुपा
गतः ॥ गुंजामालीततोगेहाद्विरक्तोभूदतिव्यथः ॥ २ ॥ धनंसर्वंद्विधाकृत्यपत्नीपुत्रस्त्रियोस्तथा ॥ दत्त्वोवाचगृहाणेदंयाम्यहंमथुरापु
रीम् ॥ ३ ॥ अथस्नुषाप्रणम्याहाकिमनेनधनेनमे ॥ भोगायधनमिच्छंतिनाहंभोगाधिकारिणी ॥ ४ ॥ सहत्वयैवयास्यामिकुर्वंती
तवसेवनम् ॥ गुंजामालीतिवचनंश्रुत्वापत्न्यैददौधनम् ॥ ५ ॥ कियन्नीत्वाधनंपुत्रस्त्रियासहसमागतः ॥ मथुरायांव्रजन्नेकोमठोजीर्ण
श्चिरंतनः ॥ ६ ॥ तन्मध्येकृष्णमूर्तिश्चास्थितत्वात्तस्यमठस्यसः ॥ समीपेसकुटींकृत्वातस्थौतत्रातिभक्तितः ॥ ७ ॥ स्नुषापित
स्यसद्बुद्धिर्ब्रह्मचर्य्यपरायणा ॥ शुश्रूषयंतीश्वशुरंपितृवद्भक्तितत्परा ॥ ८ ॥ पूजयामासकृष्णस्यतांमूर्तिंचातियत्नतः ॥ गुंजामा
लीस्नुषानित्यंब्रह्मचर्य्यपरायणा ॥ ९ ॥ यदानिवेद्यचान्नंसाबहिरायातिवेक्षणम् ॥ तदान्नंव्यक्तमेवाभूदंगुलीभिस्तुखंडितम् ॥ १० ॥
एवंप्रत्यहमाश्चर्य्यंतयोर्भक्तिप्रभावतः ॥ एकदाशिशवस्तत्रक्रीडितुंसमुपागताः ॥ ११ ॥ धूलीभिरिष्टकाभिश्चाकिरंतश्चपरस्परम्॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवन्मूर्तिमपितांधूल्यासंछादयंतिहि ॥ १२ ॥ गुंजामालीस्नुषादृष्ट्वाधूलिभिर्धूसरंहरिम् ॥ ततस्तेशिशवःसर्वेतयानिर्भर्त्सिताग
ताः ॥ १३ ॥ ततोनैवेद्यमादायमूर्त्यग्रेप्रददौस्नुषा ॥ बहिरेत्यस्थिताद्वारेविधायतदनंतरम् ॥ १४ ॥ गृहेगत्वाददर्शान्नमच्छिन्नं
चिंतिताभवत् ॥ गुंजामालिनमाहार्तानभुक्तंहरिणाविभो ॥ १५ ॥ सोपिदृष्ट्वाविचिंत्यातोहरेर्दत्त्वापिधानकम् ॥ मुहुःक्षमापयि
त्वाथगत्वादृष्ट्वातथास्थितम् ॥ १६ ॥ बहिरागत्यतूष्णींसतस्थौचिंतासमन्वितः ॥ स्नुषांप्राहपुनर्मोहात्त्वंभुंक्ष्वान्नमहंतुन ॥ १७ ॥
तावद्भोक्ष्यामियावन्नोभोक्ष्यतिश्रीहरिःस्वयम् ॥ श्रुत्वासाप्राहनैवाहमपिभोक्ष्यामिकिंचन ॥ १८ ॥ ततस्ताभ्यांक्षुधार्ताभ्यांनैवभु
क्तंतुकिंचन ॥ नैवेद्यंश्रीहरेरग्रेदत्त्वासुषुपतुर्निशि ॥ १९ ॥ उभौस्वप्नेहरिःप्राहदिवायेशिशवःस्थिताः ॥ तेतीवमेप्रियायस्माद्युवाभ्यां
यद्बहिःकृताः ॥ २० ॥ ततोभुक्तंननैवेद्यंतस्मादानयतंतुतान् ॥ इतिदृष्ट्वातुसास्वप्नंश्वशुरेणसहस्नुषा ॥ २१ ॥ उत्थायतंहरिंप्राह
प्रातरेष्यंतितेर्भकाः ॥ धूल्यासेवयादिप्रेमभवतेप्रददाम्यहम् ॥ २२ ॥ किंत्विदंधूलिभिर्दुष्टंभविष्यतिततोधुना ॥ भुंक्ष्वप्रातस्तु
दास्यामिधूलिस्तेशिशुभिःसह ॥ २३ ॥ इतिश्रुत्वाततोदेवःसुप्रीतोबुभुजेतुतत् ॥ नैवेद्यंससमागत्यदृष्ट्वाभुक्तंयथापुरा ॥ २४ ॥
मुमुदेश्वशुरस्तस्यागुंजामालीननर्तह ॥ एवंतौभगवद्भक्तौदेहांतेमुक्तिमापतुः ॥ २५ ॥ एवंविठ्ठलनामाभून्महाराष्ट्रेतिभक्तिमा
न् ॥ मुरलीरघुनाथश्चतथैवयदुनंदनः ॥ २६ ॥ हरिदासोमुकुंदश्चविष्णुदासश्चतुर्भुजः ॥ दंडप्रणामकर्ताचकेशवश्चातिभक्तिमा
न् ॥ २७ ॥ एवंस्त्रियोभक्तिमत्योबभूवुःकथयामिताः ॥ दत्त्वादांभिककन्यैकासीतानामेतिविश्रुता ॥ २८ ॥ उमागंगातथागौरी
गोपालेत्येवमादयः ॥ एवंगणेशदेवीतिराज्ञीभक्ताबभूवह ॥ २९ ॥ कथामस्याःप्रवक्ष्यामिशृण्वतांप्रीतिवर्द्धनीम् ॥ गणेशदेवीश्रीकृष्णं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पूजयंत्यथवैष्णवान् ॥ ३० ॥ महाभक्त्यार्चयामासज्ञात्वाश्रीकृष्णसेवकान् ॥ एकदाकोपिदुष्टात्माभूत्त्वावैष्णवरूपधृक् ॥ ३१ ॥
जनयामासराज्ञेवैभक्तिकपटचेष्टितैः ॥ ततःसधूर्तभक्तस्तुराज्ञाविश्वासवानभूत् ॥ ३२ ॥ अंतःपुरेपिसंयातिस्वेकालेसहातिष्ठति ॥
राजापिवैष्णवंसत्वानाकिंचित्तमुवाचह ॥ ३३ ॥ एकस्मिन्दिवसेराज्ञीतस्थावेकांतमंदिरे॥धूर्तभक्तोगतस्तत्रक्षुरिकांप्रतिगृह्यच॥३४॥
राज्ञींजघानजंघायांशक्त्याचैववदन्ली ॥ कथंनवर्तसेमह्यंदेहीत्येवंवदन्मुहुः ॥ ३५ ॥ निःससारततोरक्तंदृष्ट्वातद्धूर्तवैष्णवः ॥ त्रस्तः
पलायितस्तस्मात्स्थानात्प्राणदिदृक्षया॥३६॥अथराज्ञीसमुत्थायबबंधतत्क्षणंस्वयम् ॥ राजातत्रगतोगेहेशय्यायांगंतुमास्थितः॥३७॥
ददर्शशोणितंवस्त्रेसंदेहान्नाब्रवीत्प्रियाम् ॥ किमिदंदृश्यतेरक्तमितिश्रुत्वाब्रवीन्नृपम् ॥ ३८ ॥ स्त्रीधर्मेणेदमभवन्नात्रागच्छसमांतिकम्॥
श्रुत्वातद्वचनंराजापरावृत्यागतोबहिः ॥ ३९ ॥ चतुर्थेदिवसेराजाकामुकोमंदिरंगतः ॥ पत्नीसमीपमागत्यदृष्ट्वातामतिदुःखिता
म् ॥ ४० ॥ ततःपप्रच्छतांराजादुःखंकिंवर्ततेतव ॥ ततोराज्ञीनृपंप्राहधूर्तभक्तस्यचेष्टितम् ॥ ४१ ॥ तस्मिन्नेवदिनेशक्त्याजंघा
यांविनिहत्यसः ॥ मत्तोधनंजिघृक्षुःसन्दृष्ट्वामेशोणितंस्वयम् ॥ ४२ ॥ प्रपलाय्यगतोगेहान्नजानेऽत्रास्तिवानवा ॥ साधुलोभवशादेवं
तस्यदंडोभवेदिति ॥ ४३ ॥ ज्ञातंमयानभवतेप्रोक्तंतस्मिन्दिनेतथा ॥ इतिश्रुत्वापतिस्तस्याभक्तिधैर्यात्तुतोषह ॥ ४४ ॥ सत्य
तयार्थंप्रिययाभुक्त्वाराज्यमकंटकम् ॥ अंतेजगामनृपतिःश्रीकृष्णपदमुत्तमम् ॥ ४५ ॥ एवमन्यास्तथाजाताःप्रियाभक्ताब्रवीमिताः ॥
कलालपासत्यभामाकोलीमानयतीतथा ॥४६॥ यमुनाकमलादेवामृगाहीरम्बदेवकी ॥ एवमाद्यामहाभक्ताबभूवुर्योपितोपिच ॥४७॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येगुंजामालीगणेशदेवीचरितंनामएकोनविंशाधिकशततमःसर्गः ॥ ११९ ॥ ॥ छ ॥ ॥ अंतर्वेदेकान्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कुब्जग्रामस्यतुसमीपतः ॥ भूमिग्रामोस्तितत्राऽभून्नरवाहननामतः ॥ १ ॥ सभक्तोनौकयावैश्यव्यापारंकृतवांस्ततः ॥ अन्नवस्त्रादि
नासाधूंस्तोषयामासयत्नतः ॥ २ ॥ एकदातस्यनौःसर्वसामग्रीसहितावलात् ॥ केनाप्यपहृतातस्यलुंटाकेनवलीयसा ॥ ३ ॥ आ
नीतोभवनेतेनवद्धासौनरवाहनः ॥ ततोलुंटाकभवनसमीपान्नरवाहनः ॥ ४ ॥ तत्रस्थितोहरिंचित्तेस्मरन्द्वित्रिदिनोत्तरम् ॥ नरवा
हनायलुंटाकदास्यन्नंदातुमागता ॥ ५ ॥ दृष्ट्वातंसाधुरूपंसानरवाहनमब्रवीत् ॥ अहोयंहरिवंशस्यशिष्योभूत्वात्रतिष्ठति ॥ ६ ॥
अतस्त्वमुच्चैःश्रीराधावल्लभेतिध्वनिंकुरु ॥ श्रुत्वापृच्छतिकस्त्वंभोतदातस्मैवदद्भुतम् ॥ ७ ॥ गोस्वामिहरिवंशस्यशिष्योहमितितं
वद ॥ श्रुत्वातन्नामसत्कृत्यसर्वदास्यतितेधनम् ॥ ८ ॥ ततोदासीवचःश्रुत्वाचक्रेसर्वंतदुक्तवत् ॥ लुंटाकस्तंमहाभक्त्यासंपूज्यप्र
ददौधनम् ॥ ९ ॥ नैवंकुत्रापिवक्तव्यमित्युक्त्वाप्रददौधनम् ॥ ततस्तंचापिलुंटाकंशिक्षित्वानरवाहनः ॥ १० ॥ महाभक्तंवि
धायाथनीत्वास्वीयधनंमुदा ॥ तदातंचापिस्वगृहमाजगामातिहर्षितः ॥ ११ ॥ अंतेहरिंजगामैवंश्रीगोविंदजनार्दनौ ॥ दामोद
रश्चेश्वरश्चमायानंदस्तथैवच ॥ १२ ॥ गुंठलस्तुलसीदासोगौरीदासस्तथापरः ॥ जटीआनपुरेभाऊदाजीभक्तोवभूवह ॥ १३ ॥
वंदीवैश्योरामदासोभगैतेमोहनस्तथा ॥ माडौटेजगदीशोभूल्लक्ष्मणश्वरथावलौ ॥ १४ ॥ तथासोमपथग्रामेभगवानितिविश्रुतः ॥
सलखानपुरेतद्वद्गोपालोभून्महायशाः ॥ १५ ॥ योवनेरपुरेथान्योगोपालोभक्तिमानभूत् ॥ कुटुंबीसकलत्रादियुक्तोप्यंतस्तुनिःस्पृ
हः ॥ १६ ॥ अथैकदिवसेतस्यवंशारण्यंगतःपुरा ॥ विरक्तःसतुगोपालंश्रुत्वाभक्तंसमागतः ॥ १७ ॥ तत्परीक्षांजिघृक्षुःस्मगो
पालोद्वारमागतः ॥ विचार्यतंनजानाभक्तोयंकोप्यपूर्वकः ॥ १८ ॥ सामान्यवैष्णवधियासत्कृत्यभक्तिपूर्वकम् ॥ उवाच।

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

गच्छभवनेश्रुत्वोवाचसपूर्वकः ॥ १९ ॥ अहोममैषनियमोनपश्याम्यवलांमुखम् ॥ त्वंकुटुंबीतवगृहेकथंयास्याम्यहंव्रती ॥ २० ॥
श्रुत्वातमाहगोपालःस्त्रियःस्थास्यंतिकुत्रचित् ॥ इत्युक्त्वाताःस्तिरोधायविरक्तंगृहमानयत् ॥ २१ ॥ अथागत्याविरक्तस्तुदृ
ष्ट्वाकस्याश्चिदाननम् ॥ क्रुद्धोगोपालवदनेनिजघानचपेटया ॥ २२ ॥ अरेत्वयादर्शितंमेस्त्रीमुखंकथमद्यभोः ॥ इतिजल्पंस्तदात
स्मैगोपालःप्राहहृष्टवत् ॥ ॥ २३ ॥ अहोभाग्यमभूदस्यकपोलस्यनसंशयः ॥ द्वितीयमपिचैवेदंकृतार्थस्यात्तदातुसत् ॥ २४ ॥
ययातुभवनेभक्तदर्शितंस्वमुखंहठात् ॥ तस्यादंडःप्रवक्तव्यःकरोम्यद्यैवतेपुरः ॥ २५ ॥ इतिनिर्दंभवचनंश्रुत्वातुकुलजोब्रवीत् ॥
अहोस्त्रीणांनदंडोस्तिनतवाप्यस्तिदूषणम् ॥२६॥ अहंतवपरीक्षार्थमागतोत्रनसंशयः ॥ येनक्रोधोजितोलोकेतेनसर्वेऽरयोजिताः ॥२७॥
लोभमोहादयोन्येयेभक्तिविघ्नकरानृणाम् ॥ इत्युक्त्वासययौक्वापिगोपालोपिगृहेस्थितः ॥ २८ ॥ लँपानामबभूवैकोमरुदेशे
तिभक्तिमान् ॥ भिक्षामादायसततमन्नंसद्भ्योददौमुदा ॥ २९ ॥ एवंतस्यव्रतंह्यासीदेकस्मिन्दिवसेतदा ॥ दुर्भिक्षमभवद्धोरंतदासो
प्यंतिर्चिंतितः ॥ ३० ॥ तस्मिन्दिनेभोजयित्वासाधून्स्वयमुपोषितः ॥ पत्नीमुपोषितांप्राहकिंकरिष्याम्यतःपरम् ॥ ३१ ॥ दे
शांतरेद्यगंतव्यंस्थातव्यंचात्रतद्वद ॥ मयात्वेकंतुनिश्चित्यस्थापितंशृणुभोःप्रिये ॥ ३२ ॥ यस्मिन्दिनेत्रसाधुभ्योनदास्यामिकथंचन ॥
तदासंदीप्यभवनंमरिष्येनात्रसंशयः ॥ ३३ ॥ इत्युक्तासापिनिःशंकातथैवाहपतिंमुदा ॥ रात्रावुभौसुषुपतुर्लंपास्वप्नेददर्शह ॥ ३४ ॥
विष्णुभक्तःसमागत्यवदत्यतिदयान्वितः ॥ त्वयाभक्तनकर्तव्याचिंताह्यद्यकिथंचन ॥ ३५ ॥ प्रातरेत्यपुराधीशोमहिषींददतींपयः ॥
पंचाशन्मानगोधूमानिहागत्यप्रदास्यति ॥ ३६ ॥ कोष्ठ्यांकृत्वातुगोधूमान्पिधायोपरियत्नतः ॥ अधस्तन्मुखतोनित्यंगृहाणातुलि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तंस्वयम् ॥ ३७ ॥ महिष्याःपयसस्तक्रंघृतंचापिभविष्यति ॥ तेनभोजयभक्तांस्त्वंयुवाभ्यामपिभुज्यताम् ॥ ३८ ॥ दुर्भिक्षभ
यतोमृत्यौनमनःकर्तुमर्हसि ॥ इतिस्वप्नंसमीक्ष्यासौसमुत्थायहरिंस्मरन् ॥ ३९ ॥ प्रातःपत्नींवदन्नेतद्ग्रामेशोग्रामणीःस्थितः ॥ स
आहस्वजनान्सर्वान्दुर्भिक्षोयंमहानभूत् ॥ ४० ॥ सर्वेषामन्नमस्त्यत्रसर्वेसंवत्सराधिकम् ॥ लषाभक्तायदत्त्वाहगृह्यतामिदमद्यभोः॥४१॥
व्ययीकृतेस्मिन्वक्तव्यंपुनर्दास्याम्यहंतव ॥ इतिश्रुत्वालषाप्राहपर्य्याप्तमिदमेवमे ॥ ४२ ॥ ग्रामणीःस्वगृहंयातोलषाभक्तोपितत्क्षणा
त् ॥ स्वप्नंसंस्मृत्यकोष्ठचांसकृत्वातद्द्रुपाहरत् ॥ ४३ ॥ महिषीघृततक्राभ्यांभोजयामासवैष्णवान् ॥ एवंदुर्भिक्षसमयंसर्वान्निन्ये
तुतेनवै ॥ ४४ ॥ ततःश्रीमज्जगन्नाथंद्रष्टुंसचलितोऽभवत् ॥ कुर्वन्साष्टांगनमनंपुरुषोत्तमपुरेगतः ॥ ४५ ॥ कृशोपिनैवतत्या
जसाष्टांगंप्रणतिंलषः ॥ अथाष्टादशनालायांदृष्ट्वास्वप्नंतुपूजकः ॥ ४६ ॥ आदायशिबिकांतत्रलषंसंस्थाप्यसंस्कृतम् ॥ दर्शयामास
नीत्वातंजगन्नाथंसतांगतिम् ॥ ४७ ॥ दृष्ट्वातत्रजगन्नाथंलषापूजकसद्मनि ॥ अवात्सीत्तत्ररात्रौचजगन्नाथोनृपंप्रति ॥ ४८ ॥ उवाचस्व
प्नमध्येचकन्यांदेहिलषायच॥प्रातरुत्थायराजासतस्मैदातुंसमुत्सुकः॥४९॥लषमाकारयामासदातुंकन्यांसुरूपिणीम् ॥ लषस्तत्सविधे
गत्वानाग्रहीत्तत्सुतांतदा॥५०॥ राजातंरोधयित्वाचतस्मैकन्यांददौपुनः॥जगन्नाथाज्ञयातस्याभवद्वैवाहिकोविधिः ॥५१ ॥ तदालषोग्र
हीत्कन्यांगृहीत्वागृहमागतः॥गृहमागत्यतेनाथाऽभ्यागताश्चैवसाधवः ॥५२॥ तर्पितास्तुततोयावज्जीवंहरिपदांबुजम्॥ स्मरन्साधुजना
न्नित्यमर्चयन्नतिभक्तितः॥५३॥अंतेजगामश्रीकृष्णसान्निध्यंयोगिदुर्लभम्॥५४॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येलषाभक्तचरितंनामविं
शाधिकशततमःसर्गः॥ १२०॥ ॥छ॥ तदाजाग्रामवास्यासीद्गुर्ज्जरेषुचनागरः॥विप्रोनाम्नातुनरसीमहंतेत्युपनामकः॥१॥सौराष्ट्रदेशेवि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ख्यातःपूर्वंजातोद्विजोत्तमः ॥ पश्चात्तुद्वारकायांवैअष्टयोजनपश्चिमे ॥ २ ॥ पर्वतोरैवतोनामतस्यैवतुसमीपतः ॥ पूनाठेठेतिविख्या तस्तत्रोवासनिरंतरम् ॥ ३ ॥ नरसीपितृमातृभ्यांरहितोज्येष्ठबंधुयुक् ॥ तत्पत्नीचापिभवनेस्वयमस्त्रीकएवसः ॥ ४ ॥ एकदाप र्य्यटित्वासग्रामेकस्माद्गृहंगतः ॥ भ्रातृजायामुवाचेदंजलंदेहिपिपासतः ॥ ५ ॥ साकार्य्यवशतःक्रुद्धाभर्त्सयंत्यब्रवीद्वचः ॥ कृत्वा कार्य्यश्रमेणाद्ययदत्रागतवानसि ॥ ६ ॥ ततःपिपासितोत्यर्थंजलपन्नेवंनलज्जसे ॥ पानभोजनवेलायांदृश्यसेत्वंहिसर्वदा ॥ ७ ॥ नान्यस्मिन्गृहकार्य्येषुततोयाहिपिबान्यतः ॥ ममनैवावकाशोस्तिस्वयंनीत्वापिबात्रवा ॥ ८ ॥ इतिभ्रातृवधूवाक्यंश्रुत्वाशानिमि वद्विजः ॥ तत्कालंनिर्ययौगेहान्मरणेकृतनिश्चयः ॥ ९ ॥ क्वचिद्गत्वामरिष्येद्यनैतस्याःकटुभाषणम् ॥ श्रोतुमिच्छामिचंडायाइतिनि श्चित्यनिर्गतः ॥ १० ॥ ययौस्वग्रामतःक्रोशत्रयोपरिपिपासितः ॥ गोपनाथेतिनाम्नास्तियत्रलिंगंवरप्रदम् ॥ ११ ॥ तत्रतस्थौ ससप्ताहमन्नपानविवर्जितः ॥ नमृतस्तुतदोत्थायमर्तुमुद्योगमाचरत् ॥ १२ ॥ गृहीत्वागुरुपाषाणंस्वशिरःशिवलिंगके ॥ संस्थाप्य हंतुमारब्धःस्मरन्भ्रातृवधूवचः ॥ १३ ॥ अथतुतोषभगवान्महादेवोदयानिधिः ॥ विप्ररूपधरस्तत्रसमायातोन्यवारयत् ॥ १४ ॥ किमर्थंमात्महत्येयंक्रियतेमूर्खवत्त्वया ॥ यमिच्छसिवरंब्रूहिप्रियंमत्तोददामिते ॥ १५ ॥ इतिश्रुत्वातुनरसीप्राहतंविप्ररूपिणम् ॥ त स्मात्तवप्रियंयत्स्यादर्शयित्वाप्रदेहितत् ॥ १६ ॥ इतितद्वचनंश्रुत्वाविप्ररूपधरःशिवः ॥ चिंतयामासहृदयेकथंदद्यामहंप्रियम् ॥१७॥ इतिश्रुत्वातुनरसीतस्थौनेत्रेनिमील्यसः ॥ ददर्शाथस्वप्नतुल्यंनीत्वासतंद्विजंशिवः ॥ १८ ॥ आनीयमथुरायांचदर्शयामासस्वप्रि यम् ॥ प्रदीपधारिकंकृत्वानरसींस्त्रीस्वरूपिणम् ॥ १९ ॥ स्वयंशिवोरासनृत्येगत्वोवाचदयान्वितः ॥ अयंकृष्णइयंराधाप्रियमेत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्वयंमम ॥ २० ॥ राधाकृष्णेतिमंत्रोयंगृह्यतांसर्वकामदः ॥ ततःकृष्णःशिवंप्राहकेयंदीपधरातव ॥ २१ ॥ भक्तोयंतवदेवेशमया
नीतस्त्वदंतिके ॥ कृपावलोकनेनेमंकृतार्थंकुरुभूतले ॥ २२ ॥ श्रुत्वेदंशंभुवचनंकृष्णःप्रोवाचशंकरम् ॥ यस्तेभक्तोममातीवभ
क्तःप्राणसमःसतु ॥ २३ ॥ तवनिंदांप्रकुर्वाणोमद्भक्तिंकुरुतेयदि ॥ समद्वेष्योनसंदेहःसत्यंसत्यंवदाम्यहम् ॥ २४ ॥ मद्वेषा
न्नरकेघोरेपीड्यतेयमकिंकरैः ॥ पश्चाद्विट्कृमिरूपेणग्रामशूकरयोनिजः ॥ २५ ॥ खिद्यतेऽमेध्यभक्ष्यार्थंजन्मजन्मनिमानवः ॥ अतो
यंतवभक्तश्चेन्ममातीवप्रियःशिव ॥ २६ ॥ इत्युक्त्वानरसींदीपधारिणीरूपधारिणम् ॥ तिष्ठमासंस्मरंश्चित्तेगीतनृत्यपराय
णः ॥ २७ ॥ संसारेस्वर्गलोकेपिसुखंदास्याम्यनुत्तमम् ॥ परलोकेतुमामेदत्वंसंप्राप्स्यस्यसंशयम् ॥ २८ ॥ यदायदात्वंकार्यार्थेस्मरि
ष्यसितदात्वहम् ॥ वेषांतरेणसंप्राप्तःकरिष्यामितवेप्सितम् ॥ २९ ॥ इत्युक्तोनरसीसर्वंदृष्ट्वास्वप्नवदुत्थितः ॥ गोपनाथस्यनिकटे
तूष्णींतस्थौक्षणंततः ॥ ३० ॥ राधाकृष्णेतिनामैवमंत्रंहृदिजपन्मुदा ॥ उत्थायचशिवंनत्वाययौग्रामांतरंक्वचित् ॥ ३१ ॥ तत्रैक
स्तस्यजातीयोज्ञात्वातंनरसीस्वयम् ॥ अंतर्गतेनहरिणाप्रेरितोस्मैददौसुताम् ॥ ३२ ॥ कृत्वाविवाहंस्वग्रामेगत्वातस्थौहरिंभजन् ॥
तत्रकन्यांचपुत्रांश्चसमुत्पाद्यमुमोदह ॥ ३३॥ सर्वदासाधुभिःसार्द्धंनृत्यगीतपरायणः ॥ कंकरादिकवाद्यानिवादयन्वैस्त्रियोयथा॥३४॥
अद्यतत्रसजातीयैस्त्यक्तोभ्रात्रापिसर्वथा ॥ अयंकुलकलंकोमेयदयंनृत्यतिस्वयम् ॥ ३५ ॥ श्रुत्वापिनरसीचित्तेसक्रोधोनाभवत्तदा॥
कुर्वन्नागतसत्कारंत्यागंचत्यजतांनृणाम् ॥ ३६॥ एवंकतिपयेजातेकालेकोपिगृहीतदा ॥ द्वारावतींव्रजंस्तस्मिन्नगरेसमुपागतः॥ ३७॥
ग्राम्यान्दृष्ट्वासचैकत्रस्थितांस्तन्निकटेगतः ॥ अहंद्वारावतींयामिवर्ततेमेधनंबहु ॥ ३८ ॥ मार्गेचौरभयादत्रसाधुकारश्चकोपिचेत् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दत्त्वातस्मैधनंतस्यपत्रंनीत्वाव्रजाम्यहम् ॥ ३९ ॥ नीत्वापत्रमहंतत्रग्रहीष्यामियथासुखम् ॥ इतिश्रुत्वातुतेसर्वेधूर्ताःपथिकमब्रुव
न् ॥ ४० ॥ अहोह्यनरसीभक्तःसाधुकारोमहानिह ॥ तत्रगच्छसतेकार्य्यंकरिष्यतिनसंशयः ॥ ४१ ॥ इतिश्रुत्वासपथिकोनर
सीगृहमागतः ॥ उवाचतंधनंह्येतद्गृहीत्वापत्रमर्प्पय ॥ ४२ ॥ द्वारकांयाम्यहंतत्रयथाशीघ्रंमिलेद्धनम् ॥ साधुकारतथाक्षिप्रंकुरुया
मित्वरान्वितः ॥ ४३ ॥ इत्युक्तोनरसीचित्तेचिंतयित्वातिदुर्जयम् ॥ ग्रामीणानांतथाकृष्णंस्मृत्वापथिकमब्रवीत् ॥ ४४ ॥ अ
होचेदंकियत्तेस्तिधनंपत्रंददाम्यहम् ॥ इत्युक्तःसददौसप्तशतीमुद्रास्तुराजतीः ॥ ४५ ॥ गृहीत्वानरसीमुद्राःपत्रंचपथिकायतत् ॥
दत्त्वासर्वंहरिप्रीत्यैसाधुभ्यःप्रददौमुदा ॥ ४६ ॥ पत्रंलिलेखनरसीश्यामलाययथोचितम् ॥ साधुकारःप्रभवतिमुद्राःसप्तशतीमि
ताः ॥ ४७ ॥ दृष्ट्वैवास्मैप्रदातव्यास्तवताःसंतिमेगृहे ॥ अथासौपत्रमादायततोद्वारवतींपुरीम् ॥ ४८ ॥ तत्रपप्रच्छसर्वान्सश्याम
लःकोस्तिसाधुकृत् ॥ उक्तःसर्वैर्नचात्रास्तिकोपिश्यामलनामकः ॥ ४९ ॥ ततोतिचिंतितोविप्रोग्रामाद्बाह्यमुपागतः ॥ ददर्शप
थिकस्तत्ररथमेकंमनोरमम् ॥ ५० ॥ श्वेताश्वाभ्यामुदूढंतंतस्येपरिमहाद्भुतम् ॥ साधुकारोस्तिकुत्रेतिरथीश्रुत्वातमब्रवीत् ॥५१॥
अहोहंश्यामलोनाम्नासाधुकारोवसामिच ॥ किंतेभिलषितंब्रूहीत्युक्तःपथिकआहतम् ॥ ५२ ॥ अहोग्रामेनकेनापिदर्शितस्त्वंत
दात्वहम् ॥ अतिखिन्नःपरावृत्यचलितोनरसीगृहम् ॥ ५३ ॥ त्वन्नाम्नापत्रमेकंतुनरसीप्रददौमम ॥ नीत्वासप्तशतीर्मुद्रास्तामेऽद्यै
वसमर्प्पय ॥ ५४ ॥ इत्युक्त्वानरसीपत्रंश्यामलायसमर्प्पयत् ॥ सतुपत्रंगृहीत्वातन्नेत्रेसंयोज्यहृष्टवत् ॥ ५५ ॥ पथिकंप्राहध
न्योसियदानीयददौमम ॥ अतिप्रियंतस्यपत्रंनानीतंकेनचित्पुरा ॥ ५६ ॥ पथिकात्रैवमुद्रास्तागृहाणाद्यगृहाद्बहिः ॥ प्रस्थाप्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सुंमुहूर्तैनकचिद्गंतुमिहागतः ॥ ५७ ॥ अतोनयामिभवनमित्युक्त्वाप्रददौसताः ॥ मुद्राःश्यामलनामाथपत्रंचापिस्वकंददौ ॥ ५८॥
पथिकंचापिसंप्राहवक्तव्योमद्वचःसवै ॥ एवमेवसदापत्रंप्रेषणीयंनिरंतरम् ॥ ५९ ॥ इतिश्रुत्वासपथिकोनीत्वापत्रंतथाधनम् ॥ द्वा
रकायामुपागत्ययात्रांचक्रेतिभक्तितः ॥ ६० ॥ अथश्यामलनामापिसाधुकारस्तिरोऽभवत् ॥ पथिकोनरसीग्रामंकृत्वायात्रामुपाग
तः ॥ ६१ ॥ तत्रतेदुर्जनाःसर्वेंदृष्ट्वातंपथिकंमुदा ॥ तेनसाकंसमायातानरसीमंदिरेद्रुतम् ॥ ६२ ॥ अप्राप्यधनमेषोत्रकिंकरिष्य
तिचेतिते ॥ द्रष्टुंतद्दुर्दशांदुष्टास्तस्थुःसर्वेस्मिताननाः ॥ ६३ ॥ पथिकस्तत्रचागत्यदृष्ट्वातंनरसींमुदा ॥ प्रणम्यकथयामासधन्यो
सित्वंनसंशयः ॥ ६४ ॥ यस्यतेतादृशोभृत्योद्वारकायांविराजते ॥ श्यामःकमलपत्राक्षोयुवासर्वांगसुंदरः ॥ ६५ ॥ कुण्डलीपीत
वसनःश्रीकृष्णइवचापरः ॥ नविस्मरामितंचाहंकथंचिदपिकुत्रचित् ॥ ६६ ॥ दृष्ट्वैवमुद्राःप्रददौपत्रंतेश्यामलोमुदा ॥ इत्युक्त्वाप्रददौ
पत्रंपथिकोनरसींतदा ॥६७॥ नीत्वाशिरसिचोत्थायपथिकस्यप्रदक्षिणम् ॥ कृत्वाप्रणामंचक्रेसहर्षास्राविललोचनः ॥ ६८ ॥ ततस्तेदुर्ज
नाःसर्वेश्रुत्वादृष्ट्वातदद्भुतम् ॥ अधोमुखाःस्वस्ववेश्मजग्मुःसर्वेतिचिंतिताः ॥ ६९ ॥ नरसीचापितंगेहेस्थापयित्वादिनत्रयम् ॥ शुश्रूष
यित्वादत्वाथधनंसविससर्जह ॥ ७० ॥ इति श्रीभगवद्भक्तिमाहात्म्येनरसीभक्तचरितंनामएकविंशाधिकशततमःसर्गः ॥ १२१ ॥
एकदानरसीपुत्रीस्वपतेर्मंदिरेसती ॥ ज्ञातागर्भवतीतस्याःसप्तमेमासिचागते ॥ १ ॥ स्नुषापितुर्गृहात्सर्वैर्भोजनांबरभूषणैः ॥ संतो
ष्यावांधवाग्राम्याइत्याचारस्तुकौलिकः ॥ २ ॥ ततस्तुनरसीपुत्र्यायाश्वश्रूःसातिदुःखिता ॥ स्नुषांदृष्ट्वाब्रवीद्वाक्यंकथंकुर्वेहमु
त्सवम् ॥ ३ ॥ अस्याःपितातिनिर्लज्जोदरिद्रोभिक्षुकैःसह ॥ झर्झरंवादयन्नृत्यंकुर्वन्गायतिसर्वदा ॥ ४ ॥ किंकरोमिकपालेमेलिखि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तोविधिनाह्ययम् ॥ एवंमुहुर्भाषमाणातदातस्याःस्नुषास्वयम् ॥ ५ ॥ तातायनरसीनाम्नेप्रेषयामासपत्रकम् ॥ अत्रसर्वेविनिंदंतित्वांत
तोयदिचेद्धनम् ॥ ६ ॥ तवकिंचिद्भवेत्तर्हिसमागत्यतुतेनवै ॥ कृत्वायथोचितोत्साहंपुनर्गच्छेतिमेमनः ॥ ७ ॥ दृष्ट्वातुपत्रंनरसी
तत्कालमुत्थितःस्वयम् ॥ वृद्धोक्षेणोहितंजीर्णंरथमारुह्ययनतः ॥ ८ ॥ गायन्हरिकिथांभक्त्यास्वजामातृगृहंगतः ॥ अथतत्रत्यम
नुजाद्दृष्ट्वातंनरसींतथा ॥ ९ ॥ हसंतःप्राहुरन्योन्यमेषपश्यागतोत्रभोः ॥ तत्पुत्रीतुतदैकांतेपितरंप्राहलज्जिता ॥ १० ॥ किमर्थ
मागतोस्येवंहसिष्यंतिजनाइमे ॥ नकिंचिद्वर्ततेतर्हिशीघ्रंगच्छनिजंगृहम् ॥ ११ ॥ इतिपुत्रीवचःश्रुत्वानरसीचातिहर्षितः ॥ पुत्रीं
प्राहत्वयानैवचिंताकार्य्याकथंचन ॥ १२ ॥ पूरयिष्यतितेसर्वंहरिरत्रमनोरथम् ॥ तस्मात्त्वंपृच्छश्वश्रूंवैपृच्छ्यसर्वंलिखापय ॥
॥ १३ ॥ आनीयदेहिमेपत्रंततस्त्वंमुदिताभव ॥ ततस्तुनरसीपुत्रीश्वश्रूंगत्वाब्रवीद्वचः ॥ १४ ॥ पितामेसर्वसामग्रींप्रलिख्याप्य
ह्ययाचते ॥ इतिस्नुषावचःश्रुत्वाश्वश्रूर्हास्यंविधायसा ॥ १५ ॥ प्रष्टव्यानात्रकिमपिविस्मृतंतद्विभावय ॥ इत्युक्तासागताश्वश्रूस
मीपंपुनरब्रवीत् ॥ १६ ॥ श्रुत्वाजहातिसात्युच्चैःक्रोधेनप्रस्तरद्वयम् ॥ लिखापयित्वाप्रददौस्नुषायैसापिहर्षिता ॥ १७ ॥ गत्वापित्रे
ददौसापिनरसीतत्क्षणंमुदा ॥ झर्झरादिकमादायक्वचिज्जीर्णगृहेस्थितः ॥ १८ ॥ राधाकृष्णौभजन्प्रेम्णातत्रत्यैवेश्मनिन्यधात् ॥
अथवैष्णवरूपेणभगवान्भक्तवत्सलः ॥ १९ ॥ आगत्यतस्मिन्भवनेसर्वंसंपाद्यनिर्ययौ ॥ ततस्तुनरसीसर्वानाहूयातिविनीतवत् ॥
॥ २० ॥ वस्त्रालंकरणादीनिभोजयित्वाददौमुदा ॥ सर्वान्संतोष्यवस्त्राद्यैर्दक्षिणाभिस्तथैवच ॥ २१ ॥ सौवर्णप्रस्तरंद्वंद्वंसंबंधि
न्यैददौमुदा ॥ साचातिलज्जिताभूत्वाविस्मयंपरमंगता ॥ २२ ॥ ततस्तद्ग्रामनिलयाःशशंसुश्चापितंमुदा ॥ तत्रैकाविस्मृताकाचि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ब्राह्मणीसासमागता ॥ २३ ॥ नरसीदुहितातस्यैस्वकीयाभरणादिकम् ॥ ददौर्नजगृहेसातुनवंसर्वंजिघृक्षते ॥ २४ ॥ ततस्तु
नरसीभक्तःपुनस्तुष्टावतंहरिम् ॥ अथसर्वंसमायातंतदर्थंतद्गृहेपुनः ॥ २५ ॥ नीत्वातन्नरसीतस्यैददौचातिविनीतवत् ॥ स्वयमाग
त्यभवनेराधाकृष्णौभजन्मुदा ॥ २६ ॥ सर्ववैषयिकंसौख्यंहृदिमेनेतृणायसः ॥ अथसानरसीपुत्रीसुषुवेपुत्रमुत्तमम् ॥ २७ ॥ स्थि
त्वाकतिदिनंतत्रपतिगेहेस्वकंसुतम् ॥ संस्थाप्यश्वश्रूनिकटेस्वयंतातगृहंप्रति ॥ २८ ॥ दृष्ट्वाभक्तेस्तुमाहात्म्यंविरक्तासाप्यभूत्तदा ॥
एकातुतनयातस्यगृहेएवस्थिताह्यभूत् ॥ २९ ॥ तेचापिभक्तिसंजातेकन्यकेपितृमंदिरे ॥ ताभ्यांचैवातिभक्ताभ्यांकन्याभ्यांनरसी
द्विजः ॥ ३० ॥ सस्त्रीकोभगवन्मूर्त्तेरग्रेगायन्ननर्तह ॥ एकदाकापिगणिकागायंतीतत्रचागता ॥ ३१ ॥ उक्तासर्वैस्तुनरसीगृहंग
च्छतवेप्सितम् ॥ करिष्यतिनसंदेहःसतुनृत्यादिपारगः ॥ ३२ ॥ इत्युक्त्वासागतावेश्यातस्थौतस्यसमीपतः ॥ भगवद्भजनेस
क्तात्यक्त्वावृत्तिंजुगुप्सिताम् ॥ ३३ ॥ अथैकदातुनरसीमातुलःसचिवःस्थितः ॥ तत्रत्यराज्ञोनिकटेराजानंसोब्रवीद्वचः ॥ ३४ ॥
राजन्नयंतुनरसीकलंकोभूत्कुलेमम ॥ वेश्ययासहकन्याभ्यांस्वयंनृत्यतिगायति ॥ ३५ ॥ तस्मादयंवहिष्कार्य्योग्रामादस्मान्नसंश
यः ॥ इत्युक्तोनृपतिस्तेनपदातींश्चतुरोद्रुतम् ॥ ३६ ॥ प्रेषयामासनरसींशीघ्रमानयमेंतिकम् ॥ गत्वातिक्रुद्धाःप्राहुस्तेचलराजसमी
पतः ॥ ३७ ॥ ततस्तुनरसीताभिःस्त्रीभिर्गायन्समाययौ ॥ दृष्ट्वाराजातुतान्सर्वाँल्लौकिकेमतिमान्स्वयम् ॥ ३८ ॥ नरसीमाह
किंचैतत्क्रियतेकुलगर्हितम् ॥ श्रुत्वासोप्याहभोराजन्नमेजातिःकुलंनवा ॥ ३९ ॥ सर्वंस्त्यक्तोहमत्रास्मिस्वेच्छयापुनरेवमाम् ॥ अयं
वदतिनिर्लज्जोमत्कुलेपतितंस्वयम् ॥४०॥ त्वंतुराजासिलोकानांदुर्जनोक्तैर्वहिष्कृतः॥श्रुत्वाभागवतंप्रायोऽयस्मार्षीःसंगदोषतः॥४१॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ इतिश्रुत्वाततोराजापौराणिकमवैक्षत ॥ सआहराजाभक्तोयंसत्यमेवनसंशयः ॥ ४२ ॥ राजापिनरसींप्राहगच्छसाधो यथासुखम् ॥ पुरेनिवसतस्तेमेनकाश्चिद्भीतिरस्तिभोः ॥ ४३ ॥ इत्युक्तेनरसींगेहेसमायातोतिभक्तितः ॥ जानन्नसारंसंसारंदध्यौहरि पदांबुजम् ॥ ४४ ॥ एकदातस्यभवनेसहस्रावधिसाधवः ॥ समायाताःक्षुधार्तास्तान्दृष्ट्वास्वयमुपस्थितः ॥ ४५ ॥ कस्याचद्वाणि जोगेहेगत्वातंप्राहचार्तवत् ॥ अहोकेदाररागोयंत्वद्गृहेस्थाप्यतेमया ॥ ४६ ॥ त्वंसहस्रमितामुद्रादेहिमेसाधुभुक्तये ॥ दास्यामि यावत्तेनैवधनंतावदहंपुनः ॥ ४७ ॥ गायामिनैवकेदारंसत्यमेतद्वदाम्यहम् ॥ इत्युक्तोवणिगुत्थायपत्रंनीत्वाधनंददौ ॥ ४८ ॥ तस्य पत्नीद्वयंचासीदेकाभक्तिमतीस्थिता ॥ साब्रवीन्नरसीभक्तंश्रीकृष्णंमेप्रदर्शय ॥ ४९ ॥ भविष्यतीतितामुक्त्वानरसीगृहमागतः ॥ नीत्वाधनंभोजयित्वास्वयंसंपूज्यकेशवम् ॥ ५० ॥ अगायतप्रियंरागंनातितृप्तोबभूवसः ॥ तद्दिनेभ्यपतन्नैवमालामूर्तेर्गलादपि ॥ ॥ ५१ ॥ अन्यस्मिन्दिवसेतस्यकेदारंगायतःसतः ॥ कृष्णमूर्त्तेर्गलान्मालाप्रसादान्निपपातह ॥ ५२ ॥ तदादितस्यगानंसततत्या जातिसुचिंतितः ॥ मालायाःपतनंदृष्ट्वामूर्तेःकंठप्रदेशतः ॥ ५३ ॥ ज्ञात्वैवंदुर्जनाःसर्वेराजानंप्राहुरग्रतः ॥ भूपतेनरसीगीतसम येयच्छुतंत्वया ॥ ५४ ॥ मिथ्यैवतन्नसंदेहःशृणुतस्यतुकारणम् ॥ अयंस्वभवनेचैवसूत्रमालांविधायच ॥ ५५ ॥ पुष्पतारवशा न्मालात्रुटितापतितास्वयम् ॥ तस्मादद्यपरीक्षस्वतवाग्रेप्रकरोतुतत् ॥ ५६ ॥ इतिदुष्टवचःश्रुत्वाराजातंनरसींद्विजम् ॥ आनी योवाचमद्गेहेभगवन्मूर्तिरस्तिभोः ॥ ५७ ॥ तत्रगायस्वतन्मूर्तेर्गलान्मालापतिष्यति ॥ तदासत्यंविजानामिह्यन्यथाकपटेनतत् ॥ ॥ ५८ ॥ इत्युक्तोनरसीवीणांधृत्वागातुंव्यवस्थितः ॥ तदादुष्टस्तुपट्टस्यदृढसूत्रेऽकरोत्स्रजम् ॥ ५९ ॥ मुहूर्तंसजगौभक्तोनरसी

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चातिचिंतितः ॥ नपपाततदामालादुष्टाःसर्वेंतिहर्षिताः ॥ ६० ॥ ततस्तुनरसीचित्तेहरिंसंस्मारदुःखितः ॥ नकापिहानिर्मेनाथतवै
वेयंविडंबना ॥ ६१ ॥ इत्याहमनसातस्मिन्क्षणेश्रीभगवान्हरिः ॥ कृत्वातुनरसीरूपंनीत्वामुद्रासहस्रकम् ॥ ६२ ॥ जगामतस्य
वैश्यस्यगृहंभक्त्यातवेगतः ॥ तमाहनरसीकास्तिपतिर्गृह्णात्विदंधनम् ॥ ६३ ॥ ददातुममतत्पत्रंकेदारोयत्रवैधृतः ॥ इतिश्रु
त्वासवैश्यस्तुसुतएवाहतांप्रियाम् ॥ ६४ ॥ गृहाणमुद्रास्तत्पत्रंदेहितस्मैतुसाधवे ॥ इत्युक्तासातुतत्पत्नीपत्रंतस्यकरेददौ ॥ ६५ ॥ धनं
ररक्षकुत्रापिपरंतुतन्मनोभृशम् ॥ नरसीरूपिणंदृष्ट्वासाभिलाषमभूत्तदा ॥ ६६ ॥ नायंसभक्तःकोप्येषतद्रूपेणागतस्त्विह ॥ इतिपत्ये
यथार्थंसाप्रोवाचागत्यमंदिरे ॥ ६७ ॥ भगवानपितत्पत्रंनरसीनिकटेगतः ॥ उपरिष्टात्पातयित्वाददौसोप्यगृह्णान्मुदा ॥ ६८ ॥ ततः
केदाररागेणजगौसंन्यासिवद्द्विजः ॥ तत्क्षणान्मूर्तिकंठात्तुमालाभिपतिताभुवि ॥ ६९ ॥ त्रुटित्वाथद्वितीयापिनरसीकंठदेशगा ॥ चित्रं
बभूवसर्वेषांतत्रत्यानांतुपश्यताम् ॥ ७० ॥ अथराजामहाश्चर्यंदृष्ट्वातान्दुर्जनान्स्वयम् ॥ निर्भर्त्स्यनरसींभक्त्यापूजयित्वाब्रवीद्वचः ॥
॥७१॥ भक्तराजक्षमस्वैतन्ममदुष्टस्यचेष्टितम् ॥ किमिदंपरमाश्चर्यंपत्रंस्यात्पतितंतुयत् ॥७२॥ इतिश्रुत्वाततोभक्तोनरसीप्राहतंनृप
म् ॥ केदाररागवृत्तांतंतत्पत्रंचाप्यदर्शयत् ॥७३॥ ततोराजातिमुदितोनमस्कृत्यददौधनम् ॥ नतज्जग्राहनरसीसंतुष्टःप्रययौगृहम् ॥७४॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येनरसीभक्तिचरितंनामद्वाविंशत्यधिकशततमःसर्गः ॥१२२॥ ॥छ॥ एकदाधनिकःकश्चिन्नागरोब्राह्मणं
निजम् ॥ कन्यार्थंचवरंज्ञातुंप्रेषयामासतत्रहि ॥ १ ॥ तत्रसर्वेद्विजादुष्टास्तंविप्रंप्राहुरादृताः ॥ अहोतस्यचधनिनःकन्यैकावर्ततेशुभा ॥२॥ त
स्याःपाणिग्रहार्थायवरस्तेतनयोवृतः ॥ इतिश्रुत्वातुनरसीकृतांजलिरुवाचतम् ॥३॥ अहोनाहंतुतद्योग्यःसंबंधेनमहान्धनी ॥ अहंतुभिक्षुको

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दीनस्तस्मादन्यंवरंवृणु ॥ ४ ॥ इत्युक्तःसाद्विजःप्राहतद्योग्यस्त्वयमेवमे ॥ इत्युक्त्वातिलकंतस्यभालेंगुष्ठेनचाकरोत् ॥ ५ ॥ दत्त्वामु
द्रांनालिकेरंहर्षितोगृहमाययौ ॥ कन्यायाःपितरंप्राहनरसीतनयोमया ॥ ६ ॥ वृतोवरस्तेपुत्र्यर्थंसोस्यायोग्योनसंशयः ॥ इतिश्रु
त्वाविप्रवाक्यंसधनीकन्यकापिता ॥ ७॥ निर्भर्त्स्यंविप्रंप्रोवाचकिंकृतंमूर्खवत्त्वया ॥क्काहंलक्षाधिपःक्कासौकर्तव्योहिवरोमया॥८॥इति
तस्यवचःश्रुत्वासविप्रकुपितोब्रवीत् ॥ अहोंगुष्ठेनभालेवैदत्तंतुतिलकंमया ॥९॥ तंछेदयततोयामिमुद्रामानेतुमप्यहम्॥इतिश्रुत्वाततः
सोपिधनीतूष्णींस्थितःस्वयम् ॥१०॥ कन्यायाभाग्यमेवंहिकिंमेमोहेनजायते ॥ बोधितोन्यैर्ज्ञातिवर्गैःस्वीकृत्योद्योगवानभूत् ॥ ११ ॥
विवाहलग्नंपत्रंसलिखित्वाप्रैषयत्सतु ॥ नीत्वातन्नरसीपत्रंस्थापयामासकुत्रचित् ॥ १२ ॥ विज्ञाप्यराधाकृष्णाभ्यां व्यग्रोभूत्सस्वयं
द्विजः ॥ जगौश्रीकृष्णचरितमवशिष्टेदिनत्रये ॥ १३ ॥ विवाहस्यततःकृष्णोवैष्णवस्यकुटुंबिनः ॥ रूपंकृत्वासपत्नीकोदेशांतरनृपच्छ
लात् १४ ॥ निमंत्रितोहंशिष्योस्यसमायातइतिब्रुवन् ॥ आनिन्येसर्वसंभारान्श्रीकृष्णोराजदुर्लभान् ॥ १५ ॥ ततोविवाहपूर्वाहत्रये
सर्वान्निमंत्र्यसः ॥ भोजयामासविविधैर्मिष्टान्नैर्लोकदुर्लभैः ॥ १६ ॥ तेभुक्त्वावासप्ताबद्धानिन्युःस्वंस्वंगृहंजनाः ॥ तथापिसर्वसाम
ग्रीतथैवासीच्चतद्गृहे ॥ १७ ॥ ततस्तुवरयात्रायांतद्रूपोभगवानयम् ॥ तदातंनरसीप्राहनाहंगच्छामितत्रवै ॥ १८ ॥ गत्वात्वमेवसंबं
धीभविष्यासियथोचितम् ॥ अथकन्यापितातंतुविप्रंमुहुरवोचत ॥ १९ ॥ त्वयाकन्याविवाहोयंगर्हितोनात्रसंशयः ॥ सायंकालःस
मायातआगमिष्यतिवानवा ॥ २० ॥ इतिश्रुत्वातुविप्रस्तुग्रामाद्बाह्यंगतस्तदा ॥ ददर्शचागतंसर्वंवरंसैन्यसमावृतम् ॥ २१ ॥ कन्या
पितरमाहासौपश्यायातोवरस्तव ॥ ततःकन्यापितोवाचविप्रंभ्रांतोसिकिंतुभोः ॥ २२ ॥ दीनातिदीनोनरसीक्केदंसैन्यंमहीपतेः ॥ एवं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ब्रुवतिवैतस्मिन्सैन्यंग्रामेसमागतम् ॥ २३ ॥ कन्यापितापिनिश्चित्यसएवायामितिद्रुतम् ॥ गत्वागृहेनिजान्बंधूनाहकिंतुभविष्यति ॥
॥ २४ ॥ अतःपरंचमेग्रामेसर्वेषांवित्तसंचयैः॥सत्कारोनास्यभवितार्किकर्तव्यमतःपरम्॥२५॥इत्येवंमंत्रयित्वासप्रेषयामासतंद्विजम्॥
नालंसैन्यस्यसत्कारमहंहिकर्तुमत्रभोः ॥ २६ ॥ कन्येयंवर्ततेचैकाममदीनस्यगृह्यताम् ॥ गत्वैवंनरसीभक्तोवक्तव्योमद्वचस्त्वया ॥
॥ २७ ॥ श्रुत्वाविप्रस्तुतंप्राहकथमेवंवदस्यहो ॥ क्वतेसखायोवित्तानियशःकौलीन्यमप्यहो ॥ २८ ॥ यदेवंभाषसेद्येतिश्रुत्वासोतिवि
लज्जितः ॥ ततःसविप्रोगत्वातंनरसीमाहनम्रवत् ॥ २९ ॥ नैतेषांपूजनेशक्तोदरिद्रोयंद्विजोयथा ॥ यथाशक्तिततःपूजांकरिष्यति
नसंशयः ॥ ३० ॥ इतिश्रुत्वाततोविप्रःकन्यापितरमब्रवीत् ॥ सोपिहृष्टःसमुद्योगंकृत्वाकन्यांददौमुदा ॥ ३१ ॥ ग्राहयित्वाहरिःक
न्यांव्यवहृत्ययथाविधि ॥ दीनानाथदरिद्रेभ्योदत्त्वास्वगृहमाययौ ॥ ३२ ॥ दृष्ट्वातत्सैन्यसंभारंग्राममेमार्गेतिविस्मिताः ॥ प्रशंसंतोपि
नरसींसुह्यंतोद्भुतदर्शनात् ॥३३॥ एवंदिनत्रयंस्थित्वानृपरूपधरोहरिः ॥ संतोष्यनरसींसैन्यंनीत्वाधाममयौस्वकम् ॥३४॥एवंसनरसी
भक्तोराधाकृष्णप्रसादतः ॥ भुक्त्वामनोरथान्सर्वाञ्जगामांतेहरेःपदम् ॥३५॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनरसीचरितंनामत्रयोविं
शत्यधिकशततमःसर्गः॥ १२३॥ ॥ छ ॥ ॥ दिवोदासकुलेजातःसदनोतीवभक्तिमान् ॥ नंददासस्तथारामपुरग्रामेबभूवह ॥ १ ॥
एवंहिवंगदेशेभूद्गोपालोतिहरिप्रियः ॥ निवसन्नहरिग्रामेययावंतेहरेःपदम् ॥ २ ॥ गढानगरवास्येवमाधवोभक्तिमानभूत् ॥ नृत्येन
गीतवाद्याभ्यांतोपयामासवैहरिम् ॥ ३ ॥ एकदाराजनिकटेदुर्जनैःकथितंवचः ॥दंभेनायंस्वमात्मानंपूजयत्यतिदुर्मतिः ॥ ४ ॥ इति
श्रुत्वाननर्तासौमाधवोभक्तिसत्तमः ॥ ननिवेदस्वमात्मानंप्रासादाग्रात्पपातह ॥ ५ ॥ भूमौकटाहेपतितोनममारेच्छयाहरेः ॥ राजादु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

धांस्तुनिर्भर्त्स्यंतस्मैदत्त्वातुजीविकाम् ॥ ६ ॥ विससर्जततःसोपिगृहमागत्यनिर्व्यथः ॥ पूर्ववत्पूजयामासभगवंतंदिवानिशम् ॥ ७ ॥
राजसेनगरेचेत्थमंगदोभून्महायशाः ॥ कथामस्यप्रवक्ष्यामिपरमाश्चर्य्यकारिणीम् ॥ ८ ॥ पूर्वंतुभक्तिनिर्मुक्तोनृपमंत्रीपितृव्यकः ॥ प
त्नीतस्यमहाभक्त्यागुरुशुश्रूषणेरता ॥ ९ ॥ एकदातुगुरोरग्रेएकांतेसंस्थितासती ॥ अथांतरेंगदस्तत्रसमायातोददर्शताम् ॥ १० ॥
कोयंकिंभाषसेत्वंतद्ब्रूहीत्युक्त्वाथसाब्रवीत् ॥ अयंमेगुरुरत्रास्तिपितृवत्पूजयामितम् ॥ ११ ॥ अतःक्रुद्धोंगदःप्राहगुरुश्चतेनकिं
गृहे ॥ एकांतेतस्यकिंचास्तिप्रयोजनमिदंमहत् ॥१२॥ ततोगुरुःसमुत्थायसोद्वेगःप्रययौगृहात् ॥ अंगदस्यतुपत्नीसारुष्टासुष्वापकुत्र
चित्॥१३॥ अथमध्याह्नसमयेविश्रामार्थंगतोंगदः॥ पत्नींसमीपेतांदृष्ट्वामहाशोकेनपातिताम् ॥१४॥ उवाचतांकएषोस्तिशोकस्तन्वंगि
तेहृदि॥वदतस्यप्रतीकारंकरिष्येहंनसंशयः॥१५॥ पत्न्युवाच॥त्वयामिथ्याभिशापोद्यगुरवेमेसमर्पितः॥ सगुरुःपितृतुल्योस्तिपरिवाद
स्तुतेनमे ॥१६॥ यत्कृतोभवतातेनमरिष्येहंनसंशयः ॥ इतिश्रुत्वाप्रियावाक्यमंगदश्चातिदुःखितः ॥ १७ ॥ सहसैवतदुक्तंतत्क्षमस्वा
द्यप्रसीदमे ॥ अतःपरंप्रियेब्रूहितत्करोम्यविचारितम् ॥ १८ ॥ इतिश्रुत्वाततःप्राहप्रियभक्त्यासतीतुसा ॥ अहोस्त्रीधनपुत्रादिमोहवान
सिकिंवृथा ॥ १९ ॥ नतेसहायःकोप्यस्तिनहंतेदंधनंमम ॥ ततःश्रीकृष्णचरणौशरणीकुरुसर्वदा ॥ २० ॥ महापदिस्मृतौचेमौरक्षिता
रौभविष्यतः ॥ तमेवगुरुमानीयभक्त्याशिष्योभवाधुना ॥ २१ ॥ तेततःपुर्ववत्प्रीतिर्भविष्यतिनसंशयः ॥ एवंपत्नीप्रेरणयाकृ
त्वातंगुरुमंगदः ॥ २२ ॥ भक्तोबभूवपत्न्यासतयाचातीवतोषितः ॥ एकदातस्यभ्रातृभ्योराजमंत्रीकचिद्गतः ॥ २३ ॥ जेतुंशत्रुपु
रेतत्रानिन्येचांगदमप्यसौ ॥ गतेषुतेषुरिपवस्त्यक्त्वासर्वेंतुविद्रुताः ॥ २४ ॥ मंत्रीपुरंलुंठयित्वाराजसंनिधिमागतः ॥ अंगदःप्रापत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्रैकंशिरोलंकरणंमहत् ॥ २५ ॥ बहुमूल्यैश्चरत्नैश्चखचितंदिव्यहाटकम् ॥ तत्रैकोहीरकश्चासीन्महान्तंतंररक्षसः ॥ २६ ॥ जगन्नाथः
सदास्वामीत्येवंबुद्ध्यातिभक्तिमान् ॥ अन्यानिसर्वरत्नानिविचिंत्यापत्तितोधनैः ॥ २७ ॥ भोजयामाससाधून्सदीनान्विप्रान्मुदां
गदः ॥ कर्णाकर्णिततोग्रामेश्रुतंसर्वैर्महाद्भुतम् ॥ २८ ॥ केनापिराज्ञेकथितंरत्नंतत्रमहाद्भुतम् ॥ श्रुत्वाराजातुभृत्येनयाचयामा
सतंमणिम् ॥ २९ ॥ नददावंगदोराज्ञेततोमंत्रिणमब्रवीत् ॥ भ्रातृपुत्रश्चांगदस्यसोप्युवाचततोमणिम् ॥ ३० ॥ नददौभ्रातृपुत्रायप्रा
हायंश्रीहरेर्नते ॥ ततोराजांगदगेहेभगिनीतस्ययास्थिता ॥ ३१ ॥ तामाहान्नेतुगरलंदत्त्वाहत्वांगदंत्वया ॥ मणिर्देयोद्यमेतुभ्यंदा
स्यामिविविधंधनम् ॥ ३२ ॥ इत्युक्ताभगिनीराज्ञादत्त्वान्नेतुविषंस्वयम् ॥ भ्रात्रेंगदायप्रददौभोक्तुंसोपिचपूर्ववत् ॥ ३३ ॥
अर्प्पयित्वाभगवतेभागिनेयींसमाह्वयत् ॥ विषदात्र्याभगिन्याःसापुत्रीतस्यापिताहृशी ॥ ३४ ॥ स्नेहात्तस्यैपुरादत्त्वाभोक्तव्यमि
तितन्मनः ॥ अथांगदस्यभगिनीस्वपुत्रीप्रेमदर्शनात् ॥ ३५ ॥ रुदंतीमनसात्मानंधिक्चकारात्मनापुनः॥ दृष्ट्वारुदंतींतांप्राहकिंक
रोषिक्वचास्तिसा ॥ ३६ ॥ नाहंतावत्तुभोक्ष्यामियावन्नैष्यतितेसुता ॥ इत्युक्ताभगिनीप्राहतंभुंक्ष्वेदंविषान्वितम् ॥ ३७ ॥ राज्ञो
क्ताहंत्वद्वधायविषमन्नेन्यवेशयम् ॥ मण्यर्थंतुनिहत्याशुमणिंमेदेहितेधनम् ॥ ३८ ॥ दास्यामिविपुलंचेतिनृपोक्ताकरवाण्यह
म् ॥ इतिश्रुत्वांगदःप्राहभगिनींभर्त्सयन्मुहुः ॥ ३९ ॥ किमेवंभाषसेपापेकृत्वाकर्म्मेदृशंपुनः ॥ श्रीकृष्णायार्पितंचैतत्सविषंन
मयाक्वचित् ॥ ४० ॥ भोक्तव्यमितिउक्त्वाद्यमरिष्येनात्रसंशयः ॥ इत्युक्त्वाबुभुजेन्नंसप्रसादंमनसातदा ॥ ४१ ॥ विषतेजस्तदं
गेषुवबाधेनैवकिंचन ॥ पूर्वतोप्यधिकाकांतिस्तस्यासीदंगदस्यतु ॥ ४२ ॥ श्रुत्वाराजातुतत्सर्वंभृत्यानतिबलीयसः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रेषयामासहत्वातंमणिमाप्रापतद्रुतम् ॥ ४३ ॥ ततस्तेराजभृत्यास्तुगताअंगदमंदिरे ॥ अंगदस्तान्समाकर्ण्यमणिमादायस त्वरम् ॥ ४४ ॥ प्रविलाप्यगतोगेहाज्जगन्नाथायचार्पितम् ॥ राजभृत्याअपितदादुद्रुवुस्तमनुद्रुतम् ॥ ४५ ॥ कियद्दूरे पितेगत्वासन्निरुध्यस्थिताजनाः ॥ आहुस्तमंगदंदेहिमणिंहन्मोनचेद्वयम् ॥ ४६ ॥ इतिश्रुत्वांगदःप्राहदीयतेतिष्ठताधुना ॥ स्नात्वातडागसलिलेवहिष्कृत्यप्रदीयते ॥ ४७ ॥ इत्युक्त्वासजलेगत्वास्नात्वानीत्वामणिंकरे ॥ तान्वदन्पश्यतेमंभोमणिममकरे स्थितम् ॥ ४८ ॥ जगन्नाथायदास्यामितदर्थंरक्षितंमया ॥ इत्युक्त्वागाधसलिलेचिक्षेपपश्यतांनृणाम् ॥४९॥ ततःसर्वैराजभृत्यानिप त्यसलिलेद्रुतम् ॥ मणिमन्वेषयंतस्तेतेभ्यएकोययौद्रुतम् ॥ ५० ॥ प्राहराजापितच्छ्रुत्वासमायातोजलाशये ॥ बहिर्निष्कासयामा सजलंसर्वंनराधिपः ॥ ५१ ॥ अप्राप्यतंमणिंराजारात्रौतत्रवसन्स्थितः ॥ अथस्वप्नेजगन्नाथोराजानंसाधुरूपधृक् ॥ ५२ ॥ उवाच श्रीजगन्नाथोजग्राहतंमणिंनृप॥ किंवृथाखिद्यसेयाहिगृहंश्रीपुरुषोत्तमः॥५३॥संपादयतिसंकल्पंभक्तानांनात्रसंशयः॥ एवंदृष्ट्वाततोराजा ततःस्वभवनंययौ ॥ ५४ ॥ तावत्सचांगदोभीत्यासकुटुंबःपलायितः ॥ राजातंनिर्गतंज्ञात्वातत्याजान्नंजलंशुचा ॥ ५५ ॥ यावन्ना यात्यंगदोत्रनतावद्भोजयाम्यहम् ॥ ततोराज्ञाद्विजास्तत्रमंत्रिणःप्रेषिताद्रुतम् ॥ ५६ ॥ तेंगदद्वारमागत्यउपोषणपरायणाः ॥ अंग दायाभयंदत्त्वासमानिन्युर्नृपांतिके ॥ ५७ ॥ राजादृष्ट्वासमुत्थायमत्वातंसाधुसत्तमम् ॥ प्रणम्यतस्यशिष्योभूत्सोपिभक्तोबभूवह ॥ एवंभक्तेस्तुमाहात्म्यंकोवेदितुमिहक्षमः ॥ ५८ ॥ इति श्रीभगवद्भक्तिमाहात्म्येअंगदभक्तिचरितंनामचतुर्विंशत्यधिकशततमःसर्गः ॥ ॥ १२४ ॥ छ ॥ करोलीग्रामनृपतेःकथांवक्ष्येमनोरमाम् ॥ चतुर्भुजेतिनाम्नस्तुभक्तिराजस्यपावनी ॥१॥ आसीद्राजामहाभक्तोभगव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

द्भक्तपूजकः ॥ ग्रामाच्चतुर्दिक्षुनृपोभृत्यान्संस्थाप्यानित्यशः ॥ २ ॥ यंकंचिद्वैष्णवंदृष्ट्वानयतेत्युक्तवांस्तुतान् ॥ तैरानीतंस्वतः प्राप्तंदृष्ट्वाराजासवैष्णवम् ॥ ३ ॥ पूजयामासश्रीकृष्णबुद्ध्यापत्नीसमन्वितः ॥ यावन्मनोरथंतस्यददौवित्तानिभक्तितः ॥ ४ ॥ एवंश्रुत्वाथतद्वार्तामन्यदेशाधिपोनृपः ॥ उवाचकोयंधर्मस्ययद्विवेकोनजायते ॥ ५ ॥ अपात्रपात्रयोश्चैवतस्मादेतन्नशस्यते ॥ इतिश्रुत्वाब्रवीत्तस्याद्विजःपौराणिकोनृपम् ॥ ६ ॥ राजन्नैवंवदत्वंभोमहाभक्तःसभूपतिः ॥ निर्दंभोभक्तपूजायांवर्ततेतस्यचेन्मतिः ॥ ॥ ७ ॥ पात्रापात्रविचारस्तुनभक्तेर्लक्षणंनृप ॥ अपात्रमपिविज्ञायसद्रूपंपूजयत्यसौ ॥८॥ इतिश्रुत्वाततोराजास्वबंदिनमुवाचह ॥ चतुर्भुजनृपद्वारिभक्तरूपधरोव्रज ॥९॥ सत्कुर्यात्सयथात्वांतुतथावदममाग्रतः ॥ इतिश्रुत्वासबंदीतुमालांमुद्रांवहन्ययौ ॥ १० ॥ श्रुत्वा चतुर्भुजोभक्तमागतंद्वारिचाययौ ॥ सपत्नीकस्तुसंपूज्यददौधनमनेकशः ॥ ११ ॥ ज्ञात्वातंबंदिनंबुद्ध्यापरीक्षार्थंसमागतम् ॥ चतुर्भुजस्तुतत्रैकंकौशलंकृतवान्स्वयम् ॥ १२ ॥ कृत्वातुसंपुटेचैकंराजाकाणवराटकम् ॥ संवेष्ट्यचप्रददौस्वर्णसूत्रवस्त्रैरपूर्ववत् ॥ ॥ १३ ॥ अथबंदीप्रसन्नात्मानृपांतिकसमागतः ॥ उवाचतस्यसत्कारंदत्तंसर्वंप्रदर्शयन् ॥ १४ ॥ उवाचपश्चादेकंतुकिंचिद्दत्तंनृपेणमे ॥ तत्पश्यत्वंमहाराजदर्शयामितुतेधुना ॥ १५ ॥ इत्युक्त्वातत्पुरस्कृत्यस्वर्णवस्त्रपृथक्कृतम् ॥ पश्चात्तुसंपुटेसर्वैर्दृष्टःकाणवराटकः ॥ १६ ॥ किमिदंकिमिदंचेतिप्रोचुराजाप्युवाचतम् ॥ पौराणिकंसचाप्याहराजानंतस्यकारणम् ॥ १७ ॥ राजन्वराटकंमध्येदत्त्वादिव्येनवाससा ॥ संवेष्ट्यचप्रददौतस्यभावंशृणुवदाम्यहम् ॥ १८ ॥ अयंबंदीमयाज्ञातोयथाकाणवराटकः ॥ परंतुसाधुरूपेणवेष्टितोयंतुभक्तिवत् ॥ १९ ॥ मयासंपूजितोयद्वत्त्वयायंतुवराटकः ॥ सुवर्णवस्त्रसन्नद्धोदृश्यतेपरमादरात् ॥ २० ॥ इति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रुत्वाततोराजामत्वासत्यंप्रसन्नधीः ॥ प्राहपौराणिकंगच्छत्वंद्दष्ट्वागत्यमांवद ॥ २१ ॥ इतिश्रुत्वाययौविप्रश्चतुर्भुजसमीपतः ॥
राजातमपिसंपूज्यविससर्ज्जमुदान्वितः ॥ २२ ॥ ततःपौराणिकोविप्रश्चतुर्भुजमयाचत ॥ शुकसारिकयोर्मध्येदेह्येकंमेनृपोत्तम ॥
॥ २३ ॥ श्रुत्वैतत्प्रददौराजाशुकंपौराणिकायसः ॥ गृहीत्वातंशुकंविप्रःस्वराजांतिकमागतः ॥ २४ ॥ दर्शयित्वाधनंराज्ञेशुकंतंप्र
ययौद्विजः ॥ राजाप्रोवाचकोसीतिश्रुत्वाभूपंशुकोब्रवीत् ॥ २५ ॥ कस्त्वंकोहमितिभ्रांतिःसंसारेवर्ततेनृणाम् ॥ अहंकृष्णमयंसर्वं
पश्यामिनृपसत्तम ॥ २६ ॥ इतिसंचिंत्यराजेंद्रवदकृष्णमुहुर्मुहुः ॥ राधाकृष्णेतिकृष्णेतिगोविंदेतिसदाजप ॥ २७ ॥ इतिश्रुत्वाशुकव
चोविस्मयंपरमंगतः ॥ तत्कथाश्रवणाद्भक्तिंप्राप्याभूद्वैष्णवोनृपः ॥ २८ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येचतुर्भुजमाहात्म्यचरितंनाम
पंचविंशत्यधिकशततमःसर्गः॥१२५॥ ॥छ ॥ राजासीन्मेरताग्रामेजयमल्लेतिविश्रुतः ॥ कन्याबभूवतस्यैकामीराबाईतिविश्रुता ॥ १ ॥
तस्यराज्ञोगृहेकृष्णमूर्तिःपरमशोभना ॥ नाम्नागिरिधरेत्येतत्तद्भक्ताःसर्वएवते ॥ २ ॥ मीरापिपितृवाक्येनविवाहंस्वीचकारसा ॥
चित्तेगिरिधरंदेवंपतिंकृत्वाव्यवस्थिता ॥ ३ ॥ जयमल्लस्ततोमीरांसुमुहूर्तेददौमुदा ॥ सनापुत्रायवीरायधनानिविविधानिच ॥ ४ ॥
ततःसमीरांनीत्वास्वंभवनंचलितोभवत् ॥ मीरागिरिधरंत्यक्त्वानगंतुंसहतेस्मसा ॥ ५ ॥ प्रस्थानसमयेमीरारुदतीमूर्छितापतत् ॥
ततस्तौपितरौतस्याःसमागत्येदमूचतुः ॥ ६ ॥ किमस्तितहृदयेमीरेतद्वदेववदाशुमाम् ॥ तयोक्तंमेगिरिधरंदेहिप्रियतरंपितः ॥ ७ ॥
इतिश्रुत्वावचस्तस्याःपितरावतिमोहितौ ॥ ददतुस्तंगिरिधरंपुत्रींतोषयतावुभौ ॥ ८ ॥ अथमीरागिरिधरंशिबिकायांनिधायतम् ॥
हर्षिताप्रययौपत्युर्गेहंसैन्यसमन्विता ॥ ९ ॥ तत्रश्वश्रूःसमागत्यमीरयासहचात्मजम् ॥ ग्रामदेवीसमीपेतुनिनायातिप्रसो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दिता ॥ १० ॥ पुत्रेणपूजयित्वातांदेवींमीरामथाब्रवीत् ॥ स्नुषेसंपूज्यमनसाग्रामदेवींनमस्कुरु ॥ ११ ॥ इतिश्वश्रूवचः
श्रुत्वामीराप्राहकृतांजलिः ॥ विनागिरिधरंदेवींनमस्कुर्यामहंनहि ॥ १२ ॥ इतिश्रुत्वापुनःश्वश्रूराहसौभाग्यवर्द्धनम् ॥ भवि
ष्यतिततस्त्वंतुनमस्कुरुनसंशयः ॥ १३ ॥ इतिश्रुत्वापुनःप्राहमीराश्वश्रूंनमेपतिः ॥ मरिष्यतिततोनित्यंसौभाग्यंवर्ततेमम ॥
॥ १४ ॥ किंचेमाविधवाःसंतिग्रामेतवकथंस्त्रियः ॥ इतिश्रुत्वाततःश्वश्रूःकोपेनस्फुरिताधरा ॥ १५ ॥ वधूपुत्रौपरित्यज्यप
तिसन्निधिमागता ॥ उवाचतंमहादुष्टास्नुषानीतात्वयागृहे ॥ १६ ॥ अद्यैवनशृणोत्युक्तंकिमेषाग्रेकरिष्यति ॥ अहंतुनैववक्ष्या
मिकिंचिदस्यैहिताहितम् ॥ १७ ॥ इतिश्रुत्वाततोराजानृपःक्रुद्धोविचारयन् ॥ प्रणामोऽस्याःकलंकःस्यात्स्त्रीवधश्चातिदारु
णः ॥ १८ ॥ तस्मात्क्वचिद्गृहेरक्ष्याभोजनाच्छादनादिभिः ॥ जिज्ञासानैवगेहेस्याःप्राधान्यंस्यात्कथंचन ॥ १९ ॥ इतिनिश्चि
त्यतांमीरांस्थापयामाससमंदिरे ॥ क्वचित्तत्ररक्षासौद्वारपालान्सुधार्म्मिकान् ॥ २० ॥ मीरागिरिधरंनित्यंपूजयंतीपतिव्रता ॥ नवे
दकिंचिच्चरितंश्वश्र्वावाश्वशुरस्यवा ॥ २१ ॥ पूजयंतीगिरिधरंनिर्लज्जासाधुभिःसह ॥ अनभिज्ञकुलाचारानिमग्नानंदसागरे ॥ २२ ॥
तदारानादयःसर्वेतदाचारेणदुःखिताः ॥ कुलेकलंकभूतेयंमरिष्यतिकदापुनः ॥ २३ ॥ एवंविचिंतयंतस्तेलेभिरेशर्म्मनक्वचि
त् ॥ मीरांननंदाचैकस्मिन्दिनेभ्येत्याब्रवीच्चताम् ॥ २४ ॥ भ्रातृजायेकिमेवेत्थंकुलद्वयकलंकिनि ॥ भूत्वागायसिनिर्लज्जावैष्ण
वानांपुरःस्थिता ॥ २५ ॥ श्वशुरौदुःखितौतत्रदृष्ट्वेदंतवचेष्टितम् ॥ पिताविजयमल्लस्तेयशस्वीकिंवदिष्यति ॥ २६ ॥ इतिश्रु
त्वातुतद्वाक्यंमीराप्राहहसन्मुखी ॥ कुलेयावर्ततेतस्याःसत्यमेतन्नसंशयः ॥ २७ ॥ नाहंजानामिपितरौश्वशुरौपतिमेवच ॥ नान्यंपु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मांसंजानामिक्रतेगिरिधरंशुभम् ॥ २८ ॥ किंकरोम्यैवमेवास्तिमनोविक्षिप्तवन्मम ॥ लग्नंगिरिधरेन्यत्रनयातिकथमप्यहो ॥ २९ ॥ तस्माद्धिताहशंचित्तंकोऽन्यथाकर्तुमर्हति ॥ मयात्यक्तंकुलंशीलंहरिंशरणमागता ॥ ३० ॥ इतिश्रुत्वावचस्तस्यानन्दाक्रोधसंयुता ॥ आगत्यपितरौप्राहभ्रातृभार्यात्वियंपितः ॥ ३१ ॥ मयोक्ताबहुशःप्रेम्णालोभेनचभयेनच ॥ नसामन्यतमद्वाक्यंगीतनृत्यपरायणा ॥ ॥ ३२ ॥ इतिश्रुत्वावचःपुत्र्याराणाभूपोतिकोपितः ॥ महाविषंप्रेषयित्वाकृत्वासौवर्णभाजने ॥ ३३ ॥ प्रेषयामासमीरायैविष्णुपादोदकंतथा ॥ भृत्योनीत्वाददौतस्यैराजोक्तमपितांवदन् ॥ ३४ ॥ अद्यराज्ञार्चितोदेवस्तस्येदंचरणोदकम् ॥ दत्तंतुभ्यमितिश्रुत्वामीराहर्षात्समुत्थिता ॥३५॥ निधायपाणौतत्पात्रंपपौभक्तिसमन्विता ॥ विष्णुपादोदकधियायत्पपौगरलंसती ॥ ३६ ॥ ततोगिरिधरोमीरांददर्शभक्तवत्सलः ॥ नमीरायास्तदाकिंचिद्वैरूप्यमभवत्तनौ ॥३७॥ कांतिर्दशगुणाजातानैरुज्यमप्यजायत ॥ एवंज्ञात्वानृपोराणाविस्मयंपरमंगतः ॥ ३८ ॥ मरिष्यतिकदाचैषेत्येवंसंप्रार्थयन्स्थितः ॥ एकदासतुमीरायाःश्रुत्वादुश्चेष्टितंनृपः ॥ ३९ ॥ तत्रतुरक्षकंप्राहयदैकांतेस्थिताभवेत् ॥ केनापिसाधुनासाकंतदैवागत्यमांवद ॥ ४० ॥ इतिराजवचःश्रुत्वाज्ञात्वातंसमयंजनः ॥ आगत्योवाचराजानंराज्ञात्वेकस्तदोत्थितः ॥ ४१ ॥ तद्गृहद्वारिसंलग्नःकपाटेसमुपस्थितः ॥ शुश्रावमीरावचनमन्यस्यापितथावचः ॥ ४२ ॥ अस्पष्टाक्षरमव्यग्रंततोराजाहतांस्नुषाम् ॥ उद्घाटयकपाटंतुकस्तिष्ठतिसहत्वया ॥ ४३ ॥ इतिश्रुत्वाततोमीरास्वयमुद्घाटयसाद्रुतम् ॥ तस्थावधोमुखीदृष्ट्वाश्वशुरंनृपतिंसती ॥ ४४ ॥ राजाप्राहत्वयासार्द्धंकःस्थितोमंदिरेवद ॥ इतिश्रुत्वावचोमीरानिर्लज्जानृपमब्रवीत् ॥ ॥ ४५ ॥ त्वंरहस्यागतोराजन्निरीक्षस्वस्वकंगृहम् ॥ नापश्यत्सगृहेकंचिद्दृतेगिरिधरंप्रभुम् ॥ ४६ ॥ ततोतिलज्जितोराजासमागत्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्वमंदिरम् ॥ उक्त्वापत्न्यैतुतत्सर्वंतस्थौविस्मितमानसः ॥ ४७ ॥ एकदाकोपिदुष्टात्माकामीवैष्णवरूपधृक् ॥ ज्ञात्वातिसुंदरींमी
रामुवाचरतिमर्प्पय ॥ ४८ ॥ इतिश्रुत्वाततोमीरानचुकोपाहतंपुनः ॥ भोजनंकुरुसाधोद्यनिशिदास्यामितेरतिम् ॥ ४९ ॥ ततोमी
रांगिरिधरस्यांतिकेविष्णुवल्लभाम्॥समानीयाथतत्रैवशय्यांचक्रेमनोरमाम् ॥ ५०॥ सायंपूजादिकंकृत्वासमलंकृत्यवैपुनः ॥ समाहृतव
तीप्रेम्णातंधूर्तंसाधुरूपिणम् ॥ ५१ ॥ ससमागत्यतांमीरांददर्शनिजमातरम् ॥ कृतांजलिपुटःपादौनिपत्येदमभाषत ॥ ५२ ॥
मातःक्षमस्वदुष्टस्यममचैतद्विचेष्टितम् ॥ अज्ञानाज्जननींतत्त्वामुक्तमेवंवचोमया ॥ ५३ ॥ ततस्तेवैष्णवाःसर्वेविस्मयंपरमंगताः ॥
तमप्युत्थापयामासमीरापुत्रधियास्वयम् ॥ ५४ ॥ एवंभक्तेःप्रभावंतुज्ञात्वासोपिचदुर्म्मतिः ॥ भक्तिमार्गरतोभूत्वापरमंपदमाप्तवा
न् ॥ ५५ ॥ एवमेकदिनेदिल्लीश्वरोम्लेच्छःस्वयंप्रभुः ॥ श्रुत्वामीरांयशोहृष्टंतेनसैन्येनसंगतः ॥ ५६ ॥ वेषांतरेणचायातोमीरांतत्का
लमाह्वयत् ॥ गत्वातन्निकटेराजामीरांगिरिधराकृतिम् ॥५७॥ दृष्ट्वातिविस्मतोभक्त्याचक्रेपद्यंमनोरमम् ॥ अद्यमेदृष्टिसंप्राप्तोनंदनंदन
एषभोः ॥ ५८ ॥ इत्याद्यर्थकगीतेनगायन्नागत्यवेश्मनि ॥ मीरांमातृसमांजानन्सेवयामासयत्नतः ॥ ५९ ॥ एकदासागतामीरावृंदा
वनमनुत्तमम् ॥ जीवगोस्वामिवृत्तांतंशुश्रावजनवक्रतः ॥ ६० ॥ आबालब्रह्मचार्य्यैषस्त्रीमुखंनैवपश्यति ॥ इतिज्ञात्वाययौमीरा
तंद्रष्टुंभक्तसत्तमम् ॥ ६१ ॥ ततोमीराषोडशाब्दंपुरुषंतंददर्शह ॥ उत्थायाश्लिष्यतंधृत्वाकरेस्वासनमानयत् ॥ ६२ ॥ उप
विश्यततोजीवगोस्वामीतांददर्शह ॥ मीरांस्त्रियंतताश्चित्तेविस्मितोवाचतांपुनः ॥ ६३ ॥ स्त्रीमुखंनैवपश्यामीत्येतद्यन्मेस्तिवै
व्रतम् ॥ इतिश्रुत्वावचोमीराजीवगोस्वामिनेपुनः ॥ ६४ ॥ नमश्चक्रेमुहुःसोथतांननामपुनश्चसः ॥ कृत्वावृंदावनेयात्रांमीराद्वारव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तींययौ ॥ ६५ ॥ तत्रैवोवासमुदितास्मरंतीज्ञातिचेष्टितम् ॥ अथरानानृपोविप्रान्प्रेषयामासतत्रह ॥ ६६ ॥ मीरामानेतुमनघांज्ञा
त्वाविप्राययुर्द्रुतम् ॥ मीरामूचुस्तुतेगत्वानयास्यामीतिचाब्रवीत् ॥ ६७ ॥ ततस्तेब्राह्मणाःसर्वेत्यक्ताशनजलास्तुताम् ॥ त्यक्ष्या
मोजीवितंसर्वेनत्वंयास्यसिचेद्गृहम् ॥ ६८ ॥ इतिज्ञात्वाततोमीराश्रीकृष्णांतिकमागता ॥ आहूयतान्द्विजानाहमयाद्यप्रार्थितोहरिः ॥
॥ ६९ ॥ यूयंपश्यतयद्रूपादेषमेकरुणानिधिः ॥ करिष्यामिनसंदेहोभवतांपश्यतामिह ॥ ७० ॥ इत्युक्त्वातंहरिंचित्तेमीराप्राहाति
दुःखिता ॥ दासीभूत्वातवाहंभोःक्कगच्छाम्यधुनापुनः ॥ ७१ ॥ गणिकाशबरीगृध्रांस्त्वंसमुद्धृतवानसि ॥ अहंवराकीकियतीनमांत्य
जमहाभुज ॥ ७२ ॥ इत्येवंविलपंत्यास्तुमीरायाभक्तिपूर्वकम् ॥ ब्रह्मांडंस्फुटितंतस्यास्तेजोविद्युदिवज्वलत् ॥ ७३ ॥ निर्गत्यकृ
ष्णप्रतिमामुखेन्यस्तमिवाभवत् ॥ एवंदृष्ट्वातुतेविप्राःशोकाश्चर्यसमन्विताः ॥ ७४ ॥ हाहाकृत्वारुदंतस्तेसंस्कारंचक्रुरर्थवत् ॥ ७५ ॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येमीराचरितंनामषड्विंशत्यधिकशततमःसर्गः ॥ १२६ ॥ ॥ छ ॥ ॥ कच्छवाहःक्षत्रियेषुपृथ्वीराजोबभू
वह ॥ आमेरकोटेनिवसन्हरिभक्तिमतांवरः ॥ १ ॥ कृष्णदासस्यशिष्यःसगुरुशुश्रूषणेरतः ॥ एकदासगुरुःकृष्णदासोद्वारवतींव्रज
न् ॥ २ ॥ गुरोत्वयाननेतव्यःपृथ्वीराजःकथंचन ॥ गतेस्मिन्राज्यविभ्रंशोभविष्यतिनसंशयः ॥ ३ ॥ इत्येकांतेगुरुःश्रुत्वापृथ्वीरा
जमुवाचह ॥ नत्वयासहगंतव्यंतिष्ठात्रैवममाज्ञया ॥ ४ ॥ इतिश्रुत्वागुरुवचःपृथ्वीराजउवाचतम् ॥ स्नानंकृत्वातुगोमत्यांदृष्ट्वा
कृष्णंततःपरम् ॥ ५ ॥ शंखचक्रादिकंनीत्वाआगमिष्याम्यहंद्रुतम् ॥ इतिस्थितंमनःकिंतुभवदाज्ञागरीयसी ॥ ६ ॥ अतःपरंनग
च्छामिभवदाज्ञांकरोम्यहम् ॥ इतिश्रुत्वागुरुःप्राहसर्वंतेत्रभविष्यति ॥ ७ ॥ हरिंभजन्गृहेस्थित्वाकुरुराज्यमकंटकम् ॥ इत्याज्ञांशि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रसाधृत्वादत्त्वाधनमनेकशः ॥ ८ ॥ गुरुंप्रस्थाप्यभवनेतस्थौभक्तिसमन्वितः ॥ अथैकस्मिन्दिनेराजासपत्नीकोवनंगतः ॥ ९ ॥
विहारार्थंतुतत्रैवनिश्युवासहरिंस्मरन् ॥ पृथ्वीराजस्तदास्वप्नेकृष्णदासंददर्शह ॥ १० ॥ स्वयंद्वारावतीमेत्यकृष्णमूर्तिंमनोरमा
म् ॥ कृष्णदासोब्रवीत्स्वप्नेद्वारकेयंचगोमतीम् ॥ ११ ॥ तत्रस्नात्वाहरेर्मूर्तिंदृष्ट्वाशंखगदादिकम् ॥ गृहीत्वागच्छभवनेभवं
दृष्ट्वाचकारह ॥ १२ ॥ सर्वंततःसमुत्थायजाग्रद्वाहूददर्शह ॥ शंखचक्रादिभिर्युक्तौगोमतीसलिलंतथा ॥ १३ ॥ पत्नींप्रोवाचतं
स्वप्नंसापिदृष्ट्वातुगोमतीम् ॥ प्रातःसस्नौजलेतस्मिन्महाभक्तिसमन्वितः ॥ १४ ॥ अथोपायनवित्तैस्तुमठंनिर्माययभूपतिः ॥
स्थापयामासकृष्णस्यमूर्तिंपरमशोभनाम् ॥ १५ ॥ एकदाकोपिचांधोभूद्वैद्यनाथंजगामसः ॥ नेत्रार्थंतस्यस्वप्नेतुवैद्यनाथो
ब्रवीद्धितम् ॥ १६ ॥ आमेरकोटेचास्त्येकःपृथ्वीराजोतिवैष्णवः ॥ अंगप्रोक्षणवस्त्रेणतस्यनेत्रेप्रमार्जय ॥ १७ ॥ भविष्यतिततो
नेत्रद्वयंदृष्ट्वासचांधवत् ॥ पृथ्वीराजस्यनिकटेसमागत्याब्रवीच्चतम् ॥१८॥ अहोंगप्रोक्षणंस्वीयंवस्त्रंप्रोक्ष्यकलेवरम्॥देहिमेंधायकृपयात
तोनेत्रेभविष्यतः ॥१९॥ इत्याज्ञावैद्यनाथस्यजातामेस्तिदयानिधे ॥ पृथ्वीराजोवचःश्रुत्वासर्वान्संपृच्छ्यचद्विजान् ॥ २० ॥ तदाज्ञ
यानवीनेनवाससांगंप्रमार्ज्यंच ॥ ददौतस्मैचांधदृशेसोपितेनस्वलोचने ॥ २१ ॥ प्रोक्षयामासमुदितस्तदातस्यदृशौशुभौ ॥ तदैवविम
लेजातेदृष्ट्वासर्वेंतिविस्मिताः ॥२२॥ एवंप्रभावोभक्तेस्तुवर्ततेद्यापिभूतले ॥ कस्तंवर्णयितुंशक्तोविनाहरिकृपांबुधः ॥२३॥इति श्रीभग
वद्भक्तिमाहात्म्येपृथ्वीराजचरितंनामसप्तविंशत्यधिकशततमःसर्गः ॥१२७॥ श्रुत्वाद्भुतंतुमीरायाश्चरितंतत्पितानृपः॥जयमल्लोविरक्तो
भूद्भगवद्भजनेरतः ॥ १ ॥ स्वयमेकादिनेरात्रौप्रासादेसंस्थितोनृपः ॥ कृष्णमूर्तिरधस्तत्रवर्ततेइतिसंस्मरन् ॥२ ॥ उत्थायाधःसमागत्य

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

निन्येतत्रैवतांनिशाम्॥प्रातःस्वगृहतोऽत्यंतमुच्चैर्मठमकल्पयत् ॥३॥ तत्रसंस्थाप्यश्रीकृष्णमूर्तिंसर्वोपरिस्वयम्॥ दासवत्सेवयामासदि
वानिशमतंद्रितः ॥ ४ ॥ एकस्मिन्दिवसेराजारात्रौशय्यांविधायच ॥ दत्त्वोपकरणंसर्वस्वमंदिरमुपागमत् ॥ ५ ॥ अथराज्ञीतुराजा
नंकिंचिद्दकुंगतारहः ॥ भगवन्निकटेयातातत्रापश्यन्महाद्भुतम् ॥ ६ ॥ श्रीकृष्णमूर्तिंशय्यायांशयानांपर्णवाटिकाम् ॥ चर्वयंतीततः
शीघ्रंपरावृत्यागतागृहम् ॥ ७ ॥ पतिंप्रोवाचमुदिताविस्मयोत्फुल्ललोचना ॥ राजांश्रुत्वाप्रियामाहधन्यासित्वंनसंशयः ॥ ८ ॥ एवं
स्वभयरामोभूत्कर्म्मशीलस्तथैवच ॥ भगवानभयरामोराजमल्लस्वकंधरः ॥ ९ ॥ एतेपिचमहाभक्तामथुराप्रांतवासिनः ॥ कीर्तिदाभ
क्तिदाश्चैवनामतोपिनसंशयः ॥ १० ॥ डोडछायामभूद्राजाभक्तिमान्साधुपूजकः ॥ नाम्नामधुकरेत्येतत्सयातोतिदयान्वितः ॥ ११ ॥
तस्यैवंनियमोराज्ञःसाधुरूपधरस्तुयः ॥ तंभक्त्यापूजयामासकृष्णवच्चातिहर्षितः ॥ १२ ॥ अथैकस्मिन्दिनेकोपिदुष्टोगर्दभमानय
त् ॥ मालातिलकभूषाढ्यंवैष्णवोयमितिब्रुवन् ॥ १३ ॥ श्रुत्वाराजातिहर्षेणसमागत्यतदंतिकम् ॥ अहोभाग्यमितिप्रो
च्यपूजयामासभक्तितः ॥ १४ ॥ तस्यपूजयतस्तत्रचरणंगर्दभस्यवै ॥ मनुष्यपादसदृशंबभूवात्यंतमद्भुतम् ॥ १५ ॥
श्यामपृष्ठंरक्ततलंपंचांगुलियुतंशुभम् ॥ राजादृष्ट्वाप्रभोरेतदित्युक्त्वाचरणोदकम् ॥ १६ ॥ जग्राहचततोदृष्टःप्रपला
य्यगतःक्वचित् ॥ सर्वेदृष्ट्वामहाश्चर्य्यंसाधुसाध्वितिचाब्रुवन् ॥ १७ ॥ राजापिगर्दभंतंतुररक्षवाजिमंदिरे ॥ शुश्रूषायैदाससे
कंयोजयामासभूपतिः ॥ १८ ॥ रामराजातथैवाभूद्भक्तःश्रीकृष्णतुष्टये ॥ याचमानायप्रददौयद्यादिच्छतियाचकः ॥ १९ ॥
एकदारासलीलायांकश्चिदागत्यतंद्विजः ॥ रामराजाभिधंभूपंययाचेतस्यकन्यकाम् ॥ २० ॥ श्रुत्वातदासवर्गास्तंब्राह्मणंप्र

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तिचुक्रुधुः ॥ तान्निवर्त्यततोराजाब्राह्मणायददौसुताम् ॥२१॥ धनानिदत्त्वाबहुशोदासदासीगृहादिकम् ॥ चकारस्वसमंभूपोजामात
रमपेक्षणात् ॥ २२ ॥ अथापरोबभूवैकोरामराजातिभक्तिमान् ॥ एकदामथुरायांतुसमायातोनृपोत्तमः ॥ २३ ॥ सपत्नीकोधनंनी
त्वाकृत्वायात्रामशेषतः ॥ दत्त्वावित्तानिसर्वाणिऋणंकृत्वापुनर्ददौ ॥ २४ ॥ ऋणंदातुंततस्तस्यपत्नीस्वंकंकणद्वयम् ॥ ददौ
राज्ञेतिमुदिताकंकणंपरमाद्भुतम् ॥ २५ ॥ गृहीत्वारामराजासनाभादासकरद्वये ॥ परिधार्यागतोगेहेपत्नींप्राहातिहर्षितः ॥ २६ ॥
साश्रुत्वाहर्षितोवाचगेहाद्दास्यामितदृणम् ॥ अथप्रातर्गृहंगंतुंरामराजोऽव्यवस्थितः ॥ २७ ॥ सायंकालेतुसचिवःस्वरूपेणहरिःस्व
यम् ॥ रामराजकृतर्णंतुवैश्यायप्रददौतदा ॥ २८ ॥ रामराजापिकंचित्तंप्रेक्ष्यचोवाचतंविशम् ॥ प्रातर्यास्याम्यहंगेहेततोदास्यामि
तेधनम् ॥ २९ ॥ तदर्थमेकंकंचित्त्वंसहदेहिनिजंजनम् ॥ इतिश्रुत्वाततोवैश्यःसमुत्थायनृपांतिके ॥ ३० ॥ आगत्योवाचराजा
नंधनंप्राप्तंमयाविभो ॥ अद्यतेसचिवोगत्वादत्त्वाधनमशेषतः ॥ ३१ ॥ मद्गृहात्क्वचिदन्यत्रजगामपश्यतांनृणाम् ॥ सचिवस्तुततः
प्राहनाहंतत्रगतोनृप ॥ ३२ ॥ नददौवाधनंचास्मैकिंवदत्येषमत्तवत् ॥ इतिश्रुत्वावणिग्गत्वागृहेनीत्वाधनंसुतान् ॥ ३३ ॥ साक्षि
णस्तुसमादायदर्शयामासभूपतिम् ॥ राजादृष्ट्वाद्भुतंमेनेश्रीकृष्णस्यविचेष्टितम् ॥ ३४ ॥ वणिजेप्रददौभूरिधनंचपरितोषकम् ॥
एवंखेमालरतनोभक्तोभूदतिविश्रुतः ॥ ३५ ॥ समृत्युसमयेत्युच्चैरुरोदाथसुतोऽब्रवीत् ॥ किंकरिष्यामितद्ब्रूहिकरिष्येवचनंतव ॥
॥३६॥ इतिश्रुत्वाब्रवीत्पुत्रंखेमालरतनस्तथा ॥ स्वयमानीयकुंभेनजलंपुष्पादिकंतथा॥३७॥ नविष्णुःपूजितश्चित्तेसहयातिमनोरथः॥
इतिश्रुत्वातुतत्पौत्रःपितामहमुवाचतम् ॥३८॥ अहमेवकरिष्यामिसर्वथाहरिपूजनम्॥इतिश्रुत्वातुवचनंमूर्ध्न्याघ्रायातिहर्षितः ॥ ३९ ॥ ॥१७२॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

एवमेवं भजन्कृष्णंवयोगमयनान्यथा ॥ ततस्तस्यसुखंसर्वंभविष्यतिनचान्यथा ॥ ४० ॥ इतिश्रुत्वाकरोत्सर्वंपितामहवचःसवै ॥
एवंवंशेहरेर्भक्तिंस्थापयित्वादिवंगतः ॥ ४१ ॥ षेमालरतनोनाम्नामहाभागवतोत्तमः ॥ ततस्त्यक्त्वाशरीरंसमुक्तिंप्राप्तोनसंशयः॥४२॥
॥ इति श्रीभगवद्भक्तिमाहात्म्येरामराजादिचरितंनामाऽष्टाविंशत्यधिकशततमःसर्गः ॥ ॥ १२८ ॥ ॥ छ ॥ चतुर्भुजोबभूवै
कोभक्तःसर्वसुहृत्तमः ॥ गोस्वामीहरिवंशस्यशिष्यःपरमधार्मिकः ॥ १ ॥ एकदागोंडवानारदेशेम्लेच्छमयेगतः ॥ तत्रजीवब
लिंदृष्ट्वादेवीसन्निधिमागतः ॥ २ ॥ प्रसाद्यदेवींप्रोवाचमातर्जीवबलिंत्यज ॥ पायसान्नेनलोकानांवरदाभवचंडिके ॥ ३ ॥
इतिसंप्रार्थितादेवीनिशिस्वप्नंददौपुरे ॥ अद्यादिपायसान्नेनबलिंमेसंप्रयच्छभोः ॥ ४ ॥ चतुर्भुजोतिभक्तोमेतदुक्तंपूजनंकुरु ॥
नोचेत्सर्वान्हरिष्यामिसत्यमेतन्नसंशयः ॥ ५ ॥ इतिश्रुत्वाजनाःसर्वेचतुर्भुजमुपागताः ॥ श्रुत्वातन्मुखतःसर्वेजीवदानंचतत्यजुः ॥
॥ ६ ॥ एकदाकस्यचित्तस्यवैश्यस्यधनसंचयम् ॥ गृहीत्वाचौरआयातस्तत्पृष्ठानुगतोद्भुतम् ॥ ७ ॥ गृहीत्वातेनवैश्येनचौ
रोनीतोनृपांतिके ॥ तत्रराजसभायांसप्राहनैवंहृतंमया ॥ ८ ॥ दिव्यंदिनेतृतीयेचगृहाणेत्यब्रवीन्नृपः ॥ स्वीचकारसचौरो
पितस्मिन्नेवदिनेक्वचित् ॥ ९ ॥ पुराणेषुश्रुवेदीक्षाग्रहणेभक्तिपूर्वकैम् ॥ जन्मांतरेभवेन्नॄणांसत्यंसत्यंनसंशयः ॥ १० ॥
ततउत्थायचौरःसचतुर्भुजसमीपगः ॥ जग्राहवैष्णवींदीक्षांकृतकृत्योबभूवह ॥ ११ ॥ अथतृतीयेदिवसेदिव्यस्थानेधृतोगतः ॥ प्रति
ज्ञामकरोत्तत्रचौरःस्मृत्वागुरोःपदम् ॥ १२ ॥ नमयाचोरितंकिंचित्कस्यापीहतुजन्मनि ॥ इत्युक्त्वालोहमादायकरेसप्तपदींययौ ॥१३॥
ततस्तत्याजतल्लोहंखदिरांगारसन्निभम् ॥ दृष्ट्वाराजादयःसर्वेसाधुसाध्वितिवादिनः ॥ १४ ॥ राजाक्रुद्धोब्रवीद्वैश्यंदंडयानृतवादिनम् ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततोभृत्यास्तुतंनीत्वागताःकारागृहंप्रति ॥ १५ ॥ तदाचौरोपितन्मंत्रग्रहणाद्वैष्णवोभवत् ॥ आगत्यभूपतिंप्राहराजन्वैश्योतिधार्म्मिकः
॥१६॥ मयैवचोरितंवित्तंवैश्यस्यास्यनसंशयः॥ मयादिव्यंजितंयत्तुशृणुतत्कारणंनृप ॥१७॥ जन्मांतरंभवेद्दीक्षाग्रहणादितिमेश्रुतम् ॥
ततोदीक्षांगृहीत्वातुमयाल्लोहोधृतःकरे ॥१८॥ अत्रजन्मनिकस्यापिनकिंचिच्चौरितंमया ॥ इतिप्रतिज्ञयादीक्षाकालाज्जन्मांतरंत्विदम् ॥
॥१९॥ तस्माद्वैश्यंसमानीयत्यक्तुमर्हसिभूपते ॥ राजाचतुर्भुजंभक्तंसमानीयप्रपूज्यच ॥ २० ॥ मोचयामासतंवैश्यंसचोरोपिधनंददौ ॥
वैश्यायवैष्णवोभूत्वाचौर्य्यंतत्याजयत्नतः ॥ २१ ॥ राजाचतुर्भुजस्याथशिष्योभूत्वातिवैष्णवः ॥ यावज्जीवंहरिंस्मृत्वाजगामांतेहरेःपद
म् ॥ २२ ॥ चतुर्भुजस्यचणकक्षेत्रमेकादिनेपथि ॥ स्थितमागंतुकैर्भक्तैःलुठितंचाल्पशोषितम् ॥ २३ ॥ तद्रक्षकःसमागत्यप्रोवाचाथच
तुर्भुजम् ॥ समागत्यतुतान्सर्वान्सत्कृत्यपरयामुदा ॥२४ ॥ आनीयभोजयामासभत्सयत्रक्षकंमुहुः ॥ अथक्षेत्रेतुसर्वेभ्योऽधिकमन्नंबभूव
ह ॥ २५ ॥ एवंचालकनामाभूद्भक्तःसर्वसुहृत्तमः ॥ महाभक्तोजगन्नाथपूजायांनिरतःसदा ॥२६॥ यदृच्छालाभसंतुष्टःप्रतिग्रहविवर्जितः॥
एकदाविमलानंदःषट्पंचाशत्प्रकारकम् ॥ २७ ॥ भोज्यंगृहेजगन्नाथंध्यात्वाभक्त्यासमार्प्पयत् ॥ तस्मिन्नेवादिनेरात्रौराजास्वप्नंद
दर्शह ॥ २८ ॥ आगतोवैष्णवैःसार्धमेकोभक्तोत्तमोमहान् ॥ ततोनीलाचलेशस्तंभोजनायाब्रवीद्वचः ॥ २९ ॥ समहान्वैष्णवःप्रा
हविमलानंदमंदिरे ॥ सम्यग्भुक्तंमयाराजन्नेतैस्सहनसंशयः ॥ ३० ॥ अभून्नैवेदृशीतृप्तिःकदाचिदपिमेक्वचित् ॥ इत्युक्त्वासगतः
साधुर्महान्निजजनैःसह ॥ ३१ ॥ राजाप्रबुद्धस्तंस्वप्नंचिंतयन्प्रातरेवहि ॥ विमलानंदभवनंगत्वापप्रच्छतंपुनः ॥ ३२ ॥ पूर्वस्मिन्वा ॥१७३॥
सरेत्वन्किंत्वयाहरयेर्प्पितम् ॥ तद्वदेतिनिशम्याथविमलानंदआहतम् ॥ ३३ ॥ षट्पंचाशत्प्रकारंतुभोज्यमर्पितवानहम् ॥ इति

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रुत्वाततोराजाविमलानंदचेष्टितम् ॥३४॥ स्तुवन्नागतवान्गेहेतंमहांतममन्यत ॥ मदनमोहनभक्तोभूदिल्ल्यांसूरोऽतिभक्तिमान् ॥ ३५॥ दिल्लीश्वरनृपस्यासीदधिकारीमहानयम् ॥ कुर्वन्श्रीकृष्णभजनंराजकार्य्यंचकारसः ॥ ३६ ॥ दिल्लीश्वरोददौतस्मैकियद्देशाधिकारिताम् ॥ तत्रोत्पन्नंधनंराज्ञेदत्त्वायच्चावशेषितम् ॥ ३७ ॥ तत्साधुभ्योददौनित्यंहरिपूजापरायणः ॥ एकदासूरदासःसगुडंदृष्ट्वामनोरमम् ॥ ३८ ॥ तदैवशकटेकृत्वागुरवेऽपूपसिद्धये ॥ प्रेषयामासभक्त्यासमथुरायांमहामनाः ॥ ३९ ॥ निश्यागतंगुडंदृष्ट्वागुरुःशिष्यमुवाचह ॥ प्रातरस्यविधेयावैअपूपाहरयेशुभाः ॥ ४० ॥ इत्युक्त्वासस्वयंशिष्योददर्शस्वप्नमुत्तमम् ॥ स्वयमागत्यवदतिश्रीमन्मदनमोहनः ॥ ४१ ॥ अस्येदानींगुडस्यत्वंकृत्वापूपान्प्रयच्छमे ॥ इतिदृष्ट्वापिसुष्वापभ्रांतिरेवेतिचिंतयन् ॥ ४२ ॥ पुनर्ददर्शताहग्वैस्वप्नमुत्थाययत्नतः ॥ कृत्वापूपान्समर्प्याथहरयेवैष्णवैःसह ॥ ४३ ॥ भुक्त्वाप्रसादंबुभुजेततःसुष्वापनिर्भयः ॥ एकदासूरदासस्तुपद्यंचक्रेद्भुतार्थकम् ॥ ४४ ॥ साधोरुपानहौधृत्वातरिष्यामिभवार्णवम् ॥ इतिश्रुत्वातुकश्चिद्वैसाधुःसोपानदागतः ॥४५॥ मथुरायांसूरदासपरीक्षार्थंसधूर्तवत्॥ सूरदासोगुरुद्वारिस्थितस्तत्रगतःसवै ॥४६॥ उवाचसूरदासंभोप्रष्टुमिच्छामितेगुरुम् ॥ अहमितःप्रयास्यामिपश्योपानद्द्वयंमम ॥ ४७ ॥ नकाचिद्भीःसुखंगच्छेत्युक्तःसूरेणसोगमत् ॥ तत्रसूरगुरुंनत्वासूरदासःक्ववर्तते ॥ ४८ ॥ इत्युक्तेतेनधूर्तेनततोगुरुरथाह्वयत् ॥ सूरदासंततःसोपिगुरुसन्निधिमागतः ॥ ४९ ॥ तस्योपानद्द्वयंप्रोक्ष्यकृत्वाकरतलेमुदा ॥ गुरोममाद्यफलितस्त्वत्प्रसादान्मनोरथः ॥ ५० ॥ प्रार्थितोयस्तुगीतेनमयालब्धस्तुसोचिरात् ॥ इतिदृष्ट्वातदासोपियःपरीक्षार्थमागतः ॥ ५१ ॥ उत्थायपादयोस्तस्यनिपपातक्षमापयन् ॥ एकदासूरदासस्यगृहेराजधनंस्थितम् ॥ ५२ ॥ लक्षावधिददौ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्वंदुर्भिक्षसमयेमुदा ॥ साधुभ्योथनृपोभृत्यानानेतुंतद्धनंस्वकम् ॥ ५३ ॥ प्रेषयामासतेभृत्याःसूरदासांतिकंगताः ॥ ऊचुर्ध
नंप्रयच्छेतिश्रुत्वासूरोपितत्क्षणात् ॥ ५४ ॥ धनभांडंप्रस्तरादिकृत्वासंमुद्र्यतन्मुखम् ॥ ददौलिखित्वातत्पत्रंयथावत्कथया
म्यहम् ॥ ५५ ॥ राजन्लक्षावधिधनंममगेहेस्थितंतव ॥ दुर्भिक्षेसाधुभिर्भुक्तंभवद्भीत्यापलायितः ॥ ५६ ॥ अहंक्वचिन्निली
यास्मीत्येवंविज्ञापनामम ॥ इतिसंलिख्यपत्रंसप्रपलाय्यगतःक्वचित् ॥ ५७ ॥ दिल्लीश्वरोपितंदृष्ट्वाभांडंप्रस्तरपूरितम् ॥ पत्रंचतादृशं
दृष्ट्वाहसन्निदमुवाचह ॥ ५८ ॥ किंकुर्य्यांसाधुभिर्भुक्तंसाकिमर्थंपलायितः ॥ ततष्टोडलमल्लेनसूरदासोतियत्नतः ॥ ५९ ॥ ततोदिल्ली
श्वरंचोक्त्वाकारागारेनिवेशितः ॥ ततःसूरोहरेर्गीतंनिर्ममेभक्तिपूर्वकम् ॥ ६० ॥ आहतंभूपतिंस्वप्नेश्रीमन्मदनमोहनः ॥ मद्भक्तो
यंसूरदासःकारागारेधृतस्त्वया ॥ ६१ ॥ इदानींमुंचतंनोचेत्प्रातर्यास्यसिदुर्दशाम् ॥ इतिदृष्ट्वानृपःस्वप्नंसूरंतत्कालमानयत् ॥६२॥
क्षमापयन्धनंभूरिदत्त्वातत्राधिकारिताम् ॥ ददौससूरदासस्तुनजग्राहाधिकारिताम् ॥ ६३ ॥ वृंदावनंसमागत्यानिर्ममेगीतमुत्तमम् ॥
तत्राप्याश्चर्य्यमतुलंयस्मिन्नेवदिनेकृतम् ॥ ६४ ॥ तदैवचश्रुतंसर्वैर्गीतंक्रोशशतोपरि ॥ एवंभक्तिवशात्सूरदासोविख्यातिमान
भूत् ॥ ६५ ॥ वसन्वृंदावनेंतेसजगामहरिमंदिरम् ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येसूरदासचरितंनामैकोनत्रिंशदधिकशततमः
सर्गः ॥ १२९ ॥ ॥ छ ॥ एवंकात्यायनीदासोबभूवातीवभक्तिमान् ॥ यस्मिन्गायतिवृक्षादिवभूवस्पंदवर्जितम् ॥ १ ॥ एवंविलं
दाग्रामेतुभक्तोभूदतिविश्रुतः ॥ मुरारिनामानिर्दंभोवक्ष्याम्यस्यकथांशुभाम् ॥२॥ समुरारिर्महाभक्तोबभूवराजपूजितः ॥ ग्रामेसर्वैर्वंद्य
मानोनिःसंगोलोभवर्जितः ॥ ३ ॥ स्वग्रामेचैकदास्नात्वासमागच्छन्निजालयम् ॥ मार्गेकोपिगृहेभक्तःतुलसीतरुसन्निधौ ॥ ४॥ पूजयि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्वाहरिंतस्माद्दाजुहावसवैष्णवम् ॥ अहोकोप्यत्रभक्तोस्तिगृह्णातुचरणोदकम् ॥ ५ ॥ इतिश्रुत्वावचस्तस्यमुरारिस्तद्गृहंययौ ॥ दद
र्शतुलसींतत्रशालग्रामशिलार्चनम् ॥ ६ ॥ हृष्टस्तमाहदेहीतिश्रुत्वाभीतःसपूजकः ॥ नाथाहंचर्म्मकारोस्मिक्षम्यतांममदुर्नयम् ॥
॥ ७ ॥ इत्युक्तवंतंतंप्राहमुरारिःप्रहसन्निव ॥ माभैस्त्वंसाधुःभक्तोसिभक्तिरस्तुतवाच्युते ॥८॥ अतोमेत्वंचतातोसिदेहिमेचरणोदकम् ॥
इत्येवमाग्रहंकृत्वापीत्वातच्चरणोदकम् ॥ ९ ॥ जगामस्वगृहंहृष्टोमुरारिर्लोकपूजितः ॥ अथग्रामजनाःश्रुत्वातत्संसर्गंचतत्यजुः
॥ १० ॥ राजापिचसमागत्यमुरारिंगुरुमब्रवीत् ॥ किमिदंश्रूयतेनाथतत्रपादोदकग्रहः ॥ ११ ॥ सत्यंभोचर्म्मकारेणसमाहूतोगतः
स्वयम् ॥ तत्कराद्गलतोनीत्वार्पितंतच्चरणोदकम् ॥ १२ ॥ इतिश्रुत्वाथराजापिविमनास्ततउत्थितः ॥ जगामस्वगृहंतस्यप
रित्यागेनदुःखितः ॥ १३ ॥ एवंज्ञात्वामुरारिस्तंतंग्रामंपरिहायसः ॥ अन्यत्रोवासहृष्टात्माहरिकीर्तनतत्परः ॥ १४ ॥
श्रीरामनवमींप्राप्यमहोत्साहंचिकीर्षतः ॥ राज्ञःस्वप्नोबभूवाथरात्रावाश्चर्य्यकारकः ॥ १५ ॥ तंमुरारिंविनापूजांममाकुरुभूप
ते ॥ करिष्यसिविनातंचेदकल्याणंभविष्यति ॥ १६ ॥ एवंकोपिवदत्येत्यवैष्णवःक्रोधसंयुतः ॥ दृष्ट्वास्वप्नमिमंराजाप्रातरुत्था
यचिंतितः ॥ १७ ॥ आहूयोवाचतंस्वप्नंसचिवादींस्ततःस्वयम् ॥ मुरारिसन्निधौगत्वाप्रार्थयामासभक्तितः ॥ १८ ॥ क्षंतव्य
मितिमूर्खस्यदुष्टस्याचरितंगुरो ॥ इतिश्रुत्वामुरारिस्तुनददर्शचतन्मुखम् ॥ १९ ॥ येभक्तिविमुखास्तेषांनाहंपश्यामिचाननम् ॥
इतिश्रुत्वाततोराजाबद्धांजलिरुवाचतम् ॥ २० ॥ त्वमेवशिक्षकोमेसिकथमेतावतीकृपा ॥ नकृतामयिपापिष्ठेकथंप्रज्ञामवाप्नुया
म् ॥ २१ ॥ यथासंताडितोयातिपशुःपथिनिरंतरम् ॥ नतथासत्कृतःप्रेम्णावाण्याचापितिरस्कृतः ॥ २२ ॥ इतिश्रुत्वाप्रसन्नो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भून्मुरारिःसमुपागतः ॥ राज्ञासहनिजंग्रामंविलंदारुयंमनोरमम् ॥ २३ ॥ तत्रश्रीरामनवमीदिनेकृत्वामहोत्सवम् ॥ मुरा
रिस्तुस्वयंनृत्यञ्जगौरामायणंमुदा ॥ २४ ॥ श्रीरामवनवासस्यकथायातायदातदा ॥ मुरारिस्तुतदाऽव्यग्रचित्तोनृत्यञ्जगौक
थाम् ॥ २५ ॥ गतेरामेमुमूर्च्छाथश्रीमान्दशरथोनृपः ॥ इत्युक्तातुकथांसोपिमुरारिर्मूर्च्छितोभवत् ॥ २६ ॥ पुनरुत्थायहारा
महारामजनकात्मजे ॥ अनुकुर्वन्दशरथंमुरारिर्विजहावसून् ॥ २७ ॥ पश्यतांसर्वलोकानांतदद्भुतमिवाभवत् ॥ अथराजारुदन्नेत्य
समुत्थापितवान्गुरुम् ॥ २८ ॥ नोत्तस्थौसमृतोयस्मात्ततःसर्वेतिदुःखिताः ॥ संचस्करुर्मुरारेस्तुदेहंविधिवदुज्वलम् ॥ २९ ॥
एवंभक्तेस्तुमाहात्म्यंकोज्ञातुंक्षमतेबुधः ॥ यथाकथंचिद्भक्तिश्चेन्नृणांसंसारतारिणी ॥ ३० ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्ये
मुरारिदासचरितंनामत्रिंशदधिकशततमःसर्गः ॥ १३० ॥ तुलसीदासचरितंवक्ष्यामिपरमाद्भुतम् ॥ यस्यश्रवणमात्रेणकृतकृत्यो
भवेन्नरः ॥ १ ॥ गंगायमुनायोर्मध्येदेशःपुण्यतमोमहान् ॥ अंतर्वेदइतिख्यातोमुनिभिःपरिसेवितः ॥ २ ॥ तत्रैकोस्ततरीनाम्नाग्रामो
ब्राह्मणसंकुलः ॥ तत्रासीत्तुलसीनाम्नाशुक्लइत्युपनामकः ॥ ३ ॥ कारयित्वातद्विवाहंपितातस्यदिवंगतः ॥ माताप्यनुययौतस्य
स्वपतिंसत्यतत्परा ॥ ४ ॥ अथसतुलसीनामास्वपत्न्यासहनित्यशः ॥ रेमेपितृधनंप्राप्यदानभोगसमन्वितः ॥ ५ ॥ काले
नतस्यपुत्रोभूद्दृष्ट्वातंचातिहर्षितौ ॥ तुलसीतस्यपत्नीचेत्युभौपूर्णमनोरथौ ॥ ६ ॥ एकदातस्यपत्नीतुसमीपेमातृमंदिरे ॥ तमनुक्त्वा
गताचाथसोप्यदृष्ट्वागृहेचताम् ॥ ७ ॥ ययौतदैवश्वशुरगेहेपत्नींददर्शह ॥ दृष्ट्वातमागतंपत्नीभर्त्सयंतीवचोब्रवीत् ॥ ८ ॥ किमर्थ
मागतोस्यत्रनगेहेस्थातुमिच्छसि ॥ इत्युक्तःप्राहतांपत्नींप्रहसन्तुलसीद्विजः ॥ ९ ॥ त्वयाविनावरारोहेमंदिरंविपिनायते ॥ स्थातुं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शक्नोमिनैवातस्त्वामदृष्ट्वाकथंचन ॥ १० ॥ इत्युक्ताप्राहतत्पत्नीसक्रोधेनपतिंपुनः ॥ किमर्थंभाषसेऽव्यर्थंगच्छस्वभवनंप्रति ॥ ११ ॥
अस्थिचर्म्ममयेचास्मिन्ममदेहेस्तियादृशी ॥ प्रीतिःसायदिरामेस्यात्तदाधन्योभविष्यसि ॥ १२ ॥ श्रुत्वैतद्वचनंतस्याःपत्न्याःसतुलसी
द्विजः॥ तदैवोत्थायचलितोज्ञात्वापत्नींहितैषिणीम्॥ १३॥ दृष्ट्वातंचलितंपत्नीपुनःप्राहपतिंप्रति ॥ अतःक्रोधंचत्यक्त्वाद्भुक्त्वागच्छ
मंदिरम् ॥ १४ ॥ अहंचापिगमिष्यामित्वयासहनसंशयः ॥ इतिश्रुत्वातुतद्वाक्यंप्राहसतुलसीद्विजः ॥ १५ ॥ अतःपरंनवक्तव्यंत्वया
किमपिमत्कृते ॥ कोभोक्ष्यतिपतिःक्वासौकःस्थास्यतिगमिष्यति ॥ १६ ॥ गृहंकस्यैतिसर्वंमेविस्मृतंत्वदनुग्रहात् ॥ धन्यासित्वंम
यिस्नेहवतीचासिनसंशयः ॥ १७ ॥ यत्त्वयागुरुणेवाहमुद्धृतोभवसागरात् ॥ इत्युक्त्वातुलसीविप्रस्तत्कालंप्रस्थितोभवत् ॥ १८ ॥
पत्नीचाप्यतिसंदिग्धारुदंतीकियदन्वगात् ॥ तत्रगत्वाददर्शाथसीतारामौमुदान्वितः ॥ १९ ॥ तीर्थोपवासविधिनासुष्वापसरयू
तटे ॥ किंजपन्निहमुक्तःस्यामितिचिंतापरोभवत् ॥ २० ॥ तदासदृष्टवान्स्वप्नेपितरंभक्तरूपिणम् ॥ वदंतंवत्सरामेतिमंत्रंज
पनिरंतरम् ॥ २१ ॥ एतन्मंत्रसमोनास्तिमंत्रस्तुभुवनत्रये ॥ इमंजपंतिदेवाश्चगंधर्वोरगकिन्नराः ॥ २२ ॥ यस्योच्चारणमात्रेणपाप
राशिःप्रलीयते ॥ भवंतिकृतकृत्यावैमनुष्यानात्रसंशयः ॥ २३ ॥ रामनामसमंवत्सनास्तिकिंचिज्जगत्रये ॥ चतुर्वर्गप्रदंनॄणांसत्यंस
त्यंवदाम्यहम् ॥ २४ ॥ जपोहोमस्तथाध्यानंदानंतीर्थनिषेवणम् ॥ जानीहिसर्वसिद्धांतंरामनामसमंनहि ॥ २५ ॥ तस्मादिदंराम
नामगृहीत्वामंत्रमुत्तमम् ॥ यावदायुःसुखीभूत्वाव्रजांतेरामसन्निधिम् ॥ २६ ॥ किंचप्रातस्तवाकस्मात्सरयूतीरवर्तिनः ॥
सन्निधावेत्यतुलसीमालांस्यतिवैष्णवः ॥ २७ ॥ अथैवंस्वप्नमालोक्यप्रबुद्धस्तुलसीद्विजः ॥ परमानंदमग्नःसजजापतंमनुंहृदि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ २८ ॥ प्रातरुत्थायसुस्नातःसीतारामौनिरीक्ष्यच ॥ आसीनःसरयूतीरेतत्रयातिचवैष्णवः ॥ २९ ॥ मालांगृहीत्वातुलसी
दासायप्रददौसतु ॥ जग्राहतांतुमालांसरात्रिस्वप्नमनुस्मरन् ॥ ३० ॥ एवंमालांचमंत्रंचसंप्राप्यसोतिहर्षितः ॥ एकचित्तोजपं
स्तत्रतस्थौभक्तिसमन्वितः ॥ ३१ ॥ ततःकाशींसमागत्यअसीनद्याउदग्दिशि ॥ हनुमद्दक्षिणेकृत्वाकुटींतत्रावसत्सुखम् ॥
॥ ३२ ॥ रामनामजपासक्तोरामायणपरायणः ॥ भुंजानःपरमप्रीत्यायथालब्धमयाचितम् ॥ ३३ ॥ यत्ररामकथाकाश्यांगत्वात
त्रातिसादरम् ॥ शुश्रावसततंनित्यंलोभमोहविवर्जितः ॥ ३४ ॥ अथैवंवसतस्तस्यश्रीरामस्यकृपाह्यभूत् ॥ संस्कृतं
प्राकृतंचैवकाव्यंचक्रेमनोहरम् ॥ ३५ ॥ एकदानिशिसस्वप्नंददर्शपरमाद्भुतम् ॥ ध्यायमानोराममूर्तिंसमागत्याब्रवीदिदम् ॥
॥ ३६ ॥ शृणुष्वतुलसीभक्तत्वयितुष्टोस्म्यसंशयम् ॥ ततोवक्ष्यामिजगतांहितंतवविशेषतः ॥ ३७ ॥ कुरुरामायणंसर्वं
भाषयात्वंमदाज्ञया ॥ त्वंमयोद्धृतएवासिलोकेस्यादुपकारकम् ॥ ३८ ॥ कलौमूर्खाभविष्यंतिनज्ञास्यंतिचसंस्कृतम् ॥ तेषां
हितमिदंलोकेभविष्यतिनसंशयः ॥ ३९ ॥ येगास्यंतितवप्रोक्तंरामायणमनुत्तमम् ॥ तेममातिप्रियानित्यंतेभ्योदास्याम्यभी
प्सितम् ॥ ४० ॥ एवंदृष्ट्वातुतुलसीदासःस्वप्नंसमुत्थितः ॥ कृतकृत्यमथात्मानंमेनेसभक्तसत्तमः ॥ ४१ ॥ गणेशादीन्नमस्कृत्यप्रा
रेभेभक्तिपूर्वकम् ॥ कुर्वन्नहर्निशंभक्त्यासंपूर्णमकरोन्मुदा ॥ ४२ ॥ दृष्ट्वातंनिर्मितंसर्वेस्तुत्वासंजहृषुर्बुधाः ॥ देशेदेशांतरेख्यातम
भूद्धात्रापिपूजितम् ॥ ४३ ॥ एकदायदभूत्तस्यमाहात्म्यंतद्वदाम्यहम् ॥ तस्यैवंनियमःकाश्यांचक्रेशौचंनकुत्रचित् ॥ ४४ ॥ असी
नदीदक्षिणतीरमेत्यससर्वदामूत्रपुरीषयोश्च ॥ कृत्वाविसर्गंपुनरेत्यमंदिरेचकारचावश्यकमाह्निकंमुदा ॥ ४५ ॥ अथास्यदक्षेक्वचि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दाम्रवृक्षेशौचावशेषंजलमाक्षिपत्तदा ॥ पीत्वाप्रसन्नोभवदाहकश्चिन्माध्यागिरावैतुलसींपरेतः ॥ अहोतवैतज्जलदानतोहंप्रीतोददे
स्वाभिमतंवदत्वम् ॥ ४६ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येतुलसीदासचरितंनामैकत्रिंशदधिकशततमःसर्गः ॥ १३१ ॥
॥ इत्युक्तस्तुलसीदासःप्रेतंप्राहातिनिर्भयः ॥ कस्त्वंकथमिमांयोनिंसंप्राप्यात्रविषीदसि ॥ १ ॥ इतिश्रुत्वाब्रवीत्प्रेतःसाधोमच्चरितं
शृणु ॥ आसंपूर्वमहंविप्रोविंध्येराजपुरोहितः ॥ २ ॥ लुब्धःसत्कर्मरहितःसाधुविद्वेषकारकः ॥ परनिंदारतोनित्यंविद्वद्ब्राह्मणकं
टकः ॥ ३ ॥ राज्ञादत्तंद्विजातिभ्योयद्धनंचतदर्धकम् ॥ तोकंदत्त्वाद्विजातिभ्यःसर्वंरक्षितवानहम् ॥ ४ ॥ एवंमयावयोनीतंनदत्तं
किमपिस्वयम् ॥ नसत्कृतंनोपकृतंमनोवाक्कायकर्मभिः ॥ ५ ॥ एकस्मिन्दिवसेद्वारिसमायातःपिपासितः ॥ तस्मैक्रोधेनमहताकिं
चिद्दत्तंजलंमया॥६॥एवंतत्कर्मणाचात्रजलेनतदुपस्थितम्॥ इति श्रुत्वा तु तुलसीदासःपप्रच्छतंपुनः॥कथमत्रागमोथेतिश्रुत्वासोप्यब्रवी
त्पुनः ॥ ७ ॥ एकदामम्देशीयोराजाकाशीमुपागतः ॥ तेनसाकमहंलोभादिहायातोथदैवतः ॥ ८ ॥ सर्पदंष्टोमृतश्चाहंततोमां
यमकिंकराः ॥ नेतुमागतवंतस्तानेवमुक्त्वान्यवारयत् ॥ ९ ॥ भीमोविनायकोदेवोनायंनरकमर्हति ॥ अनिच्छयापियत्काशीयात्रायां
मृत्युमाप्तवान् ॥१०॥ अतएवमहापापीक्षुत्पिपासार्दितःसदा ॥ भुंजानोनगराद्बाह्येकालभैरवयातनाम् ॥ ११ ॥ रामभक्तस्यविप्रस्यपी
त्वाशौचावशेषतः ॥ जलंकाशींसमासाद्यमुक्तोभवितुमर्हसि ॥ १२ ॥ इत्येतत्कथितंसर्वंसाधोह्याचरितंमया ॥ त्वंयदिच्छसितद्ब्रू
हिदत्त्वायास्यामिसद्गतिम् ॥ १३ ॥ श्रुत्वैवंतुलसीदासस्तमुवाचातिहर्षितः ॥ रामंदर्शयमेब्रह्मन्परिवारसमन्वितम् ॥ १४ ॥
इतिश्रुत्वाब्रवीत्प्रेतोनशक्यंतन्ममास्तिभोः ॥ किंतूपायंप्रवक्ष्यामियथाद्रक्ष्यसिराघवम् ॥ १५ ॥ हनुमन्निकटेश्रीमद्रामायणकथा
श्रवे ॥ नित्यमायातिपूर्वंयोयातिपश्चात्तुसर्वदा ॥ १६ ॥ कुष्ठरोगातुरोदीनोदुर्दर्शःसाधुरूपधृक् ॥ हनुमंतंविजानीहितमेवभक्तस

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्तमम् ॥ १७ ॥ यदातुससमुत्थायव्रजेत्त्वंतमनुव्रज ॥ गत्वैकांतेनिपत्याथपादौधृत्वाप्रसादय ॥ १८ ॥ अथप्रसन्नोहनुमांस्त्वांवदि
ष्यतियद्वचः ॥ तदेवसत्यंजानीहिभक्तराजनमोस्तुते ॥ १९ ॥ इत्युक्त्वासचप्रेतस्तुकाशींगत्वाथतारकम् ॥ मंत्रंगृहीत्वामुक्तोभू
द्विश्वेश्वरकृपावशात् ॥२०॥ अथोसतुलसीदासःस्नात्वासंपूज्यराघवम् ॥ हनुमन्निकटेपूर्वंसचासीद्गतवान्मुदा ॥२१॥ जानेहंत्वांनसंदे
होब्रह्मराक्षसवाक्यतः॥कुरुप्रसादंदेवेशहनुमन्भक्तवत्सल॥२२॥इत्युक्तोहनुमानाहकिमिच्छसिवदस्वतत्॥ततस्तुतुलसीदासःप्राहतंपा
दयोःपतन् ॥२३॥ रामःसपरिवारोमेदृक्पथःस्यात्कदाविभुः ॥श्रुत्वैतन्मारुतिःप्राहचित्रकूटंचत्वंव्रजेः॥ २४ ॥ तत्रगत्वाभवद्धेतुःसेत्स्य
तितीवदन्मुदा ॥ मुहुःप्रणम्यतंतत्रननर्तानंदविह्वलः ॥ हनुमान्प्रययौतस्माद्देषोपिस्वगृहंगतः ॥२५॥प्रार्थयंस्तद्दिनंनित्यंचित्रकूटंययौ
मुदा॥एकस्मिन्दिवसेतत्रददर्शाद्भुतमुत्तमम् ॥२६॥तत्रपौरजनाएत्यरामलीलांप्रकुर्वते ॥तत्रापिजित्वापौलस्त्यंपुष्पकोपरिसंस्थितः॥
॥ २७ ॥ सीतयालक्ष्मणेनापिभ्रात्राजांबवतायुतः ॥ विभीषणेनसुग्रीवहनुमत्प्रमुखैर्वृतः ॥ २८ ॥ गुहाश्रमादयोध्यायांगच्छन्हृष्टस्तुते
नत्रै ॥ एवंदृष्ट्वारामलीलांमोहितोभून्महामनाः ॥ २९ ॥ रामलीलेतितुलसीदासोजानन्समागतः ॥ किय‌द्दूरेततस्तत्रहनुमान्साधुवेषधृ
क् ॥ ३० ॥ ॥ मिलितस्तंतुतुलसीदासोहृष्टवदब्रवीत् ॥ अहोपूर्वंरामलीलांदृष्ट्वेदानीमिहागतः ॥ ३१ ॥ चित्रकूटसमीपेतुगत्वातं
द्रष्टुमर्हसि ॥इतिश्रुत्वातुहनुमान्संप्राहप्रहसन्निव ॥ ३२ ॥ अहोक्वसाश्विनेमासिरामलीलाप्रजायते ॥ किमिदंभाषसेसाधोभ्रांतिमानिव
सर्वथा ॥ ३३ ॥ इतिश्रुत्वातुतुलसीदासस्तेनसमाययौ ॥ चित्रकूटंपुनस्तत्रसर्वंपृच्छतिसादरम् ॥ ३४ ॥ इदानींरामलीलात्रस्थिताः
साधुगताजनाः ॥ इतिश्रुत्वातुवचनंसस्मारोक्तंहनूमतः ॥ ३५ ॥ अहोरामेणप्रभुणावंचितोहंदुराशयः ॥ यत्तदामोहयामासमाययामम

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मानसम् ॥ ३६ ॥ तदालीलेतिमेबुद्धिरभवद्भ्रांतिशालिनी ॥ इत्युक्त्वाप्ररुरोदोच्चैस्तत्रत्यैर्निश्चितंतदा ॥ ३७ ॥ विक्षितोयंबभूवात्रम
त्वासवैंस्तिरस्कृतः ॥ समागत्यनिजेगेहेभक्तंर्यन्निजमानसम् ॥ ३८ ॥ त्यक्ताहारोनिशायांसमुष्वापातिविमोहितः ॥ ददर्शतंहनूमंतं
यथाद्राक्षीद्विमानगम् ॥ ३९ ॥ अहोभाग्यंतवैवैतन्नान्यस्यजगतीतले ॥ कस्यचिज्जायतेचैवंदर्शनंसुरदुर्लभम् ॥ ४० ॥ तस्माद्विवतांप
रित्यज्यभजतंरघुनंदनम् ॥ ज्ञानपूर्वंहिसाक्षात्तंद्रष्टुमर्हतिकःक्षितौ ॥ ४१ ॥ धनुर्बाणधरंश्यामंजटावल्कलमंडितम् ॥ जानकीलक्ष्मणा
भ्यांचसेवितंरामदक्षयोः ॥४२॥ सुग्रीवोपासनंकिंचिद्वदंतंसस्मिताननम् ॥ हृष्टाग्रस्थंतुभरतंपादुकेदधतंस्वके ॥ ४३ ॥ मुंचंतंहर्षजंवा
रिनेत्राभ्यांप्रेमाविह्वलम् ॥ कृतांजलिपुटंशांतमानंदैकदृशंमुदा ॥४४॥ पश्यंतंहनुमंतंतंविभीषणपुरःस्थितम् ॥ अयोध्यांद्रष्टुकामैस्तैर्वा
नरैःपरितोवृतम् ॥४५॥ स्तूयमानंसुरगणैर्वर्षद्भिःकुसुमान्यलम् ॥ इत्येवंसंस्मरन्नित्यंशृण्वन्रामायणंमुदा ॥ उवासकृतकृत्यःसकाश्यां
विश्वेश्वराज्ञया ॥ ४६ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येतुलसीदासचरितंनामद्वात्रिंशदधिकशततमःसर्गः ॥ १३२ ॥ ॥ एकदातुद्विजः
कश्चिदायातोद्वारिसंस्थितः ॥ ब्रह्महत्यायुतोहत्याचिह्नंचापिसमुद्वहन् ॥ १ ॥ मध्याह्नेतुलसीदासमाजुहावबुभुक्षितः ॥ अहोगतासाहत्या
तेसीतारामेतिभाषणात् ॥ २ ॥ ततस्त्यजेदंहत्यायालक्षणंचातिगर्हितम् ॥ स्नात्वाजह्नुसुतायांत्वंशीघ्रमागच्छमद्गृहे ॥ ३ ॥ त्वया
सहाहंभोक्ष्यामिनिष्पापस्त्वंनसंशयः ॥ इत्युक्तःसद्विजोगंगास्नानंकृत्वासमागतः ॥ ४ ॥ पुनस्तमाहतुलसीसीतारामंवदत्रिधा ॥
ततःसमीलिताक्षःसन्सीतारामेत्युवाचसः ॥५॥ त्रिधाशनैःशनैर्हृष्टस्ततस्तंप्रेमपूर्वकम् ॥ करेधृत्वागृहेगत्वासहतेनातिहर्षितः ॥ ६ ॥
बुभुजेतुलसीदासःस्वगेहेपश्यतांनृणाम् ॥ एवमस्यतुवृत्तांतंशुश्रुवुःपुरवासिनः ॥ ७ ॥ आगत्यपंडिताविप्रास्तमूचुःकिंकृतंत्वया ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ब्रह्महत्याकृतासाकंभुक्तवानस्तियद्भवान् ॥८॥ अतोनयैनंभवतःस्पर्शंकुर्य्यान्नकर्हिचित् ॥ इतिश्रुत्वावचस्तेषामुवाचप्रहसन्निव॥९॥
परीक्ष्यतामयंविप्रःसर्वैर्विश्वेश्वरांतिके ॥ इतिश्रुत्वाब्रवीत्कश्चिदेतद्धस्तात्तुगौर्यदि ॥ १० ॥ ग्रासंभुंजीतमुदितानिष्पापोयंतदाद्विजः ॥
इतिश्रुत्वातुतुलसीदासश्चातीवहर्षितः ॥११॥ सत्यमेतन्नसंदेहःकिंचान्यच्छृणुमेवचः ॥ गवांग्रासंभक्षयित्वानंदिनंभक्षयाम्यहम्॥१२॥
रामेत्युच्चारणादेवयदिपूतोभवेद्द्विजः ॥ इतिश्रुत्वातुतेसर्वेविश्वेशांतिकमागताः ॥ १३ ॥ नीत्वातुतुलसीदासोब्राह्मणंसमुपागतः ॥
तत्रब्राह्मणहस्तेनघासंपूर्वंगवेददौ ॥१४॥ मुदिताबुभुजेसागौर्घासंसर्वंततस्तुसः ॥ स्थाल्यामन्नंनिधायाथद्विजहस्तेददौस्वयम्॥१५॥
उवाचनंदिनंविप्रोभोजयित्वातुभक्तितः ॥ स्वयंतुधावतत्रैवनंदिनंपरमादरात् ॥ १६ ॥ यद्येषब्रह्महत्यावान्सीतारामेतिभाषणात् ॥
निष्पापोभूत्तदास्यत्वंहस्तेनान्नंतुभक्षय ॥ १७ ॥ इत्युक्तःसतुनंदीवैपाषाणस्याद्भुताकृतिः ॥ अधःकृत्वामुखंपात्रेयोजयन्बुभुजेमु
दा ॥ १८ ॥ पश्यतांसर्वलोकानांतदद्भुतमिवाभवत् ॥ सर्वंतद्बुभुजेचान्नंजयशब्दोमहानभूत् ॥ १९ ॥ ततस्तेपंडिताःसर्वेदृष्ट्वात
त्परमाद्भुतम्॥साधुसाध्वितितुलसीदासंतुष्टुवुरादरात्॥२०॥ विप्रोपिनाममाहात्म्यंज्ञात्वातज्जपतत्परः॥बभूववैष्णवश्रेष्ठस्त्यक्तसर्वमनो
रथः ॥ २१ ॥ एकदाकोपितद्गेहेचौरएकःसमागतः ॥ निशिचोरयितुंभित्त्वावेश्ममध्येजगामसः ॥ २२ ॥ ददर्शपुरुषंतत्रश्यामंक
मललोचनम् ॥ धनुर्बाणधरंगेहेजाग्रतंतुमनोहरम् ॥ २३ ॥ तंदृष्ट्वातस्करःशीघ्रंनिर्ययौगृहतोबहिः ॥ निशिस्थित्वाकियत्कालंपुनरा
गत्यपश्यति ॥ २४ ॥ दृष्ट्वातंजाग्रतंगेहेपुनस्तस्मात्पलायितः ॥ एवंगतानिशासर्वाचौरोपिस्वगृहंगतः ॥ २५ ॥ एवंदिनद्वयेजाते
तस्करःपुनरेत्यसः ॥ दृष्ट्वातंजाग्रतंचित्तेमहाश्चर्यममन्यत ॥ २६ ॥ ततश्चौरःसमायातस्तुलसीदाससन्निधौ ॥ त्वद्गृहेयोवनश्या

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मोधनुर्बाणधरःपुमान् ॥ २७ ॥ तंदर्शयमहाभक्तंपुरुषंसर्वभूषणम् ॥ तद्दर्शनमृतेसाधोनकरिष्यामिकिंचन ॥ २८ ॥ श्रुत्वेदंतुलसीदासःप्राहहृष्टःकदात्वया ॥ मद्गेहेपुरुषस्तादृक्तंवदाशुयथार्थतः ॥२९॥ श्रुत्वासतुलसीदासवाक्यंचौरोब्रवीत्तुतम् ॥ तस्करोहंतवगृहेग्रहीतुंधनमागतः ॥ ३० ॥ तत्रगेहेत्वपश्यंतंजाग्रतंसुमनोहरम् ॥ धनुर्बाणधरंश्यामंततोहंप्रपलायितः ॥ ३१ ॥ एवंदिनद्वयेजातेपुनरागतवानहम् ॥ दृष्ट्वातंजाग्रतंभीत्याप्रपलाय्यगतोगृहम् ॥ ३२ ॥ परंतुदृष्ट्वातद्रूपंपरमानंदकारकम् ॥ ततोदर्शयतंसाधोतदर्थमहमागतः ॥ ३३ ॥ श्रुत्वैवतुलसीदासोज्ञात्वारामकृपांस्वयम् ॥ धनंस्वस्यंददौसर्वंब्राह्मणाययदृच्छया ॥ ३४ ॥ तावद्गृहाणनिःशंकइत्युक्त्वाप्रददौधनम् ॥ सचौरोनैवजग्राहतद्धनंभक्तिमानभूत् ॥ ३५ ॥ तुलसीदासशिष्योभूत्सीतारामौभजन्मुदा ॥ परित्यज्यनिजांवृत्तिंसाधुसेवापरायणः ॥३६॥ गुरुभक्तिरतोनित्यंबभूवातीववैष्णवः ॥ सदासाधुगणासेवीपरमेरमतेसदा ॥ ३७॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येतुलसीदासचरितंनामत्रयस्त्रिंशदधिकशततमःसर्गः ॥ १३३ ॥ ॥ छ ॥ एकदाकोपितत्रैवकाश्यांविप्रोमृतोयुवा ॥ तेनसाकंतुतत्पत्नीप्रवेष्टुंचलितानलम् ॥ १ ॥ मार्गेददर्शतुलसीदासंसाप्रणनामह ॥ तस्यैसोप्याशिषंप्रादाद्भवसौभाग्यशालिनी ॥२॥ ततःसाऽधोमुखीतस्थौतस्यावंधुजनाःपुनः ॥ ऊचुस्तेतुलसीदासमद्येयंविधवाह्यभूत् ॥ ३ ॥ सहगंतुमिहायातासत्यंतस्माद्भवद्वचः ॥ कथंफलिष्यतित्वस्यामुप्तंबीजमिवोषरे ॥४॥ इतिश्रुत्वातुतुलसीदासस्तेषांवचस्स्वयम् ॥ स्नात्वागच्छन्गृहेतस्मान्मार्गादेवन्यवर्तत ॥५॥ गत्वागंगातटेतस्माद्भर्तुःशवसमीपतः ॥वस्त्रेणाच्छाद्यतंप्रेतंस्वयंतत्रोपविष्टवान् ॥६॥ सीतारामौजपंश्चित्तेतद्रूपंहृदिचिंतयन् ॥ प्रार्थयामासविप्रस्यजीवनंरघुनंदनात् ॥ ७ ॥ याममेकंहृदिभजञ्छ्रीरामंभक्तवत्सलम् ॥ तस्थौतदातंश्रीरामोजीवयामासवैद्विजम् ॥ ८ ॥ अथोत्थाय

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सविप्रस्तुकिंजातमितिचाब्रवीत् ॥ आत्मीयास्तेपितंप्राहुरेषतेप्राणदःपिता ॥ ९ ॥ त्वांमृतंजीवयामासपश्यतांसर्वदेहिनाम् ॥ इति श्रुत्वातुतुलसीदासंदंडवदानमत् ॥ १० ॥ सोपितस्मात्समुत्थायस्नात्वागंगाजलेक्वचित् ॥ ययौस्ववेश्मतुलसीदासोरामंहृदिस्मरन् ॥ ११ ॥ सोपिविप्रस्तयापत्न्यासाकंबंधुसमन्वितः ॥ आजगामगृहेतस्थौसुखेनकतिवत्सरान् ॥ १२ ॥ एवंप्रभावस्तुलसीदासोभक्तवत्सलः ॥ नज्ञातवान्किमप्यन्यच्छ्रीरामचरणांबुजात् ॥ १३ ॥ तस्यप्रभावंश्रुत्वैवंदिल्लीशोद्रष्टुमानसः ॥ सत्कारेणसमानिन्येस्वगृहेसंस्कृतस्थले ॥ १४ ॥ सतंतत्रागतंज्ञात्वास्वयमागत्यभूपतिः ॥ प्रणम्यस्वासनादग्रे दिल्लीशश्चोपवेशयत् ॥ १५ ॥ अथतंतुलसीदासंभूपतिःप्राहधूर्तवत् ॥ श्रूयतेतवसामर्थ्यमलौकिकमिहास्तिभोः ॥ १६ ॥ तद्दर्शयचमत्कारंकंचिदथमहामते ॥ इतिश्रुत्वासतुलसीदासस्तंप्राहसस्मितम् ॥ १७ ॥ नमेसामर्थ्यमस्तीहनचमत्कारवानहम् ॥ राममेकंतुजानामिसत्यमेतद्ब्रवीमिते ॥ १८ ॥ इतितस्यवचःश्रुत्वादिल्लीशश्चातिकोपनः ॥ भृत्यानुवाचनीत्वेमंनिरुध्यस्थापयक्वचित् ॥ १९ ॥ यावदेतस्यरामोमेचमत्कारंनदर्शयेत् ॥ तावन्नायंबहिःकार्य्योभवद्भिर्ममशासनात् ॥ २० ॥ ततःसतुलसीदासोसस्माररघुनंदनम् ॥ हनूमंतंतत्पुरस्तात्तुष्टावभक्तरक्षकरम् ॥२१॥ धनुर्बाणधरोवीरःसीतालक्ष्मणसंयुतः ॥ रामचंद्रःसहायोमेकिंकरिष्यत्ययंमम ॥ २२ ॥ हनूमनञ्जनीसूनोवायुपुत्रमहाबल ॥ महालांगूलविक्षेपनिहताखिलराक्षस ॥ २३ ॥ श्रीरामहृदयानंदाविपत्तौशरणंभव ॥ लक्ष्मणेनिहतेभूमौनीलद्रोणाचलेद्रुतम् ॥ २४ ॥ ययौजीवितवानद्यतांशक्तिंप्रकटीकुरु ॥ येनलंकेश्वरोवीरोनिःशंकंविजितस्त्वया ॥ २५ ॥ दुर्निरीक्ष्योपिदेवानांतद्बलंदर्शयाधुना ॥ ययालंकांप्रविश्यत्वंज्ञातवाञ्जानकींस्वयम् ॥ २६ ॥ राव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

णांतःपुरेत्युग्रेतांबुद्धिंप्रकटीकुरु ॥ रुद्रावतारभक्तार्त्तिविमोचनमहाभुज ॥ २७ ॥ कपिराजप्रपन्नस्त्वांशरणंभवरक्षमाम् ॥ इत्यष्टकं
हनुमतोयःपठेच्छ्रद्धयान्वितः ॥ २८ ॥ सर्वकष्टविनिर्मुक्तोलभतेकांक्षितंफलम् ॥ एवंस्तुवतितुलसीदासेश्रीहनुमान्स्वयम् ॥ २९॥
कोटिशोवानरान्नीत्वादिल्लीग्राममुपागतः ॥ आज्ञापयततान्सर्वान्दारयस्वपुरीमिमाम् ॥ ३० ॥ कदर्थीकुरुताद्यैवराजानंराज्यगर्वि
तम्॥इतितद्वचनंश्रुत्वावानरादुद्रुवुस्तदा ॥३१॥ इंद्रप्रस्थेमहाग्रामेसमुत्कृत्यगृहेगृहे॥मुष्टिभिश्चैवलांगूलैर्दंतैःपादतलैरपि ॥३२॥ ता
डयित्वाजनान्सर्वान्बभंजुस्तेगृहानपि ॥ इष्टकाभिश्चपाषाणैर्दंडैर्धूलिभिरेवच॥३३॥ उपहत्यनृपावासमाजग्मूराजमंदिरे ॥ दृष्ट्वादिल्ली
श्वरोराजासहसैवोत्थितोभयात् ॥ ३४ ॥ किमिदंकिमिदंचेतिभाषमाणोनिजाञ्जनान् ॥ अथभृत्याःसमायातारक्षितुंतंनृपंबलात् ॥३५॥
एकैकस्यतुभृत्यस्यशतशोवानरास्तदा ॥ लग्नादेहेविनिष्कास्यदंतानतिभयंकराः ॥ ३६ ॥ धृत्वातंताडयामासचपेटाभिर्मुखेक
पिः ॥ एवंगृहीत्वाकतिधाभ्रामयित्वानभस्तले ॥ ३७ ॥ चिक्षेपराजनिकटेदूरेकोपिचवानरः ॥ एवंक्षणार्द्धतःकृत्वाभृत्यान्सर्वान्मृ
तानिव ॥ ३८ ॥ दिल्लीश्वरंसपत्नीकंजगृहुस्तेथवानराः ॥ गृहीत्वापाणिनापाणिंभ्रामयन्परितोनिजम् ॥ ३९ ॥ संस्थाप्यकतिचि
त्कालंपुनर्नर्तयतिस्मतम् ॥ केचित्कर्णौस्पृशंतिस्महनुंश्मश्रुचकेचन ॥ ४० ॥ मुष्टिबद्धातिवेगेनहंतुमायांतिकेचन ॥ दृष्ट्वेत्थंदुर्द
शांभूपोमर्तुकामइवाभवत् ॥ ४१ ॥ परंतुनमृतःकोपितस्मिन्नपिमहाभये ॥ प्रायस्तुतुलसीदासेयासीद्भक्तिर्महीपतेः ॥ ४२ ॥ प
श्चाद्दुर्विनयंज्ञात्वाभयंशिक्षामदात्प्रभुः ॥ तत्रापिपरमाश्चर्यंसीतारामेतिवादिनः ॥ ४३ ॥ निजघ्नुर्नैवतान्सर्वेवानरातिविभीषणाः ॥
एवंदिल्लीश्वरंज्ञात्वामृतप्रायंतुमंत्रिणः ॥ ४४ ॥ रामेत्युच्चैर्वदंतस्तेनृपसन्निधिमागताः ॥ तमूचुर्भूपतेरक्षराज्यमात्मानमेवच ॥४५॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रुत्वास्माकंवचःपश्यकुरुसर्वंहितंविभो ॥ अयंयस्तुलसीदासोधृतःकारागृहेत्वया ॥ ४६ ॥ तस्यथोरामचंद्रोस्तिस्वामीसजगदीश्व
रः ॥ तस्यदूतोस्तिहनुमांस्तस्येयंवानरीचमूः ॥ ४७ ॥ भक्तापमानादस्मैत्यकदर्थयतिनःप्रभो ॥ तस्माद्गृहेकुठारंतुबद्ध्वारामेतिचा
सकृत् ॥ ४८ ॥ वदंस्तत्रप्रयाहित्वंप्रणिपत्यप्रसादय ॥ इत्युक्तःसतुतत्कालंसपत्नीकोतिविह्वलः ॥ ४९ ॥ बद्ध्वाकुठारंरामेतिवदं
स्तत्रगतोनृपः ॥ नत्वाचतुलसीदासंकृतांजलिपुटोनृपः ॥ ५० ॥ क्षमस्वेतिमुहुःप्राहततस्तमपिसोब्रवीत् ॥ राजन्पश्यचमत्कारंरा
मस्यैवनसंशयः ॥ ५१ ॥ नमेकिंचिदिदंसत्यंतवाग्रेकथयाम्यहम् ॥ इत्युक्तःसपुनःपादौसपत्नीकोनिपत्यच ॥ ५२ ॥ प्रसाद्यतुलसी
दासंतत्पृष्ठेसंन्यलीयत ॥ ततःसतुलसीदासोदृष्ट्वावानरवाहिनीम् ॥५३ ॥ हर्षान्ननर्ततुष्टावननामचमुहुर्मुहुः ॥ ततोध्यात्वाहनूमंतंप
रिवारसमन्वितम् ॥५४॥ संपूज्यविससर्जासौततस्तेवानराद्रुतम्॥प्रासादाद्भ्रामतोगेहान्निर्गत्यबहिरागताः ॥ ५५ ॥ उत्पत्योत्प्लुत्यजग्मु
स्तेदिशोदशयदृच्छया ॥ ततःसतुलसीदासश्चलितोनिजमंदिरम् ॥ ५६ ॥ दिल्लीश्वरःसमागत्यपादयोःपतितोभुवि ॥ धनंदत्त्वाब्रवीद्वा
क्यंक्षमस्वाविनयंमम॥५७॥किंकुर्वन्नत्रवत्स्यामिकथंतत्कृपयावद॥इतिश्रुत्वासतुलसीदासश्चातिदयान्वितः॥५८॥गेहमध्येक्वचित्स्था
नंकल्पयित्वाप्रभोर्मम॥साधुसेवासमायुक्तोवसभूपसुखीभव॥५९॥इत्युक्त्वातुलसीदासोनजग्राहाथतद्धनम् ॥वृंदावनंदिदृक्षुःसन्नायात
स्तेनमार्गतः ॥ ६० ॥ गत्वावृंदावनेतत्रनाभादासंददर्शह ॥ भक्तोयमितिगत्वासनमश्चक्रेपुरास्वयम् ॥ ६१ ॥ नाभादासस्ततोज्ञात्वादं
भाहंकारवर्जितम् ॥ प्रणम्यतुलसीदासंतुष्टावातिमुदान्वितः ॥६२॥ अथागत्यचतत्रैववैष्णवास्तुदिदृक्षवः ॥ तमूचुस्तुलसीदासंपश्ये
हमुरलीधरम् ॥ ६३ ॥ श्रुत्वैवमुत्थितःसोपिवदन्कुत्रास्तिमेप्रभुः ॥ अथतंमंदिरेनीत्वागताःसर्वेतुवैष्णवाः ॥ ६४ ॥ तन्मध्येकोप्यु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वाचोच्चैर्जिघृक्षुस्तत्परीक्षणम् ॥ स्वेष्टदेवंपरित्यज्ययोन्यदेवंनमस्यति ॥ ६५ ॥ लभतेलाघवंमूर्खोयोषेवव्यभिचारिणी ॥ इतिश्रुत्वा
सतुलसीदासस्तत्कालमुक्तवान् ॥ ६६ ॥ दृष्ट्वागोपालमूर्तिंसंस्मृत्यतंरघुनंदनम् ॥ अहोसम्यगिदंरूपंविधायात्रविराजते ॥ ६७ ॥
धनुर्बाणधरश्चेत्स्यात्तद्देवंतुलसीनमेत् ॥ इतिश्रुत्वातदैवाभूद्धंशीबाणस्वरूपिणी ॥ ६८ ॥ वेत्रंचापिधनुर्जातमद्भुतंपश्यतांनृणाम् ॥
तदासर्वेतिसंतुष्टाःसाधुसाध्वितिवादिनः ॥६९॥ तुष्टुवुस्तुलसीदासंप्रणेमुस्तंमुहुर्मुहुः ॥ पुनःकोप्याहतत्रैकःकृष्णस्तुभगवान्स्वयम् ॥
॥ ७० ॥ रामादयोहरेरंशाःश्रुत्वैतत्तुलसीमुदा ॥ ननर्ताहोमहद्भाग्यंमहद्भाग्यंनसंशयः ॥ ७१ ॥ यदेषपूर्णोभक्तानांकृपयांशोभवेद्ध
रिः ॥ एवंदृष्ट्वादृढांभक्तिंसर्वेतेवैष्णवाजनाः ॥ ७२ ॥ नमंतस्तुलसीदासंतुष्टुवुःपरयामुदा ॥ एवंसतुलसीदासोलोकोद्धारणहेतवे ॥
॥ ७३ ॥ जातोवाल्मीकिरेवासौपुनरस्मिन्महीतले ॥ मन्येवाल्मीकिरेवासौपुनर्जातोमहीतले ॥ ७४ ॥ श्रीरामचरितंगायन्नतृप्तोवैपु
रामुनिः ॥ अतोविस्तरशःकृत्वाभाषयाभ्येत्यभूतले ॥ ७५ ॥ रामायणेनपोतेनजीवमात्रमतीतरत् ॥ तस्माच्चैतादृशोभक्तोनभूतोनभ
विष्यति ॥ ७६ ॥ नमस्करोम्यहंतस्मैप्रसन्नोस्तुसदासमे ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येतुलसीदासचरितंनामचतुस्त्रिंशद
धिकशततमःसर्गः॥ ॥ १३४ ॥ मानदासोमहाभक्तःश्रीरामचरितंस्वयम् ॥ अनुकुर्वन्ययौधामश्रीरामस्यमहामनाः ॥ १ ॥ वल्लभा
चार्य्यपुत्रस्यविट्ठलस्वामिनःसुताः ॥ सप्तपूर्वोदितास्तत्रसप्तस्थाननिवासिनः ॥ २ ॥ श्रीमद्गोकुलनाथस्यकथांवक्ष्यामिभक्तिदाम् ॥
महाभागवतःसोभूत्प्रसिद्धोद्यापिभूतले ॥ ३ ॥ नाथद्वारेतिविख्यातापुरीयवनपावनी ॥ श्रीमद्गोकुलनाथोभूत्तत्रश्रीपूजकोत्तमः ॥ ४ ॥
तत्रश्रीनाथमूर्तिंतुमंदिराद्बाह्यतोजनाः ॥ ददृशुर्नतुतत्रासीत्किमपिव्यवधायकम् ॥ ५ ॥ अथैकस्तत्रचांडालःकांधाख्योमलशो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

धकः ॥ बाह्याद्ददर्शतांमूर्तिंप्रातराराार्तिकक्षणे ॥ ६ ॥ दृष्ट्वाविमोहितस्तस्थौमूर्तिमारातिकेक्षणे ॥ नचचालस्वयंकेनाप्याहूतोनिर्ययौ
ततः ॥ ७ ॥ परंतुसंस्मरन्मूर्तिंगृहकर्म्मचकारसः ॥ एवंप्रत्यहमुत्थायप्रातराराार्तिकक्षणे ॥ ८ ॥ गत्वातत्रतुतांध्यायन्मूर्तिंपश्यन्स्थितोऽ
भवत् ॥ एवंबहुदिनेयातेदृष्टंकेनापिसाधुना ॥ ९ ॥ श्रीमद्गोकुलनाथाख्यस्वामिनेकथितंतुतत् ॥ भित्तिर्देयांतरानोचेच्चांडालो
पिनिरीक्षते ॥ १० ॥ इत्युक्तःसोपितंप्राहकारयाद्यैवमाचिरम् ॥ ततोभृत्यानुपाहूयानिर्ममेभित्तिमुत्तमाम् ॥ ११ ॥ अथप्रातः
समागत्यचांडालोनैवदृष्टवान् ॥ महाशोकार्णवेमग्नोदुःखाद्भूमौनिविष्टवान् ॥ १२ ॥ ददर्शपुनरुत्थायनापश्यत्संस्थितस्तदा ॥ एवं
सदुःखितोभूत्वात्यक्त्वाकर्मनिजंपुनः ॥ १३ ॥ कामीप्रियावियोगेनकृपणस्तुधनक्षये ॥ यथापितासुतत्यागेतथादुःखमवाप्तवा
न् ॥ १४ ॥ आगत्यस्वगृहंसोथशिश्येरोगार्तवत्क्वचित् ॥ नभुक्तवान्दिवारात्रौमूर्तिविश्लेषदुःखितः ॥ १५ ॥ ततःसभगवान्देवःस्वप्नेप्रा
हदयान्वितः ॥ श्रीमद्गोकुलनाथंतांभित्तिंदूरीकुरुद्रुतम् ॥ १६ ॥ योसौकांधाख्यचांडालःसोप्यतीवममप्रियः ॥ मद्दर्शनंविनासोथम
रणेकृतनिश्चयः ॥ १७ ॥ तस्माद्यथासपश्येन्मांतथाकुरुमदाज्ञया ॥ इत्युक्त्वातत्रतंकांधंप्राहवैष्णवरूपधृक् ॥ १८ ॥ अहोभि
त्तिस्तुपतितागत्वापश्यहरिंमुदा ॥ इतिदृष्ट्वातदोत्थायकांधस्तत्रागतोनिशि ॥ १९ ॥ संमुखेसंस्थितस्तस्थौपूजकःस्वाम्यपिस्व
यम् ॥ उत्थायभित्तिंतत्कालंदूरीचक्रेतिविस्मितः ॥ २० ॥ अथप्रातरभूद्द्वारःकपाटोद्घाटनेकृते ॥ कांधंसंमुखतोदृष्ट्वाकिंकरोम्यत्र
मांवद ॥ २१ ॥ इतिश्रुत्वाततःकांधःसर्वस्वाचरितंजगौ ॥ श्रुत्वास्मृत्वास्वप्रवृत्तंतस्योपरितुतोषसः ॥ २२ ॥ प्राहत्वंत्यजस्वांवृ
त्तिंभोजनंतेददाम्यहम् ॥ द्वारसंमार्ज्जनंत्वेकंकुर्वन्नत्रसुखीभव ॥ २३ ॥ इत्युक्तःसोपिकांधाख्यस्तंप्रणम्यमुहुर्मुहुः ॥ त्यक्त्वागृहादि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कंतत्रास्थितोभक्ततरोभवत् ॥ २४ ॥ वनमालीबभूवैकोभक्तःसर्वसुहृत्तमः ॥ मिश्रोपनामकश्चैवतथानारायणोभवत् ॥ २५ ॥ एवं राघवदासोभूद्गुरुःकृष्णैकरूपधृक् ॥ योगानंदस्यशिष्यस्तुवामनोतिविरक्तिमान् ॥ २६ ॥ लषोजंगलदेशेभूत्पर्शुरामोतिभक्तिमान् ॥ श्रीभट्टकहरिव्यासपथानुसरणक्षमः ॥२७॥ विरक्तोह्यदिबाह्येसराजवत्सुखमन्वभूत् ॥ शिबिकाहस्तिवाज्यन्नधननृत्यादिसंभवम्॥२८॥ एवमेकदिनेकोपितंपरीक्षितुमागतः ॥ पर्शुराममुवाचासौकिमेवंकुरुषेवृथा ॥ २९ ॥ त्यक्त्वासर्वंसमुत्तिष्ठसमागच्छमयासह ॥ एतावदेवश्रुत्वासतत्कालंचोत्थितोभवत्॥३०॥त्यक्त्वावस्त्राद्यलंकारंतेनसाकंप्ययौमुदा॥शिष्यास्तुचलिताःसाकंतान्निरुध्यस्वयंगतः॥३१॥ अथगत्वाक्वचिद्दूरेक्वचित्पर्वतसानुनि ॥ उपविष्टःपर्शुरामस्तद्धूर्तनिकटेसुखी ॥ ३२ ॥ अथांतरेसमायातोवैश्योधनसमृद्धिमान् ॥ दृष्ट्वातंपर्शुरामंतुप्रणम्यातीवभक्तितः ॥ ३३ ॥ शय्यांमाल्यंभोजनानिभृत्यापर्णकुटींतथा ॥ दत्त्वोवाचात्रचेदाज्ञागृहंनिर्माययाम्यहम् ॥ ३४ ॥ इतिश्रुत्वापर्शुरामदासस्तंवैश्यमब्रवीत् ॥ इमंपृच्छमहाभक्तंनास्याधीनोस्म्यहंपृथक् ॥ ३५ ॥ इतिश्रुत्वासवैधूर्तःपर्शुरामपदांबुजे ॥ निपत्यप्रांजलिर्भूत्वासमस्तौषीत्क्षमापयन् ॥ ३६ ॥ पुनःस्वधामचागत्यपर्शुरामस्तुपूर्ववत् ॥ चित्तेहरिमयोभूत्वाप्राप्तंकर्म्मचकारसः ॥ ३७ ॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येश्रीमद्गोकुलनाथादिचरितंनामपंचात्रिंशदधिकततमः सर्गः ॥ १३५ ॥ ॥ आंध्रदेशेबभूवैकोगदाधरइतिश्रुतः ॥ भट्टोपनामकोजात्यातैलंगश्चातिभक्तिमान् ॥ १ ॥ सस्वगेहेस्थितोनित्यंराधाकृष्णौभजन्द्विजः ॥ श्रीमद्भागवतंनित्यंददर्शैकांतसंस्थितः ॥ २ ॥ एकदासद्विजःकिंचिद्भाषयानिर्ममेपदम् ॥ श्यामरागेणरक्तोहमित्यर्थकमनुत्तमम् ॥ ३ ॥ तत्पदंसमुपागत्यकश्चिद्वृंदावनेजगौ ॥ जीवगोस्वामिनिकटेश्रुतंतेनमहा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्मना ॥ ४ ॥ कस्येदमितिपप्रच्छगायकंसोब्रवीच्चतम् ॥ आंध्रदेशेऽस्तितैलंगोगदाधरइतिद्विजः ॥ ५ ॥ तेनेदंनिर्मितंपद्यंमहाभ
क्तिमतासता ॥ इतिश्रुत्वातदातेनजीवगोस्वामिनापुनः ॥ ६ ॥ मथुरांरंजनस्थलीमनागत्यकथंपुमः ॥ इमामरागेणरक्तोभूदि
त्यर्थकपदंशुभम् ॥ ७ ॥ निर्मायशिष्यद्वितयंप्रेषयामासतंप्रति ॥ श्रीगदाधरभट्टाख्यंगत्वाशिष्यद्वयंततः ॥ ८ ॥ ग्रामाद्बाह्येस्थि
तःकूपनिकटेसगदाधरः ॥ पप्रच्छतुस्तमेवासौक्वास्तेभट्टोगदाधरः ॥ ९ ॥ ततोगदाधरःप्राहकौयुवांकुतआगतौ ॥ इतिश्रुत्वा
वचस्तस्यप्राहतुस्तौकृतांजली ॥ १० ॥ जीवस्वामिसकाशात्तुश्रीमद्वृंदावनादुभौ ॥ पत्रंदातुमिहायातौश्रीगदाधरशर्म्मणे ॥ ११ ॥
श्रुत्वैतद्वचनंभट्टःकूपप्रांतेपपातह ॥ मूर्च्छामेवापघटिकाद्वयंतस्थौततःस्वयम् ॥ १२ ॥ उत्थायपत्रंतद्धस्तान्नीत्वाशिरसिचार्प
यत् ॥ प्रतस्थेसहसाताभ्यांतत्कालंमथुरांप्रति ॥ १३ ॥ महानंदेनिमग्नःससमायातोतिहर्षितः ॥ प्राप्यवृंदावनंभक्त्याजीवगो
स्वामिकादिकान् ॥ १४ ॥ नमस्कृत्यततस्तैश्चतत्रोवासनिरंतरम् ॥ पुराणकथयान्येद्युर्दिवारात्रमतंद्रितः ॥ १५ ॥ एकदाथोह
रानामग्रामस्तन्निकटेस्थितः ॥ ततःकल्याणसिंहेतिनाम्नाक्षत्रियवंशजः ॥ १६ ॥ गृहस्थोभक्तिमानासीत्समागत्यानिरंतरम् ॥
श्रीगदाधरभट्टस्यपुराणेहृष्टचेतसा ॥ १७ ॥ पत्नीतस्यगृहेसाध्वीयुवतीकामपीडिता ॥ नतांभजतिकल्याणसिंहश्चातिविरक्तिमान् ॥ १८ ॥
एकदासातुकल्याणसिंहपत्नीविचक्षणा ॥ ददर्शगर्भिणींकांचिदनाथांभिक्षुकींस्वयम् ॥ १९ ॥ एकांतेतांसमाहूयदत्त्वामुद्राश्चविं
शतिम् ॥ प्राहवृंदावनेगत्वाश्रीगदाधरभट्टकम् ॥ २० ॥ ब्रूहिस्वोक्त्यापुराणस्यंसमयेभयवर्जिता ॥ अहोतवाहंगर्भोमेसूयेकु
त्रेतितद्वद ॥ २१ ॥ इतिश्रुत्वातदासर्वेतस्थुस्तूष्णीमधोमुखाः ॥ श्रीगदाधरभट्टस्तुप्रहृष्टेनैवचेतसा ॥ २२ ॥ तामाहमातरागच्छ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तिष्ठात्रकथयाम्यहम् ॥ अध्यायांतेनसंदेहस्त्वामप्यत्रभजाम्यहम् ॥ २३ ॥ अथसर्वेतदातांतुहंतुंकृतधियोभवन् ॥ स्त्रियंज्ञात्वात
तःसर्वेस्वयंक्षर्तुंव्यवस्थिताः ॥ २४ ॥ एतावानस्यमहतःकलंकोभूद्वयंपुनः ॥ कथंजीवामइत्येवंभाषमाणाःपरस्परम् ॥ २५ ॥
राधावल्लभनामासीत्तन्मध्येकोपिवैष्णवः ॥ सउत्थायद्रुतंतांतुभर्त्सयन्निदमब्रवीत् ॥ २६ ॥ गृहीत्वातुमहादंडंरंडेसत्यंवदाधुना ॥ एवं
वदसिकेनोक्तानोचेत्त्वांहन्मिपश्यताम्॥२७॥इत्युक्त्वादंडमुद्यम्यगतस्तत्ससमीपगः॥साभयादाहतत्सर्वंकल्याणस्त्रीकृतंत्विदम् ॥२८॥
पश्येमाविंशतिंमुद्रादत्त्वोवाचाथसांप्रति॥श्रीगदाधरभट्टंत्वमेवंवदममाज्ञया ॥२९॥एवंश्रुत्वातुतेसर्वेहर्षिताह्यभवंस्तदा ॥ कल्याणःस्व
स्त्रियंहंतुंधृतासिरुदतिष्ठत ॥ ३० ॥ श्रीगदाधरभट्टस्तंवारयामासयत्नतः ॥ अन्यश्चोवाचकिंचास्यावचनेनभविष्यति ॥ ३१ ॥
एवंमनोजयास्यस्यथयदेतावतिचागते ॥ कलंकेनमनःकिंचिच्चचालास्यमहात्मनः ॥ ३२ ॥ एकदाबहुभिःशिष्यैःसहितःकोपिवैष्णवः॥
कथामागतवान्श्रोतुंतदातस्याश्रुनापतत् ॥३३॥ अन्येषांप्रेमतोश्रूणिनिपेतुर्नयनात्ततः ॥ तदातेनापिभक्तेनद्वितीयादिवसेपुनः॥३४॥
आगत्यमारिचंचूर्णंनीत्वानेत्रेददौस्वयम् ॥ तदाश्रुपातयामासेत्येवंदृष्ट्वातुकश्चन ॥ ३५ ॥ तस्मिन्समुत्थितेभट्टंप्राहश्रुत्वातुतत्क्षणा
त् ॥ जहसुर्वैष्णवाःसर्वेभटस्तत्राब्रवीच्चताम् ॥ ३६ ॥ नभवंतोहसंत्वत्रभक्तोयंनात्रसंशयः ॥ ममापिप्रेमजाश्रूणिनिपतंत्वितिवांछ
ति ॥ ३७ ॥ एवंहास्यास्पदेतस्यनहास्यंतोकमप्यभूत् ॥ तानेवंवैष्णवान्सम्यक्बोधयामासयत्नतः ॥ ३८ ॥ एकदातस्यभवने
निशिचौरःसमागतः ॥ गृहस्थंसकलंवस्तुबद्धोत्थापयितुंत्वरन् ॥ ३९ ॥ नोत्तस्थौतन्महाभारंदृष्ट्वाश्रीमद्गदाधरम् ॥ आगत्योत्था
प्यशिरसिचौरस्यधृतवान्स्वयम् ॥ ४० ॥ चौरस्यहृदयेजातंमदीयोयमितिस्फुटम् ॥ प्राहकोसीतिशनकैःश्रुत्वाभट्टोब्रवीद्वचः॥४१॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कोप्यस्तुकिंभवोनतद्गृहीत्वागच्छतद्द्रुतम् ॥ प्रातःकालइवाभातिदृष्ट्वान्योधर्षयिष्यति ॥४२॥ इतिश्रुत्वावचश्चौरोज्ञात्वाभट्टंगदाधरम् ॥ धनंत्यक्त्वापपातास्यपादयोरतिभक्तितः ॥ ४३ ॥ त्यक्त्वाचौर्य्यंतस्याशिष्योभूत्वाभक्तोबभूवसः ॥ अत्रापिनैवलोभोभूद्धनापहरणक्षणे ॥ ४४ ॥ एकदाकोपिधनिकोधनंदातुमुपागतः ॥ स्वयंतुभगवद्गेहेभूमिंलिंपन्स्थितस्तदा ॥ ४५ ॥ प्राहैकस्तुतदाशिष्योदृष्ट्वातंधनिकंजनम् ॥ त्यजकार्यंथित्वंत्वांद्रष्टुमायातिकश्चन ॥ ४६ ॥ श्रुत्वाहसन्नुवाचार्थकिंवदिष्यसिमूर्खवत् ॥ यस्यदासोस्मितद्दास्यंकरोम्यत्रहितंनिजम् ॥ ४७ ॥ इत्युक्त्वासतथैवासीद्धनिकश्चसमागतः ॥ दत्त्वाधनंप्रणम्याहालिंपंतंतंमहाशयम् ॥ ४८॥ अहंलिंपामिनाथस्त्वंत्यक्त्वेतिविररामसः ॥ प्रोवाचसत्यमेवैतत्किंतुमद्वचनंशृणु ॥ ४९ ॥ स्वलेपनेनकिंनुस्यादहंदासोस्मियस्यसः॥ मद्दास्यंमनुजेकिंतुतवलेपनतोवद ॥५०॥ योभक्तःकुरुतेभक्तिपूजोपकरणादिकम् ॥ संपादयतिशिष्येणसुतैर्वान्यैर्नसोत्तमः ॥५१॥ इतिश्रुत्वाततःसोपिपरितुष्टोययौगृहम् ॥ श्रीगदाधरभट्टस्तुतस्थावानंदपूर्वकम् ॥ ५२ ॥ अत्रापितस्यनैवाभूत्संकोचोहृदयेनृणाम् ॥ प्रतिष्ठावाजिघृक्षावादंभोवानास्पृशच्चतम् ॥ ५३ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येगदाधरदासचरितंनामषट्त्रिंशदधिकशततमःसर्गः ॥ १३६ ॥

॥ एवंचतुर्मुखोभक्तश्चामुंडश्चतथापरः ॥ चंडदासोबभूवासौमहाभक्ताइमेभुवि ॥ १ ॥ कर्म्मापिनंदनामैकःशालग्रामशिलांवहन् ॥ गलेबद्ध्वाचचारोर्वींवृंदावनमुपागतः ॥ २ ॥ नेत्रंत्रिपादिकंकृत्वासर्वत्रपर्य्यटन्स्थितः ॥ यत्रस्थातुंमनश्चक्रेतत्रतस्योपरिप्रभुम् ॥३॥शालग्रामंस्थापयित्वास्वयंतस्थौनिरंतरम्॥एकत्रतांत्रिपादिकांविस्मृत्यन्यत्रचागतः॥४॥ तत्रस्थातुंमनश्चक्रेतामदृष्ट्वापिविचिंतयन् ॥ चलितःपुनरुत्थाययतएवागतस्ततः ॥ ५ ॥ अथांतरेतुभगवान्सायंवैष्णवरूपधृक् ॥ तांत्रिपादींसमाद

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यददौतस्मैप्रहर्षितः ॥ ६ ॥ उपवेश्यप्रभुंपश्चात्स्वयंतत्रोपविष्टवान् ॥ नोचेदतिश्रमात्साधुर्म्रियेतनैवनसंशयः ॥ ७ ॥ एवंकोल्हस्त
थाल्हलोभ्रातरौपश्चिमेस्थितौ ॥ कायस्थकुलसंभूतौतयोर्वक्ष्येकथांशुभाम् ॥ ८ ॥ ज्येष्ठोभक्तःस्थितःसाधुसेवायांनिरतःसदा ॥ क
निष्ठोमद्यमांसादिभोक्ताभ्रातुश्चभक्तिमान् ॥ ९ ॥ कोल्होद्वारावतींयातःकनिष्ठोपिययौसह ॥ गत्वातत्रहरेरग्रेरणछोरस्यचप्रभोः ॥
॥ १० ॥ जगौस्वकृतपद्यानिज्येष्ठोभक्तिसमन्वितः ॥ ततोल्होपिजगौकिंचित्स्वकृतंत्रपयान्वितः ॥ ११ ॥ रणछोरस्ततस्तुष्टोमा
लांस्वगलतस्तदा ॥ अल्हस्यचगलेकस्मात्प्रददौवायुचालिताम् ॥ १२ ॥ अल्होनत्वाहरिंभक्त्याप्राहायमग्रजोमम ॥ तवभक्तोमहा
राजप्रसीदास्योपरिप्रभो ॥ १३ ॥ इतिदृष्ट्वापमानःसकोल्हस्त्वातीवलज्जितः ॥ निमज्ज्यवारिधौमर्तुंचलितःक्रोधमूर्च्छितः ॥ १४ ॥
अहोस्मैपापिनेदत्त्वामालांमेनैवकिंचन ॥ तस्मान्मरणमेवात्रवरमेवंमनाययौ ॥ १५ ॥ सर्वत्रजानुदघ्नंतुजलमासीन्महोदधेः ॥ नम
ग्नोलक्षयित्वातंदुखितंभगवान्हरिः ॥ १६ ॥ भक्तरूपंसमादायनिनायनिजमंदिरे ॥ संतोष्यबहुभिर्मंत्रैर्भोजनायन्यवेशयत् ॥ १७ ॥ तत्रभो
कुंददौपात्रंद्वितीयंभक्तरूपधृक् ॥ कोल्हंपप्रच्छकस्येदमल्हायेत्यब्रवीत्सतम् ॥ १८ ॥ पुनःसदुःखितःप्राहनाहंभोक्ष्येततोहरिः ॥ भक्तरूप
धरःप्राहकोल्हमल्हस्यचेष्टितम् ॥ १९ ॥ अयंपुराराजपुत्रस्त्यक्त्वासर्वंवनेगतः ॥ मांस्मरन्विजहौप्राणांस्तस्मादेषप्रियोमम ॥ २० ॥
नैतेनेर्ष्याप्रकर्तव्यात्वयाकोल्हममाज्ञया ॥ इत्युक्तःसतुकोल्होपिनिर्मत्सरतरोभवत् ॥ २१ ॥ दत्त्वान्नंसाधुरूपःसकोल्हंप्राहकिमिच्छ
सि ॥ सआहयामिभवनमितिश्रुत्वातदाहरिम् ॥ २२ ॥ तत्कालंप्रापयामासतंसवेश्माथमायया ॥ एवंस्वप्नसमंसर्वमनुभूयसकोल्हकः ॥
॥ २३ ॥ अल्हदर्शनकामःससंस्मारभ्रातरंमुहुः ॥ एवंगतेषुकालेषुशुश्रावाल्हंसमागतम् ॥ २४ ॥ प्रेम्णाकोल्होग्रतोगत्वामिलित्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

प्रेमपूर्वकम् ॥ त्यक्त्वासर्वंमुभौपश्चाज्जग्मतुर्वनमुत्तमम्॥२५॥ एवंमाधवदासोभूज्जीवानंदस्तथैवच ॥ उभावपिजगत्सर्वंहरिंमत्वापतुर्गतिम्॥२६॥ एवंनारायणोनाम्नाकस्माद्भक्तोत्तमोभवत्॥तस्यज्येष्ठःस्थितोभ्राताततत्पत्नीचगृहेसतु ॥२७॥ नकिंचिदकरोत्कार्य्यंज्येष्ठएवधनार्जकः॥एकस्मिन्दिवसेभ्रातृपत्नीपर्य्युषितंददौ॥२८॥भोक्तुंनबुभुजेभ्रातुःपत्नींप्राहातिखेदतः॥नाहंपर्य्युषितंभोक्ष्येतप्तंदेह्योदनंमम॥२९॥ इतिश्रुत्वाभ्रातृपत्नीप्राहतंदेवरंक्रुधा ॥ एतच्चापिकुतोभ्येतीत्येवंचित्तेविचारय ॥३०॥ किमेवंभाषसेव्यर्थमहंकारान्नलज्जसे ॥ भोक्तुमिच्छसिचेद्भुंक्ष्वनोचेद्गच्छयथासुखम्॥३१॥श्रुत्वैतद्वचनंतस्यावज्रपातसमंक्रुधा॥जाज्वल्यमानोनिर्यातोगृहाद्वृंदावनंशुभम्३२॥ राधाकृष्णेतितत्रासौमहामंत्रंजपन्द्विजः ॥ तस्थौचैकत्रकुंजेसनिनायकतिवासरान् ॥ ३३ ॥ अनाहारस्ततोराधातत्कालकृतमोदनम्॥ ददौसर्वरसैर्युक्तंस्वयंवेषांतरेणसा ॥३४॥ एवंनारायणोनाम्नानामस्मरणमात्रतः॥ कृतकृत्योबभूवातोमनस्ताद्दगपेक्षितम् ॥३५॥ एवंकानिरग्रामेतुमरुदेशेतिविश्रुतः ॥ पृथ्वीराजेतिनाम्नाभूद्दयालुर्भक्तसत्तमः ॥ ३६ ॥ तस्यगेहेहरेर्मूर्तिस्तांभक्त्यार्चयतिस्मसः ॥ क्वचिदन्यत्रचेद्यातस्तदापिमनसास्मरन्॥३७॥ तांमूर्तिंपूजयामासेत्येवंतस्यव्रतंदृढम् ॥ एकदासनृपःक्वापिययौदेशांतरेस्वयम् ॥३८॥ सस्मारतत्रतांमूर्तिंनददर्शहृदायदा ॥ तत्स्थानेचापितांमूर्तिंततश्चिंतामवापसः ॥ ३९ ॥ कुतोनदृश्यतेमूर्तिस्तत्स्थानंचापिवामया ॥ प्रेषितंभृत्ययुगलंदृष्ट्वागच्छात्रवैद्रुतम् ॥ ४० ॥ पुत्रायपत्रंप्रददौमूर्तिरस्तिगृहेनवा ॥ तत्प्रेषयलिखित्वात्वमेतदर्थप्रबोधकम् ॥४१॥ अथचारद्वयंतत्रगत्वापत्रंददौद्रुतम् ॥ ददर्शचहरेःस्थानंकुरुतेनूतनंपुनः ॥४२॥ पृथ्वीराजसुतःपत्रंददौचारद्वयायच॥ ज्ञात्वापिपतिपुस्थानंक्रियतेनूतनंपुनः ॥४३॥ अतःसामूर्तिरन्यत्रस्थापितापूज्यतेमया॥ जातेस्थानेयथापूर्वंस्थापयिष्याम्यहंतुताम् ॥४४॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दृष्ट्वेदंपुत्रलिखितंपृथ्वीराजस्तुतोषह ॥ स्वयंचापिसमागत्यपूजयामासपूर्ववत् ॥ ४५ ॥ एकदाप्रतिजज्ञेसपृथ्वीराजोतिभक्तिमा
न् ॥ मथुरायांमरिष्येहमितिदिल्लीश्वरांतिके ॥ ४६ ॥ सोपिज्ञात्वापितंकालंपृथ्वीराजमुवाचह ॥ त्वंगच्छकाबिलेराज्येयुद्धा
करमिहानय ॥ ४७ ॥ इतिदिल्लीशवचनंपृथ्वीराजोनिशम्यह ॥ उद्विग्नःप्रययौतत्रकेशवंसंस्मरन्हृदि ॥ ४८ ॥ तत्रगत्वानृ
पंजित्वाजग्राहकरमुत्तमम् ॥ रात्रौस्वप्नेब्रवीत्तस्मैमृत्युकालंसकेशवः ॥४९॥ ततःप्रातःसमुत्थायभूपायप्रेष्यतंकरम् ॥ श्रुत्वादिल्लीश्वरः
सर्वंपश्चात्तापेनदुःखितः ॥५०॥ तुष्टावतंमहाराजंपृथ्वीराजंहरेःप्रियम् ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनारायणादिसदाचारचरितं
नामषट्त्रिंशदधिकशततमःसर्गः ॥ १३६ ॥ जात्याकायेतिविख्यातःसीवातस्यसुतोह्यभूत् ॥ सागतश्चेतिनाम्नासससाधुसेवापरा
यणः ॥१॥ द्वारकायांसमायातोअन्नवस्त्रादिभिर्जनान् ॥ तोषयामासभक्त्यासौद्वारकानाथतुष्टये ॥ २ ॥ एकदामहदाश्चर्यमजनीजे
तिनामतः ॥ तुरुष्कएकआयातोलुंठितुंद्वारकांपुरीम् ॥३॥ आगत्यनगरीमध्येदीपयामासवह्निना ॥ ततःपलायिताःसर्वेदिशोदशभया
तुराः॥४॥त्राहित्राहिजगन्नाथस्वभक्तान्शरणागतान्॥ अथैकस्मिन्क्षणेकस्मात्सैन्यमेकमुपागतम्॥५॥हत्वातुरुष्कसैन्यंतत्समुद्रेचाप्य
पातयत् ॥ वह्निंनिवारयित्वातत्सैन्यंचापिपुनर्ययौ ॥ ६ ॥ कस्येदंकुतआयातमितिनोवेदकश्चन ॥ भगवत्कृपयासर्वानिर्विघ्नाभूत्पुरी
तदा ॥ ७ ॥ सागतोपिहरिंचित्तेरक्षितारममन्यत ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येसागतचरितंनामसप्तत्रिंशत्यधिकशततमःसर्गः
॥ १३७ ॥ ॥ मानसिंहस्यभ्राताभूत्कनिष्ठोनातिभक्तिमान् ॥ नाम्नामाधवसिंहेतितस्यरत्नावतीप्रिया ॥ १ ॥ तस्यांपुत्रोबभूवैकःप्रेम
सिंहेतिनामतः ॥ सोतिवीरोमहाभक्तःसमर्थोरणवर्त्मनि ॥२॥ एकदानिशिशय्यायांसुप्तारत्नावतीस्थिता ॥ जाग्रतीतत्पदद्वंद्वंदासीका

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चिन्ममार्जह ॥३॥ श्रीमन्नंदकिशोरेतिराधाकृष्णेतिचासकृत् ॥ वदंतीशनकैर्दासीतत्पादौचाप्यसेवत ॥४॥ तदाराज्ञ्याश्रुतंनामदासीहर्षा
श्रुमालिनी ॥ दृष्ट्वादृष्ट्वापुनःसातुकिमिदंतवचेष्टितम् ॥ ५ ॥ अहेतुरेषचानंदोविक्षिप्तेवचजल्पसि ॥ सत्यंकथयमेदासीमाभयंकुरुकस्य
चित् ॥ ६ ॥ इतिश्रुत्वावचस्तस्याःस्वामिन्याःसाब्रवीद्वचः ॥ भुंक्ष्वभोगान्महाराज्ञिकिंपृच्छसिवृथामम ॥७॥ इतिब्रुवंतींतांप्राहसुहूर
त्नावतीसती ॥ वदत्वंनास्तितेभीरितिश्रुत्वाब्रवीच्चसा ॥ ८ ॥ स्वामिन्यहंतुसततंराधाकृष्णौभजेहृदि ॥ वदाम्येवंतुतन्नामसाधुनाशि
क्षितास्म्यहम् ॥ ९ ॥ इत्येवंभाषमाणांतांसेवातःसंन्यवर्तत ॥ स्वयंचापितुजग्राहनामश्रीराधिकापतेः ॥ १० ॥ एवंजपं
तीसाराज्ञीमहाभक्ताबभूवह ॥ द्रष्टुंचित्तेचकारासौश्रीमन्मदनमोहनम् ॥ ११ ॥ साधुसेवासमासक्ताशुश्रावभगवत्कथाः ॥ इंद्रनील
मणेःकृष्णप्रतिमांप्रविधायसा ॥ १२ ॥ पश्यंतीसाधुवृंदंसाहरिबुद्ध्यामहासती ॥ एवमेकदिनेकोपिमहाभक्तःसमागतः ॥ १३ ॥
नृत्यन्नग्रेहरेरग्रेसमलोष्टाश्मकांचनः ॥ रत्नावतीतुतंदृष्ट्वास्वयमेवगतासती ॥ १४ ॥ निवारितातदादास्यानाबिभ्यतकथंचन ॥
तत्रागत्यस्वयंकृत्वाभोज्यंतस्मैददौमुदा ॥ १५ ॥ तांबूलादिततोदत्त्वाप्रणम्यस्वयमागता ॥ एवंदृष्ट्वामहाश्चर्यंमंत्रीराज्ञेलिलेख
सः ॥ १६ ॥ राज्ञीरत्नावतीमार्गंत्यक्त्वासाधुजनैःसह ॥ गायत्यत्रहरेरग्रेशिक्षितापिनमन्यते ॥ १७ ॥ दृष्ट्वेदंलिखितंराजाक्रोधा
ज्ज्वलितमानसः ॥ तूष्णींतस्थौतदायातःप्रेमसिंहोनृपांतिके ॥ १८ ॥ तमाहराजाक्रोधेनमुंडासुतसमेहिभो ॥ इत्युक्त्वामंत्रिलिखितंदत्त्वापु
त्रायभूपतिः ॥ १९ ॥ जगामशयनागारंपुत्रःपत्रंव्यलोकयत् ॥ प्रेमसिंहोमातृभक्तिंज्ञात्वातीवप्रहर्षितः ॥ २० ॥ लिलखमात्रेपत्रंसप्रेमसिंहोतिभ
क्तितः ॥ यदारब्धंत्वयामातर्नत्याज्यंसर्वथापुनः ॥ २१ ॥ राजापिमांवदत्यत्रमुंडासुतमितिक्रुधा ॥ दृष्ट्वापत्रंतदातस्यमातारत्नावलीमुदा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥२२॥लिलेखपत्रंपुत्रायहरिभक्तायसास्वयम्॥ नाहंपररतापुत्रनत्यक्ष्यामित्रतंत्विदम् ॥२३॥ राधाकृष्णप्रसादेनतवकीर्तिर्भविष्यति ॥ इतिदृष्ट्वातदापत्रंप्रेमसिंहोतिहर्षितः ॥२४॥ महोत्सवंगृहेचक्रेश्रुत्वाराजाब्रवीज्जनम् ॥ किमकांडेमहोत्साहःक्रियतेतेनतद्वद ॥२५॥ सगत्वागत्यचपुनर्महाराजंनिरीक्ष्यतत् ॥ मुहुर्वदतिमुंडायाअद्यजातोनसंशयः ॥ २६ ॥ इतिश्रुत्वाततोराजातंहंतुंसैन्यमाह्वयत् ॥ प्रेमसिंहोपिसन्नद्धस्तत्रैकंमंत्रिसत्तमम् ॥२७॥ राजावदतित्वंत्वेतांहत्वासंमार्ज्जयायशः ॥ ततोमंत्रीनृपंप्राहसाक्षादस्यास्तुमारणे ॥२८॥ लोकेमहान्कलंकःस्यात्तस्माद्युक्त्यानिहन्म्यहम् ॥ अयंयोवर्ततेव्याघ्रःपिंजरेकालसन्निभः ॥ २९ ॥ तद्गृहद्वारितंत्यक्त्वामारयिष्या मितेनताम् ॥ इतिश्रुत्वानृपःप्राहप्रातरेवकुरुष्वतत् ॥ ३० ॥ अथव्याघ्रोययौशीघ्रंरत्नावत्यागृहेसतु ॥ इतिरत्नावतीश्रुत्वापूजयं तीहरिंमुदा ॥ ३१ ॥ दृष्ट्वाव्याघ्रमहोभाग्यमहोभाग्यमिदंमुहुः ॥ जल्पंतीशीघ्रमुत्थायपूजोपकरणानिच ॥ ३२ ॥ गृहीत्वांगणदे शेसाव्याघ्रसन्निधिमागता ॥ नृसिंहोयंसमायातोजातोयस्यकृपानिधिः ॥ ३३ ॥ अनेनभक्तरक्षार्थंहिरण्यकशिपुर्वधः ॥ इत्युक्त्वात स्यपादेषुपाद्यंदत्त्वामनस्विनी ॥ ३४ ॥ कुंकुमंचंदनंभालेदत्त्वामाल्यंगलेददौ ॥ धूपदीपादिदत्त्वातंभोजयामाससमोदकम् ॥ ३५ ॥ एवंसमर्च्यतंराज्ञीप्रणनामातिभक्तितः ॥ व्याघ्रोगौरिवतांपूजांप्रतिजग्राहहर्षितः ॥ ३६ ॥ एवंसमर्चनंतस्याराजमंत्रीददर्शह ॥ अ थागत्यबहिर्व्याघ्रोमालातिलकभूषितः ॥ ३७ ॥ हत्वातंमंत्रिणंदृष्ट्वानान्यान्भक्षितवान्द्रुतम् ॥ दृष्ट्वाराजातिभीतःसपत्नीगृहमुपाग तः ॥ ३८ ॥ दृष्ट्वासमुत्थितासाध्वीकुर्वतीहरिपूजनम् ॥ राजानमश्रुकाराहदासीपश्यनमत्यसौ ॥ ३९ ॥ राज्ञीप्राहातिमुदितारा धाकृष्णौनमत्ययम् ॥ ममतुप्राणनाथोयंद्वितीयःश्रीहरेस्तनुः ॥ ४० ॥ तदाराजापिमेनेस्याभक्तिरस्तिदृढेतिसः ॥ एवमेकादिनेमा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नसिंहोमाधवासिंहयुक् ॥ ४१ ॥ यमुनायांस्थितोनाविमज्जंतीवचनौरभूत् ॥ कैवर्तस्तुततःप्राहराजन्नौरिहमज्जति ॥ ४२ ॥ स्मरं
तुहरिभक्तान्वैस्वकुलेनावियोस्थिताः ॥ ततःपारंप्रयात्येषानान्यथाधोगमिष्यति ॥४३ ॥ इतिश्रुत्वामानसिंहोदध्यौभ्रातृवधूंचताम् ॥
ततोर्द्धमग्नासानौकायमुनातीरमागता॥४४॥आगत्यमानसिंहोपिप्रशशंसमुदान्वितः॥ग्रामान्ददावन्नदानसिद्ध्यर्थंवनमागमत्॥४५॥
एवंरत्नावतीभक्तिःप्रसिद्धाद्यापिभूतले॥ ॥इति श्रीभगवद्भक्तिमाहात्म्येरत्नावतीचरितंनामाष्टात्रिंशदधिकशततमःसर्गः ॥ १३८ ॥
वर्धमानस्यशिष्योभूद्रामदाससुतोद्विजः ॥ नाम्नासमथुरादासोहरिभक्तिरतःसदा ॥ १ ॥ एकदातस्यनगरेसाधुरेकःसमा
गतः ॥सचत्कारेंद्रजालादीन्दाह्वालोकाविमोहिताः ॥ २ ॥ शालग्रामंतुसंपूज्यधृत्वासिंहासनेस्वयम् ॥ ननर्तचतदादेवःशालग्रामो
प्यनर्तत ॥ ३ ॥श्रुत्वेदंपरमाश्चर्यंसर्वेतत्रसमागताः ॥ महासिद्धोयमित्येवंमत्वातेतुष्टुवुश्चतम् ॥ ४ ॥ मथुरादासशिष्योपितत्रैकःस
मुपागतः ॥ दृष्ट्वातत्परमाश्चर्यंमथुरादासमाहतम् ॥ ५ ॥ गुरोसमागतःसाधुःशालग्रामंचनर्तयन् ॥ स्वयंचनृत्यतित्वंभोगत्वापश्य
तदद्भुतम् ॥ ६ ॥ इतिश्रुत्वावचस्तस्यमथुरादासआहतम् ॥ कोवेदसाधुचरितंनगंतव्यंतदंतिके ॥ ७ ॥ पुनःप्रसाद्यतंशिष्योनिन्ये
तद्वैष्णवांतिके ॥ तस्मिन्गतेतुमथुरादासेतत्तेजसाधुनः ॥ ८ ॥ ननर्ततदाज्ञातंतेनधूर्तेनचेतसा ॥ अयमागत्यमद्विद्यास्तंभंचक्रेनसं
शयः ॥ ९ ॥ एवंविचिंत्यमथुरादासेकृत्यांचकारसः ॥ साकृत्यातद्वधादेत्यकर्तारमग्रसीदद्भुतम् ॥ १० ॥ ततःसमूर्च्छितोभूत्वानिष्प
पातधरातले ॥ आगत्यमथुरादासस्तमुत्थाप्यातिभक्तितः ॥ ११ ॥ परस्पर्शपाणिनानेत्रेबोधयित्वाप्रयत्नतः ॥ इतिसंशिक्ष्यतंसाधुं
स्वयमागत्यमंदिरे ॥ १२ ॥ राधाकृष्णौस्मरंश्चित्तेमहानंदमवाप्तवान् ॥ अभून्नारायणोदासःश्रीहरेरतिभक्तिमान् ॥ १३ ॥ तस्यैवंनि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यमोगायन्ननर्तश्रीहरेः पुरः॥ परंतुतादृशंनृत्यंगानंवापिसुदुर्लभम् ॥ १४ ॥ तस्यनैवश्रमःक्वापिसदातीर्थाटनेरतः ॥ गत्वासाधुसमाजेस
शिष्यैश्चबहुभिर्वृतः ॥ १५ ॥ नृत्यंकृत्वादिनंस्थित्वापुनरन्यत्रचागमत् ॥ एवमेकदिनेभक्तःकाशींगच्छन्पथिस्थितः ॥ १६ ॥ प्रयागा
त्पूर्वतोग्रामेहण्ड्याख्येतिविश्रुते ॥ तत्रम्लेच्छोनृपःकश्चिच्छुश्रावतमुपागतम् ॥ १७ ॥ भृत्यैर्ग्रामजनैश्चापिनृत्यार्थंभक्तिमावहन् ॥
अयंतुसंदिहानोभूत्किंकर्तव्यमतःपरम् ॥ १८ ॥ अदृष्ट्वाममनृत्यंसगंतुंदास्यतिनैवहि ॥ अतोनृत्यंविधास्यामिपरंतुभगवान्कथम्
॥ १९ ॥ नेतव्यस्तद्गृहेयास्तितुलसीमालिकात्वियम् ॥ तांसंस्थाप्यतदग्रेहंनर्तिष्यामिनसंशयः ॥ २० ॥ इतिनिश्चित्यतांमालामु
च्चस्थानेनिधायसः ॥ तत्संमुखोननर्तासौम्लेच्छभूपोपिपश्यति ॥ २१ ॥ अथतुष्टःसभूपालोधनंदातुंसमुत्थितः ॥ तदामदनगोपालंस
स्मारातिमुदान्वितः ॥२२॥ मुमूर्च्छचमृतप्रायस्तंशिष्यानिन्युरन्यतः ॥ प्राप्यचैतन्यमाहाथप्रयागेनयमांद्रुतम् ॥ २३ ॥ आगत्यतत्रसं
भेदेगंगायमुनयोःशुभे ॥ राधाकृष्णौस्मरन्भक्तोममारज्ञानपूर्वकम् ॥२४॥ एवंनारायणोदासोभक्तोभूदतिविश्रुतः ॥ वोहथोजसमंतश्च
गोपालश्चगदाधरः ॥ २५ ॥ उद्धवोरामवेणुश्चकृष्णजीवनएवसः ॥ पर्शुरामःकृष्णदासोगंगादासस्तथैवच ॥ २६ ॥ गोपालोजयदेव
श्चश्रीमन्माधवदासकः ॥ एतेचयेमहाभक्ताःप्रसिद्धाःपावनाःकलौ ॥ २७ ॥ विदुरोरामभक्तोभूद्द्वितीयोपिस्थरोयथा ॥ हीथरग्रामवा
सीसकृर्षिकृत्वातिभक्तितः ॥ २८ ॥ अन्नदानंचसाधुभ्यःकुर्वंश्चित्तेहरिंस्मरन् ॥ तस्थावानंदपूर्वसदरिद्रोधनवानिव ॥ २९ ॥ अना
वृष्टिवशादेकवत्सरेतस्यवैकृषिः ॥ सगर्भाशुष्कतांयातादृष्ट्वाचिंतामवापसः ॥ ३० ॥ अन्यत्रगंतुकामोभूद्रात्रौस्वप्नेब्रवीद्धरिः ॥ वृद्धिर्भा
विन्यसंदेहोमागच्छान्यत्रकुत्रचित् ॥ ३१ ॥ अथप्रातःसमुत्थायविदुरोतीवहर्षितः॥छेदयित्वाकृषिंसर्वांदमयामासयत्नतः ॥ ३२ ॥ हासि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तोवैसलोकेश्वनविश्वासंजहौहृदि ॥ तदाचतुर्गुणंधान्यमन्यवर्षाद्बभूवह ॥ ३३ ॥ दृष्ट्वासर्वैर्महाश्चर्य्यंमत्वाभक्तिविचेष्टितम् ॥ तुष्टवु
स्तंजनाभक्तंविदुरंचातिहर्षिताः ॥ ३४ ॥ एवंदयालुदासोभूद्भक्तोदामोदरस्तथा ॥ मोहनःपरमानंदश्चेत्युभौभक्तसत्तमौ ॥ ३५ ॥
बभूवचतुरस्वामिभक्तएकोतिविश्रुतः ॥ पत्नींपुत्रंगृहंत्यक्त्वावृंदावनमुपागतः ॥ ३६ ॥ तस्यैवंनियमोनित्यंप्रातर्गोविंददर्शनम् ॥ म
ध्याह्नेनंदनागारेकेशवस्यचदर्शनम् ॥ ३७ ॥ राधाकुंडेततोगत्वास्वस्थानाद्गमनंतथा ॥ एवंनित्यव्रतंतस्यचतुरस्वामिनोभवत् ॥३८॥
जातंदिनत्रयंतस्यक्षुत्पिपासार्दितस्यवै ॥ अथरात्रौहरिःस्वप्नेप्राहसाधुस्वरूपधृक् ॥ ३९ ॥ प्रतिवेश्मव्रजन्नित्यंत्वापयःपाययाम्यहम्॥
इत्युक्त्वादात्पयस्सोपिपपावेवचतत्पयः ॥ ४० ॥ पयोव्रतीतिविख्यातोमथुरायांबभूवसः ॥ कदाचिद्बालवद्भोपियाचतेऽस्याःप
योद्धुतम् ॥ ४१ ॥ एवंतुपरमानंदविठ्ठलोमाथुरोपरः ॥ षेमपंडेतिविख्यातोगुनौरेचौधरस्तथा ॥ ४२ ॥ एतेमाधुकरींभिक्षांगृही
त्वावैष्णवाञ्जनान् ॥ तर्पयामासुरमलाःप्रख्याताभक्तसत्तमाः ॥४३॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येरामदासचतुरस्वामिचरितंना
मैकोनचत्वारिंशदधिकशततमःसर्गः ॥ १३९ ॥ ॥ मरुदेशेसीथराख्योग्रामश्चातीवविश्रुतः ॥ तत्राभूत्कुंभकारस्तुकुवादासेति
नामतः ॥१॥ तस्यचैवंव्रतंनित्यंसर्वदातिथितर्पणम् ॥ वस्त्रंविक्रीयनीत्वान्नंसाधुभ्यःप्रददौमुदा ॥२॥ एकदासाधवस्तत्रबहवस्तुसमाग
ताः॥तान्दृष्ट्वाहर्षितश्चित्तेकिंकर्तव्यमितिस्मरन् ॥ ३ ॥ तद्ग्रामनृपतेरग्रेगत्वाप्रार्थितवानथ ॥ अहोममास्तिचेत्कार्य्यंतर्हिकारयभूपते
॥४॥तद्वेतनमिदानींमेब्रूहिकार्य्यंममास्तिभो ॥ इतिश्रुत्वानृपःप्राहकूपंखात्वाददामिते ॥५॥ धनमित्थंवचःश्रुत्वास्वीकृत्यधनमाददे ॥
नीत्वान्नंभोजयामाससाधून्सर्वान्मुदान्वितः ॥ ६ ॥ भोजयित्वागतोग्रामाधीशाग्रेतमुवाचसः ॥ क्वकूपंखानयाम्यत्रस्थलंदर्शयमेधु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ना ॥ ७ ॥ ततोग्रामेशनिर्दिष्टंचखानकूपमुत्तमम् ॥ कियद्दूरेगतस्तत्रवालुकानिःसृतातदा ॥ ८ ॥ पपातमृत्तिकातत्रकूवादासस्य
चोपरि ॥ अथान्येयेस्थितास्तत्ररुदंतोगृहमागताः ॥ ९ ॥ मत्वाऽशक्यंशरीरस्यनिष्कासनमतोजनाः ॥ नतत्रयेतिरेपत्नीचक्रेतस्यौ
र्ध्वदैहिकम् ॥१०॥ ततोमासांतरेकश्चित्साधुस्तत्रसमागतः ॥ शुश्रावरामरामेतिकूवादासोक्तवत्स्फुटम् ॥ ११ ॥ सग्रामेशमुवाचा
शुसोपिभृत्यैःसमागतः ॥ खानयित्वाथराजापिशुश्रावरामनामतत् ॥ १२ ॥ कियद्दूरेततोगत्वाकूवादासोपरिस्थितम् ॥ ददर्शमृत्ति
कापुंजंमहीमिववविनिर्मितम् ॥ १३ ॥ युक्त्यातमपिनिष्कास्यराजाग्रेनिन्युरादरात् ॥ महीमध्येन्नपानीयपूर्णपात्रद्वयंजनाः ॥ १४ ॥
कूवाग्रेददृशुःसर्वेमहाश्चर्य्यंगतास्तदा॥राज्ञापिसत्कृतःसोथसर्वेतंद्रष्टुमागताः॥१५॥दर्शनीयंददुस्तेयत्तैःसर्वैःशोभनंमठम् ॥ निर्वापया
मासहरेःकूवादासोतिभक्तितः ॥ १६ ॥ अथात्रभगवन्मूर्तिंतत्रस्थापयितुंमनः ॥ कूवादासश्चकाराथजातेकतिपयेदिने ॥ १७ ॥
साधवश्चागतास्तत्रकृष्णमूर्तिंमनोरमाम् ॥ नयंतोद्वारवत्यांतेस्थापनायाथतांपुनः ॥१८॥ कूवाभक्तोमठेतस्मिन्वासयामासभक्तितः॥
भोजयित्वातिमिष्टान्नंततस्तेतत्रवैष्णवाः ॥ १९ ॥ मूर्तिंमूर्तिस्थलेन्यस्यस्तुत्यासर्वेमठेपुनः ॥ अथकूवासमागत्यदृष्ट्वामूर्तिंस्थितां
तथा ॥ २० ॥ मनसाकामयामासयद्येषासंस्थिताभवेत् ॥ महाभाग्यंतदाकिंतुकथमेनंवदेच्चकः ॥ २१ ॥ अथप्रातःसमुत्थाय
तेसर्वेचलिताद्रुतम् ॥ मूर्तिमुत्थापयंतस्तुनोत्तस्थौतत्रसंस्थिता ॥ २२ ॥ कूवादासंतदासर्वेप्राहुर्नान्यंगमिष्यति ॥ इदमेवगृ
हंतस्यहृद्यंत्वद्भक्तितोभवत् ॥ २३ ॥ एवंभक्तिवशस्तस्यमठेतस्थौनिरंतरम् ॥ एकदाशंखचक्राब्जगदादिग्रहणायसः ॥ २४ ॥
चलितोद्वारकांसाधुस्वरूपेणहरिर्निशि ॥ स्वप्नेप्रोवाचमागच्छगृहेसर्वंभविष्यति ॥ २५ ॥ इतिश्रुत्वानिवृत्तोभूदागत्यभवनेस्थितः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्षितंगुरुणास्वयम् ॥ ४ ॥ जातानिमंत्रिताःसर्वेसाधवश्चाळितास्तदा ॥ गुरुस्तावाहचार्यांतिसाधवोनात्रसंशयः ॥ ५ ॥ यथेष्टंचयुवां
साधून्मुदाभोजयतसुभौ ॥ अथागतान्यंचदिनंभोजयामासतुर्मुदा ॥ ६ ॥ प्रदक्षिणंचक्रतुस्तौगुरोराज्ञांप्रगृह्यताम् ॥ नामदेवकबीरादी
न्दृष्ट्वासंभाष्यचागतौ ॥ ७ ॥ ततोगुरुस्तुतान्सर्वान्यथायोग्यंददौमुदा ॥ विसर्जयामासपुनर्निजंदोषंक्षमापयन् ॥ ८ ॥ चतुरदासछो
तयश्चवासकर्णोलपातथा ॥ देवदामोदरोनाथभट्टोरसिकरायकः ॥ ९ ॥ एवमद्भुतरायश्चकीलहशिष्याहरिप्रियाः ॥ श्रीमन्नारायणो
भट्टोजीवगोस्वामिसेवकः ॥ १० ॥ शेषावतीतिनाम्नाभूत्षडेळायांनृपोत्तमः ॥ तत्पुरोधाःपर्शुरामःकन्यैकातस्यचाभवत् ॥ ११ ॥
करमौतीतिनाम्नावैमहाभक्ताहरेःप्रिया ॥ विषयेष्वनभिज्ञासावयसातुयुवत्यपि ॥ १२ ॥ राधाकृष्णैकहृदयापतिस्तस्याःसमागतः ॥
नेतुंस्वमंदिरेतांतुश्रुत्वासातीवदुःखिता ॥ १३ ॥ अतःपरंतुसंसारगर्तेमांपातयिष्यति ॥ अयंपतिरयंतातइयंतुजननीमम ॥ १४ ॥
विहायनश्वरंकृष्णंपतिंनित्यसुखास्पदम् ॥ करिष्याम्यथपत्याहंकिमनेनविनश्यता ॥ १५ ॥ इतिनिश्चित्यसाबालाकृष्णैकशरणानि
शि ॥ निस्ससारगृहाद्दूरमुषःकालंविलोक्यसा ॥ १६ ॥ उष्ट्रास्थिपंजरंदृष्ट्वानिलीयतत्रसंस्थिता ॥ महादुर्गंधमपितत्प्रियंमेनेगृहाद्धि
सा ॥ १७ ॥ अथप्रातस्तदीयास्तामन्वेष्टुंसर्वतोगताः ॥ उष्ट्रास्थिनिकटेगत्वामुद्रयित्वातिगंधतः ॥ १८ ॥ प्रपलाय्ययुःसर्वेसातू
ष्णींतत्रसंस्थिता ॥ एवंदिनद्वयेजातेपरावृत्यगताजनाः ॥ १९ ॥ सापिनिर्गत्यगंगायांगत्वास्नात्वातिभक्तितः ॥ अलंकारंतुज्ञाति
भ्योदत्त्वावृंदावनंययौ ॥ २० ॥ अथतत्रगतैवापिमाथुरोब्राह्मणस्तदा ॥ आगत्यपर्शुरामंतंप्राहपुत्रीविचेष्टितम् ॥ २१ ॥ पर्शुराम
द्विजश्रेष्ठमथुरायांसुतातव ॥ अस्तिसूर्य्यसुतातीरेस्मरंतीश्रीहरिंसती ॥ २२ श्रुत्वैवंपर्शुरामस्तुपुत्रीसंनिधिमागतः ॥ रुदन्नुवाचतां

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुत्रींनासाछेदःकृतस्त्वया ॥ २३ ॥ यदायातागृहंत्यक्त्वाश्वशुरस्यगृहंव्रज॥भक्षयिष्यंतिविपिनेऽव्याघ्राःपुत्रिनसंशयः ॥२४॥ इतिश्रु
त्वापितुर्वाक्यंसातंप्राहातिभक्तितः ॥ भक्तिरेवनृणांश्रेष्ठायस्यसानैववर्तते ॥ २५ ॥ स्वतःसंछिन्ननासोस्तियदुक्तंश्वशुरगृहे ॥ व्रजेति
तच्चसपातिःपरित्यक्तोमयाधुना ॥२६ ॥ तदाकःश्वशुरोमेस्याद्व्याघ्राद्भीतिस्त्वयोदिता॥शरीरंभक्ष्यतेऽव्याघ्रैर्नतेनार्थोमनागपि॥ २७॥
त्वंविचारयभोतातगृहकूपेपतन्नपि ॥ नविजानासिचात्मानमुन्मत्तइवदृश्यसे ॥ २८॥ कस्तेपुत्रोथकापत्नीकस्तेबंधुर्धनंतुकिम् ॥ अंते
किमपिनैवास्तिसाहाय्यंतवभावय ॥ २९ ॥ पंचाशदब्दिकोजातःचर्वितस्यैवचर्वणम् ॥ नित्यंकरोषिविषयंसेवमानोविमोहितः ॥३०॥
इतिश्रुत्वासुतावाक्यंसुप्तोत्थितइवाभवत् ॥ आगत्यस्वगृहेकृष्णमूर्तिंसंस्थाप्यभक्तितः ॥ ३१ ॥ पूजयामासतांप्रेम्णापर्शुरामोनिरंतर
म् ॥ तत्याजराजसेवादिसर्वंलौकिकबंधनम् ॥ ३२ ॥ अथैकादिवसेराजासस्मारस्वंपुरोहितम् ॥ पर्शुरामस्तुनायातिकुतःकातिपयाद्दिना
त् ॥३३॥ इतिश्रुत्वागतश्चैकःपर्शुरामसमीपतः ॥ उवाचपर्शुरामंतंराजात्वांद्रष्टुमिच्छति ॥३४ ॥ इतिश्रुत्वापर्शुरामोऽब्रवीत्तंदूतमादरा
त् ॥ मद्वाक्यान्नृपतिर्वाच्योनाहंतवनमेभवान् ॥ ३५ ॥ राजराजेश्वरश्चान्योमिलितोभाग्यतोमम ॥ तस्यैवसेवनंकुर्वंभवाद्भिःक्ष
म्यतांमम ॥ ३६ ॥ इतिश्रुत्वावचस्तस्यदूतोराज्ञेन्यवेदयत् ॥ राजराजेश्वरोऽन्योपिमिलितोभाग्यतोमम ॥ ३७ ॥ राजाज्ञात्वावि
रक्तंतंतत्रगत्वास्वयंपुनः ॥ तन्मुखात्तनयावाक्यंश्रुत्वाराजाब्रवीच्चतम् ॥ ३८ ॥ अहंतेतनयामत्रसमानेतुंव्रजामिभो ॥ इत्युक्त्वा
नृपतिस्तत्रययौयत्रस्थितासुता ॥ ३९ ॥दृष्ट्वाकालिंदजातीरेराजावह्निशिखामिव ॥ जाज्वल्यमानांतेजोभिर्नकिंचिद्भाषितुंक्षमः॥४०॥
तथापिदूरतोनत्वाप्रांजलिःकिंचिदब्रवीत् ॥ब्रह्मचारिणितातस्तेविरक्तोभूत्त्वयाविना ॥४१॥ अतस्तेगमनंतत्रयुक्तमद्यनसंशयः॥ इतिश्रु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्वावचोराज्ञःकोसीतिप्राहतंनृपम् ॥४२॥ राजन्पिताखिलान्भोगान्भुक्त्वाभवदनुग्रहात्॥विरक्तश्चेदभूदद्यतदाधन्यतमस्तुसः ॥४३॥
त्वंतुकेनबलेनाद्यमहाभ्रांतइवासिभोः ॥ प्रायोराज्यमिदंनीत्वासहैवचगमिष्यसि ॥ ४४ ॥ पित्रापितामहेनापिनेतुंशक्यमभून्नयत् ॥
इतिश्रुत्वावचोराजागृहमागत्यसत्वरम् ॥ ४५ ॥ राज्यंसमर्प्यपुत्रायस्वयंवृंदावनंगतः ॥ स्थित्वातत्रनृपोदानैस्तोषयन्विप्रसज्जना
न् ॥ ४६ ॥ अंतेजगामवैकुंठंहरिभक्तिप्रसादतः ॥ खड्गसेनोग्वालिपुरेमहाभक्तोबभूवह ॥ ४७ ॥ कृष्णलीलानुसारीसन्नृत्यंकुर्वन्म
मारह ॥ गंगादासस्तथैवाभूद्वैष्णवोभक्तभक्तिमान् ॥४८॥ गोपालोव्रजवास्येवंमहाभक्तोबभूवह ॥ व्रजेवासोवनंतस्यश्रीकृष्णाग्रेतुनर्त
नम् ॥ ४९ ॥ नान्यत्रगमनंक्कापिभिक्षामादायभोजनम् ॥ इंद्रप्रस्थादेकदातुराजातत्रसमागतः ॥ ५० ॥ श्रुत्वागानंचनृत्यंचराजाती
वविमोहितः ॥ बलात्कारेणतंनिन्येदिल्लचांभक्तंसदुर्जनः ॥ ५१ ॥ तत्याजान्नंचपानीयंव्रजविश्लेषतःसतु ॥ अथराजानिशिस्वप्नं
ददर्शातिभयंकरम् ॥ ५२ ॥ व्रजेयापयगोपालंनोचेद्धन्मोनसंशयः ॥ इतिदृष्ट्वानृपःस्वप्नंतत्कालंपरमादरात् ॥ ५३ ॥ गोपालं
प्रेषयामासव्रजेसोप्यतिहर्षितः ॥ संतनामाबभूवैकोशिष्योनरहरेःसुतः ॥ ५४ ॥ लालदासोपिसत्कृत्यसाधूनंतेगतोहरिम् ॥ एवं
माधवदासोभूत्सर्वभूतसुहृत्तमः ॥ ५५ ॥ अग्रशिष्यःप्रयागाख्योगुरुंहरिममन्यत ॥ रराजनृत्यसमयेगायन्हरिकथामृतम् ॥ ५६ ॥
त्यक्त्वाकलेवरंप्रापवैकुंठभुवनंमहत् ॥ एवंचभक्तिमाहात्म्यंकथितंवैमनीषिभिः ॥ ५७ ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्ये
लालदासचरितंनामैकचत्वारिंशदधिकशततमःसर्गः ॥ १४१ ॥ छ ॥ आगरायामभूदेकोनाम्नाप्रेमानिधिर्द्विजः ॥ पौराणि
कोमहाभक्तःसदाचाररतःसदा ॥ १ ॥ सएकदाभाद्रमासिपर्जन्येचातिवर्षति ॥ ब्राह्मेमुहूर्तेपानीयंनेतुंस्नातुंसमुत्थितः ॥ २ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दिवाचंडालसंस्पर्शाद्गतोरात्रौसमुत्थितः ॥ स्नातुंजलंसमानेतुंद्वारदेशमुपागतः ॥ ३ ॥ दृष्ट्वामहांधकारंसकथंयामीतिचिंतयन् ॥तदैको
दीपिकांहस्तेकृत्वाग्रेयमुनांव्रजन्॥४॥दृष्टःपश्चात्प्रमुदितोजगामातिनिराकुलः ॥ तत्रस्नात्वाजलंनीत्वाचलितःस्वगृहंप्रति ॥५॥ पुनर्दी
पकमादायसोग्रतश्चलितोऽभवत् ॥ आगत्यसगृहद्वारिघटंधृत्वास्थितःस्वयम् ॥ ६ ॥ ज्ञातुंप्रदीपहस्तंतंतद्रूपेणातिमोहितः ॥ सततो
न्यत्रचागत्याकियद्दूरेतिसत्वरम् ॥ ७ ॥ निर्वाप्यतंप्रदीपंतुस्वयमंतर्दधेचिरात् ॥ दृष्ट्वाप्रेमनिधिस्तत्रविस्मितोगृहमाययौ ॥ ८ ॥
तदारभ्यसतत्याजपानीयाहरणंनिशि ॥ मत्वातंभगवद्रूपंस्वसहायार्थमागतम् ॥ ९ ॥ तस्यप्रेमनिधेर्गेहेकथायांपुरुषाःस्त्रियः ॥
बालवृद्धायुवत्यश्चसमागत्यप्रशुश्रुवुः ॥१०॥ एकदाकोपिदुष्टात्मादिल्लीशनिकटेगतः ॥ प्राहतंप्रेमनिधिनाक्रियतेतिविपातकम्॥११॥
आगरायांतुसर्वेषांस्त्रियआहृत्यवेश्मनि ॥ पुराणव्याजतस्ताभीरमतेऽर्थंचविंदति ॥ १२ ॥ इतिश्रुत्वाततोराजापदातींश्चतुरोद्रुतम् ॥
प्रेषयामासतानुक्त्वाकोपेननृपतिःस्वयम् ॥ १३ ॥ द्रुतमानयतप्रेमनिधिंपौराणिकंद्विजम् ॥ इत्युक्तास्तेसमागत्यदृष्ट्वाप्रेमनिधिंद्वि
जम् ॥ १४ ॥ धृत्वानिन्युर्नृपद्वारिसतुकृष्णंह्यपूजयत् ॥ भोजयित्वाजलंदातुंचलितस्तैर्धृतस्तदा ॥ १५ ॥ दृष्ट्वाप्रेमनिधिंराजाक्रो
धेनोवाचभर्त्सयन् ॥ अहोक्वभक्तिःक्वान्येषांसमुदायनिषेवणम् ॥ १६ ॥ इतिराजवचःश्रुत्वाप्राहप्रेमनिधिर्द्विजः ॥ अहंश्रीकृष्णचरितं
कथयामिनिजेगृहे ॥ १७॥ तत्रायांतिनसंदेहःपुरुषाश्चस्त्रियोपिच ॥ श्रोतुमेतत्तुजानामिसर्वामेमातरोनृप ॥ १८ ॥ इतिश्रुत्वानृपःक्रुद्धः
सत्यंसत्यमितिब्रुवन् ॥ भृत्यानाहातिरुद्धायंस्थापनीयःक्वाचिद्गृहे ॥ १९ ॥ ततस्तैरोधितोगेहेसस्मारश्रीहरिंहृदि ॥ श्रोतारोऽनशनाः
कृष्णंसंस्मरुर्दुःखिताभृशम् ॥ २० ॥ ततोराजानिशिस्वप्नेददर्शनिजदेवताम् ॥ अरेपिपासितोहंतुपानीयंदेहिसत्वरम् ॥२१॥ कुतोनैव

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पिबस्वेतिराज्ञोक्तेपुनरब्रवीत् ॥ महापिपासितोयस्यहस्तात्पातुंसमुद्यतः ॥२२॥ विनापराधंतंत्वंतुन्यरोधीर्दुष्टवाक्यतः ॥ इतिदृष्ट्वाश्रम श्चायमितिमत्वास्वपन्पुनः ॥२३॥ ततःपुनःसमागत्यतंदेवोवक्षसिक्रुधा ॥ पादेनताडयामासनपाययसिमांजलम्॥२४॥ ततउत्थायनृप तिःस्वयंतत्रसमागतः ॥ प्रणम्यप्रार्थयामासस्वापराधंक्षमापयन् ॥२५॥ सोपिस्नात्वाजलंदत्त्वाहृदयेश्रोतृभिःसह ॥ द्वितीयदिवसेदेवंसं पूज्यबुभुजेस्वयम् ॥ २६ ॥ एवंभजनदासोभूद्वाह्येदीनतरोभवत् ॥ महाभक्तोहरिंचित्तेसाक्षाच्चक्रेमनोजयात् ॥२७॥ बरेलाग्रामवास्येवं हरिर्नारायणोभवत् ॥ हुसंगाबादवास्यासीदुद्धवोभक्तभक्तिमान् ॥ २८ ॥ भेलसायांतुतुलसीरामःसाधूत्तमोभवत् ॥ कल्याणरामदासो सोपरमानंदसंज्ञितः ॥ २९ ॥ अथस्त्रियोमहाभक्तादमावार्द्धरमातथा ॥ मीराहीरामणीलालीनीरालक्षाचपार्वती ॥ ३० ॥ षीचनी केशिकाधानीमतीचयमुनातथा ॥ गंगाबाईतथाजीवाहर्षाराजकुमारिकाः ॥ ३१ ॥ एताःस्त्रियोमहाभक्ताकंधरःकेशवस्तथा ॥ एवंके वलरामोभूत्सर्वभूतसुहृत्तमः ॥ ३२ ॥ दृष्ट्वाकेवलरामस्तुहाहाकृत्वापतद्भुवि ॥ यथावृषस्यपृष्ठेभूद्दंडघातक्षतंतथा ॥ ३३ ॥ केवलस्या पिपृष्ठेभूत्सर्वैर्दृष्टंमहाद्भुतम् ॥ एवंनटवरग्रामेपृथ्वीराजस्तुनिर्ममः ॥ ३४ ॥ नचान्यभाषणंतत्रकेवलाराधनंहरेः ॥ तावन्मध्येकिमप्य स्तुशुभंवाशुभमेववा ॥ ३५ ॥ कदाचिन्नृपतिस्तत्रसमायातोतिकोपनः ॥ ग्राममध्येनाशकर्णगृहेतत्रागतःस्वयम् ॥ ३६ अथतस्या गतोभृत्योनतंप्राहकिमप्यसौ ॥ पूजयन्नेवतूष्णींसहरेरग्रेस्थितोमुदा ॥ ३७ ॥ अथागतःस्वयंराजाभृत्यवाक्येनकोपितः ॥ खड्गमादा यतद्भक्तिपरीक्षार्थंसनिष्ठुरः ॥ ३८॥ तावत्संपूज्यसोरामंद्वारमाच्छाद्ययत्नतः॥ बहिरेत्यपपातोर्व्यांदंडवत्तंस्मरन्हृदि ॥३९॥राजागत्वा तथादृष्ट्वानिश्चेष्टंतंमृतंयथा ॥ खड्गाग्रेणैवचरणौचिच्छेदस्वयमेवहि ॥ ४० ॥ नाशकर्णस्यनोपादौछिन्नौवाशोणितंस्रुतम् ॥ उत्थायच

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

लितोगेहेतदाभूपंददर्शह ॥ ४१ ॥ नमस्कृत्यांजलिंबद्ध्वाअहोभाग्यमितिब्रुवन् ॥ तस्मैतदग्रेराजापिजगर्हात्मानमात्मना ॥ ४२ ॥
वृथाछिन्नंपादतलमित्येवंविलपन्हृदि ॥ तद्राज्यस्यकरंतस्मैददौराजातिभक्तिमान् ॥ ४३ ॥ अथकालेनाशकर्णोममारश्रीहरिंभजन् ॥
श्रुत्वादिल्लीश्वरोराजामहाशोकाकुलोभवत् ॥ ४४ ॥ नाशकर्णस्ययःपूज्योरामस्तस्यार्चनायसः ॥ विप्रंनियुक्तवान्ग्रामंदत्त्वातस्मैमहो
त्तमम् ॥ ४५ ॥ हरिवंशश्चकल्याणश्रीरंगोविठ्ठलस्तथा ॥ सदानंदःश्यामदासअनुरागालषाभिधः ॥ ४६ ॥ सारुकल्याणनामानौवंशी
नारायणस्तथा ॥ चेलादासस्तुगोपालस्तथागोपालशंकरः ॥ ४७ ॥ महाभक्ताइमेख्याताःकीर्तिताहरिभक्तिदाः ॥ मथुरायांस्थिताः
केचिन्मथुराप्रांतभूमिजाः ॥ ४८ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येनाशकर्णचरितंनामद्विचत्वारिंशदधिकशततमःसर्गः ॥ १४२ ॥
जगदेवनृत्यस्यनाम ॥ ७ ॥ तुंबरुःक्षत्रियकुलेहरिदासोतिभक्तिमान् ॥ राजापिवैष्णवःप्रेमश्रीकृष्णेयस्यसर्वदा ॥ १ ॥ शरणागतरक्षायांशिविभूपसमः
सवै ॥ दानेदधीचिःस्वीकारपालनेबलिवन्नृपः ॥ २ ॥ प्रह्लादइवभक्तेषुश्रीमद्भागवतेषुच ॥ जयदेवइवप्रीतिदानेप्राणसमर्पकः
॥ ३ ॥ जगदेवोऽल्पभूमीशःश्रीकृष्णार्चनतत्परः ॥ एकादातुनटीकाचिदागतातत्रनर्तितुम् ॥ ४ ॥ देवतानुगृहीतासानृत्यगान
विशारदा ॥ नृत्यंतींतांहरिदासोदृष्ट्वातुष्टोबभूवह ॥ ५ ॥ दत्त्वाधनान्यतृप्तःसन्शिरोदातुंसमुद्यतः ॥ नटींदक्षेणहस्तेनगृहीत्वा
पुनरब्रवीत् ॥ ६ ॥ राजन्गृहीतमेतत्तेशिरोदक्षेणपाणिना ॥ नानेनाहंग्रहीष्यामिकस्मादपिनसंशयः ॥ ७ ॥ तवएतच्छिरोरा
जंस्त्वयितिष्ठतुमामकम् ॥ इतिश्रुत्वानटीवाक्यंराजाछेत्तुंन्यवर्तत ॥ ८ ॥ नर्तकीवापितद्रागादन्यत्रप्रययौशुभा ॥ तत्रत्यभू
पस्तांश्रुत्वासर्वनृत्यकलावतीम् ॥ ९ ॥ नर्तयामाससदसिदृष्ट्वानृत्यंतुतोषह ॥ धनंदातुंसमुद्युक्तंसापितत्रचनर्तकी ॥ १० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वामंप्रसारयामासकरंदानजिघृक्षया ॥ तदानिवृत्तोनृपतिर्नर्टींप्राहातिकोपनः ॥ ११ ॥ किमेवमपमानंमेमूर्खेंकर्तुमिहेच्छसि ॥ श्रुत्वैव
सानटीप्राहनाहंकुर्वेतथानृप ॥१२ ॥ दत्तोयंदक्षिणोहस्तोजगद्देवायवैमया ॥ अनेनतुगृहीतंयत्तत्कोप्यर्पयिष्यति ॥ १३ ॥ अतोहंनै
वगृह्णामिदक्षहस्तेनभूपते ॥ इतिश्रुत्वानृपःप्राहकिंतद्ददद्दाम्यहम् ॥ १४ ॥ इत्युक्तासानटीभूपंप्राहगत्वानयाम्यहम् ॥इत्युक्त्वायातुत
त्कालंजगदेवसमीपगा॥ १५॥मदीयंवस्तुदेहीतिश्रुत्वाराजाददौशिरः॥ततःसानर्तकीराजदेहंसंस्थाप्यचक्राचित्॥ १६ ॥ शिरोगृहीत्वातं
भूपंदर्शयामासचाद्भुतम्॥राजन्निदंगृहीतंभोदक्षहस्तेनवैमया॥ १७॥दृष्ट्वाराजामुमूर्च्छाथनमश्चक्रेनर्टींतुताम् ॥अथसानर्तकीमुंडंजगदेव
शरीरके॥ १८॥योजयामासशक्त्यावैसोप्युत्तस्थौनृपःस्वयम्॥एवंभूतोजगदेवइतिश्रुत्वातुकस्यचित्॥ १९॥राज्ञःपुत्रीचजनकंप्राहनिश्चि
तमानसा ॥ जगदेवःपतिश्चेत्स्यात्तदापाणिग्रहोमम ॥ २० ॥ इतिश्रुत्वापितातस्याजगदेवमुपाह्वयत् ॥ उवाचतनयामेनांगृहाणविधिना
मम ॥ २१ ॥ नस्वीचक्रेजगदेवःप्रार्थितोपिमुहुर्मुहुः ॥ प्रतिजज्ञेमृतोप्येषनतांद्रक्ष्यामिकन्यकाम् ॥ २२ ॥ ततःकन्यापिताक्रुद्धोज
गदेवस्यवैशिरः॥छित्त्वातत्सम्मुखीकृत्यकन्याग्रेधारितंक्रुधा॥२३॥अथतन्मस्तकंतत्रविपरीतमुखंत्वभूत्॥ नकन्यायाःसंमुखेवैस्थितमे
तन्महाद्भुतम् ॥ २४ ॥ अथतंतुमृतंज्ञात्वापश्चात्तापोमहानभूत् ॥ राजादीनांतुसर्वेषामेतस्मिन्नंतरेनटी ॥ २५ ॥ सैवागतादद्दर्शा
थजगदेवंतुतादृशम् ॥ स्वशक्त्यायोजयामासशिरोदेहेतुतत्क्षणात् ॥ २६ ॥ जगदेवःसमुत्तस्थौनीत्वातंनर्तकीययौ ॥ एवंनिश्चितबु
द्धिःसहरिदासोतिवैष्णवः ॥ २७ ॥ तस्यैकाकन्यकाह्यासीत्पूजावस्तुविधायिनी ॥ एवंमेकथितोगेहेवैष्णवोतियुवासवै ॥ २८ ॥
राजपूजार्थपुष्पादिसमानयनकारकः ॥ परंतुविषयज्ञानरहितौतावुभावपि ॥ २९ ॥ एकदासतुवैसाधुर्ग्रीष्मेप्रासादमस्तके ॥ अट्टालि

क.स्पि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कायांसुप्तःसराजकन्यापिसायथौ ॥ ३० ॥ शिश्येतत्रैवधर्मार्तौनिर्विकारेणचेतसा ॥ अथप्रातर्हरिदासोगतस्तत्रददर्शतौ ॥ ३१ ॥ शयानावेकशय्यायामाश्लिष्टौनिद्रिताबुभौ॥ दृष्ट्वास्वीयांबरंताभ्यांददावुपरिचस्वयम्॥३२॥आगत्याधोनचुक्रोधराजकार्य्यपरोभवत् ॥ अथतावुत्थितौदृष्ट्वाराजवस्त्रंतुशंकितौ ॥ ३३ ॥ दृष्ट्वावांसदृशौराजाकिंज्ञास्यतिहृदिस्वयम् ॥ इत्येवंचिंतयन्साधुश्चालितोन्यत्रदुःखितः॥३४॥अथराजातमेकांतेबोधयामासमाव्रज॥धनंग्रामान्प्रदायास्मैनृपतुल्यंचकारतम्॥३५॥एतयोरुभयोश्चित्तेनविकारोबभूवयत् ॥ हरिदासोपितंदृष्ट्वानचुकोपातिसाधुतः॥३६॥कृष्णदासोबभूवैकोमहाभक्तोहरेःपुरः॥नृत्यतस्तस्यचैकस्माच्चरणान्नूपुरंच्युतम् ॥ ३७ ॥ सचैकचित्तोनावैतितत्पादेकोपिबालकः॥दिव्यंतुनूपुरंदत्त्वागतःपत्न्यानिरीक्षितः ॥ ३८ ॥ नृत्यांतेसास्त्रियंदृष्ट्वादिव्यमेकंतुनूपुरम् ॥ कस्मादितिह्यभूदेतत्प्राहसाप्यब्रवीवच्चतम् ॥ ३९ ॥ एकस्तेबालकःपादेनृत्यतोनूपुरंददौ ॥ इतिदृष्टंमयास्वामिन्श्रुत्वैतत्प्रणनामताम्॥४०॥ अथसंन्यासिनोभक्ताःकीर्त्यंतेनामतोमया ॥ श्रीदामोदरतीर्थाख्योमाधवःस्वामिसंज्ञकः ॥४१॥ रामभद्रस्वामिनामातथाश्रीमधुसूदनः ॥ सरस्वत्युपनामासौगीताव्याख्याकरोमहान् ॥ ४२ ॥ अपरोजगदानंदःप्रबोधानंदइत्यपि ॥ कृत्वाचैतन्यशिष्योयंवृंदावननिवासकृत् ॥ ४३ ॥ कील्हशिष्योबभूवैकोद्वारकादाससंज्ञकः ॥ एवंपूरणदासोभूत्तथालक्ष्मणभट्टकः ॥ ४४ ॥ कृष्णदासस्तुयःपूर्वमुक्तःसतुवनेगतः ॥ पयोव्रतीतत्रचैकःसायंकालेसमागतः ॥ ४५ ॥ क्षुधार्दितोव्याघ्रएकःकृष्णदासस्यसन्निधौ ॥ तूष्णींतस्थौततःकृष्णदासोतीवदयान्वितः ॥ ४६ ॥ उत्थायाग्रेतृणंदत्त्वाविशात्रेत्यब्रवीद्वचः ॥ भक्षयेदंशरीरंमेइत्युक्त्वाततसमीपतः ॥ ४७ ॥ श्रुत्वाव्याघ्रस्तृणेतस्मिन्नुपविष्टःक्षुधार्दितः ॥ शशाकनैवकिंचित्सकर्तुंत्यक्तंचभक्षितम् ॥ ४८ ॥ ज्ञात्वैतत्कृष्णदासस्तु

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जंघायांसविनिभ्यस्तः॥ददौव्याघ्रायमुदितोबुभुजेसोतिहर्षितः ॥४९॥ किंचित्पत्रेपरित्यज्यसोऽस्थितःप्रययौक्कचित् ॥ पुनश्छेत्स्यत्यथंजं
घामितिज्ञात्वात्यजन्कियत् ॥ ५० ॥ अथांतरेतुभगवान्स्वयंवैष्णवरूपधृक् ॥ समागत्यचपस्पर्शददौतत्रौषधंकिमु ॥ ५१ ॥
निर्व्यथंपूर्ववत्सद्योजातंजंघास्थलंशुभम् ॥ एवमातिथ्यवत्साधुःकृष्णदासोतिवैष्णवः ॥ ५२ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्ये
नर्तकीभक्तिवर्णनंनामत्रिचत्वारिंशदधिकशततमःसर्गः ॥ १४३ ॥ ॥ छ ॥ ॥ दक्षिणेविष्णुभक्तोभूच्छ्रीगदाधरदासकः ॥ सवुप
नपुरग्रामेएकदागत्यसंस्थितः ॥ १ ॥ ग्रामाद्बाह्येतिवृष्टिस्तुबभूवाथचतत्स्थलात् ॥ समुत्तस्थौस्थितस्तत्रकाष्ठपाषाणवन्मुदा ॥२॥
अथतत्रागतश्चैकोवणिक्श्रीकृष्णभक्तिमान् ॥ सतस्मैप्रददौतत्रकृष्णमंदिरमुत्तमम् ॥ ३ ॥ तत्रमूर्तिंहरेर्धृत्वाभक्त्यांश्चपूजयन्स्थितः ॥
तस्यचेदंव्रतंनित्यंमहाभक्तस्यचाद्भुतम् ॥ ४ ॥ नकिंचिन्मंदिरेस्थाप्यंदातव्यंसर्वमेवहि ॥ एकस्मिन्दिवसेकिंचिच्छिष्येणैकेनरक्षि
तम् ॥ ५ ॥ प्रातरर्थेतदप्याशुदापयामासवैस्वयम् ॥ शिष्यमाहपुनःप्रातर्भविष्यातिनंसशयः ॥ ६ ॥ अथजातंदिनंतत्तुद्वितीयादिवसे
गृहे॥भोक्तुंनैवागतंकिंचित्शिष्यःसपीडितःक्षुधा ॥ ७ ॥ चकारमनसाचेतःकदायास्याम्यहंसुखम् ॥ भोक्ष्येगत्वान्यभवनेइतिदुःखा
दचिंतयत् ॥ ८ ॥ दृष्ट्वाक्षुधार्तिनंशिष्यंगुरुश्चातीवचिंतितः ॥ अथांतरेतुभगवान्नीत्वामुद्राशतद्वयम् ॥ ९ ॥ श्रीगदाधरदासायद
दौवैद्यस्वरूपधृक् ॥ सतुशिष्यंसमाहूयगृहीत्वेदंव्रजाधुना ॥ १० ॥ कदायास्यामिचेत्येवंसफलस्त्वन्मनोरथः ॥ इतिश्रुत्वास
शिष्यस्तुलज्जतस्तंक्षमापयन् ॥ ११ ॥ तस्थौसेवानुकूलःसगुरुस्तस्मात्समुत्थितः ॥ वृंदावनमथागत्ययावज्जीवमुवाससः ॥१२॥
अथनारायणदासोबद्रीनाथस्यदर्शनम् ॥ श्रीमत्केशवदेवस्यद्वारिवासंचकारह ॥ १३ ॥ दृष्ट्वैकंतत्रवृत्तांतंसोतिदुःखममन्यत ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इतिज्ञात्वासभक्तस्तुतान्सर्वानेकदाब्रवीत् ॥ १४ ॥ भवंतोयांतुनिःशंकंदर्शनार्थंनसंशयः ॥ अहंपश्यामिभवतामुपानहइमाः
पुनः ॥ १५ ॥ तदादिसर्वेनिःशंकंददृशुःकेशवंजनाः ॥ एवमेकादिनेकोपिदुष्टएकःसमागतः ॥ १६ ॥ धृत्वातंभारवाहार्थंनिन्ये
तस्माद्बहिःक्वचित् ॥ वस्तुयोऽट्टालिकांवद्धाददौतन्मस्तकोपरि ॥ १७ ॥ नीत्वाभारंसुखीसोपियियौदुष्टमनाव्रजन् ॥ अथयातः
कियद्दूरंतत्रैकोमिलितःपथि ॥ १८ ॥ दृष्ट्वानारायणदासंनमस्कृत्याब्रवीच्चतम् ॥ दुष्टंकिमेतत्तेकर्म्ममहानर्थप्रदायकम् ॥ १९ ॥
अथजगद्गुरुःसाक्षाद्भगवंतंहिपश्यति ॥ धृत्वातंभृत्यवद्भारंवाहयिष्यसिनिर्भयम् ॥ २० ॥ इतिश्रुत्वासदुष्टोपिप्रणनामक्षमापयन् ॥
सतुनारायणदासोनचुकोपयथास्थितः ॥ २१ ॥ दुष्टोपितंसेवमानोमहाभक्तोवभूवह ॥ भगवद्भक्तसंसर्गात्सापराधोपिवैतथा ॥ २२ ॥
भगवानितिनाम्नाभूद्भक्तोवैमथुरापुरे ॥ एकदायवनःकोपिप्रभुस्तत्रसमागतः ॥ २३ ॥ आज्ञांददौमहादुष्टोमालांमुद्रांचयःपुमान् ॥
धारयिष्यतितंचाहंहनिष्यामिनसंशयः ॥२४॥ ज्ञात्वैवंमाथुराःसर्वेमालांमुद्रांचतत्यजुः ॥ दुष्टप्रभुभयात्तत्रभगवान्नजहौपुनः ॥ २५॥
श्रुत्वातंदुष्टनृपतिर्भगवंतंसमानयत्॥उवाचतंममाज्ञांभोःकुतोनकृतवानसि॥२६॥ तवाज्ञालंघनेराजन्मृत्युरेवेतिवैश्रुतम् ॥ मालामुद्राप
रित्यागान्मृत्युरेवप्रियोमम ॥२७॥ इतिश्रुत्वाततोराजाचांडालायसमर्प्पयत् ॥ नीत्वेमंग्रामतोबाह्येजहीत्युक्तारहःपुनः ॥२८॥ उवाच
तत्रकिंत्वेषभीतोवक्ष्यतितत्क्षणे ॥ मदग्रेकथयत्वंभोइतिश्रुत्वाजगामसः ॥२९॥ नीत्वातंभगवद्दासंचांडालःप्राहतंपुनः ॥ सर्वेत्यक्त्वा
भयान्मालांजीवंतिसुखिनस्त्विह ॥३०॥ त्वंकुतोनत्यजस्येवंत्यक्त्वाजीवसुखीभव॥ इतिश्रुत्वाब्रवीत्तंतुचांडालंचातिहर्षितः ॥ ३१ ॥
प्राणत्यागंवरंमन्येमालात्यागान्नसंशयः ॥ तस्माद्यथेक्तंकर्तव्यंत्वयाचांडालसत्वरम् ॥ ३२ ॥ इतिश्रुत्वावचस्तस्यचांडालोप्यतिह

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

र्पितः ॥ समागत्याब्रवीत्सर्वं भगवद्दासभाषितम् ॥ ३३ ॥ राजाश्रुत्वास्वयंतत्रगत्वाबद्धांजलिस्तदा ॥ निपत्यपादयोर्भक्तंप्राहदोषं क्षमापयन् ॥ ३४ ॥ धन्योसिभक्तराजत्वंतवभक्तिर्दृढाहृदि ॥ अतःपरंगृहाणत्वंयदिच्छसिधनादिकम् ॥ ३५ ॥ इतिश्रुत्वातुभगवान्न किंचिद्धनमैच्छत ॥ राज्ञेप्रसन्नहृदयोदत्त्वाशिषमथोययौ ॥ ३६ ॥ एवंकल्याणदासोभूत्सदोदारस्तुवैष्णवः ॥ गंगाधरस्यचशिष्याश्च आत्मारामस्तथैवच ॥ ३७ ॥ गोविंददासइत्येवमाद्याभक्तास्तथापरे ॥ येषांतुस्मरणंनृणांहरिभक्तिप्रदायकम् ॥ ३८ ॥ ॥ इतिश्री भगवद्भक्तिमाहात्म्येगोविंददासचरितंनामचतुश्चत्वारिंशदधिकशततमःसर्गः ॥ १४४ ॥ वासवकुमारनामाभूद्राजाचातीववैष्णवः ॥ सकृष्णमूर्तिंसर्वत्रनीत्वावव्राजसर्वदा ॥ १ ॥ दास्यकर्म्मतुतन्मूर्तेश्चक्रेतस्यात्विदंव्रतम् ॥ इंद्रप्रस्थंकदाचित्ससमायातोनृपाज्ञया ॥ २ ॥ तत्रपूजार्थमुदकंयमुनातःसमानयत् ॥ जयसिंहेनदृष्टःसन्सस्तुतंःपरमादरात् ॥ ३ ॥ धन्योऽसित्त्वंमहाराजतवैवजन्मसार्थकम् ॥ य स्त्वमेवंहरेर्भक्तिंकुरुषेदंभवर्जितः ॥ ४ ॥ इतिश्रुत्वासनृपतिर्जयसिंहमुवाचह ॥ काम्मेभक्तिर्महाराजभक्तातेभगिनीपरा ॥ ५ ॥ नाम्नादीपकुमारीतिनतद्भक्तिकलापिमे ॥ ययासाकंहरिःसाक्षात्स्वयंवसतिसर्वदा ॥ ६ ॥ श्रुत्वेदंतस्यवचनंजयसिंहोतिहर्षितः ॥ ग्रामोत्पन्नैर्धनैःसार्धंस्तोषयामासभक्तितः ॥ ७ ॥ गिरिधरेतिनाम्नैकोगोपोभूद्वैष्णवोत्तमः ॥ साधुपादोदकंभक्त्यापपौतस्यदृढंव्रतम् ॥ ८ ॥ एकदाकतिचिद्धूर्ताएकत्रीभूयचागताः ॥ गृहीत्वासाधुमृतकमाहुरग्रेनिधायताम् ॥ ९ ॥ अहोयंवैष्णवःसाधोर्गृह्यतांचरणो दकम् ॥ इतिश्रुत्वागिरिधरस्तत्कालंपरयामुदा ॥ १० ॥ प्रक्षाल्यचरणौतस्यजग्राहचरणोकदम् ॥ ततस्तत्कालमेवासौजिजी वसशवोद्धुतम् ॥ ११ ॥ दृष्ट्वासर्वेपितेधूर्ताःप्रशंसंतःपलायिताः ॥ भयात्तदग्रेनस्थातुंशेकुस्तेदुष्टचारिणः ॥ १२ ॥ गोपाली

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नामतःकाचिद्गोपीभक्तिमतीह्यभूत् ॥ बालगोविंदरूपंसाध्यायंतीमातृवत्सदा ॥१३॥ सातदैवगतिंप्रापबालगोपालसेवनात् ॥ रामदासो
बभूवैकोमथुरायांतुभक्तिमान् ॥ १४ ॥ वसन्वत्सवनेसोथसाधुसेवांचकारह ॥ एकदातस्यकन्यायाविवाहसमयोह्यभूत् ॥ १५ ॥
कृत्वापक्वान्नमखिलंगृहेसंस्थाप्यतत्सुता ॥ मात्रासहगताक्वापिनिमंत्रणवशेनवै ॥ १६ ॥ अथागताबुभुक्षार्ताःसाधवोराममंदिरे ॥
कुत्रास्तिरामदासश्चेत्यूचुःश्रुत्वातुसोत्थितः ॥ १७ ॥ पादप्रक्षालनंकृत्वापक्वान्नंह्यखिलंददौ ॥ भोजयित्वागृहद्वारंकपाटेनपिधायच
॥ १८ ॥ तूष्णींतस्थौबहिर्गत्वासमायातस्ततस्तुसः ॥ सायंकालेतुमिष्टान्नगृहेदीपायसागता ॥ १९ ॥ ददर्शनैवपक्वान्नंपुत्रंप्राहातिदुः
खिता ॥ सोपिदृष्ट्वातिदुःखार्तःपित्रादत्तममन्यत ॥२०॥ तस्मिन्नेवक्षणेतस्यवरोद्वारिसमागतः ॥ बंधुभिर्बहुभिःसार्द्धंतंदृष्ट्वातीवचिंतितः
॥ २१ ॥ रामदासोपितेसर्वेवैष्णवाअपिचिंतिताः ॥ तन्मध्येकोपिचायातोमिष्टान्नंद्रष्टुमुत्सकः ॥ २२ ॥ तदैवभक्तिमाहात्म्या
त्कृपयाश्रीहरेरपि ॥ मिष्टान्नंपर्वताकारंदृष्ट्वासोतीवहर्षितः ॥ २४ ॥ दर्शयामासतान्सर्वान्ततस्तेतीवहर्षिताः ॥ भोजयामा
सुरादायगृहान्मिष्टान्नमेवते ॥ २४ ॥ मत्वाहरिकृपांपूर्णांबभूवुस्तेगतव्यथाः ॥ एवंसारस्वतोविप्रोरामरायोबभूवच ॥ २५ ॥ महाभ
क्तःसाधुसेवीवृंदावननिवासकृत् ॥ सुजानृपतिमंत्रीतुभगवंतेतिविश्रुतः ॥ २६ ॥ वृंदावननिवासिभ्यःसाधुभ्योर्थंददौमुदा ॥ एकदा
चलितस्तस्यगुरुर्वृंदावनात्स्वयम् ॥ २७ ॥ भगवंताख्यनिकटेश्रुत्वासोतीवहर्षितः ॥ पत्नींप्राहप्रियेभ्येतिगुरुस्तस्मैददावकि
म् ॥ २८ ॥ श्रुत्वासापिमुदाप्राहसर्वस्वंगुरुवेर्पय ॥ भूत्वाचातीवसोद्विग्नःपादौद्रक्ष्याम्यहंकदा ॥ २९ ॥ इतिचिंतापरोवित्तान्यादाय
स्वयमागतः ॥ भक्त्यासमर्प्यगुरवेसाधुभ्योप्रददौधनम् ॥ ३० ॥ स्थित्वाकियद्दिनंतत्रगतःसभवनंस्वकम् ॥भुक्त्वाभोगान्खिलांस्तत्र

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चांतेरोगसमन्वितः ॥ ३१ ॥ वृंदावनायगेहात्तुचलितोबंधुभिर्यदा ॥ गतोऽतिकेतदाबंधून्पप्रच्छनयथकभोः ॥ ३२ ॥ ऊचुर्वृंदावनंयामः
श्रुत्वातान्संन्यवारयत् ॥ अहोत्रैवतुरक्ष्योहंगत्वातत्रगमिष्यति ॥ ३३ ॥ नेमंमलमयंदेहंतत्रधक्ष्यथवैमम ॥ दह्यमानाच्छरीरात्तुदु
र्गंधःप्रभविष्यति ॥३४॥ साधूनांचप्रभोश्चैवचेतोनुत्साहकारकः॥इत्युक्त्वासमृतस्तत्रतस्मिन्नेवक्षणेनवै॥३५॥ सर्वैर्वृंदावनेदृष्टएकाकी
कुंजमध्यगः ॥ पुनर्नैवचकेनापिदृष्टःकुत्रापिसोद्भुतम् ॥ ३६ ॥ एवंलालमतीबाईराधाकृष्णप्रियाभवत् ॥ वंशीवटेतथाकुंजेकालिंदीपु
लिनेतथा ॥ ३७ ॥ गोवर्द्धनेतथारण्येद्वादशस्वापिसर्वदा ॥ अन्वेषयंतीतंप्रेम्णायत्रयत्रजनोब्रवीत् ॥ ३८ ॥ वहंतीप्रापतौभक्त्याराधा
कृष्णौतपस्विनी ॥३९॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येलालमतीचरितंनामपंचचत्वारिंशदधिकशततमःसर्गः ॥ १४५ ॥ छ ॥
अंतर्वेदेवभूवैकःचिलौलीग्रामसंभवः ॥ द्विवेदस्तुजगन्नाथनामाशास्त्रधनैर्युतः ॥ १ ॥ एकदावाजपेयेनयष्टुंचक्रेमनोद्विजः ॥ ग्रामेतुचं
दनपुरेसंभारान्बहुशोकरोत् ॥ २ ॥ अध्वर्य्युर्वोऋत्विजश्चहोतारश्चतथैवच ॥ उद्गातारःसमायातावाराणस्यानिमंत्रिताः ॥ ३ ॥ अन्ये
त्वामंत्रितास्तेनयेचांतर्वेदवासिनः ॥ आगत्यब्राह्मणाःसर्वैराजानःसपुरोहिताः ॥ ४ ॥ तत्रकूपोदकंचासीत्समुदायोमहानभूत् ॥ सर्वेस
शंकिताश्चित्तेविनावारितुकिंभवेत् ॥ ५ ॥ जगन्नाथस्तुगंगायाभक्तोलपावधिसंस्थितः ॥ गंगापूजांप्रकुर्वाणोगंगानामजपन्प्रियम् ॥
॥ ६ ॥ गव्यूत्युपरिगंगाचप्रवहंतीस्थितातदा ॥ गंगांतांतुजगन्नाथोगत्वास्तुत्वान्यमंत्रयत् ॥ ७ ॥ विष्णुपादार्घसंभूतेगंगेत्रैलोक्यता
रिणिम् ॥ निमंत्रयामित्वांदेवितत्रायाहिकृपांकुरु ॥ ८ ॥ इतिसंप्रार्थ्यगंगांससमायातोगृहंद्विजः ॥ सुप्त्वापरात्रौसर्वेषांशिष्टाचारं
विधायच ॥ ९ ॥ अथरात्रौसमायातागंगातद्वाससन्निधौ ॥ जलकल्लोलनिर्घोषबोधिताखिलमानवाः ॥ १० ॥ आगत्यतज्जलंमागांत

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रेणचययौपुनः ॥ गंगायामेवतावत्स्वस्थानांतरमिवाभवत् ॥ ११ ॥ अथोत्थितास्तुकल्लोलनिर्घाताद्ग्रामवासिनः ॥ निमंत्रिताअपिज
नाजगन्नाथोपितैःसह ॥ १२ ॥ गंगायाअग्रतोभूत्वापूजयामासभक्तितः ॥ स्तुत्वासर्वेज़नागंगांजगन्नाथंचतुष्टुवुः ॥ १३ ॥ प्रातरारभ्य
तेसर्वेस्तुत्वापानावगाहनैः ॥ क्रीडंतोजाह्नवीतोयेजाताःसर्वेतिहर्षिताः ॥ १४ ॥ ततोजातेवाजपेयेसुवर्णानिचदक्षिणाः ॥ दत्त्वाविस
र्जयामासब्राह्मणानतिभक्तितः ॥१५॥ गतेषुसर्वविप्रेषुतुष्टेसामाजिकेजने॥ जगन्नाथस्तुसंभारान्दातुंगंगातटेययौ ॥१६॥ संप्रार्थ्यजाह्नवीं
देवींतदोवाचकृतांजलिः॥मातर्गंगेनमस्तेस्तुक्षमस्वदुर्नयंमम॥१७॥ तदारभ्यद्विवेदोपिवाजपेयीबभूवह॥एवंभक्तस्तुमाहात्म्यंयद्गंगास
मुपागता ॥ १८ ॥ अद्यापिवर्षासमयेतत्रायातिचजाह्नवी ॥ प्रसिद्धमेतत्सर्वत्रकान्यकुब्जेषुवैनृणाम् ॥ १९॥ तस्यापिसंततिर्देशेसंवर्ते
तिप्रतिष्ठिता ॥ मनीरामइतिख्यातोवाजपेयीवटेश्वरे ॥ २० ॥ सोतिभक्तोदयायुक्तएकपुत्रोबभूवह ॥ एकदातस्यपुत्रस्तुममारदैवयो
गतः ॥ २१ ॥ मनीरामस्तुशोकार्तोगृहीत्वातनयंस्वकम् ॥ उपविष्टोहरिंध्यायन्तुष्टावप्राकृतैःपदैः ॥ २२ ॥ जातेशततमेपद्ये
उत्तस्थौसमृतःशिशुः ॥ दृष्ट्वासर्वेमहाश्चर्यंमनीरामंप्रतुष्टुवुः ॥२३॥ एवंभक्तिवशःकृष्णोजीवयामासबालकम् ॥ मिथिलायामभूदेको
विप्रोगोविंदठक्करः॥२४॥वेदशास्त्रार्थतत्त्वज्ञोगोपालार्चनतत्परः॥ काव्यप्रदीपकर्तासौदेवीपूजनपद्धतिम्॥२५॥ चकारमंत्रशास्त्रंससाध
कानांचसिद्धिदम्॥ नवीनंतुलसीपत्रंदत्त्वातुपूजनेहरेः॥२६॥ श्रीकृष्णायतदैवान्नंबुभुजेसचनान्यथा ॥यदान्नेनमिलत्येतत्तद्दिनेजलमप्य
सौ ॥ २७ ॥ नपपावितिसंकल्पस्तस्यनित्योमहात्मनः ॥ एकदासतुकाश्मीरेथयौमम्मटपंडितम् ॥ २८ ॥ काव्यप्रकाशकर्तारंद्र
ष्टुंयात्रांसमाचरन् ॥ अंमटोमम्मटश्चैवकैयटश्चेतितेत्रयः ॥२९॥ कैयटोभाष्यटीकाकृत्अंमटोवेदभाष्यकृत् ॥ तद्गृहद्वारिगत्वासस्थि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तःपप्रच्छतत्स्त्रियम् ॥ ३० ॥ कुत्रास्तेमम्मटश्चापिद्रष्टुमिच्छाम्यहंतुतम् ॥ इत्युक्त्वासाब्रवीत्तंतुविशात्रैवागमिष्यति ॥ ३१ ॥
एषकूपोस्तिचात्रत्वंतावत्स्नानंसमाचर ॥ इत्युक्त्वासागतागेहेसोपिगोविंदठक्करः ॥ ३२ ॥ कूपेदूरतरंवारिचाप्राप्यायंतथाविशत् ॥
एवंगतेमुहूर्तेतुमम्मटोपिसमागतः ॥ ३३ ॥ श्मश्रुकेशधरश्चर्मकंचुकेपादयोर्दधत् ॥ तंदृष्ट्वायवनाकारंश्रीमद्गोविंदठक्करः ॥ ३४ ॥ शंकितो
मम्मटस्तंतुनमश्चक्रेतिभक्तिमान् ॥ आहाहंमम्मटोब्रह्मन्भवान्कस्मादिहागतः ॥ ३५ ॥ इत्युक्तःसोब्रवीत्तंतुजलमत्रास्तिदूरतः ॥ विना
तादृग्गुणेनात्रकथंस्नानंकरोम्यहम् ॥ ३६ ॥ इतिश्रुत्वावचस्तस्यमम्मटस्त्वरितोगृहे ॥ गत्वापात्रंसमानीयस्नानोपकरणंतथा ॥ ३७ ॥
आगत्यकूपनिकटेजलमादायपाणिना ॥ अभिमंत्र्यजलंकूपेचिक्षिपेतत्प्रभावतः ॥ ३८ ॥ आपूर्णमभवत्तत्रजलंकूपमुखावधि ॥
गोविंदठक्करंप्राहकुरुस्नानमिहागतः ॥ ३९ ॥ इत्युक्तोजलपात्रेणकरेणादायतज्जलम् ॥ सस्नौस्वयंददर्शैतच्छ्रीमद्गोविंदठक्करः ॥ ४० ॥
मत्वाश्चर्यंततःसोपिस्नानंचक्रेमुदान्वितः ॥ संपूज्यपक्त्वाभुक्त्वाचतस्थौगोविंदठक्करः ॥ ४१ ॥ मम्मटोपिसमायातोभ्रातृभ्यांस
हतत्रह ॥ अथकाव्यप्रकाशंतंदर्शयामाससमम्मटः ॥ ४२ ॥ गोविंदठक्करोदृष्ट्वाग्रंथंमम्मटनिर्मितम् ॥ काव्यप्रदीपंस्वकृतंदर्शया
मासतान्स्वयम् ॥ ४३ ॥ दृष्ट्वातेप्यतिसंतुष्टाविलिख्याथदद्दुश्चतम् ॥ गोविंदठक्करःकाव्यप्रकाशंजगृहेस्वयम् ॥ ४४ ॥ एवं
परस्परंस्नेहेजातेगोविंदठक्करः ॥ प्रतस्थेमिथिलाप्रांतेदासेनसहितोमुदा ॥ ४५ ॥ एकस्मिन्दिवसेमार्गेनप्राप्तंतुलसीदलम् ॥ अ
नशनस्तदातस्थौद्वितीयेदिवसेपुनः ॥ ४६ ॥ मार्गेच्युतोमहारण्येसंप्राप्तोतिपिपासितः ॥ बुभुक्षितस्तरुतलेतस्थौगंतुमशक्नुवन् ॥ ४७ ॥
दासमाहनचाहंतुगंतुंशक्नोम्यतःपरम् ॥ इत्युक्तःसतुदासोवैरुदंस्तत्रसमुत्थितः ॥ ४८ ॥ कियद्दूरेययौमार्गमन्वेष्टुंगांददर्शह ॥ गोपाल

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

बालमेकंतुश्यामंद्वादशवार्षिकम् ॥ ४९ ॥ पद्माक्षंकुंडिकामध्येवहंतंनवनीतकम् ॥ गाश्चारयंतंतत्रैवतडागंचददर्शह ॥ ५० ॥ त
त्तीरेतुलसीवृक्षंदृष्ट्वाहृष्टोबभूवसः ॥ गोपालंतंतुपप्रच्छनवनीतंभवद्गृहे ॥ ५१ ॥ मिलिष्यतिवदास्तिकभवनंतवयाम्यहम् ॥ दिनद्वय
मनाहारोद्वितीयेमृतवत्स्थितः ॥ ५२ ॥ अदत्त्वातुलसीपत्रंनवनीतमिदंत्वया ॥ विक्रीणीतेनकोप्यत्रकिंचेदंतुलसीदलम् ॥ ५३ ॥
गृहीत्वागच्छत्वरितंमद्वचष्ठक्करंवदन् ॥ नेदंसमुचितंविप्रव्रतंप्राणविनाशनम् ॥ ५४ ॥ भक्त्यैवभगवान्शीघ्रंसुलभोवर्ततेनृणाम् ॥ इति
श्रुत्वासदासस्तुगृहीत्वानवनीतकम् ॥ ५५ ॥ नीत्वाचतुलसीपत्रंत्वरितस्तत्रचागतः ॥ उवाचस्वामिनेलब्धंद्वयमस्मिन्वनेमया ॥५६॥
समीपेऽत्रतडागोस्तियामिनेतुंजलंत्वहम् ॥ इत्युक्त्वापात्रमादायशीघ्रमानीतवाञ्जलम् ॥ ५७ ॥ स्नापयित्वापूजयित्वाभोजयित्वा
तिहर्षितः ॥ स्वयंचबुभुजेदासःस्वामिभुक्तावशेषितम् ॥ ५८ ॥ ततस्तद्दासमाहेदंवचोगोविंदठक्करः ॥ कुत्रास्तिसतुगोपालस्तडाग
श्चापिकुत्रसः ॥५९॥ दृष्ट्वातौतुततोमार्गंज्ञात्वायास्याम्यरण्यतः ॥ इतिश्रुत्वासदासस्तुगृहीत्वास्वंचवस्तुहि ॥६०॥ चलितोधनिनासा
कंतत्रागत्यस्थितोभवत् ॥ अयंवृक्षस्तडागस्यतीरेदृष्टोमयातदा ॥ ६१ ॥ अत्रैवतुलसीदृष्ट्वागोपालस्त्वत्रसंस्थितः ॥ इतिश्रुत्वाततः
सोपिवनाद्बहिरथागतः ॥ ६२ ॥ क्वचिद्ग्रामेतिपप्रच्छजनानस्मिन्वनेमहान् ॥ जलाशयोभवद्भिस्तुज्ञायतेवर्ततेनवा ॥ ६३ ॥ इति
श्रुत्वाजनाआहुरत्रनैवजलाशयः ॥ वनेक्वापीतिजानीहिमिथ्यादासोवदत्ययम् ॥ ६४ ॥ पुनःपप्रच्छतंदासंगोपालःकीदृशस्त्वया ॥
दृष्टोब्रूहीतिश्रुत्वासउवाचातीवहर्षितः ॥ ६५ ॥ श्यामःकमलपत्राक्षःपुंडरीकदलेक्षणः ॥ द्वादशाब्दवयाःपीतवासादृष्टोगवानुगः
॥ ६६ ॥ इतिश्रुत्वावचस्तस्यदासोद्भुतमितिब्रुवन् ॥ सएवभगवान्सत्यमित्युक्त्वान्यपतद्भुवि ॥ ६७ ॥ ब्रह्मांडमस्यपुरस्फो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

टगतोसौहरिमंदिरम् ॥ सोपिदासःशवस्याग्रेविललापातिदुःखितः ॥ ६८ ॥ दाहयित्वाशवंतस्यरात्रौतत्रैवसंस्थितः ॥ स्वप्ने
ददर्शकोप्याहमाशोकंकुरुभोद्विज ॥ ६९ ॥ तस्येदंचरमंजन्मत्वत्संसर्गवशादयम् ॥ दृष्ट्वामामेवसंप्राप्तःकर्मणादासतांगतः
॥ ७० ॥ त्वमपिश्रद्धयाभक्त्यामांसंपूज्यनिरंतरम् ॥ मामेवैष्यसिसत्यंतेकथयामिनसंशयः ॥ ७१ ॥ एवंदृष्ट्वातुस्वप्नंसप्रात
रुत्थायधैर्यवान् ॥ ततश्चाल्पकतिभिर्दिनैरागतवान्गृहम् ॥७२॥ सचवाचजनान्सर्वान्तद्वृत्तंभक्तिपूर्वकम् ॥ श्रुत्वातिविस्मितास्सर्वे
प्रशशंसुश्चतंमुदा ॥ ७३ ॥ इत्येतत्सकलंख्यातंमिथिलायांगृहेगृहे ॥ तस्माद्भक्तेनचासाध्यंकिंचिन्नैवास्तिवैनृणाम् ॥ ७४ ॥ ॥ इति
श्रीभगवद्भक्तिमाहात्म्येजगन्नाथमनीरामगोविंदठक्कुरचरितंनामषट्चत्वारिंशदधिकशततमःसर्गः ॥ १४६ ॥ ॥ छ ॥ राम
प्रसादनामैवमयोध्यायामभूद्द्विजः ॥ त्यक्त्वासर्वमभूत्सोथरामभक्तोतिवैष्णवः ॥ १ ॥ सदागतानांसर्वेषांसाधूनांभोजनंददौ ॥
यावद्यस्यास्तिनिष्ठासासतावदत्रातिष्ठति ॥ २ ॥ इत्युक्त्वातस्यभक्तस्यजीविकानैवकापिवा ॥ कुतश्चिदागतंवित्तंतस्मात्तेनहिजीवि
का ॥ ३ ॥ एवंबहुदिनेकालेगतेचैकदिनेपुनः ॥ वणिग्ददौनसामग्रींभोजनार्थंसतांतदा ॥ ४ ॥ श्रुत्वासतूष्णींस्वगृहेतस्थौचिंतापरा
यणः ॥ अथरामप्रसादस्यरूपंधृत्वारघूत्तमः ॥ ५ ॥ गृहीत्वातावतीमुद्राययौतद्वणिजोगृहे ॥ वणिग्दृष्ट्वातुतंभक्त्याकृतांजलिपुटोऽ
ब्रवीत् ॥ ६ ॥ किमर्थमागतःस्वामिन्स्वयमेवेतिचासकृत् ॥ आहब्रुवंतंतंरामप्रसादस्यस्वरूपधृक् ॥ ७ ॥ नात्रदोषोगृहाणेदंधनंदे
हिचभोजनम् ॥ साधुभ्योहंतुगच्छामीत्युक्त्वासनिर्ययौततः ॥८॥ अथयातेकियत्कालेवणिक्तस्यतुमंदिरे ॥ रामप्रसादस्याग्रतःकृतां ॥१९७॥
जलिरुवाचतत ॥ ९ ॥ इतिश्रुत्वाब्रवीद्रामप्रसादोवणिजंतुतम् ॥ सहस्रावधितेजातंशृणुमद्यवणिक्शृणु ॥ १० ॥ तद्दत्त्वाभोज्यसा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मग्रीमानयिष्यामितेपुनः ॥ इतिश्रुत्वावचस्तस्यवणिगाहातिभक्तितः ॥ ११ ॥ इदानीमेवसर्वमेदत्त्वात्वंपुनरागतः ॥ किमिदंभाषसेना थेत्युक्त्वासतुवणिक्तदा ॥ १२ ॥ आगत्यभवनेनीत्वातामुद्रास्तत्रचागताः ॥ दर्शयामाससर्वान्वैसर्वेदृष्ट्वातिविस्मिताः ॥ १३ ॥ रामप्र सादभक्तस्तुतंनमामीतिभक्तितः ॥ हर्षाश्रुपरिपूर्णाक्षस्तुष्टावातिमुदान्वितः ॥ १४ ॥ एवंहिपरमाश्चर्यंज्ञात्वावैश्योपितत्क्षणात् ॥ बभूव तस्यशिष्योवैपरित्यज्यगृहादिकम् ॥ १५ ॥ सचरामप्रसादस्तुतेनवैश्येनसंगतः ॥ अन्यैश्चबहुभिःशिष्यैर्जगाममिथिलांपुरीम् ॥ १६ ॥ तत्रदृष्ट्वाजगद्धात्रींसीतांजनकमंदिरे ॥ संपूज्यतांनृपतिनातत्रत्येनतदासतु ॥ १७ ॥ रामग्रामंव्रजन्मार्गेममग्रामेसमागतः ॥ तत्रदृ ष्टःसपित्रामेपितृव्येनातिभक्तितः ॥ १८ ॥ तन्मुखात्तुमयासर्वमेतद्वृत्तंश्रुतंपुनः ॥ अत्यल्पेस्मिन्नपिदिनेभगवान्भक्तवत्सलः ॥ १९ ॥ प्रादुर्बभूवतद्रूपःसत्यमेतन्नसंशयः ॥ अथरामप्रसादस्तुस्थित्वातत्रकियद्दिनम् ॥ २० ॥ मार्गशीर्षेसमायातेशुक्लपक्षस्यसप्तमी ॥ यदागतोतदासीताविवाहस्यमहोत्सवम् ॥ २१ ॥ चक्रेराज्ञासमंभक्त्याश्रीमद्रामप्रसादकः ॥ तदासामिथिलासर्वाताहगानंदवत्यभू त् ॥ २२ ॥ एवंरामप्रसादोभूद्भगवद्भक्तिसत्तमः ॥ तेद्रष्टारश्चपुरुषाःसंतोभूवन्महीतले ॥ २३ ॥ तुकोजीपंठयनपुरेशूद्रोभक्तो बभूवह ॥ येनसाकंहरिःसाक्षाच्चक्रेसंभाषणंमुहुः ॥ २४ ॥ यस्यांतसमयेदेहोगतःपश्यत्सुवैनृषु ॥ कथाविस्तरतोऽन्यत्रवर्ततेतोन लिख्यते ॥ २५ ॥ तथैवरामदासोभूद्दक्षिणेरामसेवकः ॥ तस्यपुच्छमभूदेतज्ज्ञात्वासर्वैर्दृढीकृतम् ॥ २६ ॥ मारुतेरवतारोथंच मत्कारोऽपिताहशः ॥ दामाजीभृत्यचांडालवेषेणश्रीहरिःस्वयम् ॥ २७ ॥ राज्ञेमूल्यंददौसर्वंराजाचातीवहर्षितः ॥ दामाजीशर्मणेप त्रंप्रेषयामासभूपतिः ॥ २८ ॥ सतुदृष्ट्वाद्भुतंमेनेश्रीहरेर्वैविचेष्टितम् ॥ २९ ॥ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येरामप्रसादचरितंनामसप्तचत्वा

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

रिंशदधिकशततमः सर्गः ॥१४७॥ ७॥ ॥ इत्येतद्भगवद्भक्तिमाहात्म्यं कथितं मया॥ संदेहो नात्र कर्तव्यः सर्वं सत्यं न संशयः ॥१॥ यस्य भ
क्तिर्दृढा जाता धर्मो येन च रक्षितः ॥ विश्वासो यस्य हृदये शास्त्रं तस्यैव सिद्धिदम्॥२॥ इदानीमपि पश्यं तु संदिहाना महाद्भुतम् ॥ मिथ्याभिश
प्तः पुरुषो दिव्यं कुर्वन्हि शुध्यति ॥ ३ ॥ लोहं तप्तं करे कृत्वा शुद्धो नैव दह्यते ॥ अशुद्धस्तत्क्षणादेव दग्धपाणिः प्रजायते ॥ ४ ॥ जले
मग्नश्चिरं तत्र शुद्धस्तिष्ठस्तिगेहवत्॥ अशुद्धस्तत्क्षणादेव उन्मज्जति निमज्जति ॥ ५ ॥ एवं सर्पो धृतः शुद्धं नैव किंचिद्दशत्यहो ॥ अशुद्धं तत्क्ष
णादेव दशतीत्यद्भुतं महत् ॥ ६ ॥ एवं शास्त्रोदितं दिव्यमाहात्म्यं दृश्यते यथा ॥ अद्यापि भक्तिमाहात्म्यं तादृशं दृश्यते जनैः ॥ ७ ॥
अन्यत्र द्विजसंस्पृष्टं भोक्तुं नो जायते मनः ॥ जगन्नाथपुरे स्नाति सर्वश्रेष्ठद्विजोपि हि ॥८॥ तस्मान्मनो हि सर्वत्र सर्वेषां फलदं नृणाम् ॥ तस्मि
न्द्वैद्वे फलं तद्वन्संदिहाने फलं तथा॥९॥ ममैवानुभवो जातो यथा तत्कथयाम्यहम्॥ यथैतद्ग्रंथनिर्माणे मम बुद्धिरभूत्तथा ॥ १० ॥ अहं तु मै
थिलो वेणीरामशर्म्मा पिता मम ॥ तारादेवी तु जननी मदेकतनया तु सा ॥ ११ ॥ मात्रा वै चंद्रमाराध्य लब्धोहं यस्ततस्तया ॥ चंद्रदत्ते
ति मे नाम कृतमात्मजनोदितम् ॥ १२ ॥ मज्जन्मदिवसादब्दमध्ये माता दिवं गता ॥ पिता पुनर्विवाहं न स्वीचक्रे मां सुतं स्मरन् ॥ १३ ॥
अथाहं निजगेहे तु जातः षोडशहायनः ॥ लालितः स्वजनैः सर्वै रिंगमाणो यथामति ॥ १४ ॥ तदा तत्र गतः कश्चिद्दुर्जनो राजकार्य्यकृत् ॥
जीवनेति च नाम्ना स प्रेरितो म्लेच्छभूभुजा ॥ १५ ॥ मिथिलायां स सर्वेषां जीविकाऽपहृता बलात् ॥ तदा पलायिताः सर्वे ब्राह्मणा भयविह्व
लाः ॥ १६ ॥ ममाप्याग्रधनं ग्रामे कियद्राज्ञार्पितं स्थितम् ॥ तदर्थं तस्य भृत्यैस्तु गच्छन्मार्गे धृतो ह्यहम् ॥ १७ ॥ श्रुत्वा मां तु धृतं मो
हान्मतिपितृव्यः समागतः ॥ श्रीमद्राघवशर्म्मा थ तद्वाक्याद्भवने स्थितः ॥ १८ ॥ तं च मां च स दुष्टात्मा शृंखलाभ्यां बबंध ह ॥ बद्धा संतो ॥१९८॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

डयामासकशाभिर्निर्दयैर्जनैः ॥ १९ ॥ गृहेतेवर्ततेभूरिधनंमेसर्वमर्प्पय ॥ विद्धद्धनैवपापमित्युच्चैःसोऽब्रवीद्वचः ॥ २० ॥ मास्तरा
माभिधःसाधुरेकोग्रामपतिःस्थितः ॥ सोपिबद्धःकशाघातैःप्राणांस्तत्याजतत्क्षणात् ॥ २१ ॥ एवंसंताडयमानांश्चनिन्युःकारागृहेज
नान् ॥ तत्रसमत्पितृव्यस्तुमामुवाचदयान्वितः ॥ २२ ॥ आपदुद्धारणंनाममंत्रमापदितंस्मर ॥ इत्युक्तोहंतुतत्कालमारभ्याविर
तंस्मरन् ॥ २३ ॥ स्थितोवद्धस्तुतत्रैवगतमेवदिनद्वयम् ॥ तृतीयेदिवसेसुतोजीवनोनिश्ययैक्षत ॥ २४ ॥ एकोदंडधरोभ्येत्यद्रुतं
गालिंददन्पुमान् ॥ बद्धानिमान्विमुंचारेसर्वनाशस्तुतेह्यभूत् ॥ २५ ॥ त्वमपिप्रातरेवात्रविपत्तिंप्राप्स्यसिध्रुवम् ॥ इत्यर्द्धरात्रेहृष्ट्वा
सस्वप्नंतत्कालमुत्थितः ॥ २६ ॥ भृत्यानाहातिकोपेनकश्चिदत्रागतोनवा ॥ द्वारदेशेकपाटस्तुलापितोवर्ततेनवा ॥ २७ ॥ इत्यु
क्त्वासपुनर्दंडद्वयांतेचोत्थितोगृहात् ॥ भृत्यानाहूयसंत्रस्तःस्वप्नवृत्तमुवाचतान् ॥ २८ ॥ भ्रमोयमितितेसर्वेह्युक्त्वातूष्णींस्थिताभ
यात् ॥ तेषांमध्येह्यथैकस्तुस्वप्नवृत्तमुवाचनौ ॥ २९ ॥ दिनत्रयंनिराहारस्थितयोस्ताडयमानयोः ॥ आवयोरपिविश्वासाज्जात
मंतर्बलंतदा ॥ ३० ॥ प्रातःकालेचतुर्थेह्निपत्रंजीवनवेश्मनः ॥ समायातंवज्रपातसमंहृष्ट्वासमूर्च्छितः ॥ ३१ ॥ तस्यैकतनयोगेहे
ससुप्तःसहसोत्थितः ॥ अकस्मात्तत्रवह्निस्तुलग्नस्तत्रमृतःसुतः ॥ ३२ ॥ सपत्नीकोधनंसर्वंभस्मसादभवत्क्षणात् ॥ ज्ञात्वै
वंसुतवृत्तांतंलुंठतिस्मधरातले ॥ ३३ ॥ दृष्ट्वातूष्णींस्थितोथावामर्थंदंडद्वयांतरे ॥ तस्यस्थानेऽन्यपुरुषंप्रेषयामासभूप
तिः ॥ ३४ ॥ कायस्थंचातिकुशलंनाम्नाद्वंद्वबहादुरम् ॥ सतुपश्चात्स्थितस्तस्यभृत्यास्तत्कालमागताः ॥ ३५ ॥ रुदंतंजी
वनंकोपाच्चुक्रुशुश्चासनात्ततः ॥ बद्धासंस्थाप्यतंपश्चादावयोःशृंखलेद्रुतम् ॥ ३६ ॥ छेदयित्वाथसत्कृत्यसुमुचुस्तेहिवं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

धनात् ॥ अथावांस्वगृहेगत्वायथापूर्वंस्थितौसुखम् ॥ ३७ ॥ एवंमयैवानुभूतंभक्तिमाहात्म्यमुत्तमम् ॥ आर्तभक्तिस्समुत्पन्नासद्यः
प्रत्ययकारिणी ॥ ३८ ॥ तस्मिन्क्षणेकिमप्यन्यन्नज्ञातंहिधरातले ॥ एकाग्रचेतसादेवःस्मृतःसंकष्टनाशनः ॥ ३९ ॥ मज्जन्मपत्रिकां
दृष्ट्वामह्यमुक्तंफलंततः ॥ त्रिःसप्तमेब्देमृत्युस्तेभविष्यातिनसंशयः ॥ ४० ॥ तदारभ्यतुसंदेहात्सर्वान्ज्योतिर्विदस्त्वहम् ॥ प्रादर्शं
यंजन्मपत्रंसर्वैरुक्तंतदैवहि ॥ ४१ ॥ तदानिश्चित्यमरणमुदासीनःस्थितोगृहे ॥ सप्तविंशतिमेब्देतुममैकोमिलितोद्विजः ॥ ४२ ॥
सिद्धासीदुत्तमाकाचित्तस्यकर्णपिशाचिनी ॥ तमपृच्छमहंभक्त्याविपदायुर्वदास्तिमे ॥ ४३ ॥ सतुध्यात्वाकियत्कालंमामुवाचाति
निश्चितम् ॥ त्रिंशत्तमेब्देकष्टंतेमृत्युतुल्यंभविष्यति ॥ ४४ ॥ परंतुवैष्णवोमंत्रोयस्तत्कायातितंयदि ॥ स्मरिष्यसितदातर्हिनते
मृत्युर्भविष्यति ॥ ४५ ॥ कोसौमंत्रःसवक्तव्यःइतिपृष्टोमयापुनः ॥ अब्रवीदथतन्मंत्रंसश्रुत्वासचवाहनम् ॥ ४६ ॥ यातोविप्रोथ
यौगेहंस्वमहंचापितत्क्षणात् ॥ भुंजानःपर्य्यटंस्तिष्ठन्स्वपन्व्यवहरन्नपि ॥ ४७ ॥ अस्मार्षंसततंमंत्रंभक्त्यामृत्युभयेनच ॥ अथ
तस्मिन्वत्सरेहंपितुराज्ञांप्रगृह्यच ॥४८॥ काश्यांस्नातुंसमायातोग्रहणेचंद्रसूर्य्ययोः॥ आगत्यन्यवसंस्तत्रपित्रेनोक्तंहितन्मया ॥४९॥
मयाविचारितंकाश्यांमृत्युश्चेत्सर्वतोवरम् ॥ वर्षेदशद्वयेजातेवसतोममतत्रवै ॥ ५० ॥ ज्ञातंपित्रापितत्सर्वंस्नेहात्सस्वैर्मागतैः ॥
आगत्यदृष्ट्वामांहृष्टःपंचसप्ततिवार्षिकः ॥५१ ॥ ततोपितामेकृतवान्काश्यांयात्रांमयासह॥ततएकदिनेहृष्टःपितामाब्रवीद्वचः ॥५२॥
तवारिष्टदिनंचातःपरमस्तिकियद्वद ॥ इतिश्रुत्वामयाप्युक्तमपमृत्युस्तुकार्तिकः ॥ ५३ ॥ मकरांशाद्वितीयांतोवर्षेयंगार्हितोमम ॥
इतिश्रुत्वापुनःप्राहसमांमद्वचनंशृणु ॥ ५४ ॥ जनन्यांतेमृतायांतुविवाहार्थमहंपुनः ॥ प्रार्थितोबंधुभिःसर्वैर्मयानस्वीकृतोहृदि ॥ ५५॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विचारितमयंपुत्रःसर्वंममकरिष्यति ॥ अहंतुनात्रवत्स्यामियाम्यद्यैवनिजालयम् ॥५६॥ इत्युक्त्वासाश्रुनयनःप्रतस्थेतत्क्षणात्पिता॥ अन्येपिमैथिलाःसर्वेशोकार्ताश्चैववव्रजुः॥५७॥ अहंतुवरुणातीरपर्य्यंतमागतोरुदन् ।। ततोमांदक्षिणेतीरेसंस्थाप्यचोत्ततारसः॥५८॥ परपारगतोमांतुदृष्ट्वामोहात्पपातह ॥ ततोहंद्रुतमागत्यजलंनीत्वाददौपुनः ॥ ५९ ॥ ततउत्थायमामाहत्वंमाकाश्यावहिर्व्रज ॥ तावद्दिनेव्यतीतेतुशीघ्रमेहिममांतिकम् ॥ ६० ॥ ममापिचायुषोंतस्तुअग्रिमाब्देभविष्यति ॥ इत्युक्त्वाप्रस्थितोधैर्यंकृत्वाहम पिचागतः ॥ ६१ ॥ संस्मरंतमनुंचित्तेवैष्णवंविप्रभाषितम् ॥ अथतस्यांतुरात्र्यांवैअपश्यंस्वप्नमद्भुतम् ॥ ६२ ॥ मृतोहंदग्धुमायाता ममदेहंजनास्तदा ॥ निवारितास्तेशिशुभिरल्पदंडधरैस्तदा ॥ ६३ ॥ पुनःपश्याम्यहंरक्षःकोणेदंडंमहोद्धतम् ॥ नक्षत्रस्पर्शिनंस्थूलं प्रलयांबुदसन्निभम् ॥ ६४ ॥ कालदंडोयमुदितोवेतितंचाब्रुवञ्जनाः ॥ तदाहमतिचिंतार्तस्तंमंत्रमस्मरद्धृदि ॥६५॥ तस्मिन्क्षणेपुनर्दृ ष्टाश्चत्वारोवैष्णवामया ॥ वहंतस्तुलसीपत्रमालातिलकभूषिणः ॥ ६६ ॥ आगत्यतेब्रुवन्मांतुत्वदर्थंवयमागताः ॥ इमंमहाप्रसादंतेद दौद्वारावतीपतिः ॥ ६७ ॥ त्वंभुंक्ष्वेतिचश्रुत्वाहंभुक्तवांस्तत्करोत्तमात् ॥ नतादृशीसितानापिद्राक्षानैवसितोपला ॥ ६८ ॥ तानपृ च्छमहंतस्यजायतेभोज्यमद्भुतम् ॥ तंब्रुवन्तत्रनैवेद्यंश्रीकृष्णस्येदमेवहि ॥ ६९ ॥ यस्मैददातिसंतुष्टइदंश्रीकृष्णपूजकः ॥ सदीर्घायुः सुखीलोकेजायतेनात्रसंशयः ॥ ७० ॥ त्वमप्यकालकरणंनप्राप्स्यासियतस्त्वया ॥ भुक्तोमहाप्रसादोयमेतदर्थंवयंत्विह ॥ ७१ ॥ प्रेषितास्तेनयामोद्येत्युक्त्वाजग्मुर्यदृच्छया ॥ अहमप्युत्थितःस्वप्नात्प्रातःकालोबभूवह ॥ ७२ ॥ महाप्रसादमाधुर्यंजाग्रच्चाप्यनु भूतवान् ॥ अथैकोवैष्णवःप्रातःसमागत्याब्रवीच्चमाम् ॥ ७३ ॥ भक्तमालांतुभाषायांत्वमेतांसंस्कृतांकुरु ॥ इतिश्रुत्वातुते

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नाहंसहविश्वेश्वरांतिके ॥ ७४ ॥ गत्वास्थापितवान्पत्रद्वयंविधिनिषेधकम् ॥ विधिपत्रंतुबालेनतदादत्तंतुमत्कर ॥ ७५ ॥ तदा
रभ्यातिचिंताभूत्कथंज्ञास्यामितत्कथाम् ॥ अथलब्धानकुत्रापिकथातस्थौमनस्तथा ॥ ७६ ॥ एवंकाश्यांस्थितोकस्माज्जातो
हमतिदुःखितः ॥ सर्वैर्ज्ञातंस्वचित्तेतुनजीविष्यत्ययंत्विति ॥ ७७ ॥ एवंभूतोप्यहंदैवादेवंसंजीवितःपुनः ॥ गतेतस्मिन्वत्सरे
तुजातोहंनीरुजःसुखी ॥ ७८ ॥ तदैवफाल्गुनेमासिगतोहंनिजमंदिरम् ॥ तत्रदृष्ट्वातुमांसर्वैर्मृतंपुनरिवागतम् ॥ ७९ ॥ आनंदाश्रू
णिसुमुचुराश्लिष्यंतिस्ममांमुदा ॥ ततस्तस्मिन्वत्सरेतुपितादिविगतोमम ॥ ८० ॥ कृत्वौर्द्ध्वदैहिकंतस्यप्रवृत्तोहंधनार्जने ॥ संसारया
त्रांसततंकुर्वतोमेगताःसमाः ॥ ८१ ॥ एवमेकदिनेस्नातुमर्द्धोदयदिनेत्वहम् ॥ब्रह्मावर्तेतुगंगायांगतःस्नात्वातुतत्रवै ॥ ८२ ॥ वाल्मी
केराश्रमंद्रष्टुंगतस्तत्रास्थितःक्षणम् ॥ हृष्टोभूत्वासमायातःस्वेस्थानेतत्रवैनिशि ॥८३॥ पूर्वयश्चोक्तवान्साधुर्भक्तमालांचसंस्कृताम् ॥
विधेहीतिसर्वैस्स्वप्नेदृष्ट्वातस्मिन्महाश्रमे॥८४॥ कुरुत्वंभक्तमालांभोकथाचात्रैवतिष्ठति॥ इतिश्रुत्वासमुत्थायप्रातरेवतुवैष्णवान्॥८५॥
आपृच्छ्याहंतदारंभंकृतवानतिभक्तितः॥ भक्तानांकृपयाह्येतत्परिपूर्णमभूद्द्रुतम् ॥८६॥ एवंमयानुभूतंचरहस्यमुदितंत्विह॥ तस्मा
द्भक्तेस्तुमाहात्म्यंसर्वंसत्यंनसंशयः ॥ ८७ ॥ ॥ इति श्रीभगवद्भक्तिमाहात्म्येस्वानुभवकथनंनामाऽष्टचत्वारिंशदधिकशततमः
सर्गः ॥ १४८ ॥ इत्येवंभक्तिमाहात्म्यंकथितंभक्तितोमया ॥ सर्वागमहितंसर्वंयथाशास्त्रंयथामति ॥ १ ॥ अथयेकथिताभक्ता
स्तेषांमध्येतुकेचन ॥ निवसंतिहरेःपार्श्वेकेचिल्लोकनिवासिनः ॥ २ ॥ केचित्सेवापरानित्यंवैकुंठेह्यापिसंतिवै ॥ किंतुप्रियाहरेश्चैते
तेषामुक्तंकरोतिसः ॥ ३ ॥ इतिविज्ञायतेषांतुनामतोगुणतोमया ॥ कृतंहिकीर्तनंतेषांप्रसीदेत्कोपिचेन्मयि ॥ ४ ॥ यथाराजगृ

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हेगंतुमक्षमोराजसेविना ॥ कुर्वन्हिसेवनंमर्त्योलभतेवांछितंध्रुवम् ॥ ५ ॥ तथाहमपिभक्तानांकृतवानस्मिकीर्तनम् ॥ असमर्थोऽन्य
सेवायांवाङ्मात्रेणापिसेवते ॥ ६ ॥ सर्वेभक्तवशाःप्रायोविशेषेणतुदेवताः ॥ तत्रापिदुर्गागणपवृषाकपिचतुष्टयम् ॥ ७ ॥ एतेकु
र्वंतिभक्तानांप्रार्थितंह्यविचारिताः ॥ भक्त्यास्वकीयभक्तानांप्रार्थयंतिहितंध्रुवम् ॥ ८ ॥ अतोस्यश्रवणंपुण्यप्रदंकामार्थसाधकम् ॥
यत्कथाभक्तिजननीततोमोक्षप्रदायकम् ॥ ९ ॥ किमत्रबहुनोक्तेनएकएवहिमारुतिः ॥ ददात्यत्रस्मृतोभक्त्यापुरुषार्थचतुष्टयम् ॥ १० ॥
अतोग्रंथस्यमाहात्म्यंयत्किंचित्कथितंमया ॥ संतःश्रुत्वाभिनंदंतुग्रंथेकुर्वंत्वनुग्रहम् ॥ ११ ॥ पुराणश्रवणंदेशकालाचारव्यवस्थि
तम् ॥ अभीष्टफलदंनृणामन्यथानतथार्थदम् ॥ १२ ॥ एतस्यश्रवणेवश्यंनियमोनाप्यपेक्षितः ॥ श्रुतमात्रस्तुफलदोनृणांशाबरमंत्र
वत् ॥ १३ ॥ किंचप्रौढेकलौधर्मोनस्थास्यतिकथंचन ॥ तदापुराणश्रवणंकुत्रवानियमःक्ववा ॥ १४ ॥ यथाह्यवेदमार्गस्तुतिरोभू
तःकलेर्बलात् ॥ पुराणमपिसर्वत्रसर्वनैवास्तिताहृशम् ॥ १५ ॥ अग्रेत्वेतदपिप्रायोनस्थास्यतिमुनेर्वचः ॥ तदेतदपिलोकानांहिता
यप्रभविष्यति ॥ १६ ॥ तस्मादेतत्तुमाहात्म्यंश्रोतव्यंसाधुभिर्जनैः ॥ तेषांहिभक्तिःसर्वस्वंसैवचात्रास्तिवर्णिता ॥ १७ ॥ अन्यो
पिशृणुयाद्यस्तुसोपिभक्तिमवाप्नुयात् ॥ यतोहिभक्तसंसर्गःश्रवणादत्रजायते ॥ १८ ॥ अभिसंधाययःकामाञ्छृणोतिकीर्तनंसता
म् ॥ तस्मैकामान्ददात्येषभगवान्भक्तवत्सलः ॥ १९ ॥ यथामातापिताप्रेमकुर्वातेपुत्रकेस्वके ॥ दतश्चाभिमतंचापितथाप्रीतोभ
वेद्धरिः ॥ २० ॥ एकादश्यामुपवसन्कुर्वञ्जागरणंनिशि ॥ श्रुत्वैतद्भक्तिमाहात्म्यंसर्वान्कामानवाप्नुयात् ॥ २१ ॥ अपुत्रोलभतेपु
त्रंनिर्द्धनोधनमाप्नुयात् ॥ मूर्खोभवतिमेधावीश्रुत्वेमांसत्कथांशुभाम् ॥ २२ ॥ हनुमच्चरितंश्रुत्वालभतेसर्ववांछितम् ॥ विभीषण

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्यचरितंश्रुत्वापूज्योभवेन्नरः ॥ २३ ॥ शबरीचरितंश्रुत्वाहढभक्तिर्भवेन्नरः ॥ अजामिलस्यचरितंश्रुत्वापूज्योभवेन्नरः ॥ २४ ॥ जटायुचरितंश्रुत्वाजायतेरामभक्तिमान् ॥ अंबरीषस्यचरितंश्रुत्वाऽऽपद्भयोविमुच्यते ॥ २५ ॥ विदुरस्त्रीकृतांभक्तिंश्रुत्वाप्रेमहरौभवेत् ॥ सुदामचरितंश्रुत्वादरिद्रोधनवान्भवेत् ॥ २६ ॥ चंद्रहासस्यचाशिवेरंतिदेवस्यकीर्तनात् ॥ नशत्रुभयमाप्नोतिलभतेवांछितंफलम् ॥ २७ ॥ पांचालीभक्तिमाहात्म्यंसर्वसंकटनाशनम् ॥ वाल्मीकिमुनिमाहात्म्यंमहापातकनाशनम् ॥ २८ ॥ रुक्मांगदस्यचरितंमयूरध्वजभूपतेः ॥ कीर्तनंसर्वपापघ्नंहरिभक्तिप्रदायकम् ॥ २९ ॥ प्रल्हादचरितंश्रुत्वामुच्यतेसर्वसंकटात् ॥ हरिभक्तिचसुदृढांलभेज्जन्मनिजन्मनि ॥३०॥ एवमन्येतुयेचाग्रेभक्तास्तेषांतुकीर्तनात् ॥ हरिभक्तिमवाप्नोतिततःप्राप्नोतिवांछितम् ॥ ३१॥ इतिश्रीभगवद्भक्तिमाहात्म्यंकथितंमया ॥ प्रीत्यैभूयाद्भगवतःश्रीकृष्णस्यदयानिधेः ॥ ३२ ॥ भूत्वाप्रसन्नोभगवान्निजभक्तानुकीर्तनात् ॥ ददात्यभिमतंनृणांश्रोतृणांसर्वसिद्धिदः ॥ ३३ ॥ प्रसीदतुहरिःश्रीमान्भगवान्भक्तवत्सलः ॥ तद्भक्त्यामेप्रसीदंतुतस्मैतेभ्योनमोनमः ॥ ३४ ॥ षट्साहस्रमिहश्लोकाउक्ताःसतशताधिकाः ॥ ऊनपंचाशदधिकंसर्गानांचशतंशुभम् ॥ ३५ ॥ इतिश्रीभगवद्भक्तिमाहात्म्येश्रीमच्चंद्रदत्तकृतसंस्कृतभाषान्तरेभक्तिमालानामग्रन्थःसंपूर्णः ॥१४९॥ छ ॥ शुभम् ॥ ॥ राम ॥ राम ॥ राम ॥

इदं भक्तमालापुस्तकं खेमराज श्रीकृष्णदास इत्यनेन मुम्बय्यां स्वकीये " श्रीवेङ्कटेश्वर " मुद्रणालये मुद्रयित्वा प्रकाशितम् ॥ शके १८१७ संवद् १९५२ सन् १८९५

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीमद्वाल्मीकीय रामायण भाषाटीका।

श्रीपं० ज्वालाप्रसादमिश्रकृत भाषानुवाद।

भक्तगणो! अति उत्तम टीका सरल पदोंमें हरेक देशोंके समझने योग्य कराई गई है और रुचिर स्थलोंमें मधुर दृष्टान्तों और उदाहरणोंसे अर्थ पुष्ट किया है किन्तु गूढ़ाशयोंका अर्थ तो विशेषही दरशाया है, विशेष प्रलापसे क्या? शीघ्रता करो पीछे मूल्य बढ़ाया जावेगा. यह पुस्तक कथा बांचनेमें परमोपयोगीहै. मूल्य केवल २१ ही रु० भेजनेपर यह पुस्तक घरबैठे पहुंच जावेगी॥

श्रीमद्गोस्वामितुलसीदासकृत रामायण सटीक-पं०ज्वालाप्रसादजीकृतसंजीवनी टीका।

लीजिये रामायण सटीक (बारीक अक्षर) भी लीजिये असल पुस्तक श्रीगुसाईं जीकी लिपिके अनुसार व संपूर्ण क्षेपकों सहित जिसमें शंका समाधान आद्यपर्य्यंत विस्तारपूर्वक लिखेहैं. तुलसीदासका जीवनचरित्र, माहात्म्य, राम चतुर्दश वर्ष वनवासका तिथिपत्र और अष्टम रामाश्वमेध,लवकुशकाण्ड तथा कोष और सुंदर फोटोग्राफके चित्रभी संयुक्त हैं. इसके टीकाकी रचना बहुत उत्तम और अपूर्व मनभावन सुख उपजावन रामयश पावनहै. देशाटन करनेवाले तथा सर्व सामान्यकी सुगमताके लिये सुंदर नवीन छोटे अक्षरोंमें छपकर तयारहै की० ग्लेज ५ रु० रफ ४ रु०.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जाहि- रात.

जाहिरात।

नाम.	की.रु. आ.	ट.म.रु. आ.
कार्त्तिकमाहात्म्य बडा पद्मपुराणका	०-१०	०-२
कार्त्तिकमाहात्म्य भाषाटीका सह	०-१२	०-२
चातुर्मास्यमाहात्म्य	०-८	०-१
मार्गशीर्षमाहात्म्य	०-६	०-१
पौषमाहात्म्य	०-६	०-१
माघमाहात्म्य	०-८	०-१॥
फाल्गुनमाहात्म्य	०-८	०-१
वैशाखमाहात्म्य	०-१०	०-१॥
श्रावणमाहात्म्य	०-८	०-१॥
भाद्रपदमाहात्म्य	०-६	०-१

नाम.	की.रु. आ.	ट.म.रु.आ.
पुरुषोत्तममाहात्म्य	०-१२	०-२
बदरीनारायणमाहात्म्य	०-७	०-१
कोकिलमाहात्म्य अधिकआषाढका संस्कृत	०-१२	०-१
आयोध्यामाहात्म्य	०-१०	०-१
द्वारकामाहात्म्य	०-६	०-१
बदरीनारायण यात्राप्रकाश (भाषा)	०-४	०-॥
मायापुरीमाहात्म्य. (गंगामाहात्म्य)	०-१२	०-२
प्रयागमाहात्म्य (मूल)	०-८	०-१
गयामाहात्म्य	०-६	०-१

पुस्तक मिलनेका ठिकाना- खेमराज श्रीकृष्णदास, "श्रीवेंकटेश्वर" छापाखाना-मुंबई.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीमद्वाल्मीकीय रामायण भाषाटीका।

श्रीपं० ज्वालाप्रसादमिश्रकृत भाषानुवाद।

भक्तगणो! अति उत्तम टीका सरल पदोंमें हरेक देशोंके समझने योग्य कराई गई है और रुचिर स्थलोंमें मधुर दृष्टान्तों और उदाहरणोंसे अर्थ पुष्ट किया है किन्तु गूढ़ाशयोंका अर्थ तो विशेषही दरशाया है, विशेष प्रलापसे क्या? शीघ्रता करो पीछे मूल्य बढ़ाया जावेगा. यह पुस्तक कथा बांचनेमें परमोपयोगीहै. मूल्य केवल २१ ही रु०भेजनेपर यह पुस्तक घरबैठे पहुँच जावेगी॥

श्रीमद्गोस्वामितुलसीदासकृत रामायण सटीक-पं०ज्वालाप्रसादजीकृतसंजीवनी टीका।

लीजिये रामायण सटीक (बारीक अक्षर) भी लीजिये असल पुस्तक श्रीगुसाईं जीकी लिपिके अनुसार व संपूर्ण क्षेपकों सहित जिसमें शंका समाधान आद्यपर्य्यंत विस्तारपूर्वक लिखेहैं. तुलसीदासका जीवनचरित्र, माहात्म्य, राम चतुर्दश वर्ष वनवासका तिथिपत्र और अष्टम रामाश्वमेध.लवकुशकाण्ड तथा कोष और सुंदर फोटोग्राफके चित्रभी संयुक्त हैं. इसके टीकाकी रचना बहुत उत्तम और अपूर्व मनभावन सुख उपजावन रामयश पावनहै. देशाटन करनेवाले तथा सर्व सामान्यकी सुगमताके लिये सुंदर नवीन छोटे अक्षरोंमें छपकर तयारहै की० ग्लेज ५ रु० रफ ४ रु०.

पुस्तक मिलनेका ठिकाना-खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" छापाखाना-मुम्बई.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ इति भक्तमाला समाप्ता ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

॥ अथ सत्यनारायणपूजाकथाप्रारंभः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीसत्यनारायणव्रतसामग्री.

१ कदलीस्तंभाः
२ आम्रपल्लवतोरणम्.
३ पंचपल्लवाः
४ सुवर्णमूर्तिः
५ कलशः
६ यज्ञोपवीतम्.
७ पंचरत्नानि.
८ वस्त्रोपवस्त्रे.
९ तंदुलाः
१० कुंकुमम्
११ अबीरः
१२ गुलालः
१३ धूपः
१४ पुष्पाणि.
१५ तुलसीदलानि.



१६ नारिकेलफलम्.
१७ तांबूलदलानि.
१८ पूगीफलानि.
१९ नानाफलानि.
२० माला.
२१ पंचामृतपदार्थाः
दूध, दधि, घृत, मधु, शर्करा.
२२ पुण्याहवाचनकलशः
२३ भगवदर्थे पीठम्.
२४ पीठम्.
२५ रंगवल्लयर्थं रंगाः
२६ दक्षिणार्थं द्रव्यम्,
२७ नैवेद्यार्थं प्रसादपदार्थाः
१। घृतं १। शर्करा १। दुग्धं
१। गोधूमचूर्णं १। कदलीफ०

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection